BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, Ph. D.

No. 95.

450

A TREATISE ON THE PHILOSOPHY OF SASKRIT GRAMMAR BY BHARTRIHARI,

With a Commentary by Helârâja.

EDITED BY

Pandit Râmachandra Ŝâstrî Kotibhâskara,
Vyâkaranâchârya,
Pandit Central Hindû College, Benares.

Volume II Fasciculus I

2

BENARES

Published by the Proprietors Messrs Bunsi Das & Co.,

AND SOLD BY H. D. GUPTA

Secretary Chaukhamba Sanskrit Book Depot.

Printed at the Vidyâvilâs Press,
Benares

1905.

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाश	२	८	०
गंगालहरी	०	१	६
गुप्तसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रह	०	१	६
दत्तकमीमांसा	०	८	०
धर्मशास्त्रसंग्रहः	०	१	६
धातुपाठ (शिला -)	०	२	०
धातुरूपावली	०	२	६
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठ	०	१	०
			०

प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	८	
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्त	०	१	६
वार्तिकपाठ	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्गचचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्गचतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	४	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०

॥ श्रीः ॥

श्रीयशोदानन्दनाय नमः ।

अथ सटीके वाक्यपदीये तृतीयकाण्डारम्भः ।

श्रीगणेशाय नमः । यस्मिन्संमुखतां प्रयाति रुचिरं कोऽप्यन्तरुज्जृम्भते नेदीयान्महिमा मनस्यभिनवः पुंसः प्रकाशात्मनः ॥ तृप्तिं यत्र परमान्तनोति विषयास्वादं विना शाश्वतीं धामानन्दसुधामयीमजितवपुस्तत्प्रातिभं संस्तुमः १ काण्डद्वये यथावृत्ति सिद्धान्तार्थसतत्त्वतः । प्रबन्धो विहितो ऽस्माभिरागमार्थानुसारिभिः । तच्छेषभूते काण्डे ऽस्मिन्सप्रपञ्चं स्वरूपतः । श्लोकार्थद्योतनपरः प्रकाशो ऽयं विधीयते ॥ इह पदार्थाष्टकविचारपरत्वाद्वाक्यपदीयस्य प्रथमकाण्डेन प्रयोजनादिपदार्थं निर्णीते ऽनन्तरकाण्डोपपादितोपपत्तिभिः वाक्यतदर्थयोरन्वाख्येयस्थितलक्षणयोः पदार्थयोर्निर्णीतत्वात्तदपोद्धारकापोद्धाररूपः पदविचारः प्रक्रम्यते । तत्र नियतविकल्पो यथाभिप्रायमपोद्धार इति यथासम्भवं पदभेदानुद्दिशति ॥

द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधाऽपि वा ।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् ॥ १ ॥

वाक्यस्यैव निरंशस्य वाचकत्वादन्तरा पदप्रतिपत्तिर्विभ्रम इति किमसत्यपदव्युत्पादनेनेत्याशङ्क्यापोद्धृत्यैव वाक्येभ्य इत्याह । अपोद्धृत्य कल्पनाबुद्ध्या पृथक्पदं निष्कृष्याखण्डवाक्यव्युत्पत्तावुपायः पदव्युत्पत्तिर्वाक्यवादिनां, अखण्डपदव्युत्पत्ताविव परिकल्पितरूपप्रकृतिप्रत्ययागमादेशादिव्युत्पत्तिः पदवादिनाम् । आनन्त्याद्धि वाक्यानां स्वालक्ष्येणाशक्या व्युत्पत्तिं कर्तुमिति सदृशपदद्वारा तदुपपत्तिरित्यर्थः । उभयोरपि चापोद्धृतस्यासत्यत्वं समानम । तथा हि । अनियतानुपूर्वीको यथार्थे कल्पितान्वयव्यतिरेकनिबन्धनो वाक्यवादिनां पदापोद्धारः । एव पदवादिनां शास्त्रे ऽप्यन्वयव्यतिरेकनिमि-

स्यार्थोपोद्धारवश प्रकृतिप्रत्ययापोद्धार । यदाह वाक्यकारः । सिद्धं त्वन्वयव्यतिरेकाभ्यामिति । तत्र भिन्नत्व सामान्यम् । द्वित्वेत्यादिको विशय इति विधार्थे,धाप्रत्ययोपपत्ति प्रकारो हि विधार्थः स च सामान्यस्य भेदको विशेषप्रकार । सादृश्यमेव सर्वत्र प्रकार· कैश्चिदिष्यत इत्येकीयमतम् । कैश्चिदितिवचनात् । भेदे ऽपि तु प्रकाराख्या कैश्चिदभ्युपगम्यत इति चोक्तं । यदि वा ऽत्र बुद्धिरूपप्रकल्पित सादृश्यमेव विधार्थः । ज्ञानप्रतिबिम्बितस्य हि बाह्यानुकारित्वेव सादृश्यं सर्वत्र प्रकारार्थः । सद्भूतिपतसदृशस्यावाह्यस्यानिर्वर्तनात् वाक्याच्चापोद्धियमाणस्य पदस्य वाक्यार्थान्तरापरिकल्पनया ऽर्थवत एवापोद्धारो युक्तः । अर्थापोद्धार एव हि पदापोद्धारस्य निमित्त । अनिमित्ते हि तस्मिन्वर्णापोद्धारस्यापि प्रसङ्गात्तेषामपि व्युत्पाद्यता स्यात् । वाक्यार्थश्च स्थितलक्षणो निरशः कारकोत्कलितशरीरक्रियास्वभावतः । तत्र चांशांशिकल्पनयऽपोद्धारे कारकात्मा क्रियात्मा च प्रविभागार्ह इति सिद्धसाध्यलक्षणाशब्दयविषय पदापोद्धारो द्विविधो नामाख्यातरूपः । प्राथमकल्पिक शक्तिशक्तिमतोरभेदात् कारकात्मा सिद्धरूपो ऽश· । यद्यपि नामपदानां प्रत्ययार्थस्य संख्यादेः शाब्द प्राधान्यं तथाप्यर्थतः प्रातिपदिकार्थस्य जात्याद्यङ्कुरितस्य द्रव्यस्यैव प्राधान्य सिद्धरूपस्य । मख्याकारकशक्तीनान्तदाश्रयत्वादनयोरेव च नामाख्यातयोर्विशेषत्वान्निपातोपसर्गकर्मप्रवचनीयलक्षणः पदभेदो ऽतर्भवति । तथा हि । सिद्धार्थाभिधायि नामपदमिति तदर्थगत विशेष द्योतयन्निपातः तत्रैवान्तर्भवति । सिद्ध ह्यर्थ साक्षाद्वाभिदधातु तदूगत विशेष वा प्रकाशयतु नेयता भेद· स्वरादयस्तु कैचित्सत्वप्रधाना एवेति ते ऽपि नामपदमव । ये तु हिरुगादयः क्रियाप्रधानाः, तेषामाख्याते ऽतर्भाव । न हि तिङन्तमेवाख्यातं क्रियाप्रधानस्य सर्वस्यैव तल्लक्षणत्वात् । अत एवोपसर्गकर्मप्रवचनीयपदान्यप्याख्यातपदमव साध्यार्थविशेषद्योतनात् । एवं निपाता ऽपि । तदूगतभेदान्तरविवक्षायां तु निपातोपसर्गयोरपि कैश्चित्पृथक्करणम् । तथा हि अस्त्येवापोद्धारे ऽर्थमात्राविशेषो ऽनया· । नह्येतौ साक्षादर्थवन्त· अपि तु तदूगतविशेषद्योतकाविति वाचकाभ्यां नामाख्याताभ्यां प्रविभक्तौ । सिद्धसाध्यार्थविषयावशेषद्योतकत्वान्निपातानां साध्यैकनियतत्वाच्चोपसर्गाणां पर-

स्परतो भेदः । कर्मप्रवचनीयास्तु क्रियाविशेषोपजनितसम्बन्धाव-च्छेदहेतव इति सम्बन्धविशेषद्योतनद्वारेण क्रियाविशेषप्रकाशना उ-पसर्गेष्वेवान्तर्भवन्तीति चतुर्धैव केश्चित्पदं सिद्धम् । साक्षात्क्रिया-विशेषप्रकाशनाभावात्तदपि पञ्चमं पदमिति केश्चित् । तथा हि । क-र्म प्रोक्तवन्तः कर्मप्रवचनीया इति, अतिक्रान्तक्रियाख्यानलक्षणस्य व्यापारस्यात्र सम्भवो न तु वर्तमानस्येत्युपसर्गेभ्यो भेदः । क्रियागत-विशेषद्योतनपूर्वक हि सम्बन्धावच्छेदनमत्र वर्तमानं । तथा हि सर्वः सम्बन्धः क्रियाकृतः। उपकारक्रियोचितत्वात्तस्य क्रियामन्तरेण उप-काराभावात्। तत्र क्वचित्क्रियाशब्दः श्रूयते क्वचिन्न । यत्र श्रूयते तत्र श्रौत एव सम्बन्धविशेषावसायः। तद्यथा मातुः स्मरति मातुः स्मृतं सर्पिषो जानीत इत्यादौ । क्रिया हि स्वभावादेव क्रियान्तरव्यवधा-नमन्तरेण द्रव्यैः संयुज्यते । यस्मान्मातापितृविषये प्रवर्त्तने ऽवनिधृते वा तस्मान्मातापितृसम्बन्धीदं स्मरणमिति क्रियाकारकभावपूर्वक एवायमपि सम्बन्ध इति वर्णयन्ति। अश्रुते तु क्रियापदे द्वयी गतिः । क्वचित्सम्बन्धस्वरूपमहिम्नैव क्रियाक्षेपसिद्धं प्रतिनियतक्रियाकार-कभावपूर्वकत्वं शेषसम्बन्धस्य विनैव कर्मप्रवचनीयमवगम्यते । त-द्यथा उपगोरपत्यं वृक्षस्य शाखेत्यादावपत्यापत्यवत्सम्बन्धो जनि-क्रियानिमित्तो ऽवयवावयविसम्बन्धश्च स्थितिक्रियानिमित्त इत्यादि । क्वचित्तु सम्बन्धानां प्रतिनियतक्रियापूर्वकत्वावधारणे नास्ति साम र्थ्यं। तद्यथा राज्ञः पुरुष इत्यत्र स्वस्वामिभावो भरणाद्यनेकक्रियानि-मित्त इत्येवावगम्यते । क्रियाविशेषो नावधार्यते तन्निमित्तभूतः । तथा च भाष्यं, यदेतत्स्वं नाम तच्चतुर्भि प्रकारैर्भवति भरणादपहरणात्क्र-यणाद्याज्ञयेति। दानादीनां त्वन्यतमाविनाभावात्क्रिया ऽनुमीयत एव। क्वचित्त्वविनाभाविनी क्रियापि न प्रतीयते तथा चैव जातीयके वि-षये कर्मप्रवचनीयो नियतविशिष्टक्रियाकृतत्वसम्बन्धस्य विशेषमव-गमयति । तदुक्तं जनयित्वा क्रिया का चित्सम्बन्ध विनिवर्त्तते। श्रूयमाणे क्रियाशब्दे सम्बन्धो जायते क्वचित् । स चोपजात. सम्ब-न्धो विनिवृत्ते क्रियापदे । कर्मप्रवचनीयेन तत्र तत्र नियम्यते इति । नियमस्तस्य नियतक्रियाजनितत्व । तथा हि शाकल्यस्य संहितामनु प्रावर्षत् इति यो ऽयं संहिताप्रवर्षणयोर्हेतुहेतुमद्भावलक्षण. सम्बन्ध. स निपठक्रियातनित इत्यनुना वेद्यते । अनुनिशम्येत्यत्रानेर्निशामय-

निक्रियासाहचर्योपलब्धेरिह सम्पाठरूपत्वात्संहितायास्तदनुमानस्यौचित्यात्तत्र क्रियावचनत्वमस्यान्यत्र दृष्टशक्तेर्न कल्प्य । द्योत्यैर्थैर्निष्ठं च द्योतकत्वमिति तदपि क्रियापदाप्रयोगादत्र नास्ति । न च क्रियापदाक्षेपकत्वं, यथा प्रादेश विपरिलिखतीत्यत्र वैलेखनासमन्वयानुपपत्तेर्निर्मीतिक्रियाक्षेपकत्वं । कारकविभक्तिर्ह्यत्र प्रादेशमिति द्वितीयेति युक्तस्तन्मुचितक्रियाक्षेप' । इह तु संहितामिति शैषिकीय विभक्तिरिति कथ क्रियाक्षेप: । क्रियाकारकयोरेव परस्परमाक्षेप्याक्षेपकभावस्याविनाभावेन याप्यत्वात् तद्यथा प्रविश पिण्डीमित्यादौ । नापि सम्बन्धवाचित्वमत्रानो. । विभक्त्यैव तदभिधानादिति सम्बन्धावच्छेदस्य प्रत्यायको नान्यः सम्भवतीति पारिशेष्यादनोरत्र सामर्थ्यमध्यवसीयते । तदुक्तम् । क्रियाया द्योतको नायं सम्बन्धस्य न वाचक । नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदक इति ॥ भेदको विशेषको द्योतक इत्यर्थः । अयमत्र भावः । यदनन्यथासिद्ध तत्रानोर्व्यापारकल्पना युक्ता । यत्पुनरन्यथा ऽर्थसामर्थ्यादिना सिध्यति न तत्र तस्य शक्तिः कल्पयितुं पार्यत इति पदान्तराणामर्थान्तरानिवेशात्सम्बन्धविशेषस्य ततो ऽनवगतस्य कर्मप्रवचनीयविषयता सिद्धा । ननु च यदत्राधिक्यं वाक्यार्थे स इति क्रियाविशेषजनितत्वलक्षण सम्बन्धस्यावच्छेदो वाक्यार्थे. किमिति न कथ्यते अनोस्तु पश्चाद्भावमात्रवृत्तित्वमेवेति । अत्रोच्यते । इहाधिक्यं वाक्यार्थत्वेनोच्यमानं पदार्थपृष्ठगतित्वेनैवानुसरणीय न तु पदार्थोल्लङ्घनेन । तत्तद्वाक्योपात्तस्य हि साध्यस्य वा विशेष्यस्य वोपात्तैरेव साधनैर्विशेषणैश्च ससर्गस्तत्राधिक्यम् । तद्यथा । शुक्लामानय नीलोत्पलमिति च । अत एवोच्यते आश्रयाश्रयिणोर्वाक्यान्नियमस्त्ववतिष्ठते इति । इय चानुपात्तस्यैव पदार्थस्य वाक्यार्थात्प्रतीतिर्नास्तीति न सम्बन्धावच्छेदो ऽत्रापदार्थो वाक्यार्थ' शक्यते कल्पयितुमिति कर्मप्रवचनीयविषय एवायम् । यद्वक्ष्यति । निमित्तानयम' शब्दात्सम्बन्धस्य न गृह्यते । कर्मप्रवचनीयैस्तु स्वविशेषे विरुध्यते इति । अत्र च दर्शनद्वय । स्वरूपेणैव सम्बन्धान्तरविलक्षणः कर्मप्रवचनीयेन सम्बन्धो ऽवच्छिद्यते क्रियाविशेषजनितत्वेन वेति । तत्र स्वरूपेणावच्छेदे विशिष्टक्रियाजनितत्वप्रतीतिः सम्बन्धविशेषपर्यालोचनालभ्या । तथा हि । अधिब्रह्मदत्ते पञ्चाला इति स्वस्वामिभावो ऽय सम्बन्ध इत्यधिना वेद्यते । ब्रह्मदत्तश्च स्वामी-

श्वरः पञ्चालाश्च जनपद' स्वमिति तयोः सम्बन्धिनोः परिपालनक-रादानादिक्रियाप्रभाविन एव सम्बन्धो न्याय्य इत्यवगम्यते । एव-मभिमन्युरर्जुनत प्रतीति प्रतिना साहश्यलक्षणो ऽय सम्बन्ध इति द्योत्यते । स पुनः सम्बन्धिस्वरूपपर्यालोचनादत्रसंप्रहरणादिक्रिया-कृत इत्यवगम्यते । इत्थं च शाकल्यसंहितामनु प्रावर्षादित्यत्रापि हेतु-फलभावो नामायं सम्बन्ध इत्येतावत्येवायमनुर्विश्राम्यति । पाठविशे-षरूपत्वात्सहितायानिशमनक्रियावगति.। शब्दश्रवणेन हि देवो ऽवर्षे-दिति सम्बन्धिमहिम्ना विशिष्टक्रियाप्रभावितत्वमवसीयते । केचिदि-याननोरेव व्यापार इत्याहु.। स्वरूपावच्छेदेपि च क्रियाया' कार्यभूत-सम्बन्धापेक्षयातीतत्वात् । कर्म प्रोक्तवन्त इत्यर्थस्तमन्वेत्येव। वस्तुनः क्रियाफलस्यैव सम्बन्धस्य प्रकाशनात्। यथा तु तत्रभवत्भर्तृहरेस्तत्र तत्राभिप्रायो लक्ष्यते तथा निमित्तविशेषावच्छेद एव कर्मप्रवचनीय-कृत इति राद्धान्त । अधिब्रह्मदत्ते पञ्चाला इति परिपालनक्रियाहे-तुत्वं स्वस्वामिभावस्याधिना व्यज्यते । अभिमन्युरर्जुनतः प्रतीत्यत्र पराजयादिकृतो ऽनुकार्यानुकरणभाव. प्रतिना प्रकाश्यत इत्यादि सर्वत्र योज्यम् । सुस्तुतमनिस्तुतमित्यादौ तु सु. पूजायामनिरतिक्र-मणे चेत्यादिना कर्मप्रवचनीयसञ्ज्ञाधिकारिकी स्वार्थनिरपेक्षैवोपस-र्गसंज्ञाबाधनाय प्रवर्तते । यथोक्तम् । कर्मप्रवचनीयत्वं क्रियायोगे विधीयते । षत्वादिविनिवृत्त्यर्थं स्वत्यादीनां हि धर्मिणामिति । आर्थेन तु रूपेण विभागे प्रस्तुते क्रियाविशेषाद्योतकत्वादुपसर्गपदे स्वत्या-दिरन्तर्भवतीति नाव्याप्तिः । तदेवं वाक्यादपोद्रियमाणस्य पदस्या-पोद्धारार्थविशेषाश्रयण यथासम्भवं भेदो निरंशकवाक्यव्युत्पत्त्युपा-यभूतः प्रदर्शित. । अत एव स्वादिपदं वाक्यव्युत्पत्त्यनङ्गत्वाच्छास्त्रे सङ्केतितं सुबन्तपदव्युत्पत्त्युपायभूतं नेह गणनार्हम् । प्रकृतिप्रत्ययव-दिति दृष्टान्तपक्षनिक्षिप्तमिति नाव्याप्तिः । पदात्किलासावपोद्धारो न वाक्यात् ॥ १ ॥

तदित्थं पदापोद्धारे प्रदर्शिते तदर्थस्यापोद्धृतस्य सिद्ध-साध्यरूपद्वययोगिनो मतभेदेन स्वरूपेण दर्शनार्थमाह ॥

पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव वा ।
पदार्थौ सर्वशब्दानां निसावेवोपवर्णितौ ॥ २ ॥

अर्थद्वारेण पद परीक्ष्यत इति दर्शनभेदेन प्रथममपोद्धारपदार्थविचार. । तथा हि । सर्वेषामपि शब्दानां पदरूपाणां नामाख्यातादिस्वभावानां जातिवादिमते जातिरेवार्थो न द्रव्यम् । द्रव्यवादिमते तु द्रव्यमेव न जाति । द्वितीयेन वाशब्देन पदार्थान्तर सूचितं जातिविशिष्टद्रव्याभिधानमिति । अत एव तदेव सङ्कलनारूपं पदार्थोचिति स्फुटीकृतम । अन्यथा चार्थे प्रक्रान्ते वार्थोपमहारो ऽय नोपपद्यते । तद्वदभिधाने त्वभिधानं तावत् द्वयोरपि समानम् । विरम्य व्यापाराभावाच्छब्दस्य । वार्थस्तु जातिद्रव्ययोर्गुणप्रधानभावः । यद्वा प्राधान्येनैव भिन्नविषयतया पाणिनिदर्शने जातिद्रव्ये शब्देनाभिधीयेते इत्ययमत्र पक्ष पदार्थोवित्युक्त । तत्र नामपदस्य गौरित्यादेर्गोत्वादिजातिनियतक्रियाविषयसाधनैकार्थसमवेतसङ्ख्याजातिविशेषणभावमात्राभिधेयाया अनाश्रयाया जातेरनुपपत्ते. सामर्थ्यात्प्रतीतं द्रव्यं। एवमाख्यातपदस्यापि विभिन्नक्रियाक्षणसमवेता भिन्नाभिधानप्रत्ययहेतुक्रियाजातिविषया साक्षाद्वाचकशक्तिः । कारकादिजातिस्त्वत्र गुणभूता नामपदगतया च कारकजात्या क्रियाजातिराख्यातपदगता व्यक्तिद्वारेण समन्वयमेति । द्रव्यजातिस्त्वेकार्थसमवायात्साधनशक्तिद्वारेण क्रियायोगमनुभवति । सङ्ख्याजातिरप्येकार्थसमवायात्स्वव्यक्तात्मना शक्तिमुखेनैव क्रियान्वयमेतीति सर्वपदार्थसमन्वयोपपत्तौ कल्पते वाक्यार्थे । यथा वोत्क्षेपणादिक्षणैरसमवायिभिरप्यावृत्त्योत्क्षेपणत्वादिजातिरभिव्यज्यते तथा ऽधिश्रयणादिभि क्रियाक्षणै. पचत्यादिक्रियाजातिरिति विचारयिष्यते ॥ व्यक्तिद्वारकं चास्या नित्याया अपि साध्यत्वमुपपद्यते । उपसर्गादिरप्यत्र दर्शने नामाख्यातसहभावी तदर्थस्य विशेषावद्योतकत्वाज्जातिपदार्थ एव । विशेषस्य विशिष्टविश्रान्तस्यैवावसायात्कर्मप्रवचनीयो ऽपि सम्बन्धजातिनिष्ठ एव। गुणशब्दानामपि शुक्लादीनां गुणजातिवाच्या संज्ञाशब्दानामपि डित्थादिशब्दानां जातिवाचित्व समर्थयिष्यते । तदित्थ वाजप्यायनाचार्यमतेन सार्वत्रिकी जातिपदार्थव्यवस्थोपपद्यते ॥ व्याडिमते तु सर्वशब्दानां द्रव्यमर्थ. तस्यैव साक्षात्क्रियासमन्वयोपपत्तेर्वाक्यार्थाङ्गतया चोदनाविषयत्वात् । यथाह । चोदनासु च तस्यारम्भादिति । एकजातिसमन्वयवशेन चात्र सङ्ख्योपपत्ति. । अनभिधीयमानाऽपि जातिरुपलक्षणीक्रियते शब्दार्थे, यथा गृहादौ का-

कादि। आख्यातेऽपि च सा। भवनाधारद्रव्यप्राधान्य व्याडिमते। देवदत्त. पचतीति द्रव्येणैव साक्षात्सामानाधिकरण्योपपत्ते.। क्रिया तु गुणभूतात्र, व्यापाराविष्टं हि द्रव्यमाख्यातार्थ, इदं तदिति सर्वनामप्रत्यवमर्शयोग्य चात्र द्रव्यमिति सार्वत्रिकीयं व्यवस्था। तथा च वक्ष्यति। द्रव्यधर्मा पदार्थे तु द्रव्ये सर्वोऽर्थ उच्यते इति। अत एव शुक्लादीनामपि द्रव्यपदार्थता सिद्धा। तत्तदुपाधिव्यवच्छिन्नं वा ब्रह्म द्रव्यशब्दवाच्यं सर्वशब्दानां विषय इति वक्ष्यत एव। व्यक्तिपर्याया वा द्रव्यशब्द इति जातिव्यक्तिविकल्पेन सर्वशब्दविषय., तथा च सर्वशब्दानामित्यभिधानात्। पदादप्यपोद्धारे प्रकृतिप्रत्ययरूपस्यापि शब्दस्य यथायोगं क्रियाकारकसंख्यादिरपोद्धारपदार्थो जातिव्यक्तिभेदेन समाम्नातः। उभयस्यापि वा शब्दात्प्रतीतेरुभयं पदार्थः। गुणप्रधानभावभेदाऽऽश्रयस्तु मतविकल्पः। नित्यत्वोपवर्णनं च सिद्धे शब्दार्थसम्बन्धे इत्यत्र भाष्ये यस्मिंस्तत्व च न विहन्यते इति द्रव्यस्यापि नित्यत्वम्। प्रवाहनित्यतया शब्दात्सदैव प्रतीते. ॥ २.॥

तदेव दर्शनभेदेन जातिर्द्रव्यं वा पदार्थ इत्युक्ते जातिपदार्थविषयशास्त्रोपयोगी विचारोऽत्र समुद्दिश्य। पदस्य हि परीक्षार्थमिदं काण्ड, अर्थद्वारेण च पदपरीक्षा, वाक्यार्थोपयिकत्वेन च तद्विचार इति। जातिपदार्थनये वाक्यार्थभूताख्यातपदवाच्यमिति क्रियया कथं समन्वय. साधनेन हि क्रिया ऽन्वेतीति न च जाति साधनम्। तदाश्रयः साधनमिति चेत्, एवमपि जाते साक्षाच्छब्देन चोदितत्वात्सामर्थ्यात्तदाधारप्रतिपत्तौ यथाचोदितानुषङ्ग इति असम्भवे प्रतिनिधिर्माभून्नित्यस्य कर्मणः काम्यस्य वा प्रवृत्तस्य लोप इत्यपादेय इति विध्यनुपपत्तिरित्याशङ्क्य तत्समर्थनायाह ॥

केषां चिन्माहचर्येण जातिः शक्त्युपलक्षणं।
खादिरादिष्वशक्तेषु शक्तिः प्रतिनिधीयते ॥ ३ ॥

इह केषां चिज्जातिवादिनामेकार्थसमवायाच्छक्ते प्रतिपादने जातिरुपलक्षणमुपाय इति मतम्। अन्येषां पुनस्तात्पर्येण जातिरेव शब्देन प्रतिपाद्यते, कार्ययोगस्तु तस्या. क्वचित्साक्षात्क्वचिद्व्यक्तिद्वारेणेति मतम्। अथ वा केषाञ्चिदिति। शब्दानां ये साधनाभिधायिनः तत्र

शक्तितात्पर्येण ज्ञानेरुपलक्षणत्वान्नान्तरीयकमुपादानं शक्तिवाचित्वा विभक्तेः केवलाया अप्रयोगार्हत्वात्तस्याश्च प्रातिपदिकस्यावश्यमुपादानमिति तद्वाच्यया ज्ञात्या शक्तिरवच्छिद्यते सति सम्भवे । तदभाव तु तत्सदृशापरजातिसहचरितापि । प्रत्यर्थं साधनशक्त्युपादाने ऽपि ज निर्विशेषस्यासम्भवे क्रियासाधनशक्त्यावेदनपरतया जातेः प्रयोगान्माभूत्प्रधानभूताया शक्तेरपि त्यागे क्रियाया असंपत्तिरिति शिष्टसमाचारादन्यजातीयद्रव्यगतापि शक्तिः परिगृह्यते । नचैवमतिप्रसङ्ग । चोदितप्रतिनिधिविषय एवैतस्य न्यायस्येष्टत्वात् । तथा च गोदोहादिचोदनासु तदसामर्थ्येन महिष्याद्याक्षेपप्रसङ्गः । उपलक्षणत्वाच्च जातिर्नियमं न विधत्ते । तथा । उपघातनिवारणपरे वाक्ये काकादिरिति सहशोपादाने श्रौतार्थत्यागो न भवति। यत्र च सम्भवश्चादिहतस्य, श्रौतस्यार्थस्य तत्र श्रुतिः सकला । तस्मात्खदिरे बध्नाति पलाशे बध्नातीत्यादौ खदिरादेर्बन्धनसमर्थस्यालाभे तत्सदृशकदरादिशक्तसाधनपरिग्रहो युज्यते । अनाधारायाः शक्तेरसम्भवान्नान्तरीयकत्वेन जातेरुपादानं, नियमस्याविधानात् । जातिर्हिशक्तयुपलक्षणं तत्कार्ययोगिनीति तदाश्रयस्याशक्तत्वेन अन्तरेण द्रव्यान्तरगतापि शक्तिर्गृह्यते । यदि तु तज्जातीयमेव शक्तं स्यात्तदा सन्निहितपरित्यागे कारणाभावात्तज्जातीयमेवोपादीयत । तदशक्तत्वे तूपलक्षणस्योपलक्षणं चरितार्थत्वादसत्यपि तत्कार्ययोगे तदुपलक्षिता शक्तिः शास्त्रचोदितेत्यर्थान्तरगतार्थपर्युदस्तत्वादुपादीयत इति नियमो नास्ति । सदृशार्थान्तरगता च शक्तिर्गृह्यत इति नातिप्रसङ्गः ॥३॥

अथ येषां जातिवादिनां मते तात्पर्येण जातिरभिधेया न शक्त्युपलक्षणं तेषां कथं प्रतिनिधिरुपपद्यत इत्याशङ्क्याह ।

अस्वातन्त्र्यफलो बन्धः प्रमाणादीव शिष्यते ।
अतो जात्यभिधाने ऽपि शक्तिहीनं न गृह्यते ॥ ४ ॥

अत इत्यस्वातन्त्र्यफलस्य बन्धे विधानाच्चोदनाजाते' प्रतिपाद्यत्वे ऽप्युपलक्षणत्वाभावे ऽप्यस्वातन्त्र्यप्रयोजनबन्धविधिसामर्थ्याच्छक्तिहीनस्य खदिरादेस्त्यागे शक्त कदरादि प्रतिनिधीयते । वाक्यार्थभूता हि बन्धक्रिया प्रधानमिति तत्संपादानशक्तस्य पदार्थस्य परिग्रहो न्याय्य । ननु च दृष्टफले बन्धौ को ऽनुरोध इत्याशङ्क्योक्तं

प्रमाणादीव शिष्यते इति। यथा इष्टफल प्रमाणादि चोदितं तथा तदङ्गभूतो ऽपि बन्धिरिति सर्वथा, ऽसावनुरोध्य. । तथा ह्यसति पशोर्यूपे बन्धने प्रमाणाद्यनुपपत्तौ अवदानग्रहाभावात् स्वर्गफलस्य यजेरवासंपत्तिः स्यादिति तदनुरोधात्तदङ्गसंपत्त्यर्थं तत्समुचितसाधनाक्षेपः। तत्र प्रमाणं हिंसाप्रारम्भ. । मीञो हिंसार्थस्य ल्युट्यज्विषयरूपमात्वे च कृते मानं तस्यारम्भ. प्रशब्देन द्योत्यते । आदिग्रहणादालम्भनादेरवदानग्रहणपर्यन्तस्य तदुत्तरस्य प्राकरणिकस्याङ्गकलापस्यानुरोध ।अथ कथ मत्र पक्षद्वये ऽभिप्राय:, यदि नाम ज्ञातः प्रकृत्यर्थभूतायाः शक्तेरवच्छेदनोपात्ताया असम्भवद्व्यक्तिजात्यवच्छिन्नस्याशक्तत्वात्तथापि प्रत्ययार्थस्य शक्तेरवच्छेद्याया अपि त्यागो न युक्तो ऽपित्वन्यगतापि सा गृह्यते । मा भूद्वाचिनः पदस्यानर्थक्य वाक्यार्थस्य च क्रियाया असंपत्तिरिति गामालभेतेत्यादौ च सर्वत्र योग्यव्यक्तिविषयैव क्रियावतिष्ठत इति प्रतिनिधावपि किमितिसंभ्रमः ॥ ४ ॥

इदानीमत्रैव लिङ्गेनापि प्रतिनिधिमुपपादयति ।

संश्लेषमात्रं बध्नातिर्यदि स्यात्तु विवक्षितः ।
शक्त्याश्रये ततो लिङ्गं प्रमाणाद्यनुशासनम् ॥ ५ ॥

बध्नात्यर्थ उपचारादबध्नातिरित्युक्तं। संश्लेषो यूपे पशोर्योजनं देवास्वातन्त्र्यलक्षण स्वफलानपेक्ष। तन्मात्रं तद्यदि बध्नात्यर्थो ऽभिमतस्तदा तस्य खदिरलतयापि सम्पाद्यत्वात्सम्भवे कदरोपादाने सामर्थ्यं नास्तीति ततः संश्लेषादुत्तरकाल प्रमाणादीनां पशुमालभेत हृदये ऽवद्यति अथ वक्षस्नीत्यादिवचनेन यदनुशासनं तदत्र समर्थद्रव्योपादाने लिङ्गमनुमानं । अथ वा पूर्वं बन्धिरेव लिङ्गमासीत्, इदानीं संश्लेषमात्र बध्नातिस्ततः प्रमाणाद्यनुशासनं तदत्र समर्थद्रव्योपादाने लिङ्गमनुमानम । अथ वा पूर्वं बन्धिरेव लिङ्गमासीत् इदानीं यदि संश्लेषमात्र बध्नातिस्ततः प्रमाणाद्यनुशासनं लिङ्गमित्यर्थ । पशुविशसनाङ्गस्य हि बन्ध्यर्थस्यात्रोपादानं युक्तं। असमर्थश्च विशसने बध्नात्यर्थो न तदङ्गमिति एकप्रकरणोपात्तप्रमाणाद्यर्थपर्यालोचनालक्ष्म प्रतिनिधिः पूर्वं पदार्थसामर्थ्यात् । अनन्तरं वाक्यार्थसामर्थ्यात्प्रतिनिधिरुक्त. । सम्प्रति करणसामर्थ्यादिति पक्षत्र-

ये विशेषः। शक्तेराश्रयः कदरद्रव्यं तत्रोपादीयमाने लिङ्गमिति सम्बन्धः। यद्वा शक्तिः कार्यस्य निर्वर्तको द्रव्यस्यात्मातिशयः तदाश्रये तदभ्युपगम इत्यर्थः। तदेवं, यदुक्तं वाक्यकाण्डे। यश्च जातिसमुद्देशे प्रतिनिधि प्रत्यपरो दर्शनभेद इति सोऽयमिह व्याख्यातः। तत्र पुनरन्यो दर्शनभेदः प्रतिपादितः। असम्भवनियमत्यागो नियममात्रबाधश्चेति। तथा हि, व्रीहिभिर्यजेतेति देवतोद्देशेन द्रव्यत्यागस्य यज्यर्थत्वाद्यजातिक्रियैकदेशभावापन्नं द्रव्यैकमात्रं यजेतेत्येव सामर्थ्यात्प्राप्तम्। एतावानेव हि यज्यर्थ इति श्रुतिप्राप्तसन्निधानमेव द्रव्यमात्रम्। द्रव्यदेवतारहितस्य त्यागमात्रस्य यज्यर्थत्वायोगात्प्रतीते तस्मिन्नर्थसामर्थ्यादनन्तरं द्रव्याक्षेपस्यायोगात्। इत्थं च क्रियाप्रधानत्वेऽप्याख्यातस्य, तदेकदेशभूत साधनाधारमपि द्रव्यसामान्यं श्रुतिप्राप्तसन्निधानं शाब्दमेव। तत्र व्रीहिभिरिति व्रीहित्वेनाविरुद्धैकार्थसमवायेन विशेषणपरिपोषः। निर्विशेषस्य सामान्यस्याभावात्। अध्यावापार्था हि व्रीहिश्रुतिः शब्दसामर्थ्यप्राप्त द्रव्यत्वमात्रमविरोधान्न बाधते। तद्धि श्रुतिसामर्थ्यप्राप्त, व्रीहित्व पुनरर्थसामर्थ्यायात निर्विशेषस्य सामान्यस्याभावात्। एवं च द्रव्यत्वमात्रस्य श्रुत्या ऽङ्गभावश्चोदितो न व्रीहित्वस्य विशेषस्येति, तदसम्भवे ऽपि विशेषान्तरेण सामान्यमात्रस्य परिपोषे प्रतिनिधिविषये चोदितस्य बाधा न भवति। ननु चाध्यावापे व्रीहिभिर्द्रव्यत्वस्याऽधिगतत्वाद्विकल्पः प्राप्नोति सर्वत्र व्रीहिभिर्यवैर्यवैरित्यादि। आक्षिप्तं हि द्रव्यत्वं श्रुतिसामर्थ्यप्राप्त, तस्य चेद्व्रीहिश्रुत्या विशेषान्तरादवच्छेदो न क्रियते तदा तदपि विशेषान्तरं तेन स्वीकृत प्राप्तसन्निध्येवेति विकल्पप्रसङ्गः। तथा च व्रीहिश्रुतेरानर्थक्यम ॥ अत्रोच्यते॥ इह व्रीहित्वेन द्रव्यत्वे विशेषित वस्तुसामर्थ्यादवत्वादीनामसम्भव। न हि यत्र व्रीहित्वैकार्थसमवायि द्रव्यत्व तत्रैव यवत्वैकार्थसमवायि सम्भवति। ततश्चासम्भवनियमो नामार्थः। द्विप्रकारो हि नियमः, कश्चिच्छब्दसामर्थ्यायातो भवति यत्र यक्षप्राप्तौ सत्यां श्रुतिः। यथा व्यक्तौ पदार्थे विप्रतिषेधे परमिति। कश्चित्पुनरसत्यपि शब्दव्यापारे पदार्थानामितरेतररूपसाङ्कर्याभावादेकचोदना तदन्यनिवृत्तिफलेति, पदार्थस्वरूपविमर्शायातो ऽसम्भवनियम इत्युच्यते। तथा चेह शब्दसामर्थ्यायात द्रव्यत्वमिति व्रीहिभिरिति तत्राध्यावापः शब्दव्यापारः। अखण्डे ऽपि हि वाक्यार्थनये ऽपो-

द्धारदशागतो भेदसंसर्गादिविकल्पः । तत्र व्याडिमते भेदो वाक्यार्थः पदवाच्यानां द्रव्याणां द्रव्यान्तरनिवृत्तितात्पर्येणाभिधेयत्वात् । जातिवादिनो वाजप्यायनस्य तु मते संसर्गो वाक्यार्थः सामान्यानां संश्लेषमात्ररूपत्वाद्वाक्यार्थस्य । इयति चरितार्थे व्रीहिशब्दे व्रीहित्वस्य यवत्वादिभिर्विरुद्ध एकस्मिन्नर्थे समवाय इति तत्र तानि निवर्त्तन्ते । ततश्च प्रतिनिधौ वस्तुसामर्थ्यायातस्य नियमस्य बाधेऽपि शब्दस्य द्रव्यत्वमात्रस्याबाधितत्वान्न चोदितार्थत्याग. । ननु स्वनिर्विशेषस्य सामान्यस्यासम्भवात् यजिना विशेषनिष्ठमेव द्रव्यत्वमाक्षिप्तमिति सर्वविशेषाणां श्रुतिसामर्थ्यप्राप्तत्वाद्व्रीहिभिरिति पुनः श्रुतिर्नियमफलैव श्रौतेनापिरूपेण सञ्जातेति कथं श्रौतार्थत्याग. । प्रतिनिधौ नैतन्न्याय्यम् । न हि शब्दो वस्तुचिन्तामनुसरति कस्य चिदेव वस्तुभागस्य शब्दव्यापारविषयत्वात् । तथा च यजतिशब्दस्येयत्येव सामर्थ्यं द्रव्यमात्राक्षेपे, न तु तद्विशेषे । अन्यथा निर्गुणस्य च द्रव्यस्यासम्भवात् गुणस्याप्याक्षेपको ऽसौ किमिति न वर्ण्यते । तस्माद्द्रव्यत्वमात्रस्यैवाक्षेपः शाब्द इति तत्परिपोषाय विशेषान्तरावापो न नियमफल इति शास्त्रेणापर्युदस्तानां विशेषान्तराणां प्रतिनिधिसिद्धिः । तदित्थमसम्भवनियमत्यागो वर्णितः । नियममात्रबाधश्चाप्युच्यते । इह सर्वत्रैव क्रिया प्रधान वाक्यार्थः । तया च साध्यमर्थं योग्यद्रव्यमाक्षिप्यते साधन । तदेव च पदान्तरेण विशिष्ट कथ्यते । इत्थं स्थिते यत्र श्रुतस्य साधनस्यासम्भवस्तत्र प्रधानभूतक्रियासम्पत्त्यर्थं साधनान्तर प्रतिनिधीयते । क्रिया हि न प्रतिनिधीयते प्राधान्यात् । क्रियान्तराश्रयणे च कर्मान्तरस्याचोदितस्यानुष्ठानाच्छास्त्रस्योल्लङ्घन स्यादिति गुणभूतस्य साधनस्यैव प्रतिनिधिराचरित. शिष्टै. । तत्र च प्रधानभूतक्रियापदार्थाक्षिप्तस्य शास्त्रितस्य साधनमात्रस्य न त्याग., अपि तु व्रीह्यादिपदोपात्तस्य द्रव्यविषयस्य नियममात्रस्य बाधः स च न दोषाय । शक्तिमात्रस्य साधनरूपस्य क्रियासामर्थ्याक्षिप्तस्य प्राधान्याच्छास्त्रचोदितस्योपात्ताधाररूपद्रव्याभावे तदपरतदाधारभूतद्रव्योपादाने ऽपि तस्यापरित्यागाच्चोदितार्थोल्लङ्घनाभावात् ॥ ५ ॥

तदेवमेतदनन्तरकाण्डे दर्शनद्वयमुपपादितमिति यथासम्भवं प्रतिनिधिश्च चिन्तित. । इदानीं जातौ शब्देनाभिधीयमानायां

तत्र जात्यन्तराभावान्निर्निमित्ता शब्दस्य प्रवृत्तिरायातेत्याशङ्क्यो-पपादयितुमाह ॥

स्वा जातिः प्रथमं शब्दैः सर्वैरेवाभिधीयते ।
ततोऽर्थजातिरूपेषु तदध्यारोपकल्पना ॥ ६ ॥

स्वा असाधारणी आत्मीया गोशब्दत्वादिका न तु सकलशब्दसाधारणी शब्दत्वादि । एव चासाधारणत्वेन विशेषणात्तया सम्बन्धाव्यभिचार. । शब्दस्यार्थजात्या सम्बन्धव्यभिचार. । शब्दस्यार्थजात्या सम्बन्धव्यभिचारेऽपीति स्वा जातिरेव मुख्यमभिधेयमित्युक्तं भवति । तथा च वाक्यकार. न वा शब्दपूर्वको ह्यर्थे सम्प्रत्यय इति । अत एवाव्यभिचारिण्या स्वरूपजातेरर्थजात्यभिधाने शब्दस्य नान्तरीयकमभिधानमिति प्रथममित्याह । यदभेदेन यत्प्रतिपत्ति. तदवश्यं तत्र प्रतिपत्तव्यमित्येतावतात्र प्राथम्यं न तु क्रमेणाभिधानम् । यद्वा सम्बन्धव्युत्पत्तिकालापेक्षं प्राथम्यम् । तथा हि सम्बन्धव्युत्पत्तिकाले ऽर्थजात्या नास्ति सम्बन्ध । तथात्वे वाचकत्वेन तत्र विनियोगो ऽनर्थकः स्यात् । अर्थस्य प्रतिपन्नत्वादिति सो ऽर्थस्तावतेन शब्देन न प्रतिपन्न. । यदि च स्वजात्यभिधान तदानीं न स्यात्, तदानर्थकत्वाद्विभक्तियोगो न स्यादिति प्राक्सङ्केतनाभिसम्बन्धात्सङ्ग रूपपदार्थिकेत्युक्तं । रूप हि स्वरूप स्वाजातिर्वा इति दर्शनभेदेन कथ्यते । सर्वैरिति । स्वरूपपरैरर्थपरैश्च तस्या एव स्वरूपतया व्यवहाराच्छब्दस्वरूपेणावस्थिता जातिः प्रतिपद्यते । अर्थस्य झटित्येव शब्दस्वरूपाभेदेनावबोधे ऽपि यथाप्रतिपादितक्रमाश्रयेण तत. स्वजातिप्रत्यायनादनन्तरं अर्थजातीनां गोत्वादीनामात्मसु तस्याः शब्दजातेः समारोपस्य कल्पना न परमार्थ. शब्दविवर्तत्वेनार्थस्य शब्दात्तत्वतो भेदाभावात् । यद्वा सम्बन्धव्युत्पत्तिकाले गौरयमर्थ इत्यर्थजात्या शब्दजातेरत्यन्तभेदात्सामानाधिकरण्यान्यथानुपपत्याऽभेदाध्यारोपः कल्प्यते । यथा गौर्वाहीक इति । अन्यथा सङ्केतस्यैव कर्तुमशक्यत्वात् । यथा चायमनादिरपौरुषेयो वाच्यवाचकभावः तथाध्यारोपो ऽपि । अन्यथा वाच्यवाचकभाव एव न घटेत । तथा बौद्धस्य दृश्यविकल्पार्थैकीकारो भेदानध्यवसायलक्षण. । ननु यथा गौर्वाहीक इत्यत्र पुरुषेच्छया ऽध्यारोप. । व्यवहारे शब्दार्थयो. सदैवाभेदावसायात्क-

थमियं प्रतिवर्णमनभिव्यक्ता साधारणी जातिरसमसमयभाविभिर्वर्णैरभिव्यज्यत इति चेत् यथोत्क्षेपणत्वादिजातिरिति ब्रूमः। तथा हि प्रत्येकं कर्मक्षणानामुपव्यञ्जकत्वे ऽपि य. प्रथम उत्क्षेपणक्षण स परमाणुमात्रदेशाक्रमणमात्ररूपत्वात् भ्रमणक्षणात् सारूप्यवशादनवधार्यमाणभेद एकैको ऽसमर्थो नियतजात्यभिव्यञ्जन इति क्षणान्तरमपेक्षते। न च तस्य भ्रमणक्षणाद्विशेषो नास्ति उपक्रम एवोत्क्षिपामीत्येव प्रयत्नजनितत्वात्। एवं गोशब्दमुच्चारयामीत्ययं प्रयत्नो यद्यपि गगनशब्दजनकात्प्रयत्नादन्य एव हेतुभेदाच्च गकारयोरपि भेद एव तथापि सादृश्यादसौ दुरवधार इति व्यञ्जको ऽपि सन् प्रथमो ध्वनिरस्फुटमभिव्यनक्तीत्यावर्तमानो ऽपि न विशदतरसामान्यविशेषाभिव्यक्तौ हेतु'। यदा त्ववयवप्रबन्धः क्रमेणोपलब्धो भवति, अथ शब्दजातिविशेषोपाधियुक्ता व्यवहारा अवतिष्ठन्ते। तदानीं साहचर्यात्परस्परावच्छेदवशेन विलक्षणतया। प्रतिभासनात्। यथा च श्लोकः सकृत्पठ्यमानो नावधार्यते अभ्यासेन तु स्फुटावभास, तथा चरमत्वेन विचकास्ति रत्नतत्ववत्स्फोटतत्वं। प्रथमाक्षरेण हि जातेराभासमात्र जन्यते तदुत्तरोत्तरवर्णकलापेन तु स्पुटतरस्फुटनपरिच्छेदाधानं। सस्कारविशेषोत्पादनद्वारेणाभिव्यक्तिविशेषस्य रत्नतत्वादौ दृष्टे। तस्माच्छब्दादर्थं प्रतिपद्यामहे इति व्यवहाराद्वर्णानामर्थावसायजनकत्वानुपपत्तेः प्रक्रियाभङ्गस्य प्रथमकाण्ड एव विहितत्वान्निरवयवं प्रत्यायकं शब्दतत्व जातिव्यक्तिभेदेन भिन्न स्फोटस्वभावमेवाङ्गीकार्यं। गौरयमर्थ इति च वाचकाभेदेन वाच्यप्रतीतेः तदध्यासखचितत्वपुर्व्यवहार्यो ऽर्थः। तत्र च स्वरूपस्य वाच्यता प्रथमकाण्ड एव निर्णीता इह तु सम्बन्धसमुद्देशे ऽपि निर्णेष्यते ॥६॥

तत्रैतत्स्याच्छब्दसमवायि सामान्यं व्यधिकरणत्वात्कथमर्थजातिभेदेन व्यपदिशेदित्याशङ्क्य निदर्शनेनैतद् व्युत्पादयति ॥

यथा रक्ते गुणे तत्वं कषाये व्यपदिश्यते।
संयोगिसन्निकर्षाच्च वस्त्रादिष्वपि गृह्यते ॥ ७ ॥
तथा शब्दार्थसम्बन्धाच्छब्दे जातिरवस्थिता।
व्यपदेशे ऽर्थजातीनां जातिकार्याय कल्पते ॥ ८ ॥

रक्ते गुणे तत्त्वम् । तस्य रक्तस्य गुणस्य भावो रक्तत्वं लौहित्यसामान्य गुणव्यक्तिसमवेतमुच्यत । तत्समवेतसमवायात्कषाये रक्तगुणाधारे द्रव्ये व्यपदिश्यते व्यपदेशाय कल्पते । तद्विशेषणभूतं हि तत्कषायद्रव्यमभिधीयते, लोहिता लाक्षेति । तेन सयोगतो वस्त्रादय , तयो सयोगिनो कषायवस्त्रया सन्निकर्षे सम्भेदः, तस्मान्निमित्तान्तरादपि तल्लौहित्यं गृह्यते । सयुक्तसमवेतसमवायाद्वस्त्रादिष्वपि लौहित्यनिमित्तो व्यपदेश । लोहितं वस्त्रमित्यर्थ । तथा शब्दार्थसम्बन्धादिति । लोहितगुणकषायद्रव्यसम्बन्धस्थानीयात्समानाधिकरणतयावस्थितात्स्वाभाविकात्केवल व्युत्पत्तिकालेनिर्ज्ञानात्तदन्यथानुपपत्त्यैवाध्यारोपस्य कल्पनात्सम्बन्धादेव शब्दजात्या व्यपदेश । अथात्रार्थजातिमत्या एव वाच्यत्व प्रक्रम्य व्यपदेशे कल्पते स्वरूपाभेदेन जातिकार्याय कल्पते । जात्यादिशब्दे जातिषु वाचकत्वेन प्रवर्त्तमाने स्थिता जातिर्न केवलं व्यपदेशाय कल्पते यावज्जातिकार्याय च । अथ वा व्यपदेशे सति जातिकार्याय कल्पत इत्यर्थ । निःसामान्यानि सामान्यानीत्यर्थ । जातीनां स्वतो जातिरहितत्वे तत्कार्य शब्दप्रत्ययानुवृत्तिलक्षणम् । शब्दार्थयोः सो ऽयमित्यभेदेन सम्बन्धाच्छब्दसमवायिनीजातिरर्थेनाध्यारोपिताभेदा सम्पादयन्ती तदात्मना सम्पद्यत इत्युपचर्यते । व्यक्तिरूपे च शब्दे जातेः समवायो न तु वर्णेष्वित्यवस्थितेत्युपपद्यते । वर्णानां हि यौगपद्याभावादवाचकत्वमिति कथ तत्र शब्दजातेः समवाय स्यात् । केवलं स्फोटस्य जातिव्यक्तिभेदेन दर्शनद्वयमिति व्यक्तिस्फोटे जाति. समवेता । अर्थभेदेन हि भिन्नस्य नित्यशब्दस्याभिन्नाभिधानप्रत्ययहेतुर्जातिरवश्याभ्युपगन्तव्या । अत एव तया लुप्तायाः व्यक्तेरेव वाचकत्व । उपलक्षणभूता तु जातिराश्रीयते इति कथमत्रानुयायिन्या व्यक्तेर्वाचकत्वमिति न चोदनीयम् । शब्दार्थसम्बन्धश्चात्र योग्यतालक्षणो ऽभिप्रेत , सर्वो हि शब्द. सङ्घातत्वेन विनियुज्यमान सर्वत्रार्थे योग्यतालक्षणेन सम्बन्धेन सम्बद्ध । केवल शक्त्यवच्छेदमात्रे संज्ञाकर्तुर्व्यापारो नत्वपूर्वमङ्गीकरणे, अर्थसम्बन्धस्यापौरुषेयत्वात् । एवं चादिषु वृद्धिशब्दो नापूर्व एव सकेतित इति सर्वेषामनेकार्थत्वात् वक्तृभेदाद्धानेकत्वे समानाकारप्रत्ययनिबन्धनं जातिरेषणीया । तद्यथा आकाशस्य सयोगिभेदेन कल्पितभेदस्यानेकत्वे सत्याकाशत्वं वक्ष्यते । नचैव

सर्वस्मात्सर्वार्थप्रतीतिप्रसङ्गः । प्रसिद्धिवशेनार्थप्रतीतेः कुत्र चित्कस्य चित्प्रसिद्धत्वात् । प्रसिद्धानां चार्थानामर्थप्रकरणादयो विभागहेतव उक्ता. । तद्यथा गोशब्देन नवस्वर्थेषु सन्निहितेष्वपि प्रकरणादे प्रतिनियतार्थावसायः । तदेवं शब्दजात्या शब्दव्यक्तिर्वाचिका प्रथममभेदेन व्यपदिश्यते ततो ऽर्थजाति ततस्तद्व्यक्तिरित्यय वास्तवः क्रम । प्रत्यायने तु अक्रमनैव । शब्दाच्छुरितत्वे ऽपि चार्थस्य न स्वरूपव्यपगमः । यथा ह्यालोकाच्छुरितो ऽपि घटो न स्वरूपेण तिरोभवति एवं शब्दस्वरूपोपरक्तो ऽर्थ । स्वरूपारोपेण शब्दालोकयोरर्थप्रकाशकत्वस्यैवम्विधस्य दृष्टे. । यथा च गौर्वाहीक इत्यत्र न गोत्वमात्र प्रतीयते अपि तु अध्यारोपितगोरूपो वाहीक. । एवमिहापि । नतु स्फटिकमणाविवार्थे शब्दजातेः समावेशो विवक्षित. तस्यैव वाहीकवत्प्रत्याय्यत्वात् । स्वाभाविकश्चायमर्थप्रत्यायने शब्दानामभेदसम्बन्धो ऽभ्युपाय इति प्रतिपाद्यो ऽपि तथैव प्रतिपद्यते । न हि पुरुषाधीनमेतत् । अनादा ससार ऽनेनैव प्रकारेण सम्बन्धव्युत्पत्ते. को ऽत्र नियमतो ऽध्यारोपयिता कल्प्यतां । अव्युत्पन्नसङ्केतस्यापि चाभिन्नप्रत्ययोत्पत्तेरर्थजातिरप्यस्तीति न शब्दजातिरेवाध्यारोपिता ऽस्त्विति वाच्यं । शाब्दी चेयमेवम्विधा प्रतीतिरिति चाक्षुषेण रक्तादिप्रत्ययेन निदर्शनभूतेन व्युत्पादिता । वस्तुसन्निवेशित्वाभावे ऽपि च शब्दजातेरयमनादिरध्यारोपो रूढः । सदैव व्यवहारे शब्दार्थयोरभेदावसायाद्भेदस्यापि च गौर्वाहीक इति वत् प्रतिज्ञानान्मिथ्याज्ञानमिदं न भवति । प्राक्सम्बन्धसम्वेदनसमयादर्थजातयो भेदेनावभान्त्येव । अव्युत्पन्नसङ्केतस्य बालकस्य पुरो ऽवस्थितेषु सास्नादिमत्सु पिण्डेषु भिन्नः प्रत्यय उत्पद्यते तदा वाचकसन्निधानाभावादभिन्नप्रत्ययहेतुरर्थजातिरवधार्यते । अत एव कथं भेदेन तदनिर्धारितायामर्थजातौ शब्दजाति. समारोप्यत इत्यादि न चोदनीयम ॥ ७ ॥ ८ ॥

जातिकार्याय कल्पत इत्युक्तमेवार्थमभिव्यनक्ति ॥

जातिशब्दैकशेषे सा जातीनां जातिरिष्यते ।
शब्दजातय इत्यत्र तज्जातिः शब्दजातिषु ॥ ९ ॥

आकृत्यभिधानाद्वैकवचनौ वाजप्यायन इति जातिपक्षे प्रत्याख्यानादेकशेषस्य, तत्फलमेकशब्दप्रयोगो ऽत्रैकशेष उक्तः । सहविव-

क्षा चैकदेशेन लक्ष्यते । जातिशब्दैकदेशे प्रसक्त इति वा योजनीयं । सेति शब्दजाति । अर्थजातीनामभेदेन प्रत्यवस्थमाना जातिशब्दगता जातिरेकशब्दत्व, सम्पादयति जातिकार्यं । तद्यथा गावौ वृक्षा इत्यादिरभिन्नसामान्यनिबन्धनस्तदेकार्थसमवायात्समाश्रितविशिष्टसंख्य एकशब्दप्रयोग । तथा जातय इमा इत्ययमपि जात्याश्रयापरजात्यभावाद्वाचकजात्यध्यासाश्रय उपपद्यते । शब्दगत च सामान्यं जातिवाचककार्यमुपचरतीत्युच्यते न त्वर्थजातिष्वेवेति नियम' केन चिन्निश्चियत इति । यदा शब्दजातयो ऽपि प्रत्याय्याः तदाऽऽस्वप्यभिधानगत जातिकार्याय कल्पत एवेत्याह शब्दजातय इत्यत्रेति । तज्जाति शब्दगत सामान्यम् । शब्दजातय इमा इत्यत्रैकपदप्रयोगे तस्याश्चरितस्य शब्दजातिशब्दस्य या जातिः सा शब्दजातिषु गोशब्दत्वादिकासु व्यक्तिस्थानीयासु प्रतिपाद्यास्वभिन्नशब्दप्रयोगे निबन्धनमित्यर्थ ॥ ९ ॥

यद्येव शब्दजाति' शब्दगतानामपि जातीनामन्या वाचकजातिसामान्यमप्यस्येत्यनवस्थाप्रसङ्ग इत्याशङ्क्याह ॥

या शब्दजातिः शब्देषु शब्देभ्यो भिन्नलक्षणा ।
जातिः सा शब्दजातित्वमप्यतिक्रम्य वर्त्तते ॥ १० ॥

प्रयोक्तृभेदादनेकेषु शब्दजातिशब्देषु अभिन्नाप्रत्ययनिबन्धना या जातिस्तेभ्य एव शब्देभ्य' स्वाश्रयभूतेभ्यो भिन्नस्वभावा सा गोशब्दत्वादिशब्दजातिवर्गान्त'पातिनी न तु व्यपदेशान्तरार्हा । शब्दजातिशब्दस्यापि गोशब्दत्वादिवत् शब्दजातय इत्यनेनैवैकशब्दप्रयोगे सापि प्रत्याय्यत इति न प्रयोगानवस्थापत्तिरित्यभिप्राय' ॥ १० ॥

तदेव स्वनिकायसिद्धाध्यासदर्शनाश्रयेण सार्वत्रिकी जातिपदार्थव्यवस्था दर्शिता । स्वरूपभूता हि जातिः सर्वेषां । शब्दानामन्तरङ्गत्वादसाधारणत्वादहेयत्वाच्च प्रथमं प्रतिपाद्या । इदानीमध्यासानाश्रयेणापि प्रौढवादितया जातिपदार्थव्याप्तिमुपपादयितुमाह ॥

अर्थजात्यभिधाने ऽपि शब्दजात्यभिधायिनः ।
व्यापारलक्षणा यस्मात्पदार्थाः समवस्थिताः ॥ ११ ॥

अन्यथा चात्र सम्बन्धः । तथा हि, अस्तु शब्दजातेरर्थजातीनां जातिकार्यं, सम्बन्धव्युत्पत्तिस्तु न घटते । स यत्र हि सङ्केतस्तत्र शब्दजातिरध्यस्यते । स एव त्वनेकत्वादर्थजातीनां सामान्यान्तरमन्तरेण न सम्भवतीत्याह । अर्थ जात्यभिधाने ऽपीत्यादि । यद्यपि शुद्धा एवार्थजातयः शब्दैरभिधीयन्त इत्याश्रीयते तदापि सर्वे जात्यभिधायिनो जात्यादिशब्दा अपि तदा जातिवाचिन एव । ननु नि सामान्यानि सामान्यानीति सिद्धान्तात्कथ जात्यादिशब्दा अपि जात्याधारां जातिमभिदध्युरित्याह । व्यापारलक्षणा इति । व्यापारः कार्यं प्रयोजन तदेव लक्ष्यते ऽनेनेति लक्षणं हेतुर्येषां पदप्रत्याय्यानामर्थानां ते तथा नियमितस्वरूपाः । अयमाशयः । वैशेषिकादीनां भवन्तु नि.सामान्यानि सामान्यानि, तानि हि व्यक्तिष्वन्वयप्रत्ययावसेयानि परोपाधिरूपाणि स्वतन्त्रव्यक्तिवादिदन्तावभासित्वाभावात् सामान्यान्तरेण नोपाधीयन्ते । वैयाकरणानां शब्दार्थो ऽर्थ इत्यभ्युपेयतामन्वयिरूपावच्छेदेन शाब्दस्य प्रत्ययस्योत्पत्तेर्जातिष्वपि जातिरविरुद्धा ऽभ्युपगम्या । एतदेव हि व्यक्तिष्वपि जात्यभ्युपगमे निमित्तमित्यत्रापि तथाभ्युपगमे कः प्रद्वेषः । प्रत्यक्षा अपि च पदार्था स्वकार्यं विज्ञानादिकं कुर्वन्तः, सन्तीति व्यवह्रियन्ते किं पुनः शब्दवाच्याः पदार्था इति सामान्यवचनाद् द्रव्यादयो ऽपि शब्दवाच्यत्वेनैव लक्ष्यन्ते । शब्दप्रमाणकानां हि यच्छब्द आह, तत्परमार्थरूपं । तथा चान्वयिरूपेण गुणो ऽप्यभिधीयमानो जातिरेव, यथोपमानसमासे श्यामादि । तथा चोपमानानि सामान्यवचनैरित्युच्यते । एव क्रिया ऽप्यभेदेनाभिधीयमाना जाति । तथेदं तदिति स्वातन्त्र्येण विशेष्यतयाभिधीयमाना जातिगुणक्रिया अपि द्रव्यमिति यथावसरमग्रे निर्णेष्यत एव । एतच्च लौकिकव्यवहारानुगुण्येन शास्त्रेऽस्मिन् व्युत्पाद्यते । शास्त्रान्तरप्रसिद्धा हि व्यवस्था लोकविरुद्धा । लोके हि गवि शृङ्गं, वृक्षे शाखेति व्यवहारः । तथैव च व्याकरणे ऽप्याधारसप्तमी । शास्त्रान्तरे त्ववयवेष्ववयवीति शृङ्गे गौः शाखायां वृक्ष इति स्यात् । इत्थं च शब्दाभिधेयस्येहार्थत्वात्सर्वे जात्यभिधायिनो यस्मात्, शब्दव्यापारेण पदार्था लक्ष्यन्ते, यद्यपि बहिर्वस्तूनि न सन्ति तथापि शब्दैस्तथा प्रत्याय्यन्ते ऽतो विधाव्यापारवशादन्वयिरूपेण प्रत्यायनाद्यातिर्जातौ पदार्थे सिद्धेत्येषो

ऽप्यर्थे, अभिधाव्यापारलक्षणत्वमेव व्यक्तयति ॥

जातौ पदार्थे जातिर्वा विशेषो वापि जातिवत् ।
शब्दैरपेक्ष्यते यस्मादतस्ते जातिवाचिनः ॥ १२ ॥

जातौ पदार्थे इति पक्षावच्छेदं करोति । अत्र हि पक्षे सर्व एव शब्दा जातिवाचीत्यभ्युपगन्तव्यं। भवतु मा वा भूज्जातिषु जातिः, शब्दैस्तु जातिव्यतिरिक्तया जात्येकत्वजातिरपेक्ष्यते प्रत्याय्यत्वेनाऽङ्गीक्रियते । स्वालक्षण्येन हि वस्तूनां भेदः शब्दैः शाष्टुं न शक्यते, अन्वयिरूपावेशेन सम्बन्धव्युत्पत्तौ शब्दस्य वाचकत्वात्तथा च जातीनामितरेतरभेदो वस्तुतश्च ऽसिद्धोऽपि त्वभेदकल्पेन ता अभिधीयन्ते । अभेदश्च सामान्यमिति सिद्धमेकशब्दत्वं जातय इति । तथा योऽपि विशेषः संज्ञाशब्दानां वाच्यः प्रतिनियतः, सोऽपि जातिवत्प्रसिद्धजात्या तुल्यमेव वक्ष्यते शब्दैः । तत्रापि बाल्यकौमारादयस्यामेदः शब्देन न स्पृश्यते ऽपि त्वबाधात्तरूपमेवानुगतमसिद्धं प्रत्यभिज्ञाप्रत्ययनिमित्तं तत्रावश्याभ्युपगन्तव्यं। अतो यस्माज्जातिषु सर्वमपेक्ष्यते शब्दैस्तस्माज्जातिविशेषं प्रतिपादयन्तः सर्वे जात्यभिधायिन इति जात्यभिधानव्याप्तिं निगमयति । एवञ्च संज्ञाशब्दानामपि जातिवादिमते जातिशब्दत्वमित्येकैव शब्दानां प्रवृत्तिः ॥१२॥

एवं दर्शनान्तरेऽपि शब्दव्यापाराश्रयेणैव व्याप्तिसिद्धिरित्याह ॥

द्रव्यधर्मो पदार्थे तु द्रव्ये सर्वार्थ उच्यते ।
द्रव्यधर्माश्रयाद् द्रव्यमतः सर्वार्थ इष्यते ॥१३॥

न केवलं मयैव जातिपदार्थवादिनैतदङ्गीकृतं सर्वार्थो जातिरिति। यावद्द्रव्येऽपि पदार्थे, द्रव्यपदार्थपक्षेऽपि द्रव्यधर्मो सर्वार्थ उच्यते, कुतः द्रव्यधर्माणामाश्रयणाद्द्रव्यमतः सर्वार्थ इष्यते, व्याप्तिरत्र सिद्धा भवतीत्यर्थः । द्रव्यवादिनाप्येतदभ्युपेतव्यं व्याप्तिसिद्धये। शब्देन योऽर्थ उच्यते सर्वोऽसौ द्रव्यधर्मयुक्त एवेत्यभिप्रायः । यथा तव द्रव्यवादिनः केचिदेव शब्दा मुख्यद्रव्यवाचिनस्तदन्ये तूपचरितद्रव्याभिधायिनः । तथा ममापि जातिवादिनो मुख्यां जातिमभिदधति केचिदुपचरितामन्य इति मतद्वये ऽपि साम्य । तत्र द्रव्यधर्मा

इदं तदिति प्रत्यवमर्शयोग्यत्वं, परिनिष्पन्नाख्यातन्यं, लिङ्गं, सङ्ख्या-योगश्चेत्येवमादयः । तेषां शुक्लादिगुणेष्वव्यारोपात्ते ऽपि द्रव्यस्येव धर्मा येषामिति द्रव्यधर्माणः । तथा हि शुक्लो नीलं स्त्रीपुन्नपुंसकानि सत्त्वगुणाः । तथैकत्वादिभिः शब्दैः प्रत्याय्यमाना गुणादयो द्रव्यधर्माणः ख्यातव्यादिरूपेणावभासन्त इति सर्वो ऽर्थो द्रव्यरूपेणाभिधीयते ॥ १३ ॥

एवं शब्दव्यापाराश्रयेण व्यक्तिरुपपादिता । अधुना वैशेषिकदृष्टाप्यर्थगतसमानधर्माश्रयेण जातिपदार्थव्यक्तिमाह ॥

अनुप्रवृत्तिधर्मो वा जातिः स्यात्सर्वजातिषु ।
व्यावृत्तिधर्मसामान्यं विशेषे जातिरिष्यते ॥ १४ ॥

जातीनामेतज्जातित्वं यैयं स्वाश्रयानुवृत्तिः । सर्वजातीनां साधारणो धर्मः सा च, ताभ्यो ऽन्यापि सादृश्यादभेदेन परामृशा सती, सर्वासां जाति । सर्वैव हि जातिः स्वव्यक्तीरनुवर्तते । उपलक्षणं चैष धर्मः । तेन स्वानुरूपप्रत्ययजनकत्वं, यद्बलाद्द्रव्यं तद्रूपमाभाति । स्वानुरूपाभिधानहेतुत्वं, यद्बलाद्द्रव्यं तद्रूपाभिधानवाच्यं भवति । प्रत्याश्रयं च सर्वात्मना परिसमाप्तिः साधारणो जातिधर्मः । यदि भागशो जातिर्वर्तेत तदा भाग एव गोत्वादिप्रत्ययः स्यात् । सम्पूर्णांश्च विषाणाद्यवयवदर्शने ऽपि झटिति गोत्वाकारप्रत्यय प्रसूयते । प्राप्ताश्रयपरिसमाप्ता अपि च गुणाः प्रतिद्रव्यं भिन्ना, जातिस्त्वेकैवेत्येवमादयो ऽसाधारणा धर्मा वाच्याः । यथा च गोत्वादिजातिः सर्वा व्यक्तीर्व्याप्नोति तथैते धर्माः सर्वजातीर्व्याप्नुवन्तीति जात्या तुल्यरूपत्वाज्जातिकार्याय कल्पन्ते । एवं सर्व एव विशेषा व्यावर्तन्ते । अन्यथा ऽनुगमात्सामान्यानि स्युर्न विशेषा इति सर्वविशेषेषु साधारणी व्यावृत्तिः, सामान्यलक्षणो धर्मो नवत्वेषु जातिरित्युच्यते । नन्वेवं गोपिण्डेष्वपि सास्नालाङ्गूलखुरककुदविषाणाद्यवयवसम्बन्धस्य साधारणत्वात्सैव जातिरस्तु, अलं वैवं, सास्नादिमत्त्वेन सास्नादिमानित्यादि प्रत्ययो जन्यते न तु गौर्गौरिति । अनुरूप हि कार्यं कारणं कल्पयति तद्यथा दण्डीति प्रत्यये दण्डसम्बन्धो निमित्तं न तु दण्डोपादित्सा । यथैवमनुवृत्त्यापि न जातिर्जातिरिति प्रत्ययो, युक्त व्यावृ-

त्या च विशेषो विशेष इति । नैतदेवम् । गत्यन्तराभावादत्र सदृशधर्मैक्या जाति , यत्रधर्मो जाति कल्पते । मुख्ये जातिभावे बाधकोपपत्ते । तथाहि । सामान्येष्वपरसामान्यसमवाये ऽनवस्थादि बाधकसन्यत्र निर्णीतम् ! नित्यद्रव्यवृत्तिषु व्यावृत्तिप्रत्ययजनकेषु सामान्याभ्युपगमे सशयापनोदाय विशेषान्तरकल्पने तेषामपि सामान्यसमवाये सन्देहविषयत्वाद्विशेषान्तराभ्युपगमे ऽनवस्थाप्रसङ्गः । अथ कश्चिन्निःसामान्ये ऽस्ति विशेष , तदा तदविशेषात्सर्वे ऽपि तथा स्युरित्यन्यत्र विस्तरेणोक्तम । गोपिण्डेषु सामान्याभ्युपगमे न किंचिदनुबाधकमिति न तत्र यथा कथ चिन्निमित्तं परिकल्प्यम । तदेवं यत्र जात्यभ्युपगमे प्रमाणबाधास्ति तत्र सदृशधर्मरूपा जाति । तथा च भावेष्वपि सामान्याभ्युपगमे भावत्वापत्तेरभवनात्मकधर्मसामान्यादन्वयिप्रत्ययविषयतेति सैव तत्रापि जाति ॥ १४ ॥

कालाकाशदिशामेकत्वान्नित्यत्वेनावस्थाभेदाभावाच्च कथं जाति . येन व्याप्तिसिद्धिरित्यत आह ॥

संयोगिधर्मभेदेन देशे च परिकल्पिते ।
तेषु देशेषु सामान्यमाकाशस्यापि विद्यते ॥ १५ ॥

यथा सामान्यविशेषाणामन्वयिधर्मोपाधिरभेदः तथा ऽऽकाशस्यापि सयोगोपाधिर्भेद इति प्रकृतापेक्षः समुच्चयः । आकाशेन संयोगो विद्यते तेषां आकाशाधिकरणानां घटादीनां ते संयोगिनः । आकाशे हि सर्वेषां मूर्तानामधिकरणम् । अवकाशदानाद्धि तदाकाशं । मूर्तास्तु भावा परस्परप्रतिबन्धका इति न ते ऽवकाशदायिनः । संयोगिनां धर्मभेद' प्रत्यक्षादिप्रमाणसिद्ध परिमितत्वं तद्बुद्धाद्या लोकप्रसिद्ध परिमितदेशवृत्तित्व । यत्र हि देशे संयोग. परिसमाप्तो वर्तते स प्रदेशो भवत्याकाशस्यानेक. । कार्य प्रति देश. प्रदेश इति निर्वचनात् । गुणाश्च केचिद्व्याप्यवृत्तयो यथारूपादय. । सयोगस्तु मूर्त्तिपरिछिन्नवस्तुवृत्तिरिति सर्वदा प्रदेशवृत्तिरेव । अत. संयोगस्य नियतदेशतया सयोगिनो ऽपि नियतदेशवृत्तय इति संयोगिधर्मभेदेनाकाशस्य भेदो भवत्युपाधिकृतो न स्वतः । यदाह देशे च परिकल्पित इति । देशभेदाच्च सामान्यमाकाशस्यापि विद्यते । अतश्च प्रतिदेशमिदमाकाशमिदमाकाशमित्यभिन्नाभिधानप्रत्ययानुवृत्तिलक्षणमाकाशसामान्यमा-

काशशब्दगोचरोऽस्ति। एवं समानन्यायत्वात्कालादीनामपि प्रदेशपरिकल्पनेन सामान्यमुपवर्णनीयम्। तथा हि कालस्य युधिष्ठिरादिसंयोगवशेन भेदेन सत्यभिन्नं कालसामान्यं कालशब्दवाच्यमस्ति। एव मेरुं प्रदक्षिणमावर्तमानस्य सवितुर्लोकपालगृहीतैर्दैशविशेषैर्यं संयोगः, तदुपाधिना सूर्येण दिशं संयोगे सति भेदभिन्नं दिक्सामान्यं दिक्शब्दवाच्यं परिकल्प्यम्। आत्मा तु प्रतिशरीरमन्य एवेति तत्राप्यस्त्येवात्मत्वसामान्यम्। एवं समवायस्यापि सम्बन्धिभेदान्नानात्वोपचारे सर्वत्रेह बुद्ध्यनुवृत्तेर्ज्ञाति परिकल्पनीया। ननु च संयोगिदेशेनाकाशस्य देशपरिकल्पनेन संयोगिनामितरेतराश्रयत्वम्। नैतदस्ति। इतरेतरव्यावृत्तिरूपतैव द्रव्यादीनां मूर्तत्वात्परिच्छिन्नपरिमाणत्वं बोधयति। कल्पितास्त्वाकाशदेशा लोकप्रसिद्धा. संयोगिवस्तुगतां परिच्छिन्नदेशतां ज्ञापयन्ति। सामान्यतयाकाशदेशत्वे द्रव्यादीनां प्रत्यक्षादिप्रमाणावसितरूपविरुद्धं व्यापित्वमारोपित, स्वगतेन परिमितत्वेनाकाशस्य प्रदेशकल्पनया निराक्रियते। यद्येवं कल्पिता देशाः कथमाकाशस्य स्वतो निरवयवस्य देशभेदनिबन्धनं कार्यं जातिप्रकल्पितलक्षणां जातिशब्दलक्षणं वा कुर्युः। येन तद्वता जातिरभिधीयेत। उच्यते। व्यक्तिस्थानीयानां देशानामद्वैतदर्शने यथा ऽसत्यत्वमसत्या व्यक्तय' स्मृता इति वक्ष्यते। तथेहाप्याकाशस्य सत्यत्वे व्यक्तीनां न कश्चिद्विरोधः॥ १५॥

अथ वा मुख्या एवाकाशस्य देशा घटादीनामिवेत्याह॥

अदेशानां घटादीनां देशाः सम्बन्धिनो यथा।
आकाशस्याप्यदेशस्य देशाः संयोगिनस्तथा॥१६॥

इह देशो ऽवयव उच्यते। घटादयश्चावयविनः स्वात्मनि निरवयवा.। ये हि तेषामवयवभूता कपालादयस्ते आरम्भकाः कारणभूता व्यतिरिक्ता एव समवायसम्बन्धेन सम्बन्धिन.। एवमाकाशमपि केन चिदप्यनारब्धत्वादमूर्त्तं व्यापि निरवयवमित्यात्मभूतदेशाभावाद्द्रव्यादय. संयोगिन एवास्य देशाः तथा तद्भेदादाकाशभेदे सर्वत्राभिन्नप्रत्ययानुगमाज्जातिरपि कल्प्या। आकाश ह्यवच्छिन्दन्तो ऽर्था, देशास्तस्य भवन्ति। तत्कृतावच्छेद चाकाशमपि तेषामा-

धारभावापत्तेरेव इत्यन्योन्यदेशत्वम् । मूर्त्तामूर्त्तयोर्मूर्त्तास्त्वव्यापकाः परस्परमवच्छेदका न भवन्तीत्याधार एवैनयां देशः ॥ १६ ॥

कथं तर्हि देशे गौणव्यवहारः । यदि हि कस्य चिन्मुख्याः प्रदेशा आत्मभूतास्युस्तदाय युक्तः स्यात्नान्यथेत्यत आह ॥

भिन्नवस्त्वाश्रया बुद्धिः संयोगिन्यनुवर्तते ।
समवायिषु भेदस्य ग्रहणं विनिवर्तते ॥ १७ ॥
अतः संयोगिदेशानां गौणत्वं परिकल्प्यते ।
अविवेकात्प्रदेशेभ्यो मुख्यत्वं समवायिनाम् ॥१८॥

भिन्ने पृथक्सिद्धे वस्तुनि आश्रयो यस्या बुद्धेः । अप्राप्तयोः प्राप्तिः संयोग इति पृथक्सिद्धपदार्थविषया संयोगबुद्धिः भेदस्य ग्रहणं विनिवर्तत इति । यतो ऽपृथक्सिद्धानामिह बुद्धिहेतुः समवायो यथा इह कपालेषु घट इति भेदेन ग्रहणादविवेकाद्विभक्तुमशक्यत्वात् । यतो भिन्नाबुद्धिः संयोगिनां अतस्तत्प्रदेशानां गौणत्वं । यतश्च समवायिनामभिन्ना बुद्धिरतस्तत्र मुख्यत्वं । समवायप्रत्ययाद्धि प्रदेशेभ्यो विवेक्तुं समवायिनो न शक्यन्त इति तेष्वेव देशेषु कपालादिष्वेव तद्वारव्यवहारविषयो द्रव्यमुपलभ्यते । अतस्तत्र मुख्याः समवायिन प्रदेशत्वेन व्यवस्थाप्यन्ते । संयुक्तानां तु नैवमिति गौणत्वमित्यनेनौपचारिकत्वमाकाशदेशानां समर्थितम् । ननु च यथा घटादीनां सयोगिनां परस्परसंयोगेऽपि परस्परदेशसंज्ञा न भवति एवमाकाशेनापि न स्यात् । नैतदस्ति । आकाशेन सदा सम्बद्धा इत्यादित्य इति तदध्यारोपो युक्तो न तु घटादीनामपि नियतसंयोगानाम् । अत एव घट दिव्याकाशानुगत. प्रत्ययो दृश्यत एव घटाकाश इत्यादि, अध्यारोपे च न भेदविगलनमित्युक्तम् ॥ १७ ॥ १८ ॥

तदेव वैशेषिकदर्शनाश्रयेण जातिपदार्थव्यक्तिरूपपादिता । इदानीं विज्ञानवादेनापि पदार्थव्यवस्थामाह ॥

अनुवृत्तिरूपां यां प्रख्यातामाकृतिं विदुः ।
के चिद्बुद्ध्यानुवृत्तिरूपां तु द्रव्यत्वेन प्रचक्षते ॥ १९ ॥

सर्वपार्षद हीदं शास्त्रमिति शब्दार्थो ऽर्थ इति वा पदार्थव्य-

वस्त्वेयमनुगताकारा या बुद्धिस्तस्यां प्रतिभासमानस्तदाकारो ऽर्थरूपतया ऽवसीयमानश्च पुरोदेश्यविकल्पयोरभेदाध्यवसायात्सामान्यमाहुः । व्यावृत्ताकारबुद्धिसंश्लेषितत्वाकारो ऽत्र च दर्शने द्रव्यमिति प्रस्तुत्वादुक्तम् । एवं च बाह्यस्य सामान्यस्याभावात् आकाशादावपि तत्समर्थने न प्रयतितव्यम् । अनपह्नवनीयानिन्नाकारप्रत्ययोपजनस्य सर्वत्रैव सिद्धेर्विज्ञानत्वे च सर्वत्रैव प्रत्ययान्यकल्पनत्वेन । शब्दादुच्चरिताद्धा ऽऽकारवती बुद्धिरुत्पद्यत इति तदाकारस्यैव शब्दार्थत्वं न बुद्धे । सद्भावाकारो बाह्योऽस्तु नाम वा, शब्दार्थत्वस्य न पुनश्चित्रीयते ॥ १९ ॥

ननु च वस्तूनां देशकालादिनिमित्तो भेद इति तदनादरेणाभिन्नान्येव तानि सिद्धानीति किमर्थं व्यतिरिक्तसामान्यकल्पनायां प्रयस्यत इत्याशङ्क्याह ॥

भिन्ना इति परोपाधिरभिन्ना इति वा पुनः ॥
भावात्मनु प्रपञ्चो ऽयं संसृष्टेष्वेव जायते ॥ २० ॥

निरुपाधिनो वस्तुनो ऽव्यवहार्यत्वात्सर्व एव परोपाश्रयो व्यवहार इति सामान्यादौ व्यतिरिक्तसामान्यकल्पनैव माकारीत्यत्र तात्पर्यार्थः ॥ २० ॥

तदेव व्यतिरेकमुखेनापि प्रपञ्चयति ॥

नैकत्वं नापि नानात्वं न सत्त्वं न च नास्तिता ॥
आत्मतत्त्वेषु भावानामसंसृष्टेषु विद्यते ॥ २१ ॥

एकत्वसत्त्वाधीन एकत्वेन व्यवहारः, पृथक्त्वनिबन्धनो नानात्वेन व्यवहार, सत्तानिबन्धनः सत्त्वेन, स्वरूपसत्त्वेन तु सामान्यादीनामभावोपाधिर्नास्तीति व्यवहार, इति संसर्गदर्शने सर्वः परोपाश्रयो ऽयं प्रपञ्चो वैचित्र्यम् ॥ २१ ॥

एवं व्यतिरिक्तोपाधिदर्शनमुपन्यस्याधुना स्वशक्त्य एवोपाधय इत्यद्वैतदर्शनाश्रयेणापि प्राह ॥

सर्वशक्त्यात्मभूतत्वमेकस्यैवेति निर्णयः ।
भावानामात्मभेदस्य कल्पना स्यादनर्थिका ॥ २२ ॥

एकमेव ब्रह्म सर्वशक्तीति प्रमाणेन सिद्धे ऽस्मिन्नर्थे ऽविद्या-परिकल्पितस्य सर्वभेदस्यापारमार्थिकत्वात् कार्यनानात्वोक्तीयमानः शक्तिभेद एवैकस्य युक्तो न तु स्वरूपभेदः ॥ २२ ॥

तथा च ॥

तस्माद् द्रव्यादयः सर्वाः शक्तयो भिन्नलक्षणाः ।
संसृष्टाः पुरुषार्थस्य साधिका न तु केवलाः ॥ २३ ॥

द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणा. पदार्था न पृथ-ग्भूताः । एकस्यैव शक्तयो विलक्षणव्यापारानुमेया इति ता यथायथ-मुपगतसमन्वया. प्रावरणाद्यर्थक्रियाकारिण्य इत्यस्मिन्मते सर्वत्रैव जातिव्यक्तिप्रविभाग कल्पित , सत्यासत्यौ तु यौ भागौ इत्यत्र वक्ष्य-माण इति नाकाशादीनामपि कश्चिद्विशेष इत्यर्थ. । यथा हि वैशेषिका-णां व्यतिरिक्त सामान्यं, नैवमिह, केवल विश्वमूर्त्तेः पदार्थस्य श-क्तिमात्रं । न केवलं सामान्यमेव यावद् द्रव्यादयो ऽपीति प्रसङ्गात्क-थित । भेदाप्युपगमे ऽपि द्रव्यादीनां संसृष्टानामर्थकारित्वं परमेकमेव शक्तिमदस्त्वित्यर्थ. ॥ २३ ॥

तत्रैतत्स्यात्संसृष्टानां साधनत्वेनासामर्थ्यं संसर्गस्य तथात्वा-त्तस्य च व्यतिरेके द्वैतापत्तिरित्याशङ्क्याह ॥

यथैव चेन्द्रियादीनामात्मभूता समग्रता ।
तथा सम्बन्धिसम्बन्धसर्गे ऽपि प्रतीयते ॥ २४ ॥

चक्षू रूपालोकमिश्रितं, मन इन्द्रियार्थान्धपरम्पराहितविशेषाः संघटिता विज्ञानहेतवो ऽन्वयव्यतिरेकाभ्यां दृष्टा इति नेयमेभ्यः सामग्री नाम पदार्थान्तरं जनिका । अत एव हि सामग्रीजनकाः साम-ग्रीशब्दवाच्या वस्त्वन्तरस्यानुपलब्धे । एवमेकेन सम्बन्धिना सर्वश-क्तीनां साधारणभूतत्वेन प्रकृतत्वात्सम्बन्धो द्रव्यादिशक्तीनां । ततो य एकस्मादाधारव्यतिरेकात्संसर्गो रूपसम्मूर्च्छनं तस्मिन्नपि संसर्गे सति पुरुषार्थसाधके स्वभावभूता समग्रता विज्ञायते । तत्रापि ह्यात्म-भूतैव न्यायायाता । द्रव्यमात्रेण गुणादिसंसर्गरहितेन व्यवहाराभावा-त् । एव गुणादिमात्रेणेत्यवश्यम्भाविन. ससर्गस्य द्रव्यादिभिर्विवेका-नवधारणात्तत्स्वभावेनैव । क्वचित्पाठ. तथा सम्बन्धिसम्बन्धसंसर्गो

ऽपि प्रतीयत इति । तत्रापि सम्बन्धिना सर्वशक्त्याधारेण सम्बध्यन्त इति सम्बन्धात् द्रव्यादिशक्तय , तासा सम्बन्धानां शक्तीनामन्योन्यसंसर्गो ऽप्यात्मभूत एवेति व्याख्या । यद्वा सर्वशक्ते पदार्थस्य सम्बन्धिना संसर्गे ऽपि ससर्गोक्तन्यायात्रापि लब्धैवासौ सरबन्ध., आत्मभूत एवासौ ससर्ग इत्यर्थ. । क्वचित्सामान्यानुगमाच्च विश्वस्य प्रमाणसिद्धो भेद इति प्रथमकाण्ड एव निर्णीतम् । तदेवम् यथादर्शनं जाति. शब्देन प्रतिपाद्यत इति इत्युपपादितम् । सा च नित्येति नित्यशब्दार्थ , तथा च नित्यत्वेनोपवर्णितात्वित्युक्तम् ॥ २४ ॥

तत्र जातेर्नित्यत्वे कार्योपयोगमाह ॥

नतदुत्पद्यते किञ्चिद्यस्य जातिर्न विद्यते ।
आत्माभिव्यक्तये जातिः कारणानां प्रयोजिका ॥२५॥

व्यक्तयधीना जात्यभिव्यक्तिरिति स्वाश्रयकारणानां प्रयोजककर्तृत्वमिवावलम्बते जाति. । सदा सन्निहिता कार्योत्पत्तौ कारणानां सहकारिणीत्यर्थ । निमित्तकारणत्वाद्वैशेषिकदर्शने जातीनामपोऽर्थ. प्रयोजकपदेन भट्टचार्यभिहित. ॥ २५ ॥

ननुकारणेष्वसन्निधानात्कथन्तेषाम्प्रयोजिकेत्याह ॥

कारणेषु पदं कृत्वा नित्यानित्येषु जातयः ।
क चित्कार्येष्वभिव्यक्तिमुपयान्ति पुनः पुनः ॥ २६ ॥

सर्वगतत्वाज्जातीनां कारणेष्वपि सन्निधानात्पदबन्ध. । तथा च जात्यात्मना कारणेषु कार्याणामवस्थानाज्जातिरूपापरागेण तदवसायात्तत्तत्साधनानां प्रवृत्तौ कार्यारम्भे तत्समवेतजात्यभिव्यक्तिरसकृदाश्रयोपलब्धौ भवति । नित्याः परमाणवः कारणानि दर्शनान्तरे प्रधानपुरुषादय., अनित्या वीरणादय. । क चिदिति । दृश्येषु किञ्चित्किल कार्ये जात्याश्रय निष्पन्नमपि । अदृश्यं यथा वायुर्द्रव्यमिति । तत्र हि तज्जात्यभिव्यक्तिर्नास्ति । इत्थं च कृत्वा प्राक् प्रभवादपि जातेर्विद्यमानत्वान्नित्यत्वं पोपितम् ॥ २६ ॥

तथा च जातिपदार्थनये ऽत्रजातेरुपयोगं दर्शयति ॥

निर्वर्त्यमान यत्कर्म जातिस्तत्रापि साधनम् ।

स्वाश्रयव्याभिनिष्पत्तौ सा क्रियाणां प्रयोजिका ॥२७॥

घट करोतीति कथमसतो निर्वर्त्यमानस्य क्रियायां साधनभावः कर्मण इत्येतदत्र चोद्य नावतरति । जातेः सत्त्वात्स्वाश्रयनिर्वर्त्तनाय क्रियां प्रत्युक्तेन कारणपदवन्धन्यायेन प्रयोजकत्वादिति जातिरूपाश्रयेण च साधनता व्यक्तिरूपाश्रयेण च कर्मता निर्वर्त्यत इति कारक कर्मेति सामानाधिकरण्योपपत्तिः । न हि जातिव्यक्ती अत्यन्तभिन्ने, गवाश्ववत्संसृष्टिलक्षणाभावादित्युभयरूपाश्रयो व्यपदेशो ऽविरुद्ध । प्राप्यविकार्ययोस्तु कर्मणो. सत्त्वात्सत एव साधनोपपत्तिरिति निर्वर्त्यमानमिति विशेष्याह । जात्यात्मना च निरूप्य, वस्तुकारणेषु योग्येषु प्रवर्तन्ते तदर्थिन इति प्रयोजिकेत्युच्यते । एतच्च जात्यभिधानपक्षे सम्भवति घटशब्देन जात्यभिधानात् । व्यक्तिपदार्थपक्षे तु, उपचारसत्ताश्रय साधनत्व वक्ष्यति । व्यक्तौ पदार्थे शब्दादेर्जन्यमानस्य कर्मण । साधनत्वं तथा सिद्धं बुद्धिरूपप्रकल्पितमिति ॥ २७ ॥

कारणानां प्रयोजिका जातिरित्युक्त तथा च जातिपदार्थपक्षे न द्रव्यस्य क्रियासाधनत्वं अपि तु सैव विधिप्रतिषेधयो. साधनं जातिरित्याह ॥

विधौ वा प्रतिषेधे वा ब्राह्मणत्वादिसाधनम् ।
व्यक्त्याश्रिताश्रिता जातेः सङ्ख्याजातिर्विशेषिका ॥२८॥

जाते पदार्थत्वे नञ विधौ चोदिते प्रतिव्यक्तिपरिसमाप्तत्वात्तस्याः सकृदनुष्ठाने ऽपि कृतशास्त्रार्थो ब्राह्मणमालभेतेति । एवं ब्राह्मणं न हन्यादित्यादिरपि प्रतिषेधो जातावेव, सकृदनुष्ठाने ऽपि च पुनरुद्भवने चोदितस्य दोष. । तथा हि अहननं चोदितं हननं तु क्वचिदनुष्ठितमिति विरुद्धक्रियाचरणात्प्रत्यवाय एव । क्वचित्तु विध्यनुष्ठान ऽन्यत्र तदभावे ऽपि न विरोधः । तथा चाहुः । नाकरणानि विधिं बाधन्ते प्रतिषधस्तु क्रियां निर्वर्तयतीति । तस्माद्यदा यदा हननबुद्धिरुत्पद्यते तदा तदा प्रतिषेध' सर्वत्र ब्राह्मणजातौ व्याप्रियते । अत्र च जात्यवच्छिन्नकर्त्तव्यताप्रतिषधावभासस्य सङ्कल्पस्यानुष्ठेयत्वम् । इत्थ प्रवृत्तिनिवृत्तिमये पुरुषार्थे सर्वत्र जातेरुपयोगो दर्शित' । अनुष्ठानस्य प्राधान्यान्नदङ्ग पराङ्गभूत सामान्य युज्यते द्रव्यसख्ययेति ।

वक्ष्यमाणन्यायेन संख्याविवक्षामप्याह । व्यक्त्याश्रितेति । व्यक्तिं द्रव्यमाश्रिता या एकत्वसंख्या तदाधारा या जातिराश्रयभेदाभिन्नेष्वेकत्वगुणेषु प्रत्ययानुवृत्तिनिमित्तं सा प्रातिपदिकवाच्यम् । द्रव्यजातिमेकार्थसमवेतसमवायादवच्छिनत्ति, जातेः पदार्थत्वे विभक्तेरपि संख्याजात्यभिधायित्वात् । वास्तवेन च रूपेण संख्याजातिर्विशेषिका । शब्देन तु प्रत्ययार्थस्य प्राधान्याद्विशेष्यासौ । एवं चैकत्वसंख्याया अत्र विवक्षितत्वान्न युगपदनेकव्यक्तिविषयमनुष्ठानं चोदितं । सत्यपि जातिपदार्थत्वे एकस्यामपि च व्यक्तौ सर्वात्मना परिसमाप्ता जातिरिति न का चित्क्षतिः । कामनाहेतुकश्च विधिरिति सत्यां कामनायां व्यक्त्यन्तरे ऽप्यनुष्ठानाविरोध । एव प्रतिषेधे ऽपि हननबुद्धिर्निमित्तमिति तदुत्पत्तौ सर्वत्र तत्प्रवृत्ति । तदेवं जातेः पदार्थत्वे चोदना सूपपत्ति । यदा ऽह वाक्यकार धर्मशास्त्र च तथेति ॥ २८ ॥

ननुजातिरेव पदार्थ इत्यवधारणानुपपत्तिः । तस्या स्वाश्रयसमवायाविर्योगात्, अत एव यासां कार्यसिद्धे कारणानामाश्रयेषु भाव इत्याश्रयानुत्कर्षयितुमशक्या जातिः केवला कथं शब्देनाभिधीयत इत्याशङ्क्य दृष्टान्तेनैतदुपपादयितुमाह ॥

यथा जलादिभिर्व्यक्तं मुखमेवाभिधीयते ।
तथा द्रव्यैरभिव्यक्ता जातिरेवाभिधीयते ॥ २९ ॥

प्रतिबिम्बे भावान्तरोत्पत्तिर्विरुद्धपरिणामेष्वित्यादिना पूर्वं निराकृतेति मुखादिप्रतिबिम्बमादर्शादौ भ्रान्त्या ऽपि दृश्यमानं मुखशब्दाभिधेयमादर्शादिव्यञ्जकरहितं शुद्धं । एव शब्दो ऽपि जाति व्यक्तिरहितामभिदधाति । अयमाशयः । आश्रयसमवायाविर्योगे ऽपि सर्वत्राभेदात्सङ्केतोपपत्तौ जातिः शब्दाभिधेया शुद्धा, शाब्दे ज्ञाने तथाप्रतीयते । ऐन्द्रियके तु ज्ञाने विवेकानवसायात् भवतु जातिव्यक्त्योः सम्मूर्च्छितावभासः, शब्दे तु यथासङ्केत प्रतीतिहेतुत्वे न का चित्क्षतिः ॥ २९ ॥

यथैवं शब्दादप्रतीयमाना व्यक्तयः कथं शब्दज्ञानविषयतया जातीर्विशिष्युरित्याशङ्क्याह ॥

यथेन्द्रियगतो भेद इन्द्रियग्रहणादृते ।
इन्द्रियार्थेष्वदृष्टोऽपि ज्ञानभेदाय कल्पते ॥ ३० ॥
तथात्मरूपग्रहणात्केषां चिद्व्यक्तये विना ।
सामान्यज्ञानभेदानामुपयान्ति निमित्तताम् ॥ ३१ ॥

शब्दा युगपदुपलभ्यन्तेयथानुपपत्त्याऽनुमितसत्त्वानीन्द्रियाणि नित्यपरोक्षत्वानुपलभ्यमानस्वगतचक्षु श्रोत्रादिविशेषाणि शब्दस्पर्शरूपरसगन्धेष्विन्द्रियार्थेषु चाक्षुषादिप्रत्ययविशेषहेतुभाव नियमेन प्रतिपद्यन्ते । न हि चाक्षुषं ज्ञान श्रोत्रेन्द्रियकार्य । एवमगृह्यमाणस्वभावा व्यक्तय । शब्देनाभिधानवेलायां केषां चिदेव सामान्यज्ञानभेदानां काश्चन प्रत्यक्षप्रत्ययानाभिहोपयान्ति हेतुनां व्यक्तय । शब्दे प्रत्यये शब्दार्थभूतानां सामान्यानां वस्तुत. समवायनियमात् विशेषमावेदयन्तीति न साङ्कर्य शब्दार्थ इत्यर्थ । अगृह्यमाणस्यापि तदानीं व्यक्तिरूपस्यान्यदा प्रत्यक्षकाले गृहीतत्वात् व्युत्पन्नसम्बन्धस्यापि तद्विषयावसायाविरोधात्तस्मिन्प्रत्यगृह्यमाणस्यापि हष्टं प्रतीतिविशेषहेतुत्वमिति । एतावता सामान्येनात्रेन्द्रियाणि हष्टान्त । केषां चित्सामान्यज्ञानभेदानामित्यर्थाक्षिप्तं नैव व्यक्तय इति लभ्यते । तदेवं केवल जात्यभिधानपक्ष समर्थित । तद्वदभिधाने तु न काश्चिद्दोष: जात्युपलक्षिते द्रव्ये ऽभिधाविश्रान्तेर्विरम्य व्यापाराभावात् । द्रव्यपदार्थनये तु जातिरनभिधीयमानैवमुपलक्षणमभेदेन सङ्ख्यार्थं द्रव्यस्येति, तत्रैव क्रियायोगोपलब्धेः शब्दवाच्यत्वं । यथोक्तं चोदनासु च तस्यारम्भादिति ॥ ३० ॥ ३१ ॥

इदानीं यदुक्त प्राक्, सर्वशक्त्यात्मभूतत्वमेकस्यैवेति, अत्रापि मते जातिव्यक्तिप्रविभागमाह ॥

सत्यासत्यौ तु यौ भावौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत्तत्र सा जातिरसत्या व्यक्तय स्मृता: ॥३२॥

अविद्यावृत्तिरूपस्य सर्वपदार्थेष्वागमापायिनो ऽसत्यत्वाद्व्यक्तिरिति व्यवहार. । तदेव हि सत्यं यस्मिंस्तत्त्वविहन्यते इत्यन्वयि रूपं भेदप्रत्यवेक्षेष्वबाध्यमानं सत्य जातिरिति व्यवहृतमद्वैतवादिभि. । तद्यथा । रुचकस्वस्तिककुण्डलादयो विकारा: परस्परोपमर्देन

भवन्तो ऽस्थिरप्रत्ययविषया , सुवर्णमित्येव तु समन्वयिविज्ञानादवसेयं स्थिरत्वम् । एवमभेदान्तरविवक्षायां तेज इत्येव सत्यं । तत्राप्यभेदस्तत्कारणमित्यन्तया परा प्रकृति. सत्या सर्वविकारानुयायिनी प्रशान्तकल्लोला चिदेकघना ब्रह्मेत्यागमविद । तदुक्तं पृथिवीधातौ किं सत्यं विकल्पः , विकल्पे किं सत्यं विज्ञानं, विज्ञानं किं सत्यं ॐ अथ तद् ब्रह्मेति । प्रतिभावमिति । परमतेन भावानां भेदाक्षिप्तायां चित्सामान्यस्य सर्वत्रानुगमादेव महासत्तारूपमभावाप्रतियोगि विश्वस्य जगत. सत्यरूपमवदातदर्शने. साक्षात्कृत्योपादिक्षद् मनप्रमाणम्, नमस्ते भगवत इति ॥ ३२ ॥

इत्थं चाद्वयदर्शने परमार्थसत्ये सैव जातिर्महासत्ताख्या परब्रह्मस्वभावा, तस्या एव गोत्वादिजातिभेदेन विवर्त्ते व्यवहार इत्याह ॥

सम्बन्धिभेदात्तत्रैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥ ३३ ॥

वक्ष्यमाणैराश्रयादिभि स्वसम्बन्धिभिर्भिद्यमानोपचरितभेदा गवाश्वादिषु सत्तैव महासामान्यमेव जातिर्गोत्वाश्वत्वादिका अपरसामान्य, नान्या परमार्थभिन्ना सा विद्यते । तथा गोः सत्ता गोत्वं नापरमन्वयि प्रतिभासते एवमश्वस्य सत्ता अश्वत्वमित्यादि वाच्यम् । तस्यामेव च गवादिभेदनिबन्धायां सत्तात्मिकायां जातौ सर्वे गवादयो डित्थादय आकाशादयश्च शब्दा वाचकत्वेन व्यवस्थिता इत्यसाङ्केतेन नियतोपाधिनश्चाजातेरभिधायिनः सिद्धा ॥ ३३ ॥

सर्वशब्दविषयत्वमेवाभिव्यनक्ति ॥

तां प्रतिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महासत्ता तामाहुस्तत्त्वतत्त्वदः ॥ ३४ ॥

सर्वभावेषु सद्रूपं सामान्यमनुगतं, अभावस्यापि बुध्याकारेण निरूपणात् । महासत्तया ऽनयाऽनियोगात् प्रातिपदिकमात्रवाच्या सत्ता । तदुक्तं प्रातिपदिकार्थं सत्तेति । धातुभिरपि साधनाधीनलब्धजन्मसु क्रियाद्यस्तिषु सत्तयैव यथापाप्युपगृहीतनानात्वा सत्तैवाभिधेयत्वमापद्यते । सिद्धसाध्यरूपार्थद्वयात्मना च तस्या एव व्यावृत्तेस्तद्परराद्यभावात् सर्वशब्दविषयत्वं सत्तायाः । प्रत्ययभागेनाप्यत्र य-

यापय सत्त्याकारकाद्युपाधिविशिष्टा सत्तैवाभिधीयते । सा चोदय-[illegible], सत्प्रत्ययस्य सर्वदानुवृत्ते । एते सत्तामात्रव्या-प्ते वहवो, यच्छेषा परिणामा., यत परविशेषेभ्यो लिङ्गमात्र म-द्वतस्य, तस्मिन्नते सत्तामात्रे महत्यात्मन्यवस्थाय विवृद्धिकार्य्यम-नुवर्तन्ते । प्रतिसंसृज्यमानाश्च तस्मिंश्च सत्तामात्रे महत्यात्मन्यव-स्थाय यत्तश्च सत्ताऽसत्त नि सदसदव्यक्तमलिङ्गं तस्मिन्प्रतियन्ती-त्येव सांख्ये बुद्धितत्व महच्छब्दवाच्यमाद्यं जगत्कारणं निर्दिष्टमि-त्यतो ऽनन्तरस्य विकारग्रामस्य कारणरूपानुगमात्सत्तारूपत्वमवि-रुद्धमिति सत्तारूप सर्वं जगदाख्यातं भवतीति सत्ताद्वैतवाद सां-ख्यतयेनाऽनुपबृंहित । एवं च सर्वशब्दवाच्या सत्ता शब्दप्रवृत्ति-निमित्तभूतेति यथायथं भिन्नोपाधिभावप्रत्ययाभिधेया सैव । नन्वेवं गोत्वमिति प्रकृतिप्रत्ययवैयर्थ्यमेकार्थतापसङ्ग । नैतत् । क्रियाविभेदेन स-त्ताया भेदात् । प्रातिपदिकेन गवाश्रयायास्तस्या अभिधानं प्रत्ययेन तु निष्कृष्टाश्रयस्य सामान्यस्याभिधेत्यदोष. । प्रकृत्यर्थनिमित्तश्च भावप्रत्ययभेद इति न साङ्कर्यप्रसङ्ग । यदुक्तं तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते इति ॥ ३४ ॥

एतदेवोपपादयितुमाह ॥

प्राक्तक्रमा विशेषेषु क्रिया सैवाभिधीयते ।
क्रमरूपस्य संहारे तत्सत्त्वमिति कथ्यते ॥ ३५ ॥

क्रियावाची धातु सत्ववाचिनामेति, गीयते क्रियासत्त्वे च सत्तैव । तथा हि । साधनपरिस्पन्दवशात्क्रियाणां व्यक्तिस्थानीयानां विशेषशब्दवाच्यानां पौर्वापर्ये तद्वतापि जातिस्तथात्वेन प्रतिभासत इति सैव साक्षात्सत्तास्या क्रिया सकलधातुविषयातस्या एवावान्तरो धात्वर्थभेद इत्यनन्तरमेव वक्ष्यते । साधनसम्पर्कहेतुकप्रतीयमानरू-पापरामर्शे सत्तैव सत्वं द्रव्यमित्युच्यत इति सिद्धसाध्यरूपो द्विधा विवर्तः सन्मात्ररूपस्य परस्य ब्रह्मण प्रतिपादित । तदेव हि सर्वत्रा-नुगतम् । न चात्र दर्शने सद्भ्य सत्ता व्यतिरिक्ता भावत इति सर्वं तन्मय । ततश्च सर्वशब्दानां सत्तावचनत्वाज्जातिपदार्थव्याप्ति । यद्यपि च द्रव्यपदार्थे ऽपि ब्रह्मद्रव्यस्याभिधानमुपाधिभेदभिन्नस्य वक्ष्यति तथापि तात्पर्यभेदादवस्थाभेद. । जातिपदार्थे सर्वत्रान्वयि-

रूपं जात्यात्मना ब्रह्म विवक्षितम् । द्रव्यपदार्थनये तु परिनिष्ठितरूप परमार्थनयेति दर्शनविकल्पाश्रयमेवं च पक्षद्वये ऽनेकपक्षीभावरूप. सिद्धान्त । परमार्थदृष्ट्या ऽत्र सर्वपार्षदत्वात्पुनरस्य शास्त्रस्य दर्शनान्तरोपन्यासः। एष च सर्वत्रैवास्य ग्रन्थकारस्याभिप्राय । पदार्थचर्चाविषये ब्रह्मदर्शनतयैव सम्बन्धादिविचारे विनिगमनात् ॥ ३५ ॥

इदानीं समग्र क्रियाकलापः सत्ताविवर्त्त एवेति निरुक्तकारमतेन सवादमाह ॥

सैव भावविकारेषु षडवस्थाः प्रपद्यते ।
क्रमेण शक्तिभिस्ताभिरेवं प्रत्यवभासते ॥ ३६ ॥

षट् भावविकारा भवन्तीति ह स्माह भगवान्वार्ष्यायणिरिति निरुक्तकारः । तत्र च भावस्य परमार्थरूपस्य सत्तात्मकस्य जन्मादयो विकारा इत्यर्थ. । सन्मात्रस्वभावा हि सत्तोत्तरोत्तरविकारापत्तौ जायते ऽस्ति विपरिणमते वर्धते ऽपक्षीयते विनश्यतीति व्यपदेशमासादयति । प्रथमतरं च सन्मात्रं रूपमस्तिशब्देन नाभिधीयते अपि तु जन्मोत्तरकालभावी तस्या अवस्थाविशेष. । जन्मानन्तरभावि हि रूप तस्या लोके सदिति व्यवहार्यं । तत. प्राक्पश्चाद्भाविन्यः पुनरवस्था जन्मविपरिणामादिरूपेण व्यवहार्या । तथा हि। स्वशक्तिमाहात्म्यात्पूर्वं जायत इत्यवगीयते पश्चादस्तीति । अवस्थितस्य विकारापत्तिरिति विपरिणमते तच्च विपरिणमन्मुहूर्तमपि नावतिष्ठते इति वर्धते यावदेनेन वर्धितव्यं ततो ऽपक्षीयते मुहूर्त्तमप्यनवस्थानादेव। अत एवोक्तं ततो ऽपायेन युज्यत इति । ततो ऽपि विनाश इत्येवं क्रमस्थिति. । एवभूतास्तस्या काश्चन शक्तयो विद्यन्ते येनैकैव सती तथा तथा विचित्रेण रूपेण प्रतिभासते। न च परिणतिदर्शनाभिप्रायेणाय विकारशब्द । अनित्यत्वप्रसङ्गात् अपि तु विवर्तपर्यायो ऽयं। तथा हि सर्वशक्त्यात्मभूतत्वात् ब्रह्मणो ऽनेकविकारप्रदर्शनसामर्थ्यलक्षणा अविद्याख्या शक्ति कार्यभेदादुपचरितनानात्वा समस्तीत्यागमविद । इत्थ च स्वाभिरेव शक्तिभिरव्यतिरिक्ताभिर्जन्मादिरूपतया ऽविद्यायामाभासते । तदेव ब्रह्म सर्वभावेषु समानरूप सत्तात्मकमन्यस्य तद्व्यतिरिक्तस्याभावादित्येषा ऽत्रार्थ. ॥ ३६ ॥

यदि तर्हि स्वशक्तिसाहाय्याज्जन्मादिरूपतया सत्तैवावभासते कथं न युगपदवभास । क्रमेणेति कथं । न हि क्रमो नाम काश्चित्क्रियाविशेष इत्याशङ्क्य कालाख्या इपि शक्तिर्ब्रह्मण एवेत्याह ॥

अनपूर्व क्रियोपस्था यत्रैवं कालदर्शनम् ।
पौर्वापर्यादिरूपेण प्रविभक्तमिवस्थितम् ॥ ३७ ॥

यो ऽयं शिवायां क्रम सो ऽयमात्मभूतो ऽरवा सत्तायां । न केवलं ना क्रिया एव. क्रमवद्भ्यो व्यतिरिक्तस्य क्रमस्यासञ्चेतनात् तु यत्र क्रम इदकालस्तेन । काल नाम पदार्थान्तरं तीर्थिका पश्यन्ति पौर्वापर्यादिरूपेण प्रविभक्त । कालस्य प्रविभक्तत्वाहर्शनमपि प्रविभक्तमित्युक्तम् । तात्पर्येण तु काल पौर्वापर्यादिरूपेण प्रविभक्त इव क्रियापारिवशात् । क्रमाख्या हि कालशक्तिर्ब्रह्मणो जन्मवत्सु पदार्थेषु जन्मादिक्रियाद्वारकमेव पौर्वापर्यभावमालोपगमविधायिनी नापरो द्रव्यभूत काल इत्यव्याहतकलं वस्य कालशक्तिसुपाश्रिता जन्मादयो विकारा षटभावभेदस्य योनय इत्यत्र शब्दप्रभायां निर्णीतो ऽयमर्थ. ॥ ३७ ॥

ननु च जन्मनाशावस्तुत्वात्कथ सत्तात्मकौ स्यातामित्याशङ्क्य नाशस्य तावत्सत्तात्मकत्वमुपपादयति ॥

तिरोभावाभ्युपगमे भावानां सैव नास्तिता ।
लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते ॥ ३८ ॥

अनपायोपजनविकारित्वान्नित्या ब्रह्मात्मिका सत्ता निरन्वयविनाशा। स हेत्वभावो नाम न भावाद्व्यतिरिक्त. । केवल प्रागूर्ध्वं च तिरोभावमात्र भावावभासस्य यदस्माभिरभ्युपगम्यते सैव नास्तिता कथ्यत । सत्तैव तिरोभूता स्वकारणेषु शक्तिरूपतया ऽवस्थिता । वस्तूनां नाशो न तु निरूपाख्योऽ सौ । समस्तेषु च भावेषु तिरोभूतेषु उपसहृतक्रम सिद्धरूप तिरोभावो नाश इत्यादिनामपदप्रत्याख्य. । यदा तु सैव नास्तिता तिरोभावावस्थारूपा साधनसम्पर्कवशात्प्रतीयमानस्वभावा विवक्षिता तदाख्यातपदप्रत्याख्या पूर्वावस्था ऽपक्षीयत इत्युच्यते। तदुत्तरा तु विनश्यतीति द्वौ भावविकारौ प्रातिलोम्यपरिणामलक्षणौ। तत्र च भवनधर्मणो भावस्य भवनविरोधात्तिरोभावमात्रं विनाश ॥३८॥

एवं सत्ताप्रतियोगिनोऽपि प्रथमं तद्विकारत्वमवस्थाप्य जन्मनस्तद्विकारत्वं व्याचष्टे ॥

पूर्वस्मात्प्रच्युता धर्माद्प्राप्ता चोत्तरं पदम् ।
तदन्तराले भेदानामाश्रयाज्जन्म कथ्यते ॥ ३९ ॥

कारणे शक्तिरूपेणावस्थानाख्यात्पूर्वधर्मात्प्रच्युता, धर्मोत्तराभिव्यक्तिप्रगुणां निष्ठामप्राप्ता सत्ता, गृहीतक्रमा कार्याभिमुखोत्तरोत्तरावस्थाविशेषमासादयन्ती, जायत इति व्यपदिश्यते, नत्वसत एवोत्पादो जन्म । तद्यथा न सतोऽत्यन्तं विनाशः, तथा जन्मापि नाभूतपूर्वस्याविर्भावः । एतच्च नाभावो जायते भावो नेति भावोऽनुपाख्यतामित्यादिना प्रकटयिष्यति । अत एव चावस्थामात्रत्वात्कार्यकारणयोरभेदाद् यथाविवक्षं जनिक्रियाकर्तृत्वोपपत्तिरङ्कुरो जायत इत्यादौ । एतच्च निपुणतरं कारकसमुद्देशे वक्ष्यते । पूर्वापरावस्थान्तरालवर्त्तिक्षणपरम्पराक्रमविवक्षायां च जनिक्रियान्वयो न उपरिष्टादवस्थायाम् । तथा च वक्ष्यति । पूर्वामवस्थामजहत्संस्पृशन् धर्ममुत्तरम् । संमूर्च्छित इवार्थात्मा जायमानोऽभिधीयत इति । उत्तरावस्थायाश्च पूर्वावस्थासु समारोपात्कर्तृत्वं । व्यावृत्तं हि कारकं निरूपयन्तो जायत इति व्यवहरन्ति । निष्ठायां पुनरस्तीति जन्मोत्तरकाला सत्ता व्यपदिश्यते । ततोऽपि धर्मान्तराविर्भावोन्मुखतायां विपरिणमते । तत्रापि वृद्धौ वर्धत इति जन्मविशेषा एवैते न पृथगुपात्ताः । तदयमानुलोम्यपरिणामः । तदेवं सत्तैव क्रियाविवर्तान्वयिनी । षण्णामेव स्वपरः क्रियाभेदः सर्वधातुविषयः । तत्रैव च सिद्धरूपतायां द्रव्यता । सिद्धिर्हि निष्पत्तिरिति क्रियापूर्वभाविनी नात्यन्तमर्थान्तरभूता ॥३९॥

अथ यदुक्तं सम्बन्धिभेदात्सत्तैव भिद्यमानेति, तदिदानीं सम्बन्धिनं दर्शयितुमाह ॥

आश्रयः स्वात्ममात्रा वा भावा वा व्यतिरेकिणः ।
स्वशक्तयो वा सत्ताया भेददर्शनहेतवः ॥ ४० ॥

क्रियाद्रव्ययोः सत्तात्मकत्वप्रतिपादनात्तद्व्यतिरेकेण वस्त्वन्तराभावाद्यद्यपि सर्वं सत्तात्मकपरब्रह्ममयं, तथापि व्यवहारे ऽविद्याप्रवृत्तिरूपे यथावभासं भेदस्यासत्यस्यानपह्नवनीयत्वात् द्र-

व्यादिसत्ताश्रय प्रतिभागो ऽयमविरुद्ध. । तत्राश्रय सत्तायाः स्वाधारो, व्यञ्जकत्वात् भेददर्शनस्य भेदावभासस्य न तु भेदस्यैव भावतो भेदाक्षेतु । तद्यथा । एकमपिमुखं तैलोदकादर्शमणिकृपाणादावनेकरूपमवभासते । एवं व्यञ्जकानां गवादीनां भेदात्सत्ता गोत्वाश्वत्वादिरूपतया ऽवभासत इत्यर्थ । स्वात्मीया वा मात्रा कलाः परिकल्पिता भागा अंशा गोत्वादिसामान्यविषयाः परिच्छिन्नविषयाः सर्वविषयाया सत्ताया विच्छिन्नावभासतां दर्शयन्ति येन तैरेव सा विच्छिन्नेवाविच्छिन्नाप्यवभासते । ते चाश्रयभेदादेव तत परिकल्पितभेदा. । तथा च,सामान्यान्यभिधीयन्ते सत्ता वा तैर्विशेषितेति, गोत्वादिभि सत्ताभेदं वक्ष्यति । दृष्टश्च स्वांशैरेव परिकल्पितैर्भेदावभास । तद्यथा अवयविन । आत्मा परो ऽपि सम्भवति कल्पनानिर्मितेन भेदेनेति, स्वग्रहणेन विशेष्यते स्वश्चासावात्मेति । दृष्टश्च काल्पनिको भेदो यथा हन्त्यात्मानमात्मनेति । न ह्यात्मव्यतिरिक्तो हन्ता कश्चित्प्रत्यवभासते । अर्थान्तरत्वेनावभासमाना वा देशकालेन्द्रियादयो भेददर्शनहेतवः । सत्ताया वा इहेदानीमिदमन्यत्रान्यदान्यदिति देशादिनिमित्तो वस्तुभेद. । तथा देशासन्निविप्रकर्षकृतो ऽन्यथावभासो वस्तूनां । यथाहु. दूरे यथा वा महत्सु महानल्पोपि दृश्यत इति । तथा रात्रौ नीलोत्पलादीनामन्यथावभास , अन्यथाहनीति कालकृतो भेद । तथा च कामलाद्युपहतनयनानां शुक्ले शंखे पीतत्वावभास इति इन्द्रियनिमित्तो भेदः । देशादावपि च सत्ताया संबन्धिनो ऽन्ये भेदका इति विषयभेदान्नेतरेतराश्रयता । तथा चायमत्र परमार्थ । आत्मीया एव शक्तयो योग्यतास्यास्सत्तायास्तथाविधा. सन्ति याभिर्विश्वप्रपञ्चं रचयति । तद्यथा चिन्तामणिरर्थिनां यथासंशयमाकारनानात्वं दर्शयति, तथानन्तशक्ति सन्मात्रं ब्रह्माविद्याविलसितसह सांसारिकप्रमातृविषये नानारूपं चकास्तीत्यन्ते वस्तु सतत्वमुद्घाटितम् ॥ ४० ॥

इत्थं च दर्शनान्तरोपन्यासपूर्वकं स्वदर्शने जातिपदार्थव्यवस्थामुपपाद्य व्यवहारे भिन्नाया गोत्वादिजातेर्यथासंभव स्वगतो धर्मश्चर्च्यत ॥

पृथिव्यादिष्वभिव्यक्तौ न संस्थानमपेक्षते ।
अनुच्छिन्नाश्रयाज्जातिरनित्ये ऽप्याश्रये स्थिता ॥ ४१ ॥

पृथिवीत्वाप्त्वतेजस्त्वादयो जातिविशेषाः प्रतिनियतावयवरचनानपेक्षा एव महति परिमिते चाश्रये ऽभिव्यक्तिमासादयन्ति। तथा हि। लोष्ठो ऽपि पृथिवीरूपेण प्रतीयते मृत्समूहो ऽपि घटो ऽपि पर्वतो ऽपीत्यादि । एवं समुद्रो ऽपि बिन्दुरपि चोदकत्वेन प्रतीयत इत्यादि वाच्यं । क्वचित्तु गोत्वादिका सालत्वादिका तालत्वादिका च जातिः संस्थानमभिव्यक्तौ नियमादपेक्षत एवेत्यर्थादुक्तं भवति । तथा समवेतत्वे ऽपि न गुणवदाश्रयविनाशात् जातिर्विनश्यति । घटादौ गुणा ह्याश्रयप्रतिबन्धोदयाद् युक्तं यदाश्रयविनाशमनुविनश्येयुः । जातीनां चाश्रयप्रतिप्रबन्धो, नात्मालाभ । केवलं प्रतीतावाश्रयमपेक्षन्ते ना । एकव्यक्तिविनाशेपि च तदन्यत्रानुगतप्रविदन्यथानुपपत्तेरनुमितिसद्भावाज्जातिः समवस्थितैवेत्यनुच्छिन्नाश्रयादाश्रयादुच्छेदो ऽस्या नायाति। आश्रयो ऽस्या नोच्छेदहेतुरित्यर्थः । आश्रयश्च विनश्यन्नुच्छेदहेतुः सम्भाव्यत इति नाश्रयविनाशादस्या विनाश इत्यर्थः ।तृतीयार्थे वा पञ्चमी आश्रयेण सह न विनश्यतीत्यर्थः ॥ ४१ ॥

ननु महाप्रलय नित्यानां सर्वेषां विनाशादाश्रयाभावे कथं जातयोऽवतिष्ठेरन्नित्याह ॥

अनुच्छेद्याश्रयामेके सर्वा जाति प्रचक्षते ।
न यौगपद्यं प्रलये सर्वस्येति व्यवस्थिता ॥ ४२ ॥

एक इति । य आधारं विना तन्मात्रावस्थानमन्ते नेच्छन्ति त आश्रयोच्छेदो नास्त्येवेत्याहुः । तथा हि । न कदाचिदनीदृशं जगदिति वन्दतो महाप्रलयस्याभावमिच्छन्त परमाणुत्वादिजातिवद् घटत्वादिजातीनामाश्रयो ऽनुच्छेद्यः सर्वथोच्छेत्तुमशक्य इत्याहु । तथा च सदैव व्यवस्थिता जातयः, कस्य चिदाश्रयस्यापाये ऽन्यपराश्रयवृत्तित्वादिति नित्यत्वसिद्धि । अथ वा पृथिव्यादौ नष्टे ऽपि पार्थिवादिपरिमाणुषु पृथिवीत्वादयो विश्राम्यन्ति, तद्गतेषु च रूपादिषु रूपत्वादयः। आदिसर्गे च युगपत् सर्वभावप्रलयो नास्तीत्यस्मिन्मते व्यवस्थिता एक इति समन्वयः । एवमेकस्मिन्नपि ब्रह्माण्डे युगपद्भावानां प्रलयो नास्तीति दर्शनाश्रयेणोक्तम् । यद्वा ब्रह्माण्डान्तरे विनष्टे ऽपि ब्रह्माण्डान्तरसम्भवाद्युगपत्प्रलयो नास्ति । तथा चाहुः । अण्डानामीदृशानां तु परिसंख्या न विद्यत इति ॥ ४२ ॥

ये तर्हि महाप्रलयमिच्छन्ति तन्मते कथमित्याह ।

प्रकृतौ प्रविलीनेषु भेदेष्वेकत्वदर्शिनाम् ।
द्रव्यसत्वं प्रपद्यन्ते स्वाश्रया एव जातयः ॥ ४३ ॥

एकत्वमभेदमूलम्, प्रकृत्या प्रधानेन सह परब्रह्मणा वा ये पश्यन्ति जगत्, तेषां मते सर्वथा भावप्रपञ्चस्य निरन्वयविध्वंसाभावान्महासामान्यरूपे तत्र परस्मिन्मूलकारणे प्रविलयमात्रं महाप्रलय इति शक्तिरूपेषु पदार्थेषु यथायथं स्वजातियोगस्तदानीमविरुद्ध एवेति द्रव्यात्मना जातीनां तदानीमपि सत्वं, द्रव्यादर्थान्तराभावात्। अत एव सत्वमित्येव वक्तव्ये, द्रव्यग्रहण द्रव्यादभिन्नत्वं बोधयितुम्। यद्वा द्रव्यं मूलकारणं तत्र सत्व तस्य वा यत्सत्वं कारणसत्तामवलम्बत इत्यर्थः। अद्वैतिनां हि कारणमेवानुगतं सामान्यं। द्रव्यशब्दो वा वस्तुपर्यायः। तेन द्रव्यसत्वं वस्तुन एव विद्यमानत्वं मुख्य सत्त्व, न तूपचरितं साधारणमेव, शक्तिरूपतया ऽवस्थानादित्यर्थः। वैशेषिकदर्शने तु निराधारा एव घटत्वादिजातयो महाप्रलय आसते न हि गुरुत्वादयः। पतनमासां मामूदित्याधार। अभिव्यक्तिमात्रे तस्योपयोगात्। इदानीं चानभिव्यक्ता एवासतां को विरोधः। शास्त्रकारस्तु स्वसिद्धान्तेनैव निर्मितवान् ॥ ४३ ॥

एवं व्यक्तिसर्वगतत्व सामान्यानामाश्रित्योक्तम्। इदानीं सर्वगतत्वेनाप्याह ॥

ब्राह्मणत्वादयो भावाः सर्वप्राणिष्ववस्थिताः ।
अभिव्यक्ताः स्वकार्याणां साधका इत्यपि स्मृतिः ॥४४॥

भवन्ति सर्वत्रेति भावा ब्राह्मणत्वक्षत्रित्वादयः सामान्यविशेषाः। ते प्राणिषु पिण्डेषु क्षत्रियादिष्ववस्थितत्वात्सर्वगता। तथा ऽपि च ब्राह्मणमालभेतेत्यादौ न साङ्कर्यप्रसङ्गः। यस्मात्सर्वगतत्वे ऽपि प्रतिनियताभिव्यञ्जकव्यङ्ग्यता, इति प्रतीतस्य क्रियाङ्गत्वाद्यर्थैवाभिव्यक्तिमासादयन्त्युपदेशादिना व्यञ्जकेन, तत्रैव स्वकार्यसम्पादका इत्यविच्छिन्नागमपारम्पर्येण स्मर्यते। यथा सर्वगतत्वं पारम्पर्यागतं तथा प्रतिनियतव्यञ्जकव्यङ्ग्यत्वमपीत्यर्थः ॥ ४४ ॥

एवं च प्रलये घटत्वादिजातय. परमाण्वादिष्ववस्थिता इति

प्रकरणसामर्थ्यादुक्त भवति । आदिग्रहणेन ह्यचेतने जातीनामपि सर्वगतत्वमत्र विवक्षितं । तेन जातयो ऽप्यचेतनेष्वपि स्थिता इति पूर्वं सर्वगतत्वमाह ॥

चित्रादिष्वप्यऽभिव्यक्तिर्जातीनां कैश्चिदिष्यते ।
प्राण्याश्रिताश्च ताः प्राप्तौ निमित्त पुण्यपापयो ॥४५॥

आलेख्यनिर्मिते पुस्तकर्मणा दार्वादिना वा कृते ऽपि ब्राह्मणे सादृश्यात्तदाकारानुकारप्रत्ययोदय इति तत्रापि तज्जातिप्रकाश.। प्राण्युपघातात्पुनरधर्म इति चित्रस्थोपघाते तदभाव.। एव धर्मो ऽपि चित्रस्थब्राह्मणपूजायां न भवति। कैश्चिदिति वचनादत्रारुचिं सूचयति । किल मुख्यसादृश्यात्प्रतिकृतिषु प्रत्ययानुगमोपपत्तिर्न तु तद्बशात् जातिसमवाय इति युक्तं। तदेव पूर्वं, निर्वर्त्यमानं यत्कर्मेत्यादिना प्राक्प्रभवनादपि जाते सद्भावान्नित्यत्वमुपपादितम् । इदानीं पुनराश्रयध्वंसे ऽप्यवस्थानादिति पूर्वापरकोटिगामित्वात् प्राक् प्रध्वंसाभावाभ्यामयोगात् परिपूर्णस्य नित्यत्वस्यासिद्धिः । ननु अविदितशब्दार्थसम्बन्धस्यान्येभ्यो व्यावृत्त गोष्वनुगतं रूप गौर्गौरिति न प्रतिभासते । यदि च ताभिर्व्यक्तिभिरभिव्यक्त तत्सामान्यं, कथं तत्प्रत्ययो न स्यात् ॥ ४५ ॥

अथान्येभ्यो ऽव्युत्पन्न. तेभ्य' प्रतिपत्स्यते ते ऽपि कुतस्ते ऽपि कुत इति साक्षाद्दर्शिनं सर्वज्ञं द्रष्टारमन्तरेणान्धपरम्परा प्रसज्यते । सर्वत्र च शब्दार्थसम्बन्धेऽन्धपरम्पराया एव वृद्धव्यवहार इति नाम कृतं स्यान्निर्मूलत्वाद् । ब्राह्मणत्वादीनां रूपव्यञ्जनसादृश्याद्बालमूकादिज्ञानसदृशो ऽप्यसौ गोत्वादीनामिवानुवृत्तस्य व्यावृत्तरूपावभासो नास्तीवश्यमेव सर्वज्ञो ऽभ्युपगन्तव्य इति मन्यमान आह ॥

ज्ञानमस्मद्विशिष्टानां तासु सर्वेंद्रियं विदुः ।
अभ्यासान्मणिरूप्यादिविशेषेष्विव तद्विदाम् ॥ ४६ ॥

अस्मदिति पञ्चमीबहुवचनम् । पञ्चम्या अदित्यदादेशे कृते प्रतिनियतपदार्थदर्शिभ्यो ऽस्मदादिभ्यो विशिष्टाः सर्वदृश आदिगुरवः संति । तथा च पतंजलिः, स पूर्वेषामपि गुरुः कालेनानवच्छेदादिति । सर्वज्ञानामीश्वरो गुरुरुपदेष्टा । तस्य च बुद्धीन्द्रियदेहानां

कालेनानवच्छेदाविशेषतः । अन्यथा प्रलये वृत्ते पुनरुत्पत्तेषु ब्रह्मादिषु क इदानीं स्यात्तत्र च नि शास्त्र निरनुष्ठान विधिनिषेधयोरन्धमूकप्राय जगत्स्यात् । अथ प्रलयो नैवास्ति, अपि तु न कदाचिदनीदृश जगदिति जैमिनीया. । तदेतदसत् । सर्वशास्त्रेषु प्रलयस्मृतेः । अथाम्नायस्य क्रियार्थत्वात् भूतार्थवाचक वाक्यमप्रमाणमित्युच्यते । तथा हि कार्यपरत्वनैव भूतव्यवहारात् शब्दार्थसम्बन्धव्युत्पत्तिप्रतिपत्तेर्यत्पर. शब्द स शब्दार्थ इत्याख्यायिकामात्रवर्णने सिद्धार्थाभिधाने प्रयोजनाभावात् विधिनिषेधचोदनाभावात् कथ चिदप्यशासनाद् भूतार्थवाक्यमशास्त्रत्वादेव न प्रमाणतामर्हति। प्रवर्तकवाक्याङ्गभावेन तु समन्वयमेति। शास्त्रे स्तावकत्वेन ह्यर्थवादवाक्यानि विधिवाक्याङ्गभावगमनादन्वयभाञ्जि भवन्ति। एव हि विधिरुपोद्बलनो भवति । अत्र ब्रूमः । किमनर्थकानि वर्णवदेवार्थवादवाक्यानि महावाक्ये विधायके कार्यार्थप्रतिपादके ऽङ्गभावमुपयान्ति, आहोस्विदात्मीयः कश्चिदेवास्ति यत्र प्रतिपत्तिमादधति कार्यपराणि सपद्यन्त इति पक्षद्वय। प्रथम पक्षो न युक्तः। यथायथं सिद्धार्थानां स्वार्थप्रतिपत्तिदर्शनादकिञ्चित्करस्यानर्थस्य परत्राङ्गभूतत्वानुपपत्ते. । केवलं सा प्रतिपत्तिस्तत्र स्वार्थे प्रमाणभूता ऽन्यथा वेति विचार्यम् । यत्र बाध तत्राप्रमाण। अबाधे तु प्रमाणमेव। अबाधिना हि सम्बिन्धत' प्रमाणमिति जैमिनीयनयः। सर्वज्ञश्वरदेवतानां च शास्त्रार्थाधिगतानां न किं चन बाधकमुत्पश्याम. । ननु च मार्जारादीनां सार्थक वचन श्रूयते न च तत्र सम्वादो ऽस्तीत्येवमेव सर्वमदृष्टार्थप्रमाणम् । मैवं वोच । सर्वज्ञभूतानां वचनस्यागमान्तरेणापि सार्थकस्य संवादोपलब्धेरबाधितत्वमेव । चर्मचक्षुष परमेतन्न मन्यन्ते। तथा हि भगवान्पतञ्जलि , शब्दार्थसंयमनात्सर्वभूतरुतज्ञानमादिदेश। तस्माद्यत्र नास्ति सवादो बाधकमात्रपर्यवसानमर्थवादवाक्ये, तदसत्यार्थप्रतिपादनतास्तु कार्यमात्रप्रतिपादनपरम् । यत्र तु नास्ति बाध शास्त्रान्तरेण संवादस्तत्प्रमाणमेव। न च तत्र कार्यपरता सिद्धार्थप्रतिपादनेन । पुराणेतिहासवाक्यानां तावत्येव प्रश्नोत्तरयो समाप्तत्वदर्शनात्तत्परिज्ञानमात्राच्च धर्मोत्पत्त्यभ्युपगमात् । किञ्च ध्येये निर्ज्ञाते ध्यानादिरनुष्ठातुं शक्यत इति निष्प्रयोजनता ऽपि नास्तीश्वरादिप्रतिपादकानां वाक्यानांतथा च शास्त्रं। आत्मा ज्ञातव्यो मन्तव्यो

निदिध्यासितव्य इति। पातञ्जलमपि, तस्य वाचकः प्रणव, स्तज्जपस्तदर्थभावन, नत प्रत्यक्के नाधिगमो तरायाभावश्चेति। स्मृतिकारणां च मन्वादीनामभ्युपगमो महेन्द्ररुद्रादीनां प्रत्याख्यानमिति पक्षपात। न हि मन्वादयो महर्षयो न हि सर्वज्ञा वीतरागा वा। रागादिमत्त्वे अज्ञत्व वा तेषां कथ तद्वचन प्रमाणी।तस्मात्साक्षात्कृतधर्माणो ऋषयो बभूवुस्ते ऽवरेभ्यो ऽसाक्षात्कृतधर्मेभ्य उपदेशेन मन्त्रान्सम्प्राहुरुपदेशात् गृह्णन्तो ऽवरे विलम्बग्रहणायेमं ग्रन्थ समाम्नासिषुर्वेदं च वेदाङ्गानिचेत्यागमप्रामाण्यात्सन्ति सर्वज्ञा येषामन्धपरम्पराव्युदासार्थमादिगुरुर्भगवान्सर्वज्ञशास्त्रप्रवक्ता, तैरेव मुनिभिरागम्यते। शास्त्रस्य हि शब्दनित्यत्व ऽपि रचनावत्त्वादीश्वरप्रणीतत्वमेव। तथा चशास्त्रादीश्वर. समधिगम्यते। तस्माच्छास्त्र प्रवृत्तमिति तस्य शास्त्र निमित्त। शास्त्र पुन किन्निमित्त। ईश्वरनिमित्तं। तदेतयोः शास्त्रोत्कर्षयोरीश्वरसत्वे वर्तमानयोरनादि. सम्बन्ध इत्युक्त। तथा च गीतायां स्वाविष्टमहेश्वरभावेन भगवता कृष्णावतारेणाभिहित, वेदान्तकृद्वेदविदेव चाहमिति।एवमपि च शास्त्रस्य नित्यत्वे क्षतिर्नास्तीश्वरबुद्धिरूपत्वात्तस्य। ईश्वरस्य नित्यत्व कालेनानवच्छेदादुक्तमेव। विशिष्टरचनावत एव वेदस्येश्वरबुद्धौ दर्शनात्मनि सदावस्थितत्वमितिस्मृतिवद्यथाकालं मन्वादिवदस्य रचनाकर्त्तृ ऽपि नास्तीत्युक्तं ब्रह्मकाण्डे। अनादिमप्यवच्छिन्नां श्रुतिमाहुरकर्तृकां। शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिरिति। तदेवमागमप्रामाण्याद्भावतत्त्वदृश शिष्टाः सन्त्यतीन्द्रियार्थदर्शिन इति ते यथायथं गोत्वब्राह्मणत्वादिजातीराश्रयविवेकेनाध्यक्षयन्ति। तच्च तेषां शिष्टाना ज्ञानं सर्वेन्द्रियं, प्रतिनियमानपेक्षत्वात्। सर्वज्ञा हीन्द्रियान्तरेणापीन्द्रियान्तरव्यापारं कुर्वन्ति। तथा चागमः। नेदानीमिन्द्रियैरेव पश्यन्ति ब्राह्मणाः. शब्द शृणोति पृष्ठतो रूपाणि पश्यति अप्यङ्गुल्यग्रेण सर्वेन्द्रियार्थानुपलभत इति। अथ वा न चाक्षुषमेव नेषां विप्रादिजातिविषयं विज्ञानं, अपि त्विन्द्रियान्तरसम्बन्ध्यपि। शब्दादौ सूक्ष्मजातिविशेषावधारणक्षममित्यर्थः। तदेवमागमप्रामाण्यमाश्रित्य सर्वज्ञसिद्धिरत्र सूचिता पूर्वार्धेन। विस्तरेणागमप्रामाण्य वाक्यपदीये ऽस्माभिः प्रथमकाण्डे शब्दप्रभायां निर्णीतमिति नत एवावधार्य।उत्तरार्धेनागमसिद्धे. सर्वज्ञत्वानुमानं तदुपोद्बलकमाह।अभ्यासादित्यादिना।इहाभ्यासवशात् ज्ञानैश्वर्यादीनाम् पुरुषविशेषेष्वतिशयो दृष्ट. । यथा चैकघटिकादीनां

रत्नतत्त्वपरीक्षायां, रूपतत्त्वर्याणां च रूप्यतातिशयपरिच्छेदे यथाभ्यासम्प्रकर्षतारतम्यं। यच्च सातिशयं तदवश्यं क्व चित्काष्ठाप्राप्तं सम्भाव्यते। यथादित्ये तेजो दाहकत्वमग्नौ शैत्यमप्सुतथा ज्ञानैश्वर्यशक्तिबलादयो गुणा सातिशयाः पुरुषेषु दृष्टाः सर्वज्ञे ऽपि व्यापिकाष्ठाप्राप्तमतिशयमावेदयन्ति, तत्समुचितमाधारं पूर्णसमस्तसम्पर्कमनुमापयन्त्येव। अतिशय एव हि ज्ञानादीनां तारतम्येन दृश्यमान सर्वज्ञबीजं। न च यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनादिति वाच्य। स्वार्थस्य स्वाश्रयानुसारेण व्यवस्थापयितुमशक्यत्वात्। आदित्यादौ च प्रकाशकत्वादेः स्वार्थातिलङ्घनेन दृष्टत्वात्। तस्मात्सम्भावनानुमानेनापि सर्वज्ञसिद्धिरुचिता। तदुक्तं तत्र निरतिशयसर्वज्ञबीजमिति। यदेतत्सर्वज्ञबीज ज्ञानादीनामतिशयलक्षण तत्तत्र निरतिशयं। यत्र निरतिशय स सर्वज्ञ इत्यर्थः। सर्वज्ञग्रहण चात्रैश्वर्योपलक्षणं तेन यत्र निरतिशयमैश्वर्यं स सर्वेश्वर परमेश्वर इत्यादि सिद्ध। राजादीनामैश्वर्यतारतम्यदर्शनात्। इत्थ च मूलभूतेश्वरसम्भवादृषीणामपि ज्ञान। तदप्यागमपूर्वकमित्युक्त। परमेश्वरस्तु कालेनानवच्छिन्न सहजज्ञानैश्वर्यादिधर्मयुक्त। तस्य चेतस्यचेतन जगदिच्छा तु विद्याप्रत्यगात्मन इव शरीरमित्युपकार्योपकारकभावसख्यानविशेषयोगादिच्छाता स एवैतन्निमित्त इति बुद्धिमत्कर्तृकमपीदमत्र विश्व सिद्धमिति स्थितम्। तदेवमागमसिद्धाः सन्त्यस्मद्विशिष्टाः। इन्द्रियप्रतिनियमानपेक्ष च साक्षात्कारूपं तेषां ज्ञानमित्यतीतानागतसूक्ष्मव्यवहितविप्रकृष्टार्थसतत्त्वदर्शो योगिनः सर्वा गोत्वब्राह्मणत्वादिजातीरध्यक्षयन्ति, तदपदेशमसङ्करेणारभन्ते। ब्राह्मणत्वादिष्वप्यस्ति किं चित्सास्नादिस्थानीयं रूपव्यञ्जनमस्माकं परमतीन्द्रियम्। विशिष्टैस्तदवधार्य संज्ञाः प्रणीताः। तदुक्त प्रत्यक्षपूर्वकं सङ्काकर्मेति। अत्र भवतामुपदेशाद्वयमपि सम्प्रदायपारम्पर्याद्यथायोगं गोत्वादिजातीरध्यवस्यामः। अस्मद्विशिष्टानां चेद् सङ्काप्रणयनं यथावस्थितशब्दार्थसम्बन्धप्रकाशनमात्रं न त्वपूर्वसङ्केतकरण स्वाभाविकत्वाच्छब्दार्थसम्बन्धस्येति ॥ ४६ ॥

शिष्टप्रामाण्यात्सन्ति ब्राह्मणत्वादिजातयो विविक्ता यथायथं भावप्रत्ययाभिधेयाः। तत्रेद विचार्यते। तामाहुस्त्वतलादय इत्युक्तं। जातिगन्धत्वं उत्पलगन्धत्वं मल्लिकागन्धत्व मित्यत्र किं परजातौ गन्धसामान्ये भावप्रत्ययः किं वा ऽपरजातावपरसामान्ये विशि-

ष्टाश्रयगन्धसमवायिनीत्याशङ्क्याह ॥

जात्युत्पलादिगन्धादौ भेदतत्वं यदाश्रितम् ।
तद्भावप्रत्ययैर्लोके ऽनित्यत्वान्नाभिधीयते ॥ ४७ ॥

इह लौकिके शब्दव्यवहारे विवक्षाधीने यदा जातिगन्धादिशब्दात्समासाद्भावप्रत्यय. क्रियते तदा सामर्थ्ये समासविधानात्तदेव प्रवृत्तिनिमित्तमिति तत्रैव भावप्रत्यय, समासकृत्तद्धितेषु सम्बन्धाभिधानमिति वचनादित्याधाराधेयसम्बन्ध. सप्तमीमासे, तत्पूर्वकः शेषसम्बन्धो वा षष्ठीसमासे तद्भावप्रत्यय. । यदा तु गन्धशब्दादेव पूर्वं भावप्रत्यय. पश्चात्ससास इति विवक्षा तदा भेदस्य, जात्युत्पलाभ्यां ह्याश्रितस्य विशिष्टस्य गन्धस्य, यत्तत्त्व पारमार्थिकं तत्कर्मभूतं, यदाश्रितं कर्तृभूतमपरसामान्यं तद्भावप्रत्ययवाच्यं न भवति । अनित्यत्वात्सर्वत्रासन्निधानात् । भेदस्य वा गन्धविशेषस्य तत्वं विशिष्टं सामान्य, यदाश्रितं समवेतमिति समानाधिकरणे पदे । अयमत्रार्थ. । यदुत्पलगन्धसमवेतं विशिष्टं सामान्यं, न तच्चन्दनगन्धादिव्यक्तौ सन्निहितमिति व्यभिचारादनित्यम् । न तु सामान्यमनित्यं भवति । गन्धशब्दश्चाविशेषेण गन्धमात्रे वर्त्तत इति गन्धमात्रव्यापिनैवास्य प्रवृत्तिनिमित्तेन भावप्रत्ययाभिधेयेन भवितव्यम् । न चोत्पलगन्धसमवेतं विशिष्टं सामान्यं सर्वगन्धव्यापीति नेदमभिन्नं गन्धशब्दप्रवृत्तिनिमित्तम् । आश्रयविशेषेण तु जातेर्गन्धत्वमुत्पलस्य गन्धत्वमिति समवेतसमवायाद्विशेषणे विशिष्टावसायसिद्धि. । न चैवं नास्त्येव सामान्यविशेष. । आश्रयभेदेन गन्धव्यक्तीनां भेदात्, शाबलेयत्वादिवदपरजातियोगोपपत्ते. । तथा च भेदतत्वं यदाश्रितमित्याह । गुणानामाश्रयभेदाद्भेद इति वक्ष्यते । अस्त्येव चोत्पलगन्धानामन्यतो व्यावृत्तोऽन्वयी प्रत्यय इति तन्निमित्तसामान्यसम्भवः केन वार्यते । अत एव लोकग्रहणं । लोकव्यवहारे परं नाभिधीयते । गन्धयुक्तिविदस्त्वभियुक्ता. पश्यन्त्येव विशिष्टं सामान्यम् । समासादपि च भावप्रत्यये सामान्यविशेष· सम्बन्धस्य समासवाच्यत्वाच्छब्देनाप्रतिपादनादनित्य इति नाभिधीयते ॥ ४७ ॥

काश्चिज्जातयो ऽस्तविदूज्ञानपदा अपि सन्तीत्याह ॥

अस्वशब्दाभिधानास्तु नरसिंहादिजातयः ।

सरूपावयवेवान्या तासु श्रुतिरवस्थिता ॥ ४८ ॥

नरसिंहगौरश्वरत्वादिजातयो विद्यमानासाधारणवाचकाः । समानं रूपं ययोस्तावयवौ यस्या नरसिंह इत्यादिश्रुतेः शब्दस्य सा तत्र वाचिका । एषा हि श्रुतिर्नरसिंहत्वजातिविषयनर, सिंहेतिशब्दद्वयसादृश्येनावभासमाना नरत्वसिंहत्वजातिप्रतिभासमुत्पादयति । न च नरसिंहाभ्यामारब्धो नरसिंहः अपि तु जात्यन्तरमेवात्र शबलरूपे वस्तुनि समवेत, चित्र इव रूपे चित्रत्वमिति तदसाधारणमेषा शक्नोति प्रत्याययितुम् । भावतश्च निरंशैवेयं श्रुतिरित्यवयवसादृश्यमपि न वास्तवमितीवशब्द सादृश्याभिमानमात्रपरः । यथा निरंशवाक्यस्थानां पदानामिति भ्रान्त्या, नरत्वादिजातौ प्रतिभोत्पादनान्नेयमसाधारणा नरसिंहजातौ श्रुतिर्न चान्यापि विद्यत इत्यस्यशब्दाभिधाना । शब्दोऽभिधीयते नेत्यभिधानं यस्या इति ॥ ४८ ॥

तदवमर्थद्वारेण पदे परीक्ष्यमाणे प्रकृतिभागस्य जात्यर्थतया जातिमुपपाद्य प्रत्ययभागस्यापि तदुपपादितेन जात्यभिधायितायां प्रकृतिप्रत्ययार्थौ समभिव्याहारमुपपादयितुमाह ॥

जातेरवस्थापरिच्छेदे सङ्ख्या सङ्ख्यात्वमेव वा ।
विप्रकर्षेऽपि संसर्गादुपकाराय कल्पते ॥ ४९ ॥

द्रव्यजातेः क्रियाजातेश्च सुबन्ततिङन्तपदगतप्रकृतिवाच्यायाः स्वाश्रये द्रव्ये स्वस्यां समवाय, तत्र परिच्छेदः किमेकद्रव्ये तस्या समवायो विवक्षित. किं वाऽनेकद्रव्य इत्येव रूप । तस्मिन्निर्णीयमाने यथायथं सुप्तिङन्तप्रत्ययवाच्या सङ्ख्याजातिरेकार्थसमवेतसमवायात्साक्षात्सम्बन्धाभावेऽप्युपयोगाय सम्पद्यते । तिङन्तपदवाच्यायाऽपि जातेः क्रियाजात्या स्वाश्रयद्वारेणास्त्येवैकार्थसमवेतसमवाय. । जातेर्वावस्थारूपभेद स्वाश्रयविशेषेण ससर्गलक्षणः । शब्दात्प्रतीतया वा संख्याजात्या सामर्थ्यादाक्षिप्ता संख्याव्यक्तिरेकार्थसमवायात्प्रकृतिवाच्या जातिं विशिनष्टि । प्रतीतस्य ह्यवच्छेदकत्व । प्रतीतिश्च शब्दार्थसामर्थ्याद्वा भवन्ती न विशेष्यते । यद्वा द्रव्यपदार्थपक्षे संख्याव्यक्ति शब्दवाच्या विशेषणम् । जातिपदार्थपक्षे तु संख्याजातिरिति विकल्पः । तत्र गौ गावौ पचति पचत इत्यादौ विशिष्टजातीयो वि-

शिष्टसंख्याविच्छिन्नश्चार्थः प्राधान्येन प्रतीयत इति प्रत्ययार्थस्य विशेषणत्व प्रकृत्यर्थस्य च विशेष्यत्वम् । तथा च क्रियाप्रधानमाख्यातमित्युपपत्ति । पचतीत्यादौ साध्यत्वात्प्रकृत्यर्थस्य प्राधान्यात्कारकादिना प्रत्ययार्थेन तस्य विशेषणात् । औपगव इत्यादौ तु प्रकृत्यर्थोपरक्तस्य प्रत्ययार्थस्यापत्यलक्षणस्याभिधानं प्राधान्येनेत्यनाद्विषयमेवेद प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति । प्रायिकमेतत् । तथा हि । सख्या प्रकृत्यर्थानुग्रहायेहोक्तेति गामानयेत्यादौ तद्विशिष्टस्य प्राधान्यम् ॥ ४९ ॥

एव तावत्सामान्येन प्रकृत्यर्थनिशिष्ट. प्रत्ययार्थो ऽभिधीयते पदेनेति द्रव्यद्वारेण सम्बन्धाज्ज्ञात्या प्रकृतिप्रत्ययथोः समभिव्याहारोपपत्तिरुक्ता । इदानीं क चित्तात्पर्यभेदाच्छ्रुतो ऽप्यर्थो नविवक्ष्यत इति वाक्यार्थौपयिकत्वं पदार्थस्य विचारयितुमाह ।

लक्षणा शब्दसंस्कारे व्यापारः कार्यसिद्धये ।
सङ्ख्या कर्मादिशक्तीनां श्रुतिसाम्ये ऽपि दृश्यते ॥५०॥

कर्मादयो ऽपि शक्तयो विभक्तिवाच्याः सख्यावदिति तासां कर्मादिशक्तीनां श्रुतेः शब्दस्य स्ववाचकस्यामादे साम्ये ऽपि द्विविधो व्यापारो वाक्यार्थे लक्षणा एक । स च शब्दसस्कारे शब्दसंस्कारविषये । संख्याकर्मादिरहितस्य प्रातिपदिकमात्रस्यासम्भवान्न केवला प्रकृतिः प्रयोक्तव्येति शब्दसस्कारार्थं स्वार्थेन प्रकृत्यर्थमनवधार्यन्त्यपि विभक्तिः प्रयुज्यते क चित् । तद्यथा । अह संमार्ष्टीति । कथमत्रैकत्व न विवक्षितं । शब्दसंस्कारमात्रपरमेव त्वंकवचनमिति चोद्ये न्यायं वक्ष्यति । इह तु वस्तुमात्रापेक्षतया कर्मादिशक्तीनां शब्दसंस्कारार्थमुपादाने विवक्षा । यथा सक्तून्जुहोतीति । अत्र हि सक्तुसाधनो होम इत्येतावन्मात्र विवक्षितं । हवनक्रियाया अदृष्टार्थत्वेन फलवत्वात्प्राधान्यात्क्रियाविषयत्वमात्रेणष्टिसतनमा अपि सक्तव क्रियासमन्वयमात्रे चरितार्थाः । न हि कथं नाम सक्तवो भस्म सम्पद्येरन्निति होमः क्रियते अपि सक्तुसाधनेन तेनादृष्टं सम्पद्यतामिति । यद्येवमदृष्टार्थत्वात् क्रियाया , सक्तवो नैवेष्टिसतनमा इति नास्त्येवात्र कर्मशक्तिः । तदसत्यास्तस्याः कथमविवक्षा । सतो ह्यविवक्षा शब्दोपात्तस्य न्याय्या । तद्यथा अहमित्येकत्वस्य, नत्वसतः । न हि काष्ठानि पच-

न्नीत्युक्त्वा काष्ठानां कर्मशक्तिरविवक्षितेत्युच्यते अपि तु करणशक्तिः । सत्यमेतत् । अदृष्टमेव तु न सम्पद्येत यदि सक्तव ईप्सिततमत्वेन नाश्रीयेरन्, अतन्योपायसाध्यत्वादित्यदृष्टार्थत्वसामर्थ्यादेव सक्तवर्थतायाप्युपेतव्या क्रियायाः । तद्यथा आराधनस्य देवतार्थता । अदृष्टार्थमेवहि देवतारा‌ध्यत इत्यदेवतार्थत्वे तस्यादृष्टार्थत्वमेव हीयेत । एवमिह प्रधानमङ्ग सक्तवो ऽदृष्टस्येति भवन्त्येवेप्सिततमा । अविवक्षितन्तु तदीप्सिततमत्वं नावन्मात्रफलत्वेन क्रियाया अनभिसंहितत्वात्फलान्तरप्रयुक्तत्वाच्च सक्तूनां । क्रियाफलत्वस्य न ग्रहणामिव रूपान्तरेणोपादानादविवक्षितत्वम् । तस्मादीप्सिततमत्व कारकान्तरापेक्षया सत्वम्, विवक्षितं च क्वचिदपेक्षयात्रेति स्थितम् । क्वचित्तु कार्यसिध्यर्थं संख्याकर्मादिशक्तीनां व्यापार. कार्यस्य वाक्यार्थभूतायाः क्रियाया सिद्धिनिमित्तो द्रव्यावच्छेदोपयोगः । संख्यादिविशेषवता द्रव्येण साध्यमानाया क्रियाया. प्रतिपादनात् । तद्यथा । पशुना यजेतेति । अत्र हि यजिरेकेनापि पशुना विकलो निष्पद्यत इति विवक्षितैव सा सख्येति वक्ष्यते न्याय । कर्मशक्तेश्चाविवक्षा व्रीहीनवहन्तीति । व्रीहयो ह्यवघातेन सस्कार्यत्वादीप्सिततमा । न त्ववघातमात्रार्थं कश्चित्प्रवर्तते अपि तु व्रीह्यर्थं । तेषामवघातेन सस्कृतानां पुरोडाशयोग्यस्वभावातिशयप्रतिलम्भेन यज्यङ्गतासिद्धेरित्यवहननक्रियात्राऽप्रधानं । सस्कार्या व्रीहय एव प्रधानं, तण्डुलीकृतानामुत्तरत्रोपयोगात् । सक्तूनां तु भस्मीभूतानामसत्वान्नोत्तरत्रोपयोगः । तदाहु' । भूतभाव्युपयोगं हि द्रव्य सस्कारयिष्यते । सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्वचिदिति । अवहननक्रिया चात्राप्रधानं वास्तवेन रूपेणा कथ्यते । शब्देन तु रूपेण क्रियैव सम्पाद्यतया चोद्यते सर्वत्रेति सैव प्रधानम् । तथा च तदपेक्षं कर्मण. कारकत्वमत्रेति वाक्यार्थप्रधानभूता क्रियेति क्रियाविवेके विस्तरेणास्माभिरभिहितमिति तत एवावधार्यम् । इत्थं च तानि द्वैधं गुणप्रधानभूतानीति भावशब्दानां द्वैविध्यकथनं वास्तवरूपाभिप्रायमवगन्तव्यम् । पूर्वं तु लक्षणा शब्दसंस्कारो व्यापारः कार्यसिद्धय इति पठन्तो लक्षणा द्रव्योपलक्षणं तत्र शब्दसस्कारमात्रोपयोगिद्रव्योपादानमिति तद्विषयत्वाच्छब्दसंस्कारो लक्षणेति सामानाधिकरण्य व्याचक्षते ॥५०॥

इदानीं शब्दसंस्कारे लक्षणाख्यो व्यापारो विभज्यते ॥

न विना सङ्ख्यया काश्चित्सत्त्वभूतोऽर्थ उच्यते ।
अतस्सर्वस्य निर्देशः सङ्ख्या स्यादविवक्षिता ॥ ५१ ॥

इदं तदिति सर्वनामप्रत्यवमर्शयोग्य द्रव्यं संख्यासमन्वयसहम्, तस्यापत्यमित्यादौ निर्देशे साक्षान्निर्दिदक्षितमिति नान्तरीयकत्वान्निर्देशमात्रे न केवला प्रकृति प्रयोक्तव्येति चरितार्था संख्या न विवक्षितेत्युत्सर्ग. । तदुक्तं तद्धितार्थनिर्देशे लिङ्गवचनमप्रमाण तस्याविवक्षितत्वादिति । जातिस्तु द्रव्यस्य द्रव्यान्तराद्विवेकमवगमयितुमुपादीयत इति न तदविवक्षा न्याय्या । सर्वथा विवक्षाभावे प्रकृतिप्रत्ययार्थयो. शब्दप्रयोगस्यैवाभावात् । तथा च प्रकृतिवाच्या संख्या विवक्ष्यत एवेति हि वक्ष्यति ॥ ५१ ॥

अस्योत्सर्गस्य केचिद्विशेषमाहु. ॥

एकत्वं वा बहुत्वं वा केषां चिदविवक्षितम् ।
तद्धि जात्यभिधानाय द्वित्वं तु स्याद् विवक्षितम् ॥५२॥

यज्जातौ न सम्भवति तद्व्यक्तिगतं पारम्पर्येण व्यवच्छेदकतया ऽवसीयत इति द्रव्यगता संख्या जातेरवच्छेदिका न्याय्या, न तु स्वगता एकत्वद्वित्वबहुत्वलक्षणा। एकत्वं हि जातेरव्यभिचारि बहुत्वमप्यातिदेशिकम् । ननु जातेर्नैव सख्यास्ति द्रव्यधर्मत्वात्तस्या । नेह शास्त्रान्तरप्रसिद्धा प्रक्रिया वा प्रमाण अपि तु स्वकृतान्त कश्चिदाश्रेय. । अस्ति च प्रमाणमेकत्वे । जाते प्रमाणेनैकत्वविशिष्टाया एव सिद्धे. । तथातिदेशिकं जात्याख्यायामेकस्मिन्बहुवचनमिति । जातिपराया चोदनायामेकत्वबहुत्वे न विवक्ष्येते । ब्राह्मणो न हन्तव्य सुरा न पेया वृषलैर्न प्रवेष्टव्यमिति । यत्र तु विवक्षा तत्र द्रव्यपरा चोदनेति । द्वित्वं तु न जात्याख्यायां विहितमिति तत्सर्वथा द्रव्याश्रयमेवेति विवक्ष्यते सर्वत्र ॥ ५२ ॥

तदपि क्वचिन्न विवक्ष्यत इत्याह ॥

यद्येतौ व्याधितौ स्यातां देय स्यादिदमौषधम् ।
इत्येवं लक्षणेऽर्थस्य द्वित्वं स्यादविवक्षितम् ॥ ५३ ॥

औषधदानविषयभूतव्याधितोपलक्षणार्थस्यैवमनेनप्रकारेण

व्याधि निमित्तत्वेनोपादाय प्रवृत्तस्योपलक्षणस्यैताविति वमुपात्तस्य य-
द्वाच्य द्वित्व तदत्राविवक्षितं । सप्तमी चेयं लक्षणे ज्ञायते ऽर्थस्योप-
लक्षणे वेत्यर्थ । औषधस्वरूपमहिम्नैवात्र व्याधिविषयतासिद्धे. ।
तद्दानस्यैताविति व्याधितान्तरनिवृत्यर्थमुपादीयमान एकस्यापि त-
योर्मध्यात्सम्भाव्यमाने व्याध्युद्भवे तदौषधदानस्येष्टैर्विवक्षात्र द्वित्वे ।
सम्भावनाविषयत्वाच्च व्याधिसम्भवस्य यदा द्वयोरपि तत्सम्भव:
तदा समुदितावेवौषधदानस्य विषय इति सहविवक्षया चोद-
नाऽर्थवती । व्याधिप्रतीकारप्रयुक्तं पुनरौषधदानमित्येकस्यापि
व्याधितत्वे तत्सम्भव । बहुषु च प्रकृतेषु एनाविति परामर्शस्यानुपपत्तेरविवक्षायामपि द्वित्वस्य, बहुषु तदौषधदानाप्रसङ्ग. ।
किं चौषधदानेन द्वावनुग्राह्याविति प्रधाने चात्र संख्या न विवक्ष्यते । यत्र तु क्रमेणापि द्वयोरेव चोदनार्थप्रतिपत्तिः, वृक्षौ च्छेत्तव्याविति तत्र विवक्षैव । इह तु सम्भावनाविषयं व्याधितत्वं भविष्यदुत्प्रेक्ष्य चोदनेति क्रमेण युगपद्वा व्याधिसम्भवे तदुपपत्तिः । न हि भविष्यतो नियमेन सह भाव्यं नियम्यते ॥ ५३ ॥

तदेवं प्रत्ययोपात्ताया विवक्षिताविवक्षितत्वं वाक्यार्थपर्यालोचनया विषयविभागेन प्रतिपाद्याधुना प्रकृत्युपादानाया एकान्तेनैव विवक्षेत्याह ।

एकादिशब्दवाच्यायाः कर्मण्यङ्गत्वमिष्यते ।
सङ्ख्यायाः खनति द्वाभ्यामिति रूपाद्धि साश्रिता ॥५४॥

द्वाभ्यां मन्त्राभ्यां मृदं खनति, चतुर्भिरादत्ते ऽष्टभिर्हरतीत्यत्र प्रकृतिनिमित्तभूताया. प्रातिपदिकवाच्याया द्वयादिसंख्याया: क्रियावच्छेदकत्वमभ्युपगम्यते, सा संख्या विवक्षितैव । अन्यथा शब्दार्थ एव लक्त स्यादिति । प्रातिपदिकस्यान्यथानुपपन्नस्य प्रयोगस्य रूपात्स्वभावाद्विशिष्टसंख्याविधायिनः सामर्थ्यादत्र विवक्षा । रूपशब्दो वा प्रातिपदिकपर्याय इति रूपात्प्रातिपदिकान्न विभक्तेरित्यर्थ । यथा द्विपुत्र इत्यादौ । अत्र हि विभक्तिवाच्यो भेद., समास एकार्थीभावान्निवर्त्तते । प्रकृतिवाच्यस्त्ववतिष्ठत एव । तदभावे हि शब्दप्रयोग एव निष्फल स्यात् । अहमित्यादौ तु प्रत्यय. प्रातिपदिकार्थप्रत्यायने साहचर्य्यं गच्छतीत्यर्थवा-

नित्यत्राऽविवक्षा युक्ता। यस्योभयं हविरार्तिमार्च्छेत्, ऐन्द्रं पञ्चशरावमोदनं निर्वपेदित्यत्रावयवद्वयारब्धः सन्ध उभयशब्दवाच्यो न तु सख्यावाच्युभयशब्द इत्येकावयवविनाश ऽपि समुदायस्य विनाशान्निर्वाप. क्रियत एव ॥ ५४ ॥

इदानीं यदुक्त व्यापार. कार्यसिद्धय इति तद्विभज्यते । तत्र द्वित्वमेव विवक्ष्यते नैकत्वबहुत्वे इति पूर्वमुक्तम्। अधुना त्वेकत्वमपि क्व चिद्विवक्ष्यत इत्याह ॥

यजेत पशुनेत्यत्र सस्कारस्यापि सम्भवे ।
यथा जातिस्तथैकत्व साधनत्वेन गम्यते ॥ ५५ ॥

शब्दसंस्कारार्थत्वं यद्यप्यत्र विभक्ते सम्भाव्यते तथापि पशुजातेर्यथा प्रातिपदिकवाच्यायाः क्रियाङ्गभाव', तथैकत्वमपि विभक्तिवाच्यं,एकपदोपादानाच्च त्यज्यते ।जातिवदेकत्वमपि क्रियाङ्गमित्यर्थ. । एकपदोपादानो ह्यर्थ एकत्वेन बुद्धौ विपरिवर्तमान' कथं भेदेन पशुना यजेतैकेन चेति सम्बध्येत । प्रकृतिप्रत्ययाभ्यां हि यो विशिष्ट प्रत्ययार्थो ऽभिधीयते तेनाभिधयैव सस्पृश्यते यज्यर्थ' । एकपदत्वे ऽन्त. पदसंबन्धस्यापौरुषेयत्वात्। अतश्चोभयमपि शक्यविधानं। भेदेन तु स्पर्शे वाक्यभेदप्रसङ्गादशक्यविधानं स्यात् । भिन्नपदोपादानं तु वस्तुभेदेन संबध्येतापि । शक्यविधानत्वात् । यथा रक्ताश्वमानयेति। तत्र च वाक्यभेदो रक्तमानयाश्वमानयेति वाक्यीयः समन्वयः। एकपदोपादाने तु शोणमानयेति वदौपादानिको विनियोग. । अह संमार्ष्टीत्यत्र तु यथा न शक्यविधानं तथा दर्शयिष्यते । अनेन च पशुशब्दार्थस्य पूर्वमनिर्ज्ञातत्वमप्रधानत्वं च विवक्षानिबन्धन ध्वनति । अस्मादेव वाक्यात्साधनत्वेन प्रतीयत इत्यर्थ. । अग्रे तु स्फुटमेव दर्शयिष्यति। ननु विनियोजकया श्रुत्या द्रव्यस्य क्रियासाधनत्वं विहितं न तु गुणस्य। संख्यायाःविनियोजकप्रमाणस्य द्रव्य एवोपक्षीणत्वात् गुणविनियोगे प्रमाणाभावः । सत्यम् । श्रुत्यादिषड्व्यतिरिक्तो ऽयं विधिव्यापार उपादानाख्यः । न हि संख्यारहितं द्रव्यमात्रं विधिरुपादत्ते । एकदोपात्तस्य गुणस्य त्यक्तुमशक्यत्वात्। प्रतीयते हि सगुण द्रव्यं एकरसपाशाद्या प्रतीत्येति यथायाग गुणद्रव्ययोरन्वयः ॥ ५५ ॥

नदेवमयं वादी बाधकमन्तरेणाविवक्षां न मन्यते । ये तु शब्दसंस्कारार्थत्वमेव संख्याया. प्रतिजानते ते कथमनेकत्वं विवक्षन्तीत्याह ॥

लिङ्गात्तु स्याद् द्वितीयादेस्तदेकत्वं विवक्षितम ।
एकार्थीविषयत्वे च तल्लिङ्गं जातिसङ्ख्ययोः ॥ ५६ ॥

शब्दसंस्कारार्थमेव पशुनेत्येकत्वम । विवक्षा तु लिङ्गात्ज्ञापकाद्वाक्यादन्तरङ्गत्वात् । तथा हि आग्नेयमजमग्निष्टोम आलभेतेत्युक्त्वा ऐन्द्राग्नं द्वितीयमुक्त्वा, ऐन्द्रं पृश्निं तृतीय षोडशिनीति द्वितीयादित्वनाज्ञो विशेष्यते । यदि वाजमित्येकत्वमविवक्षितं स्यात् तदा द्वितीयादित्वस्यासिद्धत्वात् द्वितीयमित्यादि पुनर्विधानं न स्यादित्यभिधानसामर्थ्याद्वित्वमेकत्वमिति निश्चीयते । न च विवक्षायामप्येकत्वस्याज्ञ द्वितीय तृतीयमित्युपपद्यत एव । अनियतसख्याप्रसङ्गे द्वितीयादित्वेन विशेषणात् । नैतदस्ति । एवं हि पक्षे ऽनुवाददोष. स्यात् । लिङ्गत्वे तु द्वितीयादित्वमपूर्वमेव विहित नित्यमविकल्पितं श्रुतं नोपरुध्यते । पक्ष तु वादे हि श्रुतस्य वैकल्पिकत्वं स्यादित्येव विकल्पित श्रवणं परित्यक्तं भवेदिति दोषप्रसङ्ग । एकाश्रये परिसमाप्तत्वे चैकत्वसख्याया जातेश्चैतदेव लिङ्गमिति प्रसङ्गादाह । यथा ह्येकत्वं प्रत्याश्रयपरिसमाप्तं तथा सत्यप्यनेकार्थसमवे जातिरपीत्यसमादयसीयते । तथैकत्वसख्याया एक समानो ऽर्थो विषय आश्रयो ऽस्या जातेरित्यत्रापि तदेव द्वितीयादित्वं लिङ्गं । अन्यथा आश्रयेषु जातेरेकदेशेन प्रवृत्तौ द्वयोर्द्वयो. पूरणो नासौ तज्जातीय. स्यात् । अपि तु जात्येकदेश । न च जात्येकदेशो जातिर्भवति । समानाश्रयत्वे च जात्येकत्वयोर्जाति प्रकृत्यर्थ. साकल्येन क्रियाङ्गतयोपादीयते । अन्यथैकत्ववत् तत्राधारे सर्वात्मना जातेः परिसमाप्त्यभावे एकत्वमशक्योपादानं । एकस्मिन्सर्वात्मना जातेरपरिसमाप्तत्वात् । अतश्च द्वितीयादित्व विघटेत । स्यादेकत्वमनुमापयत्तदाश्रये सर्वात्मना जातेः समाप्तिमप्यनुमापयत्येतल्लिङ्ग । यावता हि विना नोपपद्यते तावतो ऽर्थस्यैतल्लिङ्गम । यथा चैकत्व विवक्षां विना नोपपद्यते तथा जातेस्तत्र समानविषयत्वमपि नेत्यन्यथा तत्र जातेः समाप्त्यभावे साक-

ख्येन प्रकृत्यर्थः क्रियाङ्गतया नोपात्त. स्यादिति प्रकृत्यर्थोपरोध प्रसङ्गः।द्वित्वादेरनेकाश्रयपरिसमाप्त्यभावान्न तेन सह जातेरेकार्थवि-षयत्वे लिङ्गमेतत् । एवं ह्यनेकाश्रितत्वमेव ज्ञापितं स्यात् । तच्च जातित्वादेव सिद्धमिति एकत्वेनैव सह जातेरेकार्थसमवायो लिङ्गा-दवगन्तव्यः ॥ ५६ ॥

इदानीं यदुक्तं यजेत पशुनेत्यत्रैकत्वं जातिवद्विवक्ष्यते इति तत्र पूर्वसूचितं विवक्षानिबन्धनं ग्रहवैलक्षण्येन प्रकटयति ।

अन्यत्राविहितस्यैव स विधिः प्रथमं पशोः ।
क्रियायामङ्गभावश्च तथैतत् स्याद्विवक्षितम् ॥ ५७ ॥

यजे. कर्त्तव्यता वाक्यान्तरात्सिद्धेति पशुनायजेतेति गुण-विधिस्तात्पर्यतः । तथा च ज्ञातस्य पशुगुणस्य प्रमाणान्तरात्प्र-थममनेनैव ज्ञापनमित्युत्पत्तिविधिरयं पशो. । अस्माद्वाक्यात्प्रथम-मुत्पन्न इव पशुरनेनैव ज्ञापितत्वात् । ज्ञप्तिरेव हि प्रथमोत्पत्तिर्भण्यते। स चोत्पत्तिविधिरत्राङ्गत्वेन यजिक्रियाविषयेणाङ्गित्वेन चेत्यस्मात्का-रणद्वयात्तदेकत्वमत्र विवक्षितम् । तथा हि। शब्दप्रमाणका वयं शब्देन चैकत्वविशिष्टो ऽर्थश्चोदित इति कथं तदेकत्वं त्यज्यतां । तदुक्तं। यथा जातिस्तथैकत्वं साधनत्वेन गम्यते, इति । यथा शब्दचोदिता जातिस्तथैकत्वमपीति, इहास्तत्र न्यायः सूचितः । शब्दश्च प्रथम-मिदमाह। न तु शब्दान्तरं सङ्ख्यान्तरयुक्तं ग्रहादिवदस्तीति प्रथमोप-देशो विवक्षाकारणम् । अङ्गत्वोपदेशश्च यागस्य प्राधान्यात् । यदि ह्यङ्गतयोपदेश. स्यात्पशो , तदा ग्रह सम्मार्ष्टीतिवद्भेदविवक्षेत्यर्थ. । तस्माच्छ्रुतसंख्याहाने हेत्वभावादेकत्वविशिष्टसाधनसाध्यत्वेन नि-यतरूपं प्रधानमवगतं भवतीत्यनियतानेकसंख्योपादानमप्रमाणक-म् । अत्र के चित्क्रियायामङ्गभावस्येति पठन्त. प्रथमं क्रियायामङ्ग-भावस्य विधिरिति योजितवन्त ॥ ५७ ॥

एतन्न्यायवैपरीत्येन ग्रहं संमार्ष्टीत्यत्र लक्षणाख्यं व्यापारमाह।

ग्रहास्त्वन्यत्र विहिता भिन्नसंख्याः पृथक् पृथक् ।
प्राजापत्या नवेत्येवमादि भेदसमन्विताः ॥ ५८ ॥
अङ्गत्वेन प्रतीतानां संमार्गे त्वङ्गिनां पुनः ।

निर्देशं प्रति या संख्या सा कथं स्याद्विवक्षिता ॥ ५६ ॥

प्राजापत्या नव ग्रहा भवन्ति । दशैतानध्वर्युः प्रातःसवने ग्रहान्गृह्णाति, ऐन्द्रवायव ग्रहं गृह्णाति, मित्रावरुणं ग्रहं गृह्णातीत्यादावुत्पत्तिवाक्ये ग्रहाणां सोमाधाराणां पात्राणां भिन्नसङ्ख्यानां पृथक् पृथक् तेषु प्रकरणेषु भेदेनोपात्तानां तथैवानुभूतानां ग्रहं संमार्ष्टीत्यत्र स्मृत्योपस्थापितानां यथोत्पत्तिवाक्यानुभवमेवात्र स्मृतिबुद्धावुपस्थानं युक्तमिति भिन्नसङ्ख्या एव प्रतीयन्ते । उत्पत्तिवाक्ये हि ग्रहाणामङ्गत्वेन सोमधारणार्थमुपदेश इति तत्र प्राधान्याद्विवक्ष्यते सङ्ख्या । अपूर्वोपदेशाच्च पशुनेति वत्रव दर्शेति प्रातिपदिकार्थत्वादपि तत्र नियोगतो ऽपेक्षा, सम्मार्गे तु वास्तवेन रूपेण । सम्मार्गस्य ग्रहशुद्ध्युत्पादनार्थत्वात्संस्कार्यो ग्रहा एवाङ्गिनः प्रधानभूताः शाब्देन रूपेण क्रियाप्राधान्ये ऽपि । ततश्चोत्पत्तिवाक्यापेक्षया सम्मार्गवाक्येन पुनर्यो ऽयंग्रहमिति निर्देशस्तत्र पूर्वश्रुता एव ते सम्मार्जनविषयभावार्थमुपात्तास्तात्पर्यत इति पूर्वसङ्ख्यान्वयिनः । प्रकरणार्थपर्यालोचनया हि वाक्यार्थो ऽवतिष्ठते न तु यथाश्रुते पदार्थमात्रे ऽवस्थातव्यम् । स्तुतिनिन्दाप्रधानेषु वाक्येष्वर्थो न तादृशः, पदानां प्रविभागेन यादृशः परिकल्प्यत इति न्यायात्, अवान्तरवाक्यान्वयेन महावाक्यार्थानुसारेण पदार्थापोद्धार इत्यन्यत्र प्रकरणानुभूताभिन्नसङ्ख्याकग्रहग्रहणं । तदनेन विवक्षायां हेतुद्वयमुक्तम्, अन्यत्र विधान प्राधान्यं च । यद्यपि बहुष्वेकत्वमप्यविरुद्धमनुभूतं तथाप्यनेकमध्यपात्येकत्वमनुभूत न तु केवलमित्यनेकसहचारिण एवात्र स्मृतिः । अत एव पृथक्पृथगनेकसंख्याया भूयोदर्शनेन तत्प्रभवसाधनोत्पत्तिस्थैर्यस्मृत्यव्यभिचारस्थापनार्थमाह। पृथक्पृथगिति पृथक्पृथग्भिन्नसङ्ख्यानामनुभूतत्वात्तथैव च स्मृतिः। सम्मार्गे ऽनुवादे ऽत्रेत्यर्थः । ग्रहैर्जुहोतीति हवने ग्रहाणामुपयोगात्संस्कार्यत्वं । अङ्गानां प्रधानोपकाराय संस्काराहत्वात् । न च ग्रहैकत्वविशिष्ट सम्मार्गविधिर्न्याय्यः । गुणस्य द्रव्यसमकक्ष्यतया क्रियायानङ्गभावाभावाद् द्रव्यद्वारेणाङ्गत्वाद् द्रव्यानुयायित्वे ऽनुभूतद्रव्यभेदाश्रयणात् । चित्रगवीर्वेद्यति शोणं याजयेदित्यत्रतु चित्रशोणश्रुत्यन्यथानुपपत्या गुणविवक्षोत्पत्तिकी ॥ ५९ ॥

इदानीमविवक्षौत्सर्गिकी सर्वत्र, शब्दसंस्कारार्थं विभक्त्युपादानादिति यत्राद्विवक्षामाह ।

नान्यत्र विधिरस्तीति संस्कारो नापि चांगिता ।
हेतुः संख्याविवक्षाया यत्रात्मा हि विवक्षिता ॥ ६० ॥

वाक्यान्तरे ग्रहाणां भिन्नसङ्ख्यानां विधिरस्तीत्यतो हेतोरत्र ग्रहं सम्मार्ष्टीत्येकवचनं शब्दसंस्कारार्थमात्रमित्येतन्न युक्तम् । नाप्यत्र सम्मार्गे ग्रहाणामङ्गिताप्राधान्यमेकत्वस्य विवक्षाभावे हेतुः निमित्तं, अपि तु न विना संङ्ख्यया कश्चिदित्युक्तान्यायात्, सर्वत्रैव प्रातिपदिकार्थस्योपलक्षणार्थं वचनमित्यविवक्षितम् । यत्र तु कश्चिन्न्यायो युक्तिरूपो ऽस्ति तत्र तस्माद्यत्रात्सङ्ख्या विवक्ष्यत इत्यौत्सर्गिक्या अविवक्षया विवक्षापवाद ॥ ६० ॥

न च विवक्षाहेतुर्यत्रो ऽस्ति ग्रहमित्यादावित्याह ॥

सम्मार्जनं विशेषश्च न ग्रहे क्वचिदाश्रितः ।
विहितास्ते च संस्कार्याः सर्वेषामाश्रयस्ततः ॥ ६१ ॥

ग्रहं सम्मार्ष्टीत्यनुपात्तविशेषस्य पूर्वावधृतस्य ग्रहसंस्मरणोदितः । पूर्वं च भिन्ना ग्रहा दृष्टा । तदाह विहिता स्त इति । न ह्येको ग्रहस्सौत्पत्तिवाक्ये विहितः अपि तु बहवो नव दशेत्येवं विहिताः । न च तेषां मध्ये कश्चिदेव संस्काराद् बहि अपि तु सर्व एव ते तथेत्याह । ते चसंस्कार्या इति । सर्वेषा संस्कार उपयुज्यते उत्तरत्र सोमधारणे सर्वेषां संस्कृतानामुपयोगात् । ततश्च भूयसां विहितानां यद्येको विवक्षितो ऽभविष्यत्तदा तस्य चिन्हभूतः कश्चिद्विशेषो निरदेक्ष्यत । आर्कमाश्विनं मैत्रावरुणं वा ग्रह सम्मार्ष्टीति। न चासौ निर्दिष्ट. । एकवचनं तु न विशेष । तस्य प्रनियतैकविषयत्वाभावादनियतैकोपादाने कस्येति विशेषावधारणाभावात् अशक्यानुष्ठानार्थोपदेशप्रसङ्गादिति ज्ञापकविदमेकवचनं बोद्धव्यं न तु व्यक्ताविति नास्माद्यत्राद्विवक्षासिद्धिः । किं च सर्वत्र शब्दसंस्करार्थमेकवचनमित्येवमिदमुपक्रान्तम् । तथा चैकवचनं न यत्र । तस्मात्सामान्योपदेशात्संस्कार्यत्वस्य च समानत्वाद्युत्पत्तिवाक्यावधृतसङ्ख्यानां सर्वेषामेव ग्रहाणां संस्कार्यत्वपरिग्रह इति सिद्धम् ॥ ६१ ॥

पशुना यजेतेत्यत्र को यज्ञः सङ्ख्याविवक्षायामित्याह ॥

प्रत्याश्रयं समाप्तायां जातावेकेन चेक्रिया ।
पशुना न प्रकल्पेन तत् स्यादेव प्रकल्पनम् ॥ ६२ ॥

जाते प्रत्याश्रयपरिसमाप्तत्वं पूर्वं लिङ्गेनापि साधितमित्येकत्रापि पशुत्वजातेरवैकल्याक्रियाङ्गतोपपत्तौ किमर्थं द्वितीयाद्युपादीयेत । यदि हि जातिराश्रये एकदेशेन वर्तेत तदैकव्यक्त्युपयोगे जातिपदार्थो बाध्येत जात्यंशस्याजातित्वादिति प्रकृत्यर्थसामर्थ्यादुद्वितीयाद्युपादीयेत । न चैवम् । एकत्रापि जातेर्निष्ठितत्वात् । स्यादेतत् । भवत्येकत्रापि प्रकृत्यर्थोपपत्तिः । वाक्यार्थभूता तु क्रिया नैकसाधनसाध्येति प्रधानानुरोधादङ्गान्तरमुपादीयेतेत्याशङ्क्याह । एकेन चेक्रिया पशुना न प्रकल्पेनेति । अदृष्टफलस्य यागस्य पशुनैकेनाप्यवदानद्वारेणोपकारान्निष्पत्तेरसंपत्तिर्नास्ति, यतस्तदनेकत्वप्रकल्पनमत्र भवेत् । सामर्थ्यात बुद्धिस्थमनेकसङ्ख्योपलक्षणं तदित्यनेन निर्दिशति । अस्मादेव पशुना यजेतेति प्रमाणभूताद्वाक्यादेकस्य क्रियासाधनता ऽवसीयते । अन्यथा ग्रहवद्वाक्यान्तरात्सङ्ख्यान्तरस्यानवसाये ऽनियतैकपरिग्रहे अशक्यानुष्ठानो ऽर्थ उपदिष्टः स्यात् ॥ ६२ ॥

नन्वङ्गभूयस्त्वात्फलभूयस्त्वमिति यथासम्भवं पश्वन्तरोपादानं भविष्यतीत्याशङ्क्याह ॥

एकेन चेत्प्रसिद्धायां क्रियायां यदि सम्भवात् ।
पश्वन्तरमुपादेयमुपादानमनर्थकम् ॥ ६३ ॥

अयमर्थः । इहैकस्य पशोः क्रियासिद्धौ हेतुभावो ऽस्ति न वा । द्वितीये पक्षे शास्त्रोल्लङ्घनमित्याद्यः पक्षः । तत्र च लाघवादेकेनैव क्रियानिष्पत्तावधिगतसमीहिताः किमर्थं साधनान्तरान्वेषणप्रयासमनुभवेयुरधिकारिणः । न हि यथासम्भवमिति शास्त्रचोदना । अचोदितानुष्ठाने च शास्त्रोल्लङ्घनादानर्थक्यमिति फलभूयस्त्वस्याप्यभावः । नह्येकेनानेकेन वा यज्ञो निष्पाद्यायां फलहेतुः कश्चित्स्वरूपातिशयः । तस्मादुपायलाघवात्प्रथमेनैव पशुना ऽवदानग्रहणस्य निष्पत्तेरेकस्य पशोरालम्भे ऽपरस्यालम्भो निष्प्रयोजनः ॥ ६३ ॥

क यथानिष्पन्नस्य तस्य निष्पत्त्यर्थं यत्नान्तरं नाद्रियत इत्यत्र दृष्टान्तमाह ॥

यथैवाहितगर्भायां गर्भाधानमनर्थकम् ।
तथैकेन प्रसिद्धायां पश्वन्तरमनर्थकम् ॥ ६४ ॥

आहितो बीजात्मनोपक्षिप्तो गर्भो यस्यां तत्र पुनर्गर्भाधानमफलं स्वाहितस्याधाने विशेषाभावात् । एवमेकपशुसाध्ये यागे पश्वन्तरमफलं सिद्धस्य साधनवैफल्यात् । पश्वन्तरोपादाने तु तत्साधनं क्रियान्तरमेव स्यात् । न च तत्र विधिप्रतिपत्तिः । इत्थं दार्ष्टान्तिकानुगुण्याद्गर्भाधानमनर्थकमित्युक्तं न शक्यमिति । आनर्थक्यस्य साध्यस्य प्रक्रमे निदर्शने सम्भवदप्यशक्यत्वं साध्येन समन्वितं न स्यात् । गर्भाधानार्था वा संस्कारा गर्भाधानशब्देनात्र विवक्षिताः शास्त्रचोदिता इति तेषामाहितगर्भाधानायामानर्थक्यमिति दृष्टान्तदार्ष्टान्तिकयोः साम्यं सुष्ठु सङ्गच्छते ॥ ६४ ॥

तदेव लाघवाच्चोदितमेकत्वं पशावाश्रीयत इत्येकीयं मतम् । अन्ये तु न्यायान्तरमत्राहुरिति प्रदर्शयति ॥

तावतार्थस्य सिद्धत्वादेकस्याप्यनतिक्रमम् ।
के चिदिच्छन्ति न त्वत्र सङ्ख्याङ्गत्वेन गृह्यते ॥ ६५ ॥

नात्रैकत्वसङ्ख्या पशुविषये विवक्ष्यते अपि तु प्रातिपदिकार्थोपलक्षणमेव सा । सङ्ख्यामात्रयुक्तं प्रातिपदिकार्थः साधनं । तस्य तु पूर्वं लाघवमेकत्वस्योपादाने निमित्तमभिहितम् । इदानीं त्वेकत्वपूर्वकत्वादनेकत्वस्य व्यतिक्रमे प्रयोजनाभावादेकसङ्ख्या एकस्यैवोपादानं कथ्यते । तत्परिमाणेनैकेनैव क्रियासिद्धिरिति सामर्थ्यादेकत्वस्याव्यतिक्रमो ऽत्यागः । तदेवं लाघवे पूर्वोक्तसामर्थ्ये एवोपात्ते शेषभूतमिदं । न त्वत्र सङ्ख्याङ्गत्वेन गृह्यत इत्येकवाक्यतयोपपत्तेर्वाक्यभेदेन व्याख्यानं पूर्वैर्दूषणरसिकतया दूषणकृतं । सामर्थ्यादेकत्वस्याव्यतिक्रमे तु न संख्याङ्गत्वेन गृह्यते । वचनप्रापितसङ्ख्यायाः क्रियाङ्गभावः स्यात्सामर्थ्यादतिक्रममात्रमिति शब्देनाविहितमेकत्वमित्यचोदितार्थानुष्ठानप्रसङ्ग इति दूषणं कारिकावयलाघवाद्विमृज्य पूर्वैः कल्पितं । ग्रन्थकारस्त्वत्र मते कारिकान्तरे-

गौवान्वयव्यतिरेकाभ्यामित्यादिना दूषणं दास्यति ॥ ६५ ॥

कथ तर्हि द्वितीयादि लिङ्गमेकत्वविवक्षायामन्यत्रोक्तमित्याह ।

द्वितीयादिषु यल्लिङ्गमुक्त न्यायानुवादि तत् ।
न सङ्ख्या साधनत्वेन जातिवत्तेन गम्यते ॥ ६६ ॥

एकत्वविवक्षासिद्ध्यर्थं नैतल्लिङ्गमपि तु लाघवादेकेन सिद्धत्वात्क्रियायामनेकोपादानस्य निष्प्रयोजनत्वात् क्रमव्यतिक्रमे प्रयोजनाभावाच्चैकत्वसङ्ख्यापरिग्रह इति यदेतन्न्यायद्वयमुक्तं तदनुवादपरमुक्थे द्वितीयमित्यादि लिङ्ग नापूर्वमर्थं गमयति । यस्मात्तेनानन्तरोक्तेन न्यायद्वयेनैकत्वस्यापरित्यागाच्छब्देन रूपेण न सङ्ख्या साधनत्वेन गम्यते शब्दसस्कारमात्रार्थत्वादेकवचनस्य, तेन वाक्यारूढेन सङ्ख्यात्र न विद्यते । यस्मादविवक्षायामपि न्यायादिष्टसिद्धिः । यद्वा तेन लिङ्गेन सङ्ख्या साधनत्वेन नावेद्यते न्यायादेवेष्टसिद्धेरनुवादमात्रार्थं तदित्यर्थः । जातिवदिति वैधर्म्यदृष्टान्तः । यथा शब्दचोदिता जातिरङ्गमिति गम्यते नैवमेकत्वमुक्तादेव न्यायात्तदनङ्गत्वे च समीहितसिद्धेः ॥ ६६ ॥

के चिदिति वचनात्परमत, एतद् दूषयति ॥

अन्वयव्यतिरेकाभ्यां सङ्ख्याभ्युपगमे सति ।
युक्तं यत्साधनत्वं स्यान्नत्वन्यार्थोपलक्षणम् ॥ ६७ ॥

विभक्तिप्रत्ययं मत्वेत्यनुवर्त्तते । तस्मिन्सति प्रतीयते तदभावे व्यतिरिच्यते व्यावर्त्तते न प्रतीयते सङ्ख्येति पशुमालभेतेत्यादौ शब्दोपादानायाः तस्याः प्रतीतिश्चेदभ्युपगम्यते विधानमपि कथं नास्तीति शब्दोपात्तायास्त्यागो न युक्तः, अपि त्वेवमेव युक्तं यत्साधनत्वं क्रियाङ्गत्वं । न त्वन्यार्थोपलक्षणं प्रकृत्यर्थोपलक्षणं युक्तमित्यर्थः । सत्वभूतस्यार्थस्य शब्देनाभिधाने तत्संस्कारप्रतिपत्तये वचनमिति प्रकृत्यर्थोपलक्षणमात्र तद्भवति । नचैतन्न्याय्यम् । यथा ह्यन्वयव्यतिरेकाभ्यां प्रकृतिवाच्या जातिः शब्दवती न त्यज्यते तथा सङ्ख्यापीति न्याय्यम् । नह्येकयोगक्षेमस्याङ्गाङ्गितया एकपदोपात्तस्यार्थस्य खण्डशो विनियोगाविनियोगौ युक्ताविति भावः । शब्देनाचोदिते त्वेकत्वे सामर्थ्यात्प्रतिपत्तौ यदैकपशूपात्तानामेकादशानाम-

वदानानां दैवान्मानुषाद्वा वैगुण्यादन्यतमविलोपः, तदा पश्वन्तरारण्यवदानार्थमुपादीयेरन्नेवं का चिच्छब्दार्थबाधा तदानीं भवति। शब्देनाचोदितत्वादेकस्य। तथा च तत्कर्माङ्ग्येन न निर्वर्त्तेतेति प्रतिनिध्यभावः। मुख्याभावे हि प्रतिनिधिरुपादीयते। मुख्य च वचनेन सङ्ख्यानुपादाने विद्यत एव। यस्य पुनः शब्दचोदितमेकत्वं तस्योपपन्नो ऽत्र प्रतिनिधिरित्यवदानलोपे तत्कर्माङ्ग्येन सम्पाद्यते। न तु पश्वन्तरमुपादीयते चोदितैकत्वत्यागप्रसङ्गात्। यद्येवं वपाविनाशे ऽपि पश्वन्तरं नोपादीयेत। नैतदस्ति। यस्मान्नालम्भनमात्रसम्पत्त्यर्थं पशोरुपादानं अपि तु यागार्थम्। तत्रैव च तदेकत्वं विवक्ष्यते। यागश्च वपां विना न सम्पद्यते। तस्मात्पश्वन्तरोपादाने ऽपि नातिक्रान्तमेकत्वम्। तत्रैकत्वेनैव यागस्य निर्वर्त्तितत्वादवदानान्तरार्थं तु पश्वन्तरं चोदिते सत्येकत्वे न लभ्यते इत्यवदानान्तरकार्यं घृतेन सम्पद्यत इति न्यायः॥ ६७॥

यतश्च साधनत्व युक्तं अतः॥

साधनत्वे पदार्थस्य सामर्थ्यं न प्रहीयते।

सङ्ख्याव्यापारधर्मोऽतस्तेन लिङ्गेन गम्यते॥ ६८॥

यदा शब्दोपात्तत्वाज्जातिसंख्ययोः तुल्यत्वं, तदा साधनत्वे पदार्थस्य सामर्थ्यं न प्रहीयते। पदस्येति वाक्यशेषः। सकलस्य हि पदार्थस्य साधनत्वे पदस्य तदाभिधानलक्षणं सामर्थ्यं तद्व्यापितं भवति। अतश्च परिपूर्णस्य पदार्थस्य साधनत्वात्संख्याया एकत्वलक्षणायाः क्रियाया व्यापाराख्यो धर्मः तेन लिङ्गेन गम्यते। यतस्तत्पदस्य सामर्थ्यमप्रहेयं अतस्तेन सामर्थ्यलक्षणेन लिङ्गेन हेतुना गम्यते संख्या व्यापारधर्मं। यतस्तदप्रहेयं, अतस्तद्भवति हेतुः संख्याव्यापाराधिगतौ। यथा यतो ऽविनाभूतो धूमः, अतस्सम्भवत्यग्न्यधिगमहेतुः। अथ वा तेन लिङ्गेन द्वितीयादिनैतद्गम्यते न तु पूर्वोदितस्य सामर्थ्यादपरिग्रहमात्रस्य तदनुवादि लिङ्ग यथा तैरुक्तम्। अपि तु मदीयन्यायेनैव तत्सङ्गतमित्यर्थः। यत्र तल्लिङ्ग नास्ति सङ्ख्याव्यापारसूचक तत्राविवक्षेति भावः। तद्यथा ग्रहं सम्मार्ष्टीति। अत एव सङ्ख्यायाः क्वचिदव्यापारलक्षणो धर्मः, तेन लिङ्गेन गम्यते इत्यकारप्रश्लेषं केचिद्व्याचक्षते किल। लिङ्गाभावे ग्रहं सम्मार्ष्टीत्यादौ न्यायाद-

विवक्षेति लिङ्गमभवत्तत्र साधकतमं। यथा साधनाभावःस्तोकेन मुक्तः स्तोकान्मुक्त इत्यादौ । तदेवमनेन श्लोकद्वयेन स एवार्थो निर्वाहितो यो ऽन्यत्राविहितस्यैवेत्यादौ निर्णीतः । ननु च विवक्षां प्रतिजानता ऽभ्युपेतं सङ्ख्यायाः साधनभावः। सङ्ख्या च द्रव्यविशेषणं शक्तिस्तु साधनमिति कथमेतद्विशेषणं तथा स्यात् । नैष दोषः । शक्तेर्निराधारायां अनुपपत्तेस्तदभेदापन्नं फलतो द्रव्यमेव साधनं न्याय्यम् । तथा च कटं कर्म देवदत्त कर्त्तेति सामानाधिकरण्यं दृश्यते । अथ कर्मादिशब्दैर्द्रव्यायमाणं तदभिधीयते तर्हि कर्मणि द्वितीयेत्यादौ विभक्तिविधाने शक्त्यवच्छिन्नस्य द्रव्यस्यैव सङ्ख्याविशेषणत्वं। युक्तं चैतत् । न हि शक्तिषु सङ्ख्या समवैति । तस्मादाश्रयितव्यसाधनत्वात्सङ्ख्यापि तथा। एतदेव सङ्ख्यायाः क्रियाङ्गत्वं यत्साधनावच्छेद इति सर्वं सुस्थम् ॥ ६८ ॥

पूर्वं ग्रहाणां संस्कार्यत्वादार्थेन रूपेण प्राधान्येन सत्यविवक्षोक्ता। अथ पुनः प्रकारान्तरेणात्र विवक्षाविवक्षे व्यवस्थापयितुमाह ।

अपूर्वस्य विधेयत्वात्प्राधान्यमवसीयते ।
विहितस्य परार्थत्वाच्छेषभावः प्रतीयते ॥ ६९ ॥

वास्तवेन रूपेण पूर्वं गुणप्रधानभावश्चर्चितः । अथ तु वाक्यव्यापाराश्रयेणेति विशेषः । तथा हि । पशोरुत्पत्तिवाक्येनापूर्वस्य विधेयत्वात्प्राधान्यमिति यथाश्रुतमेकत्वं न त्यज्यते विधेयत्वादित्यनेनैवापूर्वस्याक्षेपे सति पुनर्वचनं व्याप्त्यर्थं । क्रियाया वाक्यार्थत्वेन प्राधान्ये ऽपि सर्वत्रापूर्वस्य प्राधान्यप्रज्ञानज्ञापनेन विधीयमानत्वादित्यर्थः । विहितस्य तु ज्ञातस्य सतो ऽन्यार्थत्वेनानुवादादप्राधान्यमिति तत्र विधिवाक्यगतानुसरणं न्याय्यम् ॥ ६९ ॥

एतदेव प्राकरणिके ऽर्थे योजयति ।

सम्मार्गस्य विधेयत्वादन्यत्र विहिते ग्रहे ।
विधिवाक्ये श्रुता संख्या लक्षणायां न बाध्यते ॥ ७० ॥

ग्रहं सम्मार्ष्टीत्यपूर्वस्य सम्मार्गस्य विधेयत्वात्प्राधान्यादन्यत्र प्राजापत्या नव ग्रहा इत्यादौ विधिवाक्ये विहिते प्रथमं ज्ञापिते ग्रहे ग्रहसामान्य इत्यर्थः । तत्र च विधिवाक्ये या श्रुता नव दशेत्यादिका

संख्यापदोपादाना संख्या, लक्षणायां ग्रहं सम्मार्ष्टीत्यत्र पूर्वक्षितग्रहोपलक्षणपरे ऽनुवाद्वाक्ये न बाध्यते न त्यज्यते, अस्या विधौ प्राधान्यात् । इह त्वनुवादवाक्ये ग्रहणमात्रोपलक्षणपरायां चोदनायां नान्तरीयिका द्रव्योपलक्षणार्था शब्दसंस्कारमात्रपरा संख्या ग्रहश्रुतिस्त्वनर्थिका मा भूदिति ग्रहजात्युपलक्षणार्थेति यथाविभिन्नसङ्ख्याकग्रहोपादानार्थं मा भूत् गुणेन प्रधानस्यरोध इति । गुणा हि प्रधानोपकाराय प्रवर्त्तन्त इति प्रधानसंख्यया गुणसंख्या ऽत्र बाध्यते।ननु च दर्शेतानध्वर्युं प्रात सवने ग्रहान्गृह्णातीत्युत्पत्तिवाक्य क्रियाविषय । ग्रहं संमार्ष्टीति त्वनुवादवाक्यं सम्मार्जनक्रियाविषयमिति विषयभेदादविरोधे बहवो ग्रहा गृह्यन्तां, एकस्तु संमार्ज्यतामिति नास्ति बाध । अत्रोच्यते । यद्यपि बहिर्व्यापारभेदाद्भिन्नविषयत्वादविरोध., तथापि प्रतिपत्तौ तयो' सङ्ख्ययोर्विरोध एव । तथा हिपूर्वं नव दश वा बुद्धौ समवस्थिता, इदानीं तदुन्मूलनेनैको बुद्धावुपारोहयितव्यः । एवं चान्यथा ऽवगते प्रधाने, ऽन्यथा पुनरप्रधानवेलायामवगमो न युक्त. । अपि तु यथासिद्धस्यैवानुवादात्संमार्गे प्रधानवेलावगतसङ्ख्याकानामेवावधारणं ग्रहाणां युक्तं । यत्रस्थो हि ग्रहो ऽनूदितः, तत एवास्य स्वरूपमनुस्मर्तव्यम। एवं च साधनप्रचयात्संमार्गस्यापि प्रधानस्योपकारादुभयानुग्रह. सम्पद्यते । बहुषु मध्ये ऽवस्थितश्चानुभूत इति तथैवात्र स्मृत्या ऽनुवादो न्याय्य ।तथा च प्रधानोपकारानुरोध एवेहान्यथोक्त । पूर्वं ग्रहार्थत्वात्सम्मार्गस्य संमार्गवाक्य एव ग्रहाणां प्राधान्यमुक्तं, इह तु विधिवाक्यगतं प्राधान्यमभिहितमित्येतावता विशेष ॥ ७० ॥

पशुना यजेतेत्यत्रापि तर्हि यागस्य विधेयत्वात्पशोरप्राधान्यमिति तदीयमेकत्वं त्यज्येतेत्याशङ्क्याह ।

विधिवाक्यान्तरे संख्या पशोर्नास्ति विरोधिनी ।
तस्मात्सगुण एवासौ सहैकत्वेन गम्यते ॥ ७१ ॥

पशुगुणविशिष्टो यागो विधीयत इत्यज्ञातज्ञापनात्पशोरपि विधानं। उत्पत्तिवाक्यगता च सङ्ख्या न त्यज्यत इत्युत्सर्ग. । तद्यथा। पशौ । ग्रहेत्युत्पत्तिवाक्यापेक्षायां संमार्गस्य विधिवाक्ये, तद्विरोधिनी

सङ्ख्या त्यज्यते। पशौ तु विधिवाक्यान्तरं नास्तीति प्राथमकल्पिकी न त्यज्यते सङ्ख्यैकत्वलक्षणेति, तेन सहासौ क्रियाङ्गभावमनुभवति। सगुण इति। सह लिङ्गलक्षणेन पुंस्त्वाख्येन गुणेन वर्तत इत्यर्थे । यद्वा गुण. शुक्लादि. । यत्र गुणश्रुतिर्नास्ति यथा पशुना यजेतेति, तत्राक्षिप्ते गुणसामान्य इत्यर्थ' । यत्रापि गुणश्रुतिरस्ति यथा गामश्वाजं शुक्लां, श्वेतं छागमालभेतेति, तत्रापि तद्गुण. स गृह्यते एकवाक्योपात्तगुणयुक्त इत्यर्थ. । एतच्च वक्ष्यमाणार्थोपोद्घातार्थमुक्तम । के चित्पुनराहु सगुण इत्येतदेव स्फुटीकृत सहैकत्वेनेति । अत्र तु पौनरुक्त्यदोष । न हि कारिकाभागस्य भागान्तरेण व्याख्यानं युक्तम । यदि वा गुणो विशेषण जाति पशुत्वलक्षणा तया सह गम्यते । जातेरिव श्रुतस्यैकत्वस्य त्यागे कारणाभावात् तदेकत्वमपि गम्यत इति इष्टान्तगर्भं वचनम् । तदेव न्यायवादिमतानुसारेण सिद्धान्तो ऽत्रावस्थापित. । तथा हि । न्यायवादिभिः पूर्वपक्षो ऽत्र कृतः । एकत्वयुक्तमेकत्वस्य श्रुतिसयोगादिति । एवं विद्वान्सोमेन यजेतेति सोमयागे दशापवित्रेण ग्रह संमार्ष्टीति श्रूयते । तत्रैकस्य ग्रहस्य समार्ग. प्राप्त । एकत्वश्रुतिसंयुक्तो, ह्ययं पदार्थ' श्रूयते । एवं पूर्वपक्ष कृत्वा सिद्धान्तित सर्वेषां वा लक्षणत्वादविशिष्ट हि लक्षणमिति। ग्रहज्ञात्वा द्रव्य लक्षयित्वा समार्गो विधीयते ऽविशिष्टं लक्षणं सर्वद्रव्येषु । न हि विशेषो गम्यते को ग्रह संमार्ष्टव्य' को नेति । न ह्येतदेकत्वं विधीयते प्राधान्येन, अपि तु संमार्गस्य प्रधानस्य विधि.। अविधीयमानमेकत्वं, न द्वितीयादि निवारयितुमर्हतीति सामान्यवचनेन प्राप्ते द्वितीयादौ संमार्गो विधीयते । पशोस्तु यागार्थत्वात्परिच्छिन्नेन तेन यागोपकारादेकत्वविवक्षेत्युक्तं। चोदिते तु परार्थत्वाद्यथाश्रुति प्रतीयेतेति वाक्यविदां सिद्धान्त ॥ ७१ ॥

इदानीं सङ्ख्यावदन्यस्यापि गुणस्याश्रयावच्छेदकत्वद्वारेण क्रियाङ्गतयोपादानमनुपादानं वेति सङ्ख्याप्रसङ्गेन विचारयितुं सगुण एवासावित्युपोद्घाते सत्याह ॥

निर्ज्ञातद्रव्यसम्बन्धे यः कर्मण्युपदिश्यते ।
गुणस्तेनार्थिता तस्य द्रव्येणेव प्रतीयते ॥ ७२ ॥

निर्ज्ञात प्रथमं द्रव्यसम्बन्धो यस्य तस्मिन्कर्मणि क्रियायां

यो गुणः शुक्लादिर्विधीयते तेनापि तस्य कर्मणः क्रियालक्षणस्य द्रव्यवदर्थिता । तथा च सम्बन्ध इति द्रव्यपदार्थसम्बन्धपक्षे प्राह। जातिपदार्थपक्षे तु वक्ष्यति, यदा तु जातिः शक्तिर्वेत्यादि । ननु च क्रिया जनकत्वात्स्वाश्रयमपेक्षतां, गुणे तु कापेक्षा तस्याः। अथ सगुणेन द्रव्येण निर्गुणस्यासम्भवाज्जन्या क्रियेत्युभयापेक्षा तर्हि क्रमोऽयं । निर्ज्ञातद्रव्यसम्बन्धे पश्चाद्द्रव्यवद् गुणेऽप्यपेक्षेति अपेक्षाऽसाम्याच्चोपमा नोपपद्यते । अत्रोच्यते । क्रिया तावत्साध्यस्वभावा साधनमपेक्षते। तच्च द्रव्यमिति तदपेक्षोपदिश्यमानगुणापेक्षापि तस्य गुणस्य साधनावच्छेदोपयोगाद्विद्यत एव क्रियायाः । तत्र यद्व्यवहितमन्तरङ्गं तत्प्रथममपेक्ष्य । तथा च द्रव्य । गुणस्तु तदाधारस्तन्मुखेन सम्बन्धसहो बहिरङ्गः पश्चादपेक्षणीय । अत एव निर्ज्ञात इति भूताभिधानं। द्रव्यस्य शक्त्याधारत्वात् प्रथमं क्रियासम्बन्ध इत्यर्थः। एवं च साक्षादसमन्वयादुपमा । एतच्च, आर्थक्रमापेक्षयोच्यते । न तु शब्दव्यापारापेक्षया । गामभ्याज शुक्लामिति हि वाक्यं सकृदेव गुणप्रधानभावेन सम्बन्धविशिष्टमर्थमाहेति न कश्चित्तत्र द्विरस्य व्यापारः ॥ ७२ ॥

एवं गुणद्रव्ययोः श्रौतः क्रियासम्बन्ध उक्तः । इदानीं तयोः परस्परं वाक्यीयसमन्वयप्रतिपादनायाह ॥

कश्चिदेव गुणो द्रव्ये यथा सामर्थ्यलक्षणः ।
आधारोऽपि गुणस्यैवं प्राप्तः सामर्थ्यलक्षणः ॥ ७३ ॥

निर्गुणस्य द्रव्यस्यासम्भवः सामर्थ्यं तेन लक्ष्यते तत्र द्रव्ये गुणः । आधारोऽपि द्रव्यं गुणस्य सामर्थ्येन निराधारगुणासम्भवस्वभावेन लक्ष्यते । गुणमात्रं च द्रव्येणापेक्षितं द्रव्यमात्रं च गुणेनास्मात्सामर्थ्यादित्याह । कश्चिदेवेति । अपरामृष्टजातिभेदौ द्रव्यगुणौ परस्परेणापेक्षितौ । प्राप्त इति । प्रतीतिलब्ध इत्यर्थः । सामान्यमात्रं प्रतीत्यव्यभिचाराद्विशेषणाऽव्यभिचारात् ॥ ७३ ॥

एवमाधाराधेयसामान्यसंसर्गे लब्धे श्रुतयोरेकवाक्यत्वाद्वाक्यीयेन समन्वयेन परस्परसम्बन्धमाह ॥

तयोस्तु पृथगर्थित्वसम्बन्धो यः प्रतीयते ।

न तस्मिन्नुपघातो ऽस्ति कल्प्यमन्यत्र चाश्रुतम् ॥ ७४ ॥

पूर्वोपवर्णितेन सामर्थ्येन पृथक् परस्परं गुणद्रव्ययोराकाङ्क्षायां सत्यामेकवाक्योपात्तयो. इतयोरेव समन्वयो यः प्रतीयते न तत्र बाधः श्रौतेऽर्थे त्यागाभावात् । असति तत्परित्यागहेतावश्रुतपरिकल्पना न न्याय्या । अत एव प्रतीयत इति निर्बाधप्रतीतिः प्रमाणतामाह । अपोद्धारबुद्ध्याश्रयेण चैतदुच्यते । निरंशे हि वाक्ये पूर्वमेव विशेषविवक्षा । तथा हि । निरवयवेन वाक्येन विशिष्ट एवार्थ प्रतिपादित । तत्र प्रतिपत्त्यर्थमंशांशिकतया ऽपोद्धारपदार्थः परिकल्प्यते । सामान्यात्मा स एव विशेषो भवति विशेषसम्बन्धे सतीति प्रतिपादनोपायक्रम । तथा च विशेषसम्बन्धे ऽपि सामान्यात्मा पदार्थो न स्वरूपात्प्रच्यवते अपि तु तद्विशेष इति । अत एवावतिष्ठते, न तु सत्यत. । सामान्येन स्थितानां यदा विशेषे ऽवस्थानमुपपद्यते सामान्यवृत्तीनामुच्चरितानां तथाभूतानामेव तिरोभावादुत्तरकालं को ऽसौ विशेषे च तिष्ठतां । न च सामान्यविशेषयोर्युगपद्विवक्षा सम्भवति । विशेषविवक्षायां हि सर्वस्मान्नियमेन सामान्यादवच्छेदो विज्ञायत इत्युपात्तस्य सामान्यस्य त्यागप्रसङ्गः । स च नित्ये शब्दार्थसम्बन्धे न युक्त । तिरोभूतश्च निवृत्तो ऽनवधार्यमाणात्मा शब्दो ऽन्यस्यापि पदस्य सामान्यनिष्ठत्वात्कन चिदप्यप्रतिपादिने विशेषे निर्विषय. कावतिष्ठताम् । यदुक्तम । सामान्यार्थैस्तिरोभूतो न विशेषे ऽवतिष्ठते । उपात्तस्य कुतस्त्यागो निवृत्त कावतिष्ठतामिति । तस्माद्विशिष्ट एवार्थो वाक्यादवगन्तव्य इत्यश्रुतस्य कल्पनावकाश एव नास्ति । नापि श्रुतस्यार्थस्य त्यागसम्भव । अपोद्धारपदार्थाश्रयो ह्यय विचार प्रस्तुत । तथा श्रुत्यादीन्यखण्डवाक्यपक्षे नोपपद्यन्त इत्याक्षिप्तवाक्यकाण्डे ऽपोद्धारपदार्थकल्पनैवोपपादितानि । श्रुतिप्रतिपादितस्य श्रौतार्थस्य त्यागे ऽश्रुतकल्पना न युज्यत, इत्येकवाक्योपात्तत्वमत्र सम्बन्धहेतु. । परस्परसम्बन्धे हि एकवाक्यता ऽभीष्यते । वाक्यार्थेन प्रधानेन गुणानामाक्षेपादश्रुतपरिग्रहे सर्वत्र वाक्यभेदप्रसङ्गान्न कचिदेकवाक्यता भवेत् ॥ ७४ ॥

ननु च क्रियाकारकसम्बन्धे विशेषणविशेष्यभावे च प्रति-

पाद्ये वाक्यभेदप्रसङ्गः । न चासौ न्याय्यः । नैष दोषः । गुणप्रधानभावेनात्र सम्बन्धद्वयसम्भवः । स च एकस्मिन्वाक्ये ऽविरुद्ध ॥७४॥

तथा हि । श्रुतिवाक्यलक्षणमत्र प्रमाणद्वयमस्तीत्याह ॥

क्रियया यो ऽभिसम्बन्धः स श्रुतिप्रापितस्तयोः ।
आश्रयाश्रयिणोर्वाक्यान्नियमस्त्ववतिष्ठते ॥ ७५ ॥

श्रुत्या कारकविभक्त्या क्रियायां सम्बन्धो द्रव्यगुणयो. समर्थीषकतया प्रतिपादित. । वाक्यादखण्डप्रतिभोत्पत्तावपोद्धारेण गामभ्याज शुक्लामभ्याजेति पदार्थविभजनात् गामेव शुक्लामेवेति गुणगुणिनोरेकवाक्योपात्तयोर्विनियोगो वाक्यस्य प्रामाण्येनावतिष्ठते । अश्रुतगुणद्रव्यपरिकल्पने हि प्रतिपदार्थं क्रियाभेदात् गामभ्याज शुक्लां चेति वाक्यभेद. स्यादित्येकरसयैव प्रवृत्त्योपात्तगुणविशिष्टस्य द्रव्यस्य क्रियासमन्वये तदेकवाक्यत्वं पोषितं भवति । नियमो द्रव्यगुणयोराधेयान्तरादाधारान्तराच्च व्यवच्छेद. । सति परस्परसम्बन्धे न चान्यनिवृत्ते शब्दान्तरमस्ति वाचकमित्येकवाक्याख्यकशब्दोपादाना ऽसौ श्रौतीति वाक्यीया ऽवतिष्ठते। तदुक्तं न्यायवादिभि । अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यादिति । यत्रार्थैकत्वं श्रूयते वाक्ये, तत्र द्रव्यगुणयोर्नियमो भवति परस्परसम्बन्धात्मक । कुत ऐककर्म्यात् । एक हि कर्म वाक्यार्थभूतं क्रियालक्षणं । प्रधानमुद्दिश्य द्रव्यगुणौ शेषभूतौ विधीयेते इति तयो परस्पराकाङ्क्षत्वादेकवाक्यतायां सामानाधिकरण्यान्यथानुपपत्त्या ऽस्त्यपि सम्बन्धवाचकषष्ठीलक्षणविभक्तिश्रवणे विशेषणविशेष्यभावसम्बन्धावसाय इति सूत्रार्थोऽस्मन्नयानुगुण. ॥ ७५ ॥

एवमवस्थिते सति, इदमत्रापततीत्याह ।

तत्र द्रव्यगुणाभावे प्रत्येकं स्याद्विकल्पनम् ।
श्रुतिप्राप्तो हि सम्बन्धो बलवान्वाक्यलक्षणात् ॥७६॥

श्रुतिप्राप्त', श्रुत्योपस्थापितः क्रियाकारकसम्बन्धो, वाक्यं लक्षणं लक्ष्यते ऽनेनेति प्रतिपादक यस्य तस्माद्बलवानिति । तस्य सर्वथा त्यागाभाव.। साक्षाद् द्वितीयाश्रुति स्तद्विभक्तिश्च श्रौतसम्बन्धा ऽऽवेदिका ऽन्योन्यस्वरूपानुविद्धयो. क्रियाकारकयो. प्रतीतेः। वाक्यीय-

स्य तत्सम्बन्धस्य साक्षाद्वाचकं नास्ति केवलमुभयस्यैकवाक्योपादानाद्योग्यार्थसमन्वयपदान्तरसमवधानात्परस्परेण सम्बन्धो व्यवस्थाप्यत इति श्रुत्यपेक्षया दुर्बलत्वं । पदान्तरापेक्षत्वाच्च पदान्तरस्य नियतस्य सन्निधानाभावान्नावश्यं वाक्यीयसम्बन्धो विशेषणविशेष्यभावलक्षण इति तस्मिन्बहिरङ्गे निवृत्तेऽपि श्रौतस्यान्तरङ्गस्यानिवृत्ति । एवं च श्वेतं छागमालभेतेति श्वेताभावे कृष्णस्यालम्भनवच्छागाभावे पिष्टपिण्डीमालभ्य कृती स्यादिति चोद्यमत्र दर्शने ॥७६॥

जातिपदार्थनये तु सिध्यतीत्यवश्यवस्येत्याह ।

यदा तु जातिः शक्तिर्वा क्रियां प्रत्युपदिश्यते ।
सामर्थ्यात्संनिधीयेते तत्र द्रव्यगुणौ तदा ॥ ७७ ॥

केषां चित्साहचर्येण जाति.शक्त्युपलक्षणमिति जात्युपलक्षिता शक्ति.। जातिपदार्थे प्रतिनिध्युपादानार्थे क्रियासाधनत्वेन चोद्यत इत्युक्तत्वाज्जाति शक्तिर्वेत्याह । अत्र दर्शने, न द्रव्यगुणयोः श्रौतः क्रियाभिसम्बन्ध । अपि तु जातिक्रिययो. शक्तिक्रिययो र्वा विभक्तिप्रापित. सम्बन्ध ।निराधारयोश्च जातिशक्त्योरसम्भवात्सामर्थ्यात्सन्निधापितं स्वाधारं द्रव्यं तेनापि स्वाधेयो गुण इति द्वयोरपि द्रव्यगुणयो. सामर्थ्यात्प्राप्तत्वम् ॥ ७७ ॥

ततश्च प्रतिनिधिविषये ।

जातीनां च गुणानां च तुल्ये ऽङ्गत्वे क्रियां प्रति ।
गुणाः प्रतिनिधीयन्ते छागादीनां न जातयः ॥ ७८ ॥

द्रव्यव्यवधानात् द्वावपि जातिगुणौ क्रियाङ्गभावमनुभवत इति तुल्यत्वा तत्र तथापि च्छागादीनां सम्बन्धिन्यो जातयो न प्रतिनिधीयन्ते। छागाभावे मेषो नालभ्यते अपि तु गुणानामेव प्रतिनिधिः प्रसिद्ध. । श्वेताभावे कृष्णो ऽपि च्छाग आलभ्यते ॥ ७८ ॥

कात्र युक्तिरित्याह ।

व्यक्तिशक्तेः समामन्ना जातयो न तथा गुणाः ।
साक्षाद् द्रव्यं क्रियायोगि गुणस्तस्माद्विकल्पते ॥ ७९ ॥

व्यक्तिशक्ते द्रव्यशक्ते' । शक्तस्य द्रव्यस्येत्यर्थ' । शक्त्यायत्तो द्रव्यस्योपयोग इति शक्तिग्रहणमुत्पत्तिप्रभृत्याविनाशादन्वयाद्-

धिष्ठानसम्बन्धयोश्चैककालत्वादासन्ना द्रव्ये जातिः। गुणास्तु तन्निष्ठोत्तरकालभाविन कालान्तरपरिवासादन्योन्यस्वभावपरिणामिन इति द्रव्याद्विप्रकृष्टा। यदि नाम न समासन्ना गुणाः कथमेतावता विकल्प इत्याह। साक्षाद्द्रव्यं क्रियायोगीति। एतदुक्तं भवति। यदि द्रव्यमनपेक्ष्य गुण साक्षात्क्रियायोगी स्यान्न विकल्पेत। यदा तु द्रव्यं साक्षात्क्रियायोगि, जातिगुणौ तद्द्वारेण तदा प्रत्यासत्तिविप्रकर्षचिन्ता जायते। तथाहि। द्रव्य साक्षाच्छक्तं क्रियासम्बन्धक्षममिति तद्द्वारेण समन्वययोग्यम। तत्रासन्न न विकल्पते जातिरूपमित्यन्यजातीयस्य न प्रतिनिधि। अपि तु अन्यगुणस्य। कृष्णेऽपि च्छागे छागबुद्धिरन्वेत्येव। अन्यजातीयस्योपादाने तु जातेरात्मकल्पायास्त्यागे सर्वथैव साधनभदात्क्रियान्तरमेव स्यात्। कदरे तु साहश्यात् खदिरबुद्धेरनपगम। एतच्च जातिपक्ष युज्यते। औतस्य जातिरूपस्याऽत्यागात्। द्रव्यपदार्थपक्ष तु जातेरनभिधेयाया उपलक्षणत्वात्तस्यागेऽपि नास्ति औतार्थत्याग इत्यन्यजातीयस्यापि प्रतिनिधिप्रसङ्ग.। औतस्य सम्बन्धस्य च द्रव्यपदार्थपक्षे पूर्वं गुणद्रव्ययो साम्यमुक्त। इह तु सामर्थ्यादाक्षेपे प्रत्यासन्ना जातिर्न त्यज्यत इति जातिपदार्थमुत्कर्षयितुं विचारितम्। अत एव यदा तु जातिरिति तु शब्द. पूर्वस्माद्विशेषणार्थ। तदेतद्भाष्ये विहित। यत्र ह्यनन्तरं द्रव्यं तत्प्रधानं, न हि शुक्लमालभेतेति पिष्टपिण्डीमालभ्य कृती भवतीति। प्रत्यासन्नतरत्वाज्जातेस्तद्वाची द्रव्यशब्दो ऽभिप्रेतो न गुणोपमर्जनद्रव्यवाची। अनिर्धारितरूपस्य हि द्रव्यस्य जातिरात्मरूपनिर्धारणोपयोगिनी स्वात्मप्रदानेनारूपिता तदाकारतां प्राप्नोति। तत्प्रतिनिधौ वस्त्वन्तरभावाच्चोदितस्य त्यागप्रसङ्ग.॥ ७९॥

पूर्वोक्त पक्षमन्यमतत्वेनोपसंहरति।

साम्येनान्यतराभावे विकल्पः कैश्चिदिष्यते।
अतद्गुणोऽतश्छागः स्यान्मेषो वा तद्गुणो भवेत्॥८०॥

यथा जातिर्द्रव्योपलक्षणं निरुपाधेरर्थस्याव्यवहार्यत्वात्। एवं गुणोऽपि। तथा जातिवदाधारनियतो गुणो नीलादिर्व्योम्नाकाशादेस्तदभावादिति सति साम्ये ये द्रव्यवद्ज्ञेयत्वाद् द्रव्यलक्षणप्राप्तं गुणमप्यभिधेयं मन्यन्ते व्याडिदर्शनस्थिता द्रव्यपदार्थिका., तेषां गुणो

पि क्रियासम्बन्धं जातिद्रव्यद्वारेणाहेतीति द्रव्यसम्बन्धपरिपोषार्थं । वाक्यीयसमन्वयत्यागेन द्वयोरपि गुणद्रव्ययोः प्रतिनिधुपपत्तिरित्यनभिमतमपि पक्षं मतान्तरत्वेन निर्दिशति । कैश्चिदिति । द्रव्यस्य हि प्रतिनिधिर्भाष्यकारप्रभृतिभि. शिष्टैर्नाङ्गीकृत. ॥ ८० ॥

एवं प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसन्धातुमाह ॥

जातेराश्रितसङ्ख्यायाः प्रवृत्तिरुपलभ्यते ।
सङ्ख्याविशेषमुत्सृज्य क्वचित्सैव प्रवर्त्तते ॥ ८१ ॥

प्रासङ्गिकेन पूर्वप्रस्तुतस्य व्यवधानादुक्तमप्येतत्पुनः स्मारितं सामान्येनाधिक वक्तुम् ॥ ८१ ॥

तथाहि ॥

पराङ्गभूतं सामान्यं युज्यते द्रव्यसङ्ख्यया ।
स्वार्थे प्रवर्त्तमानं तु न सङ्ख्यामवलम्बते ॥ ८२ ॥

पूर्वं शब्देन व्यापारेण विधीयमाना ऽनूद्यमानत्वेन गुणप्रधानभावमाश्रित्य गुणे ऽपि ग्रहे सङ्ख्या विवक्ष्यत इति प्रतिपादितम् । इदानीं तु वस्तव गुणप्रधानभावमाश्रित्य गुणे सङ्ख्या विवक्ष्यते इति न्यायो ऽवतार्यते ॥ ८२ ॥

यजेत पशुनेत्यत्र यज्यर्थायां पशुश्रुतौ ।
कृतार्थेकेन पशुना प्रधान भवति क्रिया ॥ ८३ ॥

यागस्य प्राधान्यात्तत्साधनभूत. पशुरित्येकेन यागसम्पत्तौ प्रधानस्य क्रियालक्षणस्य वाक्यार्थस्य निष्पत्तेर्गुणभेदप्रत्यनादरात्पराङ्गभूतमत्र पशुसामान्यं द्रव्यसङ्ख्यया युज्यते इति जातेराश्रितसङ्ख्याया अत्र प्रवृत्ति' । तथा हि । प्रधानं गुणभेदे सत्यावर्त्तेतेति क्रियान्तरमेवैतत्स्यात् । ततश्च न प्रधानानुयायिनो गुणाः स्युः । अपि तु प्रधानं गुणानुयायीत्येतदनिष्ट प्रसज्येतेत्याह ॥ ८३ ॥

तथा हि ॥

यावतां सम्भवो यस्य स कुर्य्यात्तावतां यदि ।
आलम्भनं गुणैस्तेन प्राधान्य स्यात् प्रयोजितम् ॥८४॥

यस्येत्यधिकारिणः । अङ्गप्रयुक्ते च प्रधाने प्रधानत्वमेव तस्य

न स्यात्, तत्प्रतिगुणानां च गुणत्वमिति सरक्ष्यो ऽयं नय इत्यभिप्राय. ॥ ८४ ॥

स्वार्थे प्रवर्त्तमान तु न सङ्ख्यामवलम्बत इत्यत्रोदाहरणमाह ॥

सम्मृज्यमानतन्त्रे तु ग्रहे यत्र क्रियाश्रुतिः ।
सङ्ख्याविशेषश्रवण नैव तत्राद्रियामहे ॥ ८५ ॥

सम्मृज्यमानो ग्रहार्थस्तन्त्र यत्र ग्रहे ग्रहशब्दे । विशेषणसमासो वायं । सम्मृज्यमान च तन्त्र च तस्मिन् ग्रहे सस्कार्यत्वात्प्रधाने सम्मार्जनक्रियाया शब्दप्रधानभूताया यत्र श्रुति. ग्रहं सम्मार्ष्टीत्यत्र तत्र स्वशब्देन प्रतिपादितस्यापि सङ्ख्याविशेषस्यैकत्वलक्षणस्य विवक्षा न भवति । उत्पत्तिवाक्यानुसारेणानेकसङ्ख्यस्यैव तस्यात्र विवक्षितत्वात् । न हि सम्मार्ग्मोऽनन्तन्त्र, येनैकेनापि ग्रहलक्षणेन साधनेन तस्य सम्पत्तावनेकोपादानं पशुवलि फलं स्यात् । अपि तु ग्रहस्तन्त्रमिति यथासम्भव तस्य संस्कार इति सङ्ख्याविशेषमुत्सृज्य जाति. प्रवर्त्तते ॥ ८५ ॥

तदेव गुणे सङ्ख्या विवक्ष्यते न तु प्रधान इत्यत्र शास्त्रीयं ज्ञापकमाह ॥

शिष्यमाणपरे वाक्ये यदेकग्रहणं कृतम् ।
शेषे विशिष्टसङ्ख्येऽपि व्यक्तं तल्लिङ्गदर्शनम् ॥ ८६ ॥

सरूपाणामेकशेष इत्यत्र शिष्यत इति शेष इति कर्मसाधनशेषशब्दाश्रयेण शिष्यमाणो ऽवशिष्टमान पर प्रधान एकशेषलक्षणेन संस्कार्यत्वाद्भवतीत्येकवचनान्तत्वादेकसङ्ख्यायुक्तेऽपि प्रतीते शेषशब्दे यत्पुनरेकशब्दोपादान तत्स्वार्थे प्रवर्त्तमान प्रधानभूतं सामान्यमाधारगतसङ्ख्याश्रयेण प्रवर्तत इत्यस्यार्थस्य ज्ञापकं स्फुट । भावसाधने तु शेषशब्दे शेषणक्रियाया. प्राधान्येन शिष्यमाणस्येति द्विबहोरपि शेषणमेकमेवेति, एकत्वे विवक्षितेऽपि द्विबहोर्निवारणार्थमेकशब्दोऽर्थवानेवेति न ज्ञापक स्यात् ॥ ८६ ॥

एवं गुणे सङ्ख्या विवक्ष्यत इति न्यायं वैदिकोदाहरणपृष्ठपातितया ऽस्यास्य प्रकृतोपयोगितां दर्शयितुं व्याकरणे ऽप्युदाहरणमाह ॥

समासप्रत्ययविधौ यथा निपतिता श्रुतिः ।
गुणानां परतन्त्राणां सा तथैवोपपद्यते ॥ ८७ ॥

सुप्सुपेत्यत्र समासस्य विधिरिति तस्यैव प्राधान्यम् । न ह्यवयवानामिदमनुशासनम् । समुदाये तेषामन्तर्भूतत्वात् स्वातन्त्र्याभावात् । न चाप्यवयवा' के चनात्र वस्तुत. सन्ति । विशिष्टे ऽर्थे समासपदस्याभिन्नस्यैव प्रवृत्ते. । यथोक्तं वाक्यकाण्डे । ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बल इति । अभिन्नस्य समासपदस्यैव परिकल्पितपूर्वापरावयवानां विभाग सञ्ज्ञिकीर्षित । अन्वयव्यतिरेकाभ्यां हि विशिष्टार्थशब्दावधारण । तौ चात्र समासपदे राजपुरुषादौ स्त. । समुदायेन विशिष्टस्य सम्बन्धस्य प्रतिपादनात् । अवयवाभ्यामप्रतिपादनात् । समुदायसस्कारप्रयुक्त एव चावयवानां विभक्तिलोपह्रस्वत्वपुवद्भावादिसस्कार. । अवयवसंस्कारादिनान्तरीयकत्वात्समुदायसस्कारस्य । तस्मादत्र समासविधौ येन प्रकारेणैकसङ्ख्यामुपादायैकत्व प्रतिपादयन्ती श्रुति सुप्सुपेतिशब्दैर्निपतिता श्रोत्रविषयभावमागता, तेनैव प्रकारेण न्यायेनोपपद्यते युज्यत। श्रुतमेकत्वं विवक्षयत इत्यर्थ । को ऽसौ न्याय इत्याह । गुणानां परतन्त्राणामिति । प्रधानवशवर्त्तित्वाद् गुणानामवयवानां यां सङ्ख्यामुपादायार्थे प्रवृत्ता सती सुप्सुपेति श्रुतिस्तत्सङ्ख्यायोगिनमेवार्थं प्रतिपादयतीत्येकस्य सुबन्तस्य समास. कण्ठश्रित इत्यादौ भवति । ननु बहूनां महत्कण्ठं श्रित इति द्वितीयान्तजातेराश्रयादनेकस्य समासे तस्यानियतत्वादनवस्थानात्प्रधानभूतः समासो नियमेन प्रतीयत इति विप्लवात्तस्यानुग्रहो निराकृतः स्यादिति प्रत्ययवं समासभेदात् गुणायत्तं प्राधान्य स्यात् न तु गुणा. प्रधानानुयायिन इत्यर्थ । द्वन्द्वबहुव्रीह्योस्त्वनकमिति वचनसामर्थ्यादनेकपदावयव. समासोऽभ्युपगत एव । अत एव च लिङ्गात्सङ्ख्याविवक्षासिद्धिः । प्रत्ययविधाविनिङ्ग्याप्रातिपदिकादित्यत्र समाहारद्वन्द्वनिर्दिष्टाया प्रातिपदिकलक्षणाया प्रकृते' सिद्धरूपाया अनुवादात्स्वादिविधिवाक्ये ऽधिकारादपूर्वस्य स्वादेरेकवाक्यतया प्रत्ययस्य विधानमिति प्राधान्यात्तदङ्गे प्रातिपदिके यथाश्रुतसङ्ख्याङ्गीकारः । ननु च सुप्सुपेति विभक्त्येकत्वस्य प्रतिपादितत्वादस्तु सङ्ख्याविवक्षा । ङ्याप्प्रातिपदि-

क्तादित्यत्र तु का ऽसावेकत्वसङ्ख्या श्रुता यस्या विवक्षैषेत्यस्य यदि समाहारैकत्वं । तदयुक्तम् । तस्य समुदायसम्बन्धित्व तू समुदायात्प्रत्ययोत्पत्तेरविवक्षितत्वान्न तस्यैकत्वमत्र विवक्षितत्वेन प्रतिपाद्यम् । अपि तु प्रत्येकमवयवानाम् । तेषां चात्र वृत्तावन्तर्गतत्वाद् द्वित्व द्विप्रतियोग्यैकत्वं न प्रतीयते ऽपि त्वविज्ञातसङ्ख्याविशेषाणि स्वरूपमात्रेणैव ङ्याप्प्रातिपादकानि । भवतैव तर्ह्यस्माकं दिक् प्रदर्शिता । वयमप्यधुना तथैव व्याचक्ष्महे । यथा निपतिता श्रुति । येनैव प्रकारेण निपतिता अर्थवच्छब्दरूपं च स्वरूपमात्रेण प्रतिपादयन्ती निपतिता । यथा च तावति तात्पर्यमिति न द्वितीयमपेक्षते । द्विवचनबहुवचनान्तानामसमासाद् वृत्तौ सङ्ख्याविशेषानवगते. प्रतियोग्यपेक्षामन्तरेण च द्वित्वाद्यनुत्पत्ते । अतश्चार्थात्प्रत्येकमेकत्वं ङ्याप्प्रातिपदिकादिति वदतो विवक्षितम् । अन्ये तु ग्रहणकवाक्यादस्माद्यन्प्रातिपदिकं जायते, ङ्यन्तादावन्तात्प्रातिपदिकादिति, तत्र श्रुतमेकत्वं विवक्ष्यत इति व्याचक्षते । अत्र तु यथा निपतिता श्रुतिरित्यवाचकम् । न हि प्रतिपादकमुपप्लवमान वाक्य श्रुतिविषयम् । तद्वत्र सङ्ख्याविवक्षायां बहुभ्यो ङ्याप्प्रातिपदिकेभ्यः स्वादिप्रत्ययस्य परत्वासम्भवाद्यथाप्रकृत्यावर्त्तेत प्रत्ययः । तथा च गुणानुयायि प्रधानं स्यान्न तु गुणास्तदनुयायिनः । ननु च स्वादीनां प्रकृतिसम्बन्धस्य विधीयमानत्वात्कथ तेषां प्राधान्य । एवमपि प्रकृतीना तावद् गुणत्वं सिद्धमिति तत्र गुणे सङ्ख्या विवक्ष्यत इति सिद्धो ऽस्मन्नय. । न च प्रकृतिरेव प्रत्ययपरतया सम्बिच्चिकीर्षिता । प्रकृतिप्रत्ययपरिकल्पनेव पदस्यैवान्वाख्येयत्वात्तस्यैव लोके प्रयोगात् । यद्यपि च प्रत्ययपरत्वेन संस्कृता प्रकृतिरेव पदं तथापि तात्पर्यदृशा प्रकृते. प्रक्रियाभेदेनासत्यत्वादविकल्पं पदमेव सत्यमुद्दिश्य संस्कारप्रवृत्ति । वाक्यार्थप्राधान्ये त्वपूर्वस्य प्रत्ययस्यैव विधीयमानत्वात्प्राधान्य । अत एव समासप्रत्ययविधावित्याह । इत्थं च नात्र भिन्नवाक्यतया सम्बन्धिविधान । प्रक्रियायां प्रकृत्यनुवादेनैकवाक्यतया स्वादीनां विधानात्सुप्तिङोरविशेषविकरणाद्ध्रुवमाभिधानादिति तु सङ्ख्यावाक्यभेदाभिप्रायं । न तु प्रकृतिवाक्येनापि नैकवाक्यता ऽत्र विवक्षितति मन्तव्यम् । न चैकवाक्यतया विधाने प्रत्ययसंज्ञासम्बन्धो विलक्षणः प्रवृत्तिभेदेन विना न शक्यते विधातुं । विधिसम्बन्धो हि पूर्वं, ततो

विधानाल्लब्धसत्तानां स्वादीनां प्रत्ययसंज्ञासम्बन्धः । सतो हि कार्येण कार्येण भवितव्यम् । भाविनोऽपि हि बुध्या विषयीकरणाद्भाव्यमानावस्थायामेव प्रत्ययादिसंज्ञासमन्वयादित्येकवाक्यतयैवात्र प्रत्ययविधिर्ग्रन्थकाराभिमतः ॥ ८७ ॥

किमेष एवोत्सर्गः, गुणे सङ्ख्या विवक्ष्यत इति । नेत्याह ॥

गुणेऽपि नाङ्गीक्रियते प्रधानान्तरसिद्धये ।
सङ्ख्या कर्ता तथा कर्मण्यविशिष्टः प्रतीयते ॥ ८८ ॥

तथा कर्तेति । एवं च सति कर्ता ऽविशिष्टः प्रतीयत इति सम्बन्धः । स हि गुणः । ईप्सिततमं तु कर्मसंज्ञाद्वारेण धीयमानसंस्कारं प्रधानं । कर्मणीति । कर्तुरीप्सिततमं कर्मेत्यत्र कर्मसंज्ञायां विधीयमानायाम्, तस्या एव तया वा संस्क्रियमाणस्य कर्मणः प्राधान्यात्कर्तुः क्रियया ऽप्सिततममिति स्वाश्रयक्रियासम्बन्धितया कर्ता निर्दिश्यमानो गुणो ऽविशिष्टः सूत्रोपात्तलिङ्गसङ्ख्याभ्यामनवच्छिन्नः, कर्त्रो कर्तॄणां च क्रियया ऽप्सिततमस्यापि कर्मसंज्ञासिद्ध्यर्थं भूय प्रधानानुग्रहाय प्रतीयते अवगम्यते । समासप्रत्ययविधौ तु बहूनां सुबन्तानां समास ऽव्यवस्था स्यात्, बहुत्वस्यानियतत्वात्कर्मसंज्ञा तु बहुविषया प्रचयमनुभवतीति न दोषः । प्रत्ययविधिरपि बहुभ्यः प्रकृतिभ्यो नास्ति परत्वस्यानिर्वाहात् । तथा च सरूपवार्तिकमुक्तं । एकविभक्तेरिति चेन्नाभावाद्विभक्तेरिति । तदेव प्रधानप्रचये भूयानुग्रहः कृतो भवतीति प्रधानस्याविवक्षितसङ्ख्यत्वे सिद्धे न गुणगता सङ्ख्या ऽङ्गीक्रीयते । अन्यथा प्रधानसङ्कोचे तदुपरोधः स्यादिति प्रधानान्तरसिद्धिः । प्रयोजनमेतद्युक्तिगर्भं द्रष्टव्यमिति । गुणानां पारतन्त्र्यादेव न्यायात्कर्तुरीप्सिततममित्यत्र न विवक्ष्यते सङ्ख्येत्युक्ता युक्तिः ॥८८॥

अत्रैवोपोद्बलनार्थमाह ॥

यस्यान्यस्य प्रसक्तस्य नियमार्था पुनःश्रुतिः ।
निवृत्तौ चरितार्थत्वात्सङ्ख्या तत्राविवक्षिता ॥ ८९ ॥

यस्य पुनः श्रुतिरिति सम्बन्धः । पूर्वं सामान्येनाक्षेपादेकैव श्रुतिः पुनःश्रुतिरित्युच्यते । यथेह कर्तुः । पुनः शब्दो वा तु शब्दस्यार्थे । स पूर्वमप्रधाने विवक्ष्यते सङ्ख्येत्युक्तम्, तदपेक्षयेह विशेषद्योतनार्थः ।

किमर्थमसौ पुन श्रुतिरित्याह। अन्यस्य कर्मादे. प्रस्तुतस्य प्राप्तुवतो नियमार्था निवृत्त्यर्था। तथा हि ईप्सिततमस्य सम्बन्धिशब्दत्वाद्ये-नेप्सिततमं कर्म तस्याक्षेपस्तावत्सिद्ध इति करणादेरपीप्सिततम-प्रस्तुत्ते कर्तुरित्युच्यमानं कारकान्तरनिवृत्तितात्पर्यान्नियमार्थमिति। द्वौ बहवो वा कर्तारो न निवारिता। तथा ऽपि कारकान्तरनिवृत्ति-र्विवक्षिता सिध्यत्येवेति निर्देशार्थैवात्र सङ्ख्या। नन्वेवमनेनैव न्या-येन यजिना अनियताङ्गाक्षेपात् पशुनेति करणान्तरनिवृत्तितात्पर्येणा-च्यमानमविवक्षितसङ्ख्यं प्रसज्येत। नैष दोष.। यथेप्सिततमस्य स-म्बन्धिशब्दत्वादवश्यं साधनमात्राक्षेपे सिद्धे कर्तुरिति पुन श्रुति-र्भवति, नैवं यजे करणाक्षेपो ऽवश्यम्भावी। इवनोद्देशेन हविः प्रक्षेपमात्रस्य यज्यर्थत्वात्त्यज्यमानस्यैवाक्षेपो न करणस्यति करणा-क्षेपस्य नान्तरीयकत्वाभावान्न पशुनेति पुन श्रुति अपि त्वपूर्वं ए-वायमङ्गविधि.। पशुरेवाद्य त्यज्यमान इति चेत्, त्यागमात्रे ऽपि तर्हि यजे प्रयोगो दृश्यते, अग्नौ सुष्ठु यजत इति। अत्रापि हविष आक्षेप इति चेत्, एव तर्हि इष्टार्थाना क्रियाणां लोके भवेन्नाम सा-मर्थ्यात्साधनाक्षेप। अदृष्टार्थासु तु शब्दप्रमाणकत्वाद्यजेतेत्यनो याग' कर्तव्य इत्येव प्रतीयत। पशोरपूर्वैव चोदनेयमिति यथाश्रु-तसङ्ख्याविवक्षैव न्याय्या। न च तस्मिन्याग द्वाभ्यां प्रधानान्तरसि-द्धिरस्ति। नापि यागान्तरे एकेनैव सर्वस्य यागस्य सिद्धि। ननु च का-रकान्तरनिवृत्तितात्पर्यं कर्तु सामर्थ्यात्सार्थाद्धीयते पथिक इत्यत्रापा-दानेन सामर्थ्येन ईप्सिततमस्य पथिकस्य कर्मसज्ञाभावाद्धीयत इति कर्मणि लकारोत्पत्ति कथं। न चायं कर्मकर्तुर्विषय। कर्मस्थक्रियाणां कर्मवद्भावस्योक्ते। जहात्यश्च त्यागमात्रवचन कर्तृस्थक्रिय। सार्थो हि त्यजति पथिकस्तु नानुगच्छति। ततश्च पथिकस्यापायस्तत्फलं, न धातुवाच्यः। किं च पूर्वकर्मण' सन. कर्तृत्व कर्मकर्तृत्वं। इह तु सार्थापेक्षमेव पथिकस्य कर्मत्वं स च सार्थो ऽपादानमिति कथं त-दपेक्षं कर्मत्वमित्येतदेव चोद्यते। अत्रोच्यते। इह कारकाणां स्वव्यापारे स्वातन्त्र्य सर्वेषामेव विद्यते। अकिञ्चित्करस्य क्रिया-ङ्गभावायोगात्। तथा च सामान्यसज्ञापूर्वको विशेषसंज्ञासम्भव इति सार्थस्य जहातौ स्वातन्त्र्यमपादानस्यानवगतमेव। सार्थो हि पथिकं जहदपाये साधनभावमनुभवति। यथा ज्वलन्ति काष्ठानि

पाके । ततश्च सामर्थ्यात्प्रतीयमानं स्वातन्त्र्यं कर्मसंज्ञाहेतुरत्रोपपद्यते यथा प्रविश पिण्डीमिति । यद्येवं कर्मादीनामपि स्वव्यापारे स्वातन्त्र्यमस्त्येवेति तदाश्रयापि कर्मसंज्ञा स्यात्, मासेष्वश्व वहतीति, अनर्थकं कर्तुरिति विशेषणम् । नैतदस्ति । सदपि तत्र स्वातन्त्र्य न कर्त्रा न्यग्भावितमिति न कर्मसंज्ञाहेतु । इह तु सामर्थ्यस्यापगमान्ते त्यागे जहातेर्वर्तनादनपगमे ऽपादानत्वं न्याय्यं । त्यागे ऽपि स्वातन्त्र्यं न विरुध्यत इति भवति तदपेक्ष कर्तृत्वम् । नन्वेवमपि स्वातन्त्र्यस्यान्न न्यग्भावाभावे ऽपादानमुत्तराणीति कर्तृसंज्ञया ऽपादानसंज्ञाया बाधनात्कर्तृतृतीयैव स्यात् । तद्यथा धनुषा विध्यतीति करणे तृतीया । नैष दोष. । नान्तरीयकयो. शक्त्यो. शब्दसामर्थ्यादुभयोः प्रतीतौ युगपद्विवक्षायां बाध्यबाधकभावः । तथा हि धनुष. शरनि सरणे ऽवधिभावगमन विना वेधने साधकतमता नोपपद्यत इति द्वयोर्युगपद्विवक्षायां करणसंज्ञया ऽपादानसंज्ञाबाधनात्तृतीया । कृतायामपि तृतीयस्यामस्यावधिभाव प्रतीयत एवेति । अभिन्नफलत्वे सति तुल्यबलत्वात्परत्वेन व्यवस्था । सार्थेन हीयत इति तूक्ते सार्थस्य कर्तृत्वमेवावगम्यते नापादानत्वमपायस्याप्रतीते. । सार्थेन हि पथिको हीयते । यावच्चासावपि ततोऽनापेतस्तावत्सार्थस्य कुतस्तं प्रत्यपादानत्वमिति तदेतदभिधातुमपादाने पञ्चम्येवात्रन्याय्या । तत्र त्यागफलस्यापायस्य प्रतीतेस्त्यागे स्वातन्त्र्यमवगम्यते एव । ननु सार्थेन हीयत इत्यत्रापायो गम्यत एव । तथाहि । हीयत इति कोऽर्थः । त्यज्यत इति । यदि च तत. साक्षादेवंयात्पथिकः, ततोऽस्य सार्थस्य तस्यां जहातिक्रियायां कर्तृत्वमुपपद्यते नान्यथा । सत्यमेतत् । किन्तु सार्थेन हीयत इत्युक्ते संशयो जायते किं सार्थेनात्मन. सकाशात् पथिकः परित्यज्यते किंवान्यत. सार्थेनापि कृप्यत इति । अवधिभावे तु सार्थस्य पञ्चम्या प्रतिपादिते तस्यैव कर्तृत्वं नियतमवगम्यते । तस्मादन्यथासिद्धावधिभावप्रतिपत्त्यर्थमपादानसंज्ञैव तत्र विधेया नतु विप्रतिषेधः फलभेदे । सत्यम् । तुल्यबलत्वेन परत्वादपादानमुत्तराणि बाधन्त इति युक्तम् । सार्थे तु विवक्षितार्थप्रतिपाद्यसामर्थ्यात्कर्तृसंज्ञा न प्रवर्त्तते । यद्येवं कर्तुरिति कर्तृसंज्ञकेनेप्सिततमस्य कर्मसंज्ञायां पथिकस्य तदभाव इति तदवस्थ चोद्यम् । नैतत् । कर्तृग्रहणस्य स्वातन्त्र्योपलक्षणार्थत्वात् । न च स्वातन्त्र्य-

मात्रं कर्तृशब्देन लक्ष्यते येन सकलकारकसाधारणत्वात् अस्य विषयस्यार्वृत्तिविषये ऽपि कर्मसंज्ञा प्रसज्येत । प्रधानभूतस्वातन्त्र्योपलक्षणादिति सामान्येन कर्तृसंज्ञकत्वात्कर्तृसंज्ञकत्वमनपेक्ष्य प्रधानभूतं स्वातन्त्र्यमात्रं यस्यास्ति कर्तृसंज्ञकस्य ऽकर्तृसंज्ञकस्य च तस्योभयस्याप्येकवाक्यतया संग्रह इति वाक्यभेदानवतारात्सर्वं सुस्थम् । एवं लः कर्मणि च भावे चाकर्मकेभ्य इति वचनात् भावकर्मकर्तृषु सामान्येन विधानात्परस्मैपदात्मनेपदयोरविशेषेण प्रसक्तौ भावकर्मणोः शेषात्कर्तरीति नियमार्थो पुनःश्रुतिरिति निवृत्तितात्पर्यादविवक्षिता सङ्ख्येति प्रत्ययनियमपक्षे नियम्यमानत्वात्प्रत्ययस्य प्राधान्ये ऽर्थानां गुणत्वाद् गुणे ऽपि सङ्ख्या नाङ्गीक्रियते ऽत्रेति द्विवद्बुध्वापि कर्मादिष्वात्मनेपदपरस्मैपदसिद्धिरत्रोदाहरणत्वेन योजनीया । अयमेव ह्यस्य मुख्यो विषयः । पूर्वश्रुत्यैव विधावुपादानात्पुनः शब्देन नियमार्थमेवानुवादात्तथा च यजेत पशुनेत्यादार्धातप्रसङ्गो न भवति । पशोरुत्पत्तिवाक्यं किलेदं प्रथममित्यविषय एवायमस्य श्लोकस्य । एवं सरूपाणामेकशेष इत्यत्र शिष्यमाणपरे वाक्ये ऽन्यनिवृत्त्यर्थत्वात्सरूपश्रुतेः श्रुतसङ्ख्याऽविवक्षायां द्वयोरप्येकशेषः सिध्यति ॥ ८९ ॥

गतमदः । उक्तमिदम् । समासप्रत्ययविधौ यथा निपतिता श्रुतिः । गुणानां परतन्त्राणां न्यायेनैवोपपद्यत इति । तथा च प्रातिपदिकैक्य एकस्या विभक्तेरभावात् एकविभक्ताविति चेन्नाभावाद्विभक्तेरिति प्रातिपदिकैकशेष एकविभक्तिनिमित्तो दूषितः । अत्र तु भाष्ये ऽथ वा पुनरस्त्वेकविभक्तावेकशेष इति स एव सिद्धान्तित स्तत्कथमुपपद्यत इत्युपपादयितुमाह ॥

सरूपसमुदायात्तु विभक्तिर्या विधीयते ।
एकस्तत्रार्थवान् सिद्धः समुदायस्य वाचकः ॥ ९० ॥

सह विवक्षायामेकशेषवचनात्परस्परापेक्षावयवार्थोपपादितसमुदायार्थप्रादुर्भावात्सरूपप्रातिपदिकविषये ऽवयवानां समुदायस्य च पृथगेवार्थवत्वाद्भिन्नैव प्रातिपदिकसंज्ञा । ततश्च समुदायात्प्रातिपदिकादन्यैका विभक्तिः ङ्याप्प्रातिपदिकादित्यत्र सङ्ख्याविवक्षायामपि । ननु च समुदायात्प्रातिपदिकादिवा ऽवयवेभ्यो ऽपि प्रा-

निपादिकेभ्यो विभक्तेरुत्पत्तिरत्र स्यात् । तथा च समुदायविभक्तेरन्त्यावयवविभक्त्या व्यवधानात्कथमेकविभक्तित्वस्योपपत्तिः । अथ सुबन्तानां सरूपाणामेकशेषो न प्रातिपदिकानामिति नास्ति व्यवधानम् । एवमपि यो ऽसावेकः सर्वतः शिष्यते तदीया विभक्तिरपि शिष्यत इति सा समुदायविभक्तिश्चेति द्वे श्रूयेयाताम् । अत्रोच्यते । समुदायावयवसन्निधाने समुदायकार्यमेव प्रवर्त्तते नावयवकार्यं। समुदायपारतन्त्र्यादवयवानां। अस्ति च समुदायकार्येण विभक्त्यात्मनावयवानामनुग्रहः । तथा हि । समुदायादुत्पद्यमाना विभक्तिरवयवार्थगतमपि सङ्ख्याविशेषं विभजति स्पष्टं। अवयवार्थानामेव परस्परापेक्षितरूपाणां समुदायार्थत्वादिति लाघवेनैकेनैव प्रयत्नेन तत्तल्लक्षणेनावयवानुग्रहः कृतो भवतीति नावयवेभ्यः पृथग्विभक्त्युत्पत्तिः । तद्यथा । पपाचेत्यत्र समुदायैकाच एव द्विर्वचनेनावयवैकाचामप्यनुग्रहः । विरूपसमुदायविषये तु सहविवक्षासम्भवे ऽपि न समुदायार्थप्रादुर्भावः । तथा ह्युक्तम् । याभ्यां चैकमनेकार्थं ताभ्यामेवापरमिति। अवयवार्थानां प्राधान्यात्प्रत्यवयवं तत्र विभक्त्युत्पत्तौ द्वन्द्वे सुबन्तानां सिध्यति । ननु च सरूपविषये ऽपि परस्परापेक्षैवावयवानां समुदायप्रादुर्भावबीजं । न तु सरूपार्थसमवेतजातिसम्भवात्समुदायस्य तद्वाचकत्वे भिन्नसमुदायार्थोपपत्तिः, जातिपदार्थदर्शने प्रत्याख्यानादेकशेषस्य। किं च जातेरभिधेयत्वे द्विवचनबहुवचनानुपपत्तिः । एकत्वात्तस्याः । काम बहुवचनं तान्त्रिकं भवेत् न तु बहुद्रव्यावसायि । तस्मादुद्भूतावयवार्थभेदं समुदायो ऽपेक्षितेतरेतरावयवार्थभेदत्वात्सरूपविरूपविषये ऽपि समान एव। एवं तर्हि सुबन्तानां द्वन्द्ववचनसामर्थ्यात्तन्त्रेण विरूपसमुदायादेका विभक्तिर्नोपपद्यते । सरूपविषये तु न किञ्चिद्दूषयत इति तत्रैवायं न्यायः । यदि वा व्यक्तिपदार्थनये ऽप्यारब्ध एकशेषो जातिरनभिधीयमाना ऽपि सम्बन्धव्युत्पत्त्यर्थमवश्यमुपलक्षणत्वेनापेक्षणीयेति तन्निबन्धना सरूपाणां सङ्गतिः। प्रातिपदिकानां विरूपाणां त्वेककियाविषयत्वेनापेक्षितसुबन्तावस्थायां सङ्गतिर्न प्रातिपदिकावस्थायां परस्परसम्बन्ध इति सुबन्तानामेव द्वन्द्वः । वर्णानां तु निरर्थकत्वाद्वन धनमित्यादौ ससुदायस्यैऽप्यर्थवत्त्वान्नायं तन्त्राख्यो न्यायः सम्भवतीत्यसति प्रातिपदिकसंज्ञायामर्थवद्ग्रहणे ऽवयवेभ्यो ऽप्यनर्थकेभ्योविभक्त्यु-

प्रत्ययौ नलोपादिश्चोद्धावनं युक्तमेव। अप्रयोगसमवायिनोऽपि च प्रातिपदिकार्थादिकस्य परस्परार्थापेक्षा प्रयोक्राकाङ्क्षायत्ता पदवत्युपचर्यत एव। न हि पदमपि शक्यमपि वा प्रयोगसमवायि स्वतः किंचिदपेक्षते। प्रयोक्रधीना ह्याकाङ्क्षा परपर्यायेच्छायोग्येषु शब्देष्वध्यारोप्यते। असति च प्रातिपदिकस्यापेक्षणे नियतक्रियाविषयसाधनभावापरिज्ञानाद् द्वितीयाद्यनुपपत्ते पदमेव नावातिष्ठत इत्यपेक्षासिद्धौ समुदायार्थोपपत्ति। सामर्थ्ये च समासविधानात् प्रातिपदिकार्थानामपेक्षानुमानम्। सर्वत्रैव च प्रकृतिप्रत्ययादीनामपोद्धारार्थेनार्थवत्ताऽभ्युपगमे परस्परमन्वयोपपत्ति। तदेवं समुदायार्थोपपत्तौ तस्य वाचक प्रातिपदिकसमुदायोऽर्थवत्वात्प्रातिपदिकसञ्ज्ञक सिद्धः। समासग्रहणेन तुल्यजातीयविषयत्वान्नियमस्य, सुबन्तसमुदायस्य वाक्यस्यैव प्रातिपदिकसञ्ज्ञा निवार्यत इत्येकविभक्तौ प्रातिपदिकैकशेषः समर्थितः सङ्ख्याविवक्षायामपि ॥ ९० ॥

एवं च कृत्वा भूयान्प्रधानस्यानुग्रहः कृतो भवतीत्याह ॥

प्रत्ययस्य प्रधानस्य समासस्यापि वा विधौ।
सिद्धः सङ्ख्याविवक्षायां सर्वथाऽनुग्रहो गुणे ॥ ९१ ॥

ङ्याप्प्रातिपदिकादिति प्रकृत्यनुवादेनापूर्वस्य प्रत्ययस्य विधौ, विवक्षितायामपि सङ्ख्यायां गुणे केवलात्प्रातिपदिकात्समुदायाच्चोत्पत्तिस्तस्य सिद्धति सर्वथा सर्वेण प्रकारेण प्रधानस्य प्रत्ययस्य विषयव्याप्तिलक्षणोऽनुग्रहः सिद्ध। तथा सुप्सुपेति समासस्याऽपि प्रधानस्य विधौ, विवक्षितायामपि सङ्ख्यायां गुणे सङ्ख्यायां द्वन्द्वेऽनेकग्रहणाद् बहुना समासः करिष्यते। बहुव्रीहौ त्वनेकपदावयवे स्वरसमासान्तपुंवद्भावेषु दोषोऽवयवतत्पुरुषाश्रयेण निवारित इति नास्यनिष्टम। अविवक्षितायां सङ्ख्यायां बहूनामस्थितानां नियमेन समासो न विज्ञायेतेत्युपरोधस्तस्य कृतः स्यात्। उत्तरपदे द्विगुविधानाच्च लिङ्गान्तसूक्ष्मजटकेशादावनेकपदो बहुव्रीहि सिद्ध। द्वयोश्च द्वन्द्वे कृते पुनरपरेण सह द्वन्द्व इत्यनेकवचनमुपसर्जनार्थमित्युक्तम् ॥ ९१ ॥

एवं पूर्वं प्रातिपदिकार्थभूतां जातिं निरूप्य विभक्त्यर्थोऽपि सङ्ख्याजातिरित्युक्त्वा तत्प्रसङ्गेन विवक्षाविवक्षे विचार्ये इदानीं तस्यामेव

जातौ यदधिकं विचार्यमवशिष्यते तदेव विचारयितुमाह ॥

अभेदरूप सादृश्यमात्मभूताश्च शक्तयः ।
ज तिपर्यायवाचित्वमेषामप्युपपद्यते ॥ ९२ ॥

इयन्यत्र शङ्का । अन्वयविज्ञानोत्प्रीयमानसद्भावा जातिरि-त्युद्घोष्यते । सा च व्यक्तिभ्यो ऽव्यतिरेकेणात्मानं न दर्शयति । तदेता एव व्यक्तय सादृश्यबलेकाकारप्रत्ययप्रसवहेतव प्रकृत्यैवैकप्रत्ययमर्थजननसामर्थ्यादध्यासाद्वा सन्तु किमपरेण सामान्येन कृत्यम् । तदेतदभ्युपगच्छति । अभेदरूपमव्यतिरिक्त व्यक्तीनां तत्सादृश्यमेकप्रत्ययमर्थजनक वाच्यव्यतिरिक्तमेव शक्तिलक्षण सामर्थ्यं तदपि जातिरिति व्यपदिश्यत एव । अन्वितानाकारज्ञानजनक हि व्यक्तीनां किं चन रूपं सामान्यमिति सर्वपार्षदन्याय । ततश्च सादृश्य शक्तिरित्यपि नामान्तरेणोच्यतां न का चिदनुपपत्ति । व्यतिरेकाव्यतिरेकचित्तास्तु प्रवादिनां ग्रह एवेत्यभिप्राय ॥ ९२ ॥

अत्र वैशेषिकदर्शनाश्रयेण व्यतिरेकपक्षं जातीनां समर्थयितुमाह ॥

दण्डोपादित्सया दण्ड यद्यपि प्रतिपद्यते ।
न तस्मादेव सामर्थ्यात् स दण्डीति प्रतीयते ॥ ९३ ॥
नेच्छानिमित्तादिच्छावानिति ज्ञानं प्रवर्त्तते ।
तस्मात्सत्यपि सामर्थ्ये बुद्धिरर्थान्तराश्रया ॥ ९४ ॥

अयमत्रार्थ । यदा ऽनुगताकारे ज्ञाने व्यक्तीनां व्यावृत्ताकाराणां हेतुत्वं नोपपद्यत इति सामान्य परिकल्प्यते । सादृश्यसामर्थ्ये तु व्यक्त्यव्यतिरिक्ते । तद्वदनुपायिनी व्यतिरिक्ता जातिरभ्युपगन्तव्या । ननु च सा ऽपि कथमवयवेन व्यक्तिं नानुयायात् । तथा च गवाश्वादौ साङ्कर्यप्रसङ्ग । नैतदेवं, प्रतिनियताश्रयवृत्तित्वात्सामान्यानाम् । किमत्र निमित्तमिति चेत् । विशिष्टसन्निवेशजातित्व व्यक्तीनाम् । अन्योन्यावयवसन्निवेशो गवामन्यस्त्वश्वानामिति गोत्वाश्वत्वयोराधारनियमसिद्धिः । तत एव तर्हि विशिष्टात्सन्निवेशात्सादृश्यापरपर्यायात्प्रतिनियमेनानुगताकारप्रत्ययो ऽस्तु । यथा सावयवसन्निवेशः प्रतिव्यक्ति भिन्नो ऽपि सामान्यस्य भिन्नस्याश्रयावच्छेदहेतुः तथा ऽनुगताका-

रस्यापि ज्ञानस्य हेतुर्भवतीत्यलमन्तर्गडुना सामान्येन । तदुक्तम् । तुल्यभेदे यथाजातिप्रत्यासत्त्या प्रसर्पति । क्व चिन्नान्यत्र संवाम्तु शब्दज्ञाननिबन्धनमिति । अत्रोच्यते । इह कार्याणां प्रतिनियतकारणजन्यत्वान्न सर्वो जनक सर्वत्र कार्ये व्यापारयितुं पार्यते । तथा हि । दण्डीति प्रत्यये दण्डसम्बन्धो निमित्त, स तु दण्डसम्बन्ध सर्वत्र किं न भवतीत्युक्ते दण्डजिघृक्षा तस्य निमित्त भण्यते । न चैतद्वक्तु शक्यते । दण्डोपादानेच्छाया एव दण्डसम्बन्धं प्रति नियमहेतोरस्तु दण्डीति प्रत्यय किमपरेण तत्र दण्डसम्बन्धेन निमित्तेन कृत्यमिति । दण्डोपादित्सा दण्डसम्बन्धस्य निमित्तम् । तस्या अपि किं निमित्तमित्युक्ते दण्डस्य यत्र कार्ये विनियोग तत्र सामर्थ्यादिदर्शनं तदुपादित्सानिमित्तं वक्तव्यम् । तथा च तत एवेच्छानिमित्ता दण्डोपादित्सावानित्यस्तु प्रत्ययः किमनेच्छासमवाय. स्वात्मनिमित्तमुद्बोधयत इति । नैतच्छक्यते ऽभिधातुम् । अनुरूपं कार्यं अनुरूपकारणजन्यमितीच्छासम्बन्धादिच्छावानिति ज्ञानम् । दण्डीति । एव सादृश्यादे. सामान्यस्य विषयनियमसामर्थ्ये सत्यपि न तस्मादेव सामर्थ्यादनुगताकारज्ञानजनकत्वं युक्त तत्सदृशमित्यादेज्ञानादिति तन्निमित्त व्यतिरिक्तं सामान्यमवश्याश्रयणीयमिति सिद्धम् ॥ ९४ ॥

अन्यथा ऽतिप्रसङ्ग इत्याह ॥

स्वभावो ऽव्यपदेश्यो वा सामर्थ्यं वा ऽवतिष्ठते ।
सर्वस्यान्ते यतस्तस्माद्व्यवहारो न कल्पते ॥ ९५ ॥

इह कार्याणां प्रतिनियतकारणानभ्युपगमे कारणकारणादेव सिद्धावभ्युपगम्यमानायां तत्रापि तत्कारणादित्यनवस्थायामापादितायां सर्वान्ते मूलकारणे ऽवस्थानव्यम् । तच्च मूल कारणं सर्वस्य वस्तुन. । सर्वस्य वादिनो ऽन्ते पर्यनुयोगावसान नित्यस्य प्रधानादेः कारणस्य स्वभावो ऽव्यपदेश्यो ऽयमस्य स्वभावो ऽस्माद्धेतोरित्येव व्यपदेष्टुमशक्यो ऽवतिष्ठते । अत एवास्मिन्नवस्थौ हेतुप्रश्नपरम्परा निवर्तते । येषां च नित्यं कारण तेषां सामर्थ्यं हेतुशक्ति. प्रश्नपरम्पराऽवसाने ऽवतिष्ठते । तदपि सामर्थ्यमव्यपदेश्यमेव, वैलक्षण्येनेदं तदिति शब्देन व्यपदेष्टुमशक्यत्वात् ।

अथ वा नित्यकारणपरिग्रह एव। तस्यात्यन्तपरोक्षत्वात्स्वभावो ऽव्यपदेश्यो ऽनेकशक्त्यात्मकत्वे तु स्वामर्थ्यमप्यस्य परोक्षत्वादेवाव्यपदेश्यम्। एकमेव वावस्तु स्वभावशब्देन सामर्थ्यशब्देन च व्यवहरन्तीति तदुक्तिरेव प्रतिपादयति। एवमव्यपदेश्यस्वभावे ऽवस्थानात्तस्यादव्यपदेश्यात्स्वभावाद्व्यवहारो न प्रकल्पते। एकवाक्ये यथानुपातवस्तुनिबन्धनो हि परिदृश्यमान स्थूलार्थाश्रयो गामानयौदनं भुङ्क्ष्वेति व्यवहार' सो ऽत्यन्तहेतुवश इति स्वभाव सामर्थ्यं चानय भुङ्क्ष्व चेत्यवं वक्तव्यम्। अव्यपदेश्यत्वाच्च स्वभावादेतेन व्यवहारो नोपपद्यत इत्युक्तमव्यवहार्यं वस्तूपक्षेप्तुमित्यर्थं। तदेवं भिन्नव्यवहारनिबन्धनानि सामान्यान्यभ्युपगन्तव्यानीत्यादृश्यात्तु सदृश इति व्यवहार, शक्तिमत्त्वात्तु शक्तिमानिति। अन्यस्य सादृश्यज्ञान सामान्यज्ञानाद् भिन्नजातीयेष्वपि गोगवयादिषु भावात्। अथ नावधार्यं विवेकेन जायत इत्यनुगतस्य ज्ञानस्य निमित्तपरिकल्पनायां यदेव किं चिन्निमित्त स्यादिति को ग्रहो जातिरिति। उच्यते। तत्र रूपिसमवायाच्चाक्षुषायैव सामान्यानीति ब्रूम.। विप्रतिपन्नं तु प्रतिकार्यकल्पत्वमुच्यते। न च ज्ञानं नान्यकार्यं जडाङ्कुरादिसदृश अपि तु बोधरूपमिति। तस्य तत्सामान्यं न चक्षुरादिवदवधिमति प्रत्ययरूपं कारणमपित्वालम्बनप्रत्ययरूपम्। आलम्बन च सवेद्यमानस्य। अतश्चेहापि तदेवाचातं, सवेद्यते तस्य स्वरूपमप्युपयुज्यमानमिति। अथ विकल्पस्य सामान्यविषयो न तु प्रत्यक्षस्य। तदयुक्तम्। असति सामान्ये विकल्पो न प्रत्यक्षम्। न सति। सत्यविषयत्वात्। विकल्पविषयत्वाच्च तस्यासत्यत्वम्। असत्यविषयत्वाच्च तस्या सत्यत्वमितीतरेतराश्रयता। किं च। प्रतिकर्म व्यवस्थायां ज्ञानस्य बौद्धैरुच्यते यतो नीलाकारमतो नीलस्य सवेदनमिति तद्वत्सामान्यवादिभिरप्युच्यते। यतो ऽभिन्नाकारमतो ऽभिन्नस्य सवेदनमिति को ऽनयोरुक्त्योर्विशेष, येन नीलं प्रत्यक्षं सामान्यमेवाप्रत्यक्षमिति। एवमस्य न कश्चिद्विशेषो दण्डादिरिव इति, नास्ति वै सादृश्यं निदर्शनै। एकार्थकारित्वाच्च भिन्न. प्रत्ययो नास्ति हेतुभेदात्कार्याणामपि भेदादित्येकप्रत्ययमर्थं एवासति समासे नोदियात्। रूपादिव्यतिरेकेण च द्रव्याभ्युपगमात् प्रत्ययमपि नास्ति। एकार्थसाध्या काचिदर्थक्रिया किमुतार्थभेदो भवेत्। उदकाहरणाद्यपि रूपादिसमुदा-

यसाध्यमेकमिति, तत्र समुदायबुद्धिर्भवतु नैकबुद्धि. । यथैकाङ्कुरजनकत्व ऽपि क्षितिबीजादीनाम् । विश्वात्मन्यविच्छेदबुद्धिरित्यपि क्वचित् । क्व चित्सवेदनमूलत्वान्मिथ्याबुद्धेरवश्य वा क्वचिद्भेदबुद्धिः सत्या ऽप्येष्टव्येत्यलपन्हवनीयानि प्रतिनियतकार्यसाधनानि सामान्यानीति स्थितम् ॥ ९५ ॥

अधुना साङ्ख्यनयेनाद्वैतनयेन वा व्यतिरिक्तां जातिं समर्थयितुमाह ॥

यथा भेदान् परित्यज्य बुद्ध्यैक इव गृह्यते ।
व्यक्त्यात्मैव तदा तत्र बुद्धिरेका प्रवर्त्तते ॥ ९६ ॥

इहैकरूपमन्वयादेककारणपूर्वकं विश्वम् । असदनुत्पत्तेश्च कार्यकारणयोरभेद इति सर्वं किंचिद्भेदाभेदात्मकं वस्तु । एकस्यैवानेकधा ऽवस्थानात्ततो ऽभेद सामान्य भेदो विशेष. । तत्र सर्वात्मभेदो महासामान्यं तस्यैव च यथाभागमवच्छेदाद्वान्तरसामान्यानि । अवच्छेदकाश्च धर्मास्तस्यैव यस्य परिणाम इति न ततो ऽतिरिच्यन्ते । सर्वं ह्येकस्यैव परिणामो विवर्त इति वा । एव च कृत्स्न कार्यकारणयोर्धर्मधर्मिणो. सामान्यविशेषयोश्च नात्यन्त भेद । एकमप्यतीतेनाप्यत्यन्तमभेद । तथा ह्यनीते. । केवलं संविज्ञानमर्थानवगत्या भेदाभेदशब्दाभ्यां यदाभिधीयते तदा शब्दसादृश्यमात्रादविवक्षितभेदाभेदरूपाभ्यारोपेण परस्परविरोधो निर्विषय इवापद्यते । तत्र यदा भेदान्परित्यज्य भेदाभेदरूपाविवक्षया व्यक्त्यात्मैव व्यक्तिरूपमेव बुध्या एक इव गृह्यते अभिन्न प्रतीयते तदा तदेव च सामान्यमेकबुद्धिविषयो न ततो ऽन्यत्किंचित् । व्यक्त्यात्मनो हि मूलभूतमेकत्वमात्मभेदहेतुपरित्यागादविरुद्ध । यद्यपि च प्रकृतिरूपान्वयात्सर्वमेकमेव तत्वत., तथापि परिणामवैचित्र्याद्विकाराणामवान्तरभूतानामपि व्यावहारिकमनेकत्वमप्यनवगतमिताबशब्द । तत्र यदा समस्तभेदपरित्यागलक्षणा सद्वस्तुमात्र पदार्थ इति चैकबुद्धि प्रवर्त्तते धर्मैतिरस्कारे तु धर्मिमात्रं द्रव्यमिति बुद्धि । सजातीयगतभेदहेतुपरित्यागे विजातीयभेदापेक्षायां पृथिव्यापस्तेज इत्यादि व्यवहार । तत्राप्यर्थान्तराद्भेदापेक्षायां स्वसदृशभेदापेक्षणे गौरश्वो घट इत्यादिभेद इति यथायथमुदाहार्यम् ॥ ९६ ॥

तदेवं दर्शनद्वयेनाभिन्नाकारायां जातिबुद्धेर्विषयमवस्थाप्य ज्ञातिपदार्थं प्रत्याख्यानादेकशेषस्य तद्विषयं समूहबुद्धेर्विषयमवस्थापयितुमाह ॥

भेदरूपैरनुस्यूतं यदैकमिव मन्यते ।
समूहावग्रहा बुद्धिर्बहुभ्यो जायते तदा ॥ ९७ ॥

भेदरूपाण्यपि यत्र सञ्जेयन्ते ऽभेदरूपं च तत्र समूहमवगृह्णाति परिच्छिनत्ति या बुद्धिः सा प्रवर्त्तते । एकमिवेति । भिन्नेष्वभेदस्याध्यारोपात् । एवमपि चैकत्वोपसर्जनेभ्यो बहुभ्य एवेयं बुद्धिर्जायते न तु जातिप्रत्ययवदेकस्मादेव । अयमाशयः । यद्यपि ता एव व्यक्तयो व्यक्तयो जातिरिति दर्शनं तथापि सम्भवत्येकशेषस्य विषयो भेदप्राधान्येनैकधर्मावेशनिमित्ता भेदोपसर्जनतया तासां प्रतीतेः । अत एव च द्वन्द्वैकशेषयोर्वचनभेदोपपत्तिः । जातिप्रत्ययस्तु सर्वथा अभेदप्राधान्येनैव ॥ ९७ ॥

इदानीं सदृशबुद्धेर्विषयमाह ॥

सकृत् प्रवृत्तावेकत्वमावृत्तौ सदृशात्मनाम् ।
भिन्नात्मिकानां व्यक्तीनां भेदापोहात्मपद्यते ॥ ९८ ॥

इह भेदहेतूनां त्यागे सामान्यबुद्धिरित्युक्त्वा तेषामपि च परिग्रहे समूहबुद्धिरिति राश्यन्तराभावान्निर्विषयसादृश्यबुद्धिः स्यादित्याशङ्क्योदमुच्यते । भिन्नात्मिकानां व्यक्तीनां सकृत्प्रवृत्तौ भेदापोहादनालीढभेदं तदनुस्यूतं चैकत्वं जात्यात्मकं समूहात्मकं वा प्रतिपद्यते बुद्धिः । आवृत्तौ तु सदृशात्मनाम् । भेदहेतुपरित्यागेनाभिन्नात्मिका व्यक्तीरवगृह्य कार्यान्तरविषतया गृहीतभेदा एव ता गृह्णातीत्यविश्रान्ता सैव बुद्धिर्भेदापोहान्नान्या, आवृत्तेरेकधर्मत्वात्सदृशात्मनां प्रतिपद्यते । एवं भेदाभेदावग्रहरूपत्वान्नेयं जातिबुद्धिः । तस्या एकान्तेनाभेदावसायरूपत्वात् । नापि समूहबुद्धिः सकृदेव भेदानुस्यूतस्याभेदस्य ग्रहणान्नावृत्त्या । समूहावग्रहे हि समूहिनामावृत्ता सैव बुद्धिः सामान्यं गृह्णाति । गोगवययोस्तु पूर्वभेदं प्रतिपाद्य अनन्तरमवयवसन्निवेशायत्तो ऽभेदो ऽवसीयत इति सादृश्यबुद्धिस्तत्र । एव च बुद्धिभेदादेव न सादृश्यं सामान्यमित्युक्तं भवति ॥९९॥

तदेवं व्यतिरिक्तजातिदर्शनमव्यतिरिक्तजातिदर्शनं च विस्तरतो ऽभिधायेदानीं सौगतानां सम्बन्धि काल्पनिकं जातिदर्शनमाह।

अनुप्रवृत्तेति यदा भिन्ना बुद्धिः प्रतीयते।
अर्थो व्यावृत्तरूपो ऽपि तथा तत्त्वेन गृह्यते ॥ ९९ ॥

इहाभिन्नप्रत्ययावलेपा जातिरित्युच्यते। न चाभिन्न प्रत्ययो ऽस्ति। न हि य एवैकस्यां व्यक्तौ गौरिति प्रत्यय स एव द्वितीयस्यामपि तत्त्वन्य एव। प्रत्ययनियतत्वाद् बुद्धीनाम्। अतश्च नैव कश्चिद्भिन्नेष्वभिन्नप्रत्यय.। केवलं भिन्ना ऽपि सती बुद्धिरनुप्रवृत्ता ऽनुगता ऽभिन्ना प्रतीयते। न च तत्र बुद्धितत्वव्यतिरेकेण अन्यत्सामान्यं गोज्ञानत्वाद्यस्ति। तस्याप्यभिन्नप्र ययस्य प्रतिबुद्धि भेदात्। तत्राप्यपरसामान्यकल्पनायामनवस्थापातात्। न च बुद्धिष्वपरसामान्यस्यासाधारण कश्चिद्वाचको ऽस्तीति किं तत्सामान्यं नाम, यतश्चानादिकालीनभेदावग्रहसामर्थ्यप्रतिघातनिमित्तविभ्रमवशाद् यथा बुद्धीनामभेदावसायो भिन्नानामपि वस्तुनः, तथा ऽर्थानामपि व्यक्तिलक्षणानां स्वरूपपररूपाभ्यां व्यावृत्तस्वभावानां तत्त्वेनाभेदेन सामान्यावग्रहेणावसायो भविष्यतीति भेद एव परमार्थो ऽभेदावसायो मिथ्येति सौगताः ॥ ९९ ॥

किमनादिकालीनविभ्रमवशादेवायमुत बहिरप्यस्याभेदावसायस्य किं चन निमित्तमस्तीत्याह ॥

सरूपाणां च सर्वेषां न भेदोपनिपातिनः।
विद्यन्ते वाचकाः शब्दा नापि भेदो ऽवधार्यते ॥१००॥

सरूपात्मको द्विविधो व्यवहार। तत्र समानं रूप येषां वास्तवस्य भेदस्यानवधारणाद्वाग्दर्शनानां वस्तूनां प्रतिभासते। न हि तत्त्वतो वास्तव सारूप्यमस्ति। सौगतनये तस्य निराकृतत्वादिति दुरवधारभेदत्वेन यत्सरूपत्वम्, तदेव निर्दिश्यत इति साहश्यनिबन्धनो ऽभेदावसायलक्षणः प्रख्यात्मको व्यवहार.। असाधारणसामान्यरूपनिवेशे सविज्ञानपदाभावाच्चोपाख्यात्मको ऽप्यभेदेनैव व्यवहारः। उपाख्याया वाचकस्य शब्दस्य साङ्केतिकत्वात्स्वलक्षणे वृत्त्यनुपपत्तेः। "शब्दाः साङ्केतिक प्राहुर्व्यवहाराय सस्मृता.। तदा स्वलक्षण

नास्ति सङ्केतस्तेन तत्र न" इत्यादिना वेदितत्वात् । यद्यपि चावधारणाभावादेव वाचकाभावोऽपगतो स्वधारणपूर्वकत्वाद्वाचकानां तथापि यत्रापि गवादिष्ववधार्यते भेदः तत्रापि तस्य वाचका न सन्ति । स्वलक्षणस्य शब्देनाभिधातुमशक्यत्वात् अपि त्वभेदाध्यवसायानुविधायिन एव ते तत्रापीति दर्शयितुं भेदेन वाचकाभाव उक्तः । इत्थं च विशेषाणामपि वचनादप्यनुगमाभिमानो वाचकाभावाच्चाभिन्ना शब्दप्रवृत्तिर्न भूतं सामान्यं नाम किं चनात्र निमित्तमित्युक्तं भवति ॥ १०० ॥

सर्वेषामिति व्याप्तिर्ह्युक्ता तामेवोपपादयितुमाह ॥

ज्ञानशब्दार्थविषया विशेषा ये व्यवस्थिताः ।
तेषान्दुरवधारत्वात् ज्ञानाद्येकत्वदर्शनम् ॥ १०१ ॥

ज्ञानानां तावद्विषयभेदाद्भेदो न्याय्यो ऽप्यर्वाग्दर्शिनो गौर्गौरित्यभेदात्सायादशक्यपरिच्छेद इत्येकत्वमध्यारोपित तत्र पश्यन्ति । एवं च शब्दानामनुशासिकादीनां धर्माणां भेदे ऽप्यभेदेनावसायः । स एवायं गोशब्द इति क्रमवानवस्थायिनां शब्दानां न किं चित्सामान्यमस्ति । अथ भेदेनावभीयते, सूक्ष्माणां विशेषाणां दुरवधारत्वादर्थानां खण्डमुण्डादि स्फुट एव भेदो नाहतो वाग्दर्शनैः । विजातीयान्वयिरूपोल्लेखनात् । तथा च मणिमुक्ताप्रवालादीनामभियुक्तप्रणिधानगम्यो विशेषो न सर्वैर्विविच्यते ॥ १०१ ॥

अवदातदर्शनास्तु यथातत्व विवेकिन एवेति भेदवादिनयः । जातिवादिनस्तु मन्यन्ते ॥

ज्ञानेष्वपि यथार्थेषु यथा सर्वेषु जातयः ।
संसर्गदर्शने सन्ति ताश्चार्थस्य प्रसाधिकाः ॥ १०२ ॥

अनपह्नवनीयो ऽयमभिन्नावसाय सर्वजातिसद्भावाऽऽवेदक इति ज्ञानानामपि सामान्यविशेषाः सन्तु का ऽनुपपत्तिरिति वस्तूनां भेदाभेदरूपमर्थान्तरनिमित्तं मन्यमाना प्राहुः । ता एव ज्ञानजातयो ऽर्थस्य प्रसाधिका । बाह्यानामर्थजातीनां निश्चायिका । बुद्धेरन्विताबभासस्सिद्धौ व्यक्तीनामपि सामान्यावधारणादर्थस्यात्मीयस्य सामान्यकार्यस्यानुवृत्त्यादेः प्रसाधिकाः । यत्र यत्र च सत्यप्यवान्तरविशेषे

ऽभिन्नः प्रत्ययो ऽस्ति तत्र प्रमाणसिद्धानां सामान्यविशेषाणामङ्गीकरणमानन्त्ये ऽपि न दोषाय । असाधारणसङ्केतानन्त्ये ऽपि च जात्युत्पलादिगन्धादीनामिव सत्त्वमस्त्येव ॥ १०२ ॥

संसर्गदर्शन एव प्रकारान्तरमाह ॥

ज्ञेयस्यैव सामान्यं ज्ञानानामुपकारकम् ।
न जातु ज्ञेयवज्ज्ञानं पररूपेण रूप्यते ॥ १०३ ॥

यथा ज्ञेयं व्यतिरिक्तसामान्यरूपेण रूप्यते पररूपवत् क्रियते नैवं ज्ञानं संविदात्मसमवेतेन व्यतिरिक्तसामान्यरूपेण रूप्यते । ज्ञेयधर्मः किलायं यत्पररूपेण रूपणम् । ज्ञानं तु स्वतन्त्रं ज्ञेयमेव न भवति । ज्ञेयनिष्ठतया हि ज्ञानानां ज्ञेयस्य सामान्यस्याभेदेन तद्भेदावसायः प्रत्यर्थनियतत्वे ऽप्युपपद्यते । बाह्यपरतन्त्रत्वेनास्वाधीनत्वात् ज्ञानानां स्वत एव वैलक्षण्यानुपपत्तेः, बहिरभिन्नेन निमित्तेन तत्र भाव्यम् । तद्यथा घटो, घट इति घटाकारे बाह्ये निमित्ते तथा भेदे ऽपि तद्गतं सामान्यमिति युक्तम् ॥ १०३ ॥

कथं पुनर्ज्ञेयं ज्ञानं न भवतीति पररूपेण रूप्यत इत्याह ॥

यथा ज्योतिः प्रकाशेन नान्येनाभिप्रकाश्यते ।
ज्ञानाकारस्तथान्येन न ज्ञानेनोपगृह्यते ॥ १०४ ॥

यथा घटादीनां दीपः प्रकाशकः स्वप्रकाशे दीपान्तरं नापेक्षते तथार्थस्य प्रकाशकं ज्ञानमात्मप्रकाशनाय प्रकाशान्तरानपेक्षमिति स्वप्रकाशकं सिद्धम् । जडवैलक्षण्यं हि प्रकाशत्वमिति तस्यापि प्रकाश्यत्वे जडतापत्तिः । अर्थप्रकाशकाले च प्रकाशकस्याप्रकाशे ऽर्थसंवेदनमेव न स्यात् । प्रकाशासञ्चेतने तद्धर्मार्थसञ्चेतनासिद्धेः । उत्तरकालं सञ्चेतनं कोपयोगि । उत्पन्नायां च प्रकटतायामात्मसमवेतस्य तदानीम् ज्ञानस्यासञ्चेतनान्मम प्रकटितो ऽर्थ इत्यात्मगामि संवेदनं न स्यात् । तस्माज्ज्ञानान्तरेण स्वप्रकाशकं ज्ञानं न गृह्यते, परप्रकाश्यत्वे प्रकाशकत्वाभावादिति तदाकारस्य परेण रूपेणाभावाज् ज्ञेयस्यैवाभिन्नं सामान्यं, अस्यैवेदंनिमित्तं । तद्ग्राह्यस्य ग्राह्याकारस्य ज्ञानान्तरेणाभेदग्रहणात् । स्वसमवेतसामान्यवशेन त्वभेदप्रतिभासे बहिः सामान्यपरिकल्पो निर्निबन्धन एव स्यात् । अन्यथै-

वाभेदप्रतिभासस्योपपत्तेः। अर्थानां तु व्यतिरिक्तत्वादभिन्नं सामान्यमुपपद्यते। ज्ञानानां तु सामान्याकारो न व्यतिरिक्त इति नाभिन्न उपपद्यते। प्रत्यर्थनियतत्वेन तेषां भेदात्तदभिन्नस्य तस्यापि तथात्वोपपत्तेरिति नार्थः साम्यमस्ति। बुध्याकाराणामाकारसाम्यादेव च ज्ञानानामभेदावसायसिद्धेर्न संवेदनभागेऽपि सामान्ययोग इति साकारा स्वप्रकाशा निःसामान्या बुद्धयः सिद्धाः। यद्यपि च वैशेषिका ज्ञेयस्यैव सामान्यं ज्ञानानामुपकारकमिच्छन्तो न साकारं नापि स्वप्रकाशं विज्ञानमिच्छन्ति। तथापि न वयं दर्शनान्तरप्रक्रियां ब्रूमः, अपि तु यत्प्रमाणोपपन्नमितीदमत्र दर्शनमुपक्षिप्तम्॥ १०४॥

ननु च यथा घटोऽयमिति ज्ञाने घटोऽभिधीयते तथा घटज्ञानमेतदिति ज्ञाने न घटज्ञानम्। को ह्यत्र विशेषः। यदि तु विषयसंवेदनरूपा बुद्धिर्नानुभूयेन शब्देनापि तथा नाभिधीयेत। अनुभवपूर्वकत्वादभिधानस्य। न चात्मनाऽऽत्मानमनुभवति बुद्धिः। स्वात्मनि व्यापारविरोधात्। बोधरूपत्वात्तु स्वयमज्ञातैवार्थमवभासयतु। एतावानस्य बाह्याद्विशेषोऽस्तु। तद्बुभुत्सायां तु बुध्यन्तरमेवापेक्ष्यम्। ज्ञानज्ञेयसिद्धिमात्रनिष्ठत्वाच्च व्यवहारस्य प्रत्ययान्तरानपेक्षणाद् बुद्धिमाला ऽपि नानुषज्यत इत्याह।

घटज्ञानमिति ज्ञानं घटज्ञानविलक्षणम्।
घट इत्यपि यज्ज्ञानं विषयोपनिपाति तत्॥ १०५॥

घटज्ञानमिति ज्ञानं घटाद्याकारं ज्ञानं यदा ज्ञानान्तरेण परामृश्यते। एवं ममात्रानुभवो भूत इति प्रत्ययविषय यत्परामर्शज्ञानं तत् घटज्ञानभिन्नलक्षणं साक्षाद्विषयेण जनितत्वात्। अनुकार्यप्रत्यया एव हि विषयेण जन्यन्ते नान्ये ज्ञाननिबन्धना व्यवधानात्। सारूप्यबलेन च ग्राह्यग्राहकभावेन वैधर्म्येण न च घटज्ञानं ज्ञानान्तरे प्रतिभासते। अतो न तद् गृह्यते। अथोच्यते। सरूपमेव तज्ज्ञानं घट इत्येवमनुसन्धानादित्याह। घट इत्यपि यज् ज्ञानं विषयोपनिपाति तत्। न तु तत् ज्ञाने उपनिपतति। अतो न बुद्धिमालम्बते स्वयमेव तु प्रकाशत इत्यर्थः। अन्ये व्याचक्षते। घटज्ञानाद् बाह्यविषयाद् घटज्ञानमित्येवं ज्ञानं ज्ञानभिन्नं न विषयप्रविष्टं स्वात्म-

व्यवस्थितं ज्ञानं सञ्चेत्यते यस्माद् घट इत्येवमाकारं यद्विच्छिन्नं ग्राह्यप्रसूतं तदपि विषयमनुपतति ग्राह्यपरवशम् । विषयाप्रकाशने ज्ञानास्तिताया एवानिबन्धनत्वात् । एवं च बोधत्वाद्विशेषाद्यद्यपि ज्ञानज्ञानमिति मतं तदपि बाह्यविषयमेवेत्युक्तं भवति । अन्ये तु व्याचक्षते घटज्ञानमिति ज्ञानं विषयो यस्य तत् घटज्ञानविलक्षणम् । एवंस्वरूपमनाकारम् । न हि सविदाकारस्तज्ज्ञानाभिमते प्रतिबिम्बीभवति । सारूप्यवशेन ग्राह्यग्राहकभावो ऽन्यथाज्ञानत्वाविशेषादिदमस्य संवेदनमिति प्रतिनियमो न स्यात् । घट इति तु पक्षे तत् बाह्यविषयं ज्ञानं, तद्विषयोपनिपाति विषयाकारमुपादत्ते । अथ वा घटज्ञानमिति ज्ञानं घटज्ञानविलक्षणम् । किं तद्वैलक्षण्यमित्याह । घट इत्यपि यज् ज्ञानं विषयोपनिपाति तत् । निराकारमपि तद्विषयमनुपतति परिच्छिनत्ति निरूपयति । एवं रूपो ऽयं अर्थ इति । घटज्ञानमिति तु ज्ञानरूपानुपाति । यतो घटज्ञानगतं विषयं निरूप्य ज्ञानरूपं किमपि तदित्येतावत् यदि पर निरूपयितुं शक्नोति । न तु सा तदीया बोधरूपता तस्य प्रतिभासते । परसंवेदनपर इव । परेण हि ज्ञानमुपादाय घटज्ञानमस्योत्पन्नमिति कया चिद्वृत्त्या ज्ञानं परिच्छिद्यते न तु स्ववत्परस्य प्रतिभासत इति ततो विलक्षण न तस्य परिच्छेदकम् । उपलम्भात्मत्वात्स्वय प्रकाशत इति स्वसंवेदन ज्ञानमुच्यते । न ह्यात्मानमर्थमिव प्रकाशयतीति न स्वात्मन्यस्य कश्चिद्व्यापार ॥ १०५ ॥

ननु ज्ञानस्य ग्राह्याकारो न व्यतिरिक्तस्स च घटज्ञानमिति ज्ञानेन संवेद्यत इति बुद्धिरेव संवेदिता भवतीत्याशङ्क्याह ॥

यतो विषयरूपेण ज्ञानरूपं न गृह्यते ।
अर्थरूपविविक्तं च स्वरूपं नावधार्यते ॥ १०६ ॥

निराकारवादे ऽप्ययं परिहारो लगति । यतस्तत्रापि घटज्ञानमेतदिति ग्राह्यस्वभावेन ज्ञानान्तरमुपलक्षयति । तद्रहितमात्मतत्वं तस्यावधारयति । न च ग्राह्याकारो ज्ञानस्य रूपम् । औपाधिकत्वात् । यथा स्फटिकस्य नीलादि । न च ग्राह्याकारविविक्तं ग्राहकरूपं ज्ञानान्तरेणोपलक्ष्यते शुद्धबुद्ध्यनुकारेण बुध्यन्तरानुपपत्तेः । एवं च विषयाप्रकाशने ज्ञानत्वायोगात्, ज्ञानज्ञानाभिमतमपि कि-

पर्यनिष्ठमेव । तथा चोपसर्जनेन विषय एव तेन विशिष्टो ऽवस्थाप्यते । ज्ञानो ऽयमर्थ इति नीलज्ञानमित्येतदपि नीलनिष्ठतया विषयप्रभावं ज्ञान परामृशति । एव च कृत्वा संविदाकारस्य ज्ञानान्तरेणाग्रहणान्न व्यतिरिक्तसामान्यरूपेण निरूपणम् । ग्राह्याकारस्य तु ज्ञानान्तरेणासंवेदने ग्रहणं ज्ञेयस्याभिन्नसामान्यनिमित्तं तेन तस्य ग्राह्याकारस्याविलक्षणस्य जनने तथैव बुध्यन्तरेण ग्रहणादिति न तत्र सामान्यान्तरमुपयुज्यते । नाप्रीतरेतराश्रयदोषः । ज्ञेयसामान्यस्याभिन्नज्ञानजनकत्वेनाभिन्नज्ञानस्य च ज्ञेयतात्रतिपादकत्वेन व्यापारभेदात् । तेनैतदेव चोद्यम् । यथा विनैव सामान्यमभेदावसायो बुद्धीनामेवमर्थानामपि भविष्यतीति बुद्धीनामपि सामान्यवद्भेदेनैवोक्तप्रकारेण भेदावसायादिति । ननु यदि ज्ञानरूपमर्थरूपविविक्तं नावधार्यते स्वतो ऽप्यस्य सिद्धिर्न स्यात् । सत्यम् । सर्वदैव ग्राह्याकारः सहभाव्यनुभूयते ऽस्य, किं तु तत्पृष्ठभाविनो ह्लादनीयप्रकाशा अहङ्कारास्पदविच्छिन्नग्राह्याकारविधर्माण उत्तररूपा अहङ्कारास्पदतया संवेद्यन्त इति स्वतस्तद्विविक्तरूपावधारणमस्ति बुद्धीनाम् । ज्ञानान्तरेण तु ह्लादादयो गृह्यमाणा अपि तथा न संवेद्यन्त इति अनुभवसिद्धमेतदपह्नवनीयमित्यलमतिविस्तरेण । तदेवं प्रमाणे परिशुद्धा जातिः शब्देनाभिधीयमाना दृष्टादृष्टविषयव्यवहारसाधनसमर्थेति जातिपदार्थसिद्धिः ॥ १०६ ॥

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे
जातिसमुद्देशः प्रथमः ॥

जातिर्वा द्रव्यं वा पदार्थोविशेषयुक्तं तत्र वाजप्यायनदर्शनेन जातिं विशेषणभूतां पदार्थं व्यवस्थाप्य व्याडिदर्शनेन विशेष्यरूपं द्रव्यमपि पदार्थं व्यवस्थापयितुं यथादर्शनं तदेव पर्यायान्तरैरुद्दिशति ॥

आत्मा वस्तु स्वभावश्च शरीरं तत्त्वमित्यपि ।
द्रव्यमित्यस्य पर्यायास्तच्च नित्यमिति स्मृतम् ॥ १ ॥

इहार्थक्रियायां द्रव्यमेवोपयुज्यत इति तदेव प्रवर्त्तकमर्थिनाम् । अतः शब्देन तदेवोच्यते । अनभिधीयमाना तु जातिरवच्छेदिका गुडशब्दे माधुर्योदय इवेति द्रव्यवादिना दर्शनम् । द्रव्यं च द्विविधं पारमार्थिकं सांव्यवहारिकं च । तत्र द्वितीयं भेद्यभेदकप्रस्तावेन गुणसमुद्देशे वक्ष्यति वस्तूपलक्षणं यत्रेत्यादिना । अनेन च द्रव्येण व्याडिदर्शने सर्वे शब्दा द्रव्याभिधायिनो भवन्ति । इह तु पारमार्थिकं द्रव्यं निरूप्यते । तथा हि । आत्माऽद्वैतवादिभिरात्मशब्देन तद् द्रव्यमुक्तमात्मैव ह्युपाधिभिन्नं प्रतिभासमानं द्रव्यं पदानामर्थ इति तेषां दर्शनमिहैव वक्ष्यमाणं वस्तु स्वलक्षणमर्थक्रियाकारि द्रव्यमिति शाक्यैरुक्तम् । स्वभावइति । सत्ता । द्वैतवादिभिः स्वभाव आत्मभूता सत्तेति कृता । तथा हि । क्रमरूपोपसंहारे सत्तैव सत्त्वमिति स्वसम्बन्धिभिरुपाधिभिरुपहितभेदा सैव द्रव्यम् । प्रकृतेरेकदेशः चेतनः पुरुषस्तद्वारेण शरीरशरीरिणोरव्यतिरेकात् शरीरं द्रव्यं प्रधानमेवेति प्राकृतिकैः शरीरमेवैक आत्मा येषां ते शरीरात्मभिरुच्यते । तत्त्वमिति । चतुर्भूततत्त्ववादिभिश्चार्वाकैर्द्रव्यमुच्यते । पृथिव्यप्तेजोवायुरिति तत्त्वानि तत्समुदाये शरीरेन्द्रियविषयसंज्ञा इति वचनात् । तदेवमेते परमार्थं एकमेव वस्तूच्यते । द्रव्यमित्यस्येति । द्रव्यं नाम यः पदार्थः, तस्यैत एव पर्यायाः । एतेषामेव पारमार्थिकरूपाभिधायित्वात् । नान्ये घटादिशब्दाः । सत्यपि तदभिधायित्वे वक्ष्यमाणनयेनात्मादिशब्दानामेव सर्वत्र घटादावव्याहतप्रसरत्वम् । तथा च भाष्यम् । एकोऽयमात्मा उदकं नामेति । अत्रात्मशब्द उदके प्रयुज्यमानो द्रव्यवचनः । आकृतिद्वारेण चान्ये शब्दा द्रव्ये वर्त्तन्ते । इमेतु तत्परित्यागेन मुख्यया वृत्त्येति विशेषः । सिद्धे शब्दार्थसम्बन्ध इत्यत्र द्रव्यं नित्यमाकृतिरन्या चान्या च भवतीति वदता भाष्यका-

रेण नित्य द्रव्य स्मृतम् । मद्भद्रोक्तस्य नस्यार्थस्यानुवादात्स्मृतमि-त्याह । यद्यपि शाकपार्थिवादिदर्शने नित्य न भवति द्रव्य तथा ऽपि तन्मत-स्यानभ्युपगमाददोष । केवलं यदस्माक द्रव्य तदन्यैरेवमभिधीयत इत्येवमत्रोपन्यास, यच्च भाष्यानुसारेण स्वरूपान्यथात्वानापत्ति.। विकारभेदे ऽपि नित्यत्व विवक्षितमेवेति सर्वत्र तत्सिद्धि' ॥ १ ॥

पर दर्शनान्तराश्रयणेनोद्दिष्टेष्वपि भेदेषु स्वसिद्धान्ताश्रयेण सार्वत्रिकीं द्रव्यपदार्थव्यवस्थां कर्तुमाह ।

सर्वं वस्तु तदाकारैरसत्यैरवधार्यते ।
असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते ॥ २ ॥

इह सर्वशब्दानां पारमार्थिकं तत्त्वं साक्षात्प्रष्टुमशक्तानां अने-कोपाधिविषयनिहितपदाना तद्वपालिङ्गन व्यवहारे समालक्ष्यते । उ-पाधीनां चागमापायवशविधुरितनिजस्वरूपाणामर्थिसार्थसमाशापूर-णप्रतिहतशक्तित्वान्न तावत्येवपर्यवसानमित्युपलक्षितरूपपृष्ठपातिनः शब्दा व्यवस्थाप्यन्ते । अवधृतरूपनिर्देशित्वाच्च शब्दानामवधारणा-नुसारमर्थे प्रकृतिरवधृतिश्चाकारद्वारेण । निराकारस्य बुध्युपारोहा-योगात् यथाप्रत्ययं भेदावसायस्य बाध्यमानत्वादनुयाय्यभिन्नमेव रूपं परमार्थेन । तदेव ब्रह्मरूपं सत्यम् ॥ २ ॥

स्यादेतत् । उपाधिषु शब्दानां विश्रान्त्यभावे शब्दार्थोपाधित्वं तेषां न स्यात् अवाच्यस्य तदुपाधित्वायोगात् इत्येतद्विचारयितुमाह।

अध्रुवेण निमित्तेन देवदत्तगृह यथा ।
गृहीत गृहशब्देन शुद्धमेवाभिधीयते ॥ ३ ॥

अद्रो देवदत्तस्य गृह यत्रासौ काकः प्रतिवसतीत्यत्रानियत-स्वामिकगृहोपलक्षणायोपलक्षणभूतस्य काकस्य उत्पत्तिनेऽपि त-स्मिन्नुपलक्षणस्य कृतत्वादध्रुवत्वमनित्यत्वमिति तदनादरेणैव तदु-पलक्षितं गृहमभिधीयते गृहशब्देन यथा तथा प्रकृतिसम्बन्धादम-त्योपाध्युपलक्षित सत्यमुपाधिरूपानादरेण शब्दैरभिधीयमानस्या-प्यभिधानविषयनियामकत्वादुपलक्षणत्वे सत्युपाधित्वनिदर्शनेन स-मर्थितम् । तथा हि । क्तक्तवतू निष्ठेत्यनुबन्धस्य प्रयोगसमवायित्वाद-ध्रुवस्योपलक्षणत्वे तद्रहितस्य शुद्धस्य प्रत्ययरूपस्य संज्ञाप्रसङ्ग इत्य-

त्रेद भाष्ये दर्शनमुक्तम् । ननु काको ऽस्ति विलक्षणाद् गृहात् भेदनात्रधार्यमाणो मो भूद् गृहशब्दाभिधेव ।घटादयस्त्वाकारा पृथगनुपलभ्यमानतत्वा कथमिव तच्छब्दैर्नाभिधीयेरन् । अन्यो ऽप्युपाधिरुपलक्षणभूत सामानाधिकरण्येनावच्छेदक । तद्यथा । इति हरिरित्यत्र पशु ।अन्यत्तु विशेषणमपृथक् शब्दवाच्यमुपरञ्जकम् ।तद्यथा वानेयमुदकमिति । वनसम्बन्धोपाधीयमानरूपविशेषणम् । अभिधीयत इति । वचनशरीरसम्बन्धे विशेषणमुपरञ्जकतया ऽभिधेयकमापद्यत इति। तथा चोक्त अर्थविशेष उपाधिस्तदनुवादेन स आर्यामानशब्दो य. । अनुपाधिरतो ऽन्य. स्यात् ॥ ३ ॥

श्लाघादिविशेषण यद्वदित्याशङ्क्य सदृशतरमत्र निदर्शनमाह ।

सुवर्णादि यथा भिन्न स्वैराकारैरुपाधिभिः ।
रुचकाद्यभिधानानां शुद्धमेवैति वाच्यताम् ॥ ४ ॥

रुचककुण्डलाद्याकारविशेषोपाधीयमानरूपाभेदमपि सुवर्णमित्येव सर्वत्रोपाधिरूपं सत्यमित्युपाधिभि आकारविशेषैस्तत्साध्यार्थक्रियाकरणान्न तत्रैव रुचकादिशब्दा. कृतपदसम्बन्धा किं तु तदतिरिच्यमानमर्थवस्त्वभिधायकत्वेन समाविशन्ति तद्वत्प्रकृतिसम्बन्धादारोपाहितनानात्वमपि परतत्वं शब्दगोचर इत्यर्थ. । तत्र चोपाधिभिरिति हेतुनिर्देश शाक्यसमकक्ष्यतया कृत । ततश्चोपाधीनामवाच्यत्वमसत्यत्वं च सिध्यति । असत्यत्वादेवार्थक्रियाकरणात्तदर्थं च शब्दव्यवहारादवाच्यत्वं तेषामित्यर्थ । ननु च कार्यादौ प्रकृत्यन्वयो ऽवधार्यत एव इहापि वस्तूनां जायमानत्वेन सत्वात् । ज्ञानस्य वैकल्पिकाकारानवस्थानाधिराकारशुद्धसंविन्मात्रानुगम्यस्य स्वसंवित्सिद्धत्वाद्दोष । ननु विशेषणोपरक्तं विशेष्याभिधानमित्युपसर्जनीभूतस्याभिधाने का क्षति । न का चित्केवलमुपाधिष्वेवात्र तात्पर्यदृष्ट्या पदवन्धो निवार्यते । गुणत्वेन त्वभिधानमस्तु न तावत्येव विश्रान्तिरिति द्रव्यनिष्ठतासिद्धि ॥ ४ ॥

अत एव विशेषणोपरागात्साङ्कर्यदोषं परिहर्तुमाह ॥

आकारैश्च व्यवच्छेदात्सावर्थ्यमनुरुध्यते ।

यथैव चक्षुरादीनां सामर्थ्यं नाडिकादिभिः ॥ ५ ॥

सर्वभावेषु ब्रह्मणो द्रव्यलक्षणस्याभेदात्तदभिधायित्वे शब्दानां सर्वत्र तस्य भावात्सार्वार्थ्यं शब्दान्तराभिधीयमानार्थत्वं साङ्कर्यं प्रसज्येतत्यत्रेदमुच्यते । प्रतिनियताकारपरिच्छिन्नवृत्तित्वात्सर्वार्थत्वा ।निबन्धादसङ्कर इत्यर्थः । घटाकारोपधानपुरस्सरं घटशब्देन ब्रह्मद्रव्यमभिमुखीक्रियते पटाकारोपधानेन तु पटशब्देनेत्युपाधिरूपोपहितविवेकित्वमभिधानीयम् । तद्यथा नाडिकाशुषिरव-र्मनिहितनयनास्तदवकाशावस्थितमेवार्थभागं पश्यन्ति तथाऽविद्यावच्छिन्नपृथक्शक्तिभिराकारभेदैरेव वस्तूपलक्ष्यते । तथैव च यथाध्यवसाय शब्दनिवेशाच्छब्दैरभिधीयत इत्यर्थः । यथाऽऽवरणादिनेन्द्रियस्यैव प्रकाशशक्तिः प्रतिबध्यते न विषयो विक्रियते तथाऽनाद्यविद्यावच्छेदप्रकल्पितविभागानां जीवानामेव संवेदनशक्तिर्नियम्यते । येन विच्छिन्नार्थाभिधानेन भेदविषयाण्यभिधानानि प्रयुज्यन्ते न तु तत्त्वमविद्यया ऽऽवि्लीक्रियत इति नाडिकादिदर्शनेन सूचयति । नाडिकादिभिरित्यादिग्रहणाद्व्यवधातप्रतिघातमूर्त्यभिजनाद्यवरोधः । यत्रैव ह्यवधानं तदेव ह्यवधार्यते । मूर्त्यभिजनाद्रूपसौन्दर्यं तेनापहृतो ऽन्यं न पश्यति ॥ ५ ॥

ये तर्ह्याकारमात्रनिर्देशाः सन्निवेशादिशब्दाः ते धर्ममात्रमभिदध्युः इति सार्वत्रिकी द्रव्यपदार्थव्यवस्था विशीर्यतेत्याशङ्क्याह ॥

तेष्वाकारेषु यः शब्दस्तथाभूतेषु वर्तते ।
तत्तात्मकत्वात्तेनापि नित्यमेवाभिधीयते ॥ ६ ॥

उपाधिमात्रस्वभावेष्वपि सन्निवेशाद्याकारेषु सन्निवेशादिशब्दा वर्त्तमानाः । परमार्थतस्तत्त्वादव्यतिरेकादुपाधीनां तन्निष्कर्षे स्वरूपस्यास्वरूपत्वादात्मनैव सत्त्वात्तदेव नित्यमुपाधिमल्लीनता तदा, द्रव्यमेवमप्यभिधाने ऽभिहित भवति । तत्त्वमात्मा ह्युपाधीनां न तु केवलस्यात्मन इति व्यापकत्वात्सर्व एवोपाधयस्तदात्मनां सन्नस्तथैवाभिधीयन्ते । यदा ह्युपाधिमल्लीनता तदोपाधेय उपाधयो न भवन्ति । ततस्तु निष्कर्षे धर्मान्तराश्रयतया स्वातन्त्र्यादुपाधिमत्त्वमेव नोपाधित्वमित्याशयः ॥ ६ ॥

यद्येव धर्माणामवस्थान्तरे धर्मिरूपत्वान्नित्यत्वे सत्यत्वे चाकाराणामसत्यत्व द्रव्यस्य तु सत्यत्वमित्येतस्य नियमस्यानुपपत्तिरित्याशङ्क्याह ॥

न तत्त्वातत्त्वयोर्भेद इति वृद्धेभ्य आगमः ।
अतत्त्वमिति मन्यन्ते तत्त्वमेवाऽविचारितम् ॥ ७ ॥

अयमत्रार्थः । नेह अद्वैतनये सत्यासत्ये द्वे रूपे स्तः, अद्वैतहानिप्रसङ्गात् । किं तु पारमार्थिकमेकमेवाद्वयम्ब्रह्मादिसिद्धाविद्याविलसितसहं प्रमातृविषयतया यथातत्त्वमनवभासमानमनेकविकल्परूपपरिघट्टनाकाररूपतया व्यवहारमवतरति । तथा च तदेवाकारनानात्वोज्झीयमानस्वरूपभेदं चकास्ति, नान्यत् । तद्व्यतिरिक्तस्यान्यस्याभावात् । तत्र च योऽयं प्रकाशः स विद्या । अप्रकाशस्तु तमोऽविद्या । न च प्रकाशाभावोऽप्रकाशो नाम कश्चित्प्रमाणसिद्धो निरूप्य । ततश्च योऽयं भेदप्रकाश सैवैकघनप्रकाशाभावः प्रकाशविच्छेदोऽविद्या । तत्र च विच्छिन्नान्वयोऽवच्छेदोऽवधार्यते इति विच्छिन्नप्रकाश सत्या विद्यैव । विच्छेदमात्र त्वप्रधानस्वभाव न किंचिदवियेति परमार्थत्वविचारे किं चिदतत्त्वं व्यवतिष्ठते । तत्त्वमेव यथाप्रतिभासं भेदेन चकासदविचारितरमणीय प्रपञ्चोऽतत्त्वमिति व्यवहियत इति ब्रह्मविदः । तथा चाविचारितरमणीयं परीक्षया व्यवस्थितं तत्त्वमेवाभिन्नं तीर्थिका भेददर्शनव्यवस्थिता भेदात्मकमनत्त्वं मन्यन्त इति विचारेणाविद्याविलये ब्रह्मैकनिष्ठतादर्शनम्। तदुक्तम् । सत्या विशुद्धिसूत्रोक्ता विद्यैवेत्यादि ॥ ७ ॥

एवं तेन तेन रूपेण ब्रह्मैव विकल्पितं भवतीति सर्वविद्यानां तदुपाधिसुख, तदेव विषयः सिद्ध इत्याह ।

विकल्परूपं भजते तत्त्वमेवाविकल्पितम् ।
न चात्र कालभेदोऽस्ति कालभेदश्च गृह्यते ॥ ८ ॥

परमार्थतोऽविकल्पितं विकल्पानामविषयो यत्तत्त्वं तदेव व्यवहारेऽन्यस्याभावाद्विकल्पमानं, विकल्परूपं नानाविधभेदावभासमनादिसिद्धाविद्यावशात्समवलम्बतेजीवात्मभेदेनावतिष्ठमानं तदतत्त्वेनेति मूर्त्तिविवर्त्ताश्रयदिक्शक्तिविभक्तदेशनानात्वं निमित्तपौर्वा-

पर्यालम्बनसहम् । एवमकालकलितमपि तत्त्वमनादिनिधनं कालाक्षयत्वनन्त्रशक्तिविनिवेशितप्रतिबन्धाभ्यनुज्ञावशाज्जन्मादिभावविकारानिधीयमानपौर्वापर्यं चकास्तीत्यर्थः ॥ ८ ॥

नन्वविद्यमानस्य तत्त्वे प्रतिभानमयुक्तमित्याशङ्क्य दृष्टान्तेनोपपादयति ।

यथा विषयधर्माणां ज्ञाने ऽत्यन्तमसम्भवः ।
तदात्मैव च तत्त्वेद्धमत्यन्तमतदात्मकम् ॥ ९ ॥

विज्ञानवादे विषयाकारस्य तावतो ऽसत्यत्वान्नीलादिरूपद्वतो धर्मो जडो ऽजड ज्ञाने ऽसम्भवो ऽत्यन्तमिति जडाजडयोर्न केन चिदंशेन सारूप्यमित्याह । तथा चोक्तम् । एकदेशेन सारूप्ये सर्वं स्यात्सर्ववेदनम् । सर्वात्मना तु सारूप्ये ज्ञानमज्ञानतां व्रजेदिति ॥ ९ ॥

अथ वा सम्भविधर्माक्षुरित विज्ञानं विशुद्धबोधस्वभावमप्यनुज्ञाया व्यवहारे ऽवभासत इति इत्थं निदर्शनान्तरमाह ।

तथा विकाररूपाणान्तत्त्वे ऽत्यन्तमसम्भवः ।
तदात्मैव च तत्तत्त्वमत्यन्तमतदात्मकम् ॥ १० ॥

साङ्ख्याभिमतमविकृतं प्रधानतत्त्वं सर्वविकारग्रन्थिबीजावस्थमभिन्नमनुपसृष्टमेव महदादिविकाररूपै परमार्थतः । तद्धि महदादिविकारस्य शक्तियुक्त गुणसाम्यावस्थात्मक गुणवैषम्यविमर्दवशोपजायमानविकारनानात्वाद्विलक्षणमेव । अयं च व्यवहारे महदादिविकाररूपावधारणेन विना तदुपलम्भासम्भव इति सर्वदेशेष्वविद्यान्वयिनीएवमसत्याकारो ऽप्रधानेन तत्त्वप्रतिभासः सिद्ध इति साध्यान्वयो गृहीतः ॥ १० ॥

कथं पुनरेतदवगम्यते आकारा असत्यास्ततो ऽन्यत्सत्यमित्याह ।

सत्यमाकृतिसंहारे यदन्ते व्यवतिष्ठते ।
तन्नित्यं शब्दवाच्यं तच्छबलतत्त्वं न भिद्यते ॥ ११ ॥

तदेव हि नित्यं यस्मिंस्तत्त्वं न विहन्यत इति भाष्यानुसारेणैतदुच्यते । तथा ह्यलोक्त कनकमित्येव सत्यं पुनरपरया ऽऽकृत्या युक्तं कादिराङ्गारसदृशं सुवर्णकुण्डलं भवत इत्यनेनैव दृष्टान्तेन विकारापेक्षया

भिन्नस्य ब्रह्मण सत्यतोच्यते । तथा हि । तत्र रुचकाद्याकारोपमर्देन सुवर्णमित्येव सत्यम् । एवमनन्तविकारग्रामान्ते सर्वान्ते ऽवतिष्ठमानमनपायि ब्रह्मरूप सत्यं तदेव च भावतो नित्यमाप्रेक्ष्य तु जात्यादीनां सर्वव्यवहारे नित्यत्वमुच्यते । तथा हि । व्यक्त्यपाये जातिरवतिष्ठमाना गोत्वादिका नित्या । तत्राप्यश्वत्वादिभेदत्यागे पृथिवीत्येव सत्यमतत्राप्यप्त्वादिभेदापाय वस्तित्वेव सत्यं सर्वनामप्रत्याय्यम् । तत्रापि संविद्रूपस्यानपायिनो ऽनुगमाद्विषयाकारविवेके तदेव पारमार्थिक सत्यमिति नेति नेत्युपासीतेति भावनया चोद्यते । संविच्च पश्यन्तीरूपा परा वाक् शब्दब्रह्ममयीति ब्रह्मतत्त्व शब्दात्पारमार्थिकाच्च भिद्यते । विवर्त्तदशायां तु वैखर्यात्मना भेद. । तत्र च तदेव नित्य जात्यादिरूपेण शब्दवाच्यम्।तत्रान्तरे उपादानविश्रान्त्या वाचकत्वस्य व्यवस्थापनात्स्वरूपान्तर्गतस्यार्थस्य वाच्यत्वाद्वाच्यवाचकयोरविभागः सिद्ध इति प्रथमकाण्डे निर्णीतम्। अत एवानन्तरमिहाभिधास्यति । तस्य शब्दार्थसम्बन्धं रूपमेकस्य दृश्यत इति ॥ ११ ॥

यदुक्त तदात्मैव च तत्तत्त्वमत्यन्तमतदात्मकमिति । तत्रात्यन्तमतदात्मतां तावद्वचाचष्टे ॥

न तदस्ति न तन्नास्ति न तदेकं न तत्पृथक् ।
न संसृष्ट विभक्तं वा विकृत न च नान्यथा ॥ १२ ॥

वैकारिकसर्वव्यवहारातीतत्वात्पारमार्थिकेन रूपेण विकारात्मकं तत्त्वं न भवति । तथा हि। अस्तीति न शक्यते व्यवहर्त्तुं, सत्त्वोपाधिकस्य स्वरूपस्य तत्त्वस्य भावयोगात्तेनात्मना व्यवहारानवतारात् । नापि नास्तीत्यभावोपाधिकस्याप्यनर्थत्वात्प्रमाणेन भावात्मकस्य तत्त्वस्याचोदितत्वादेकसङ्ख्योपाधीयमानस्वरूपविशेषं तत्त्वं न भवति । निरुपाधितः तत्त्वस्य वस्तुतो ऽभिन्नत्वात्तथा चैकमित्यप्रतीतेः । नापि पृथक्त्वाहितविशेषं तद्भिन्नस्यासत्वात् । नापि संसर्गोपाधिकम् विभागोपाधिकं वा । ततो द्वितीयस्य प्रमाणेनानुपपत्ते. । कुतो ऽभिन्नं विभक्तं च केन वा संसृष्टं स्यात् । परिणामनिषेधेन विवर्त्तोऽप्युपगमात्र विकृतम् । अनेकभावग्रामरूपतया चादभुतया वृत्त्या विवर्त्तनादविकृतमित्यपि न शक्यते व्यवहर्त्तुमिति सर्वव्यपदेशातीतं तत्त्वमपरं ब्रह्म ॥ १२ ॥

अथ च तदात्मैवाविद्यायामवधार्यन इत्याह ॥

तन्नास्ति विद्यते तच्च तदेकं तत्पृथक् पृथक् ।
समृष्टं च विभक्तं च विकृतं तत्तदन्यथा ॥ १३ ॥

भावाभावविकारावभासनजननशक्ति तदेवास्ति च सत्तासत्तोपाधिकव्यवहारमहम्भावस्तु नि.सत्तामत्तं नि.सदसत्पर ब्रह्म। व्यावहारिक चैकानेकव्यवहारं जातिव्यक्त्यात्मना तदेव वर्त्तयति। सङ्ख्योपाधिकमपि च एवं सयोगोपाधिकमपि। अन्यससर्गितया ऽवभासनात्। एवं विवेकावसायस्तत्र। तथा समस्तविकारात्मना तन्यमानमिवाकाशाद्यात्मना कूटस्थतया तदेवावभासत इति तदात्मैव तत्त्वमित्युक्तम ॥ १३ ॥

एवं च कृत्वा सर्वस्य तन्मयत्वाद्विरोधिनो ऽपि व्यवहारास्तत्रैवोपलीयन्त इत्याह ॥

तस्य शब्दार्थसम्बन्धरूपमेकस्य दृश्यते ।
तद् दृश्यं दर्शनं द्रष्टा दर्शने च प्रयोजनम् ॥ १४ ॥

वाच्यवाचकसम्बन्धानां भावनो ऽद्वयरूपता । तत्र ह्यान्तरे तत्त्वश्रुत्यर्थशक्ती संसृज्येते इति विवर्त्तदशायां श्रुत्यर्थशाखात्मना तस्यैव विकासाद्वाच्यवाचकरूपतया भेदावभासौ, ज्ञानज्ञेयवाविद्येति ब्रह्मकाण्डे एव प्रपञ्चनायमर्थो ऽस्माभिर्निर्णीत इति तत एवावधार्यम। दृश्यरूपतया च तस्यैव विवर्त्तः। तथा हि। दृश्यं तावद्भावजातं संविदुपारूढम्। वेद्यत्वादेव चेदमनेकवेद्यमानम्। अपरार्थप्रकाशस्य प्रकाशमानतायोगादिति पूर्वकाण्डे द्वितीयसिद्धौ च वितत्य विचारितम्। द्रष्टा ऽपि जीवात्मा अविद्याकृतावच्छेदो नियतः स त्वससारी भोक्ता ब्रह्मैव चेतनत्वाद्भावतो भेदानुपपत्तेरिति तत्रैवावेदितम्। अनेन च प्रधानकर्तृकर्मरूपकारकनिश्चयेन कारकान्तरस्यापेक्षणात्सिद्धरूपो विवर्त्त प्रतिपादित । दर्शनशब्देन च प्रधानक्रियानिर्देशेन क्रियान्तरस्यापेक्षणात्साध्यस्वभावक्रियाविवर्त्तो ऽप्युक्त । कालशक्त्यवच्छिन्ना हि क्रिया विवर्त्त. । दिक्शक्त्यवच्छिन्नस्य मूर्त्तिविवर्त्त इति मूर्त्तिक्रियाविवर्त्तरूपं विश्वं प्रतिपादितम् । प्रयोजनशब्देन च सम्मतिक्रियाफल इति निदर्श इति साध्यसाधनफलरूपतया

विश्वसङ्कलनायामशेषविवर्त्तानुगुण्यं ब्रह्मण प्रतिपादितम् । एकस्य सर्वबीजस्य चेयमनेकधा भोक्तृभोक्तव्यरूपेणा स्थितिरिति ब्रह्मकाण्डे प्रतिपादित । तत्रैव च सतस्त्रितर्णयो ऽस्माभिरध्यधायि । प्राच्योपाख्यात्मकत्वात् च व्यवहारस्य, द्वित्वे शब्दार्थसम्बन्धरूपं तद् दृश्यदर्शन चेति भेदेनात्र निर्देश । एतच्चाविद्यामय रूपं कथ्यते। पारमार्थिकं तु प्रकाशितप्रपञ्चरूप वक्ष्यति । यत्र द्रष्टा च दृश्यं च दर्शनं चाविकल्पितम् । तस्यैवार्थस्य सत्यत्वं श्रितास्त्वप्यन्तवेदिन इति । युक्तमिदं, आकृतिसंहारे ऽन्ते यदवतिष्ठते तत्सत्यमिति ॥१४॥

तत्रैतत्स्यादन्ते न किञ्चिदवतिष्ठते । अस्मदन्यपदमेवैतद्विश्वमाविर्भवतीत्याशङ्क्यापि हेतुनाऽभिन्नकारणपूर्वकत्वमन्वयमुखेन दृष्टान्तोपक्रमं साधयितुमाह ॥

विकारापगमे सत्यं सुवर्णं कुण्डले यथा ।
विकारापगमे सत्यां तथाहुः प्रकृतिं पराम् ॥ १५ ॥

कुण्डलस्वात्मकविकारापाये द्वे कुण्डले सुवर्णमेकं सत्यमवतिष्ठते यथा तथा पृथिव्यादिविकारविगमे ऽन्वयिनी प्रकृतिर्नाम्ना सत्यवतिष्ठत इत्युपेयम्। आहुरित्यागमप्रमाणसिद्धतां ध्वनयति ब्रह्मण । तथा चोक्तम्। एकमेव यदाम्नातमिति आत्मैवेदं सत्यमिति हि श्रुति । उपोद्बलनमात्र चानुमानम्। तथा हीनिरुपाख्यादसतो ऽपरात्प्रादुर्भावो न युक्त.। अभावस्य भावरूपत्वविरोधान्न हि शशशृङ्गात्कस्य चिदुद्भवो दृश्यते । अस्ति च विज्ञानरूपतया जगत्यन्वय इति तत्पूर्वमेवैतत् । तथा च वक्ष्यति। नाभावो जायते भावो नैति भावो ऽनुपाख्यतामिति । तस्य चिद्रूपस्य चिच्छक्तिरपरिणामिनीति विकाराभावान्नेदं साङ्ख्यनयवत्परिणामदर्शनमपि तु विवर्त्तपक्षः । विशेषज्ञानयोर्वाक्यप्रदीपे ऽस्माभिर्व्याख्यात इति तत एवावधार्यम्। इहापि सम्बन्धसमुद्देशे वक्ष्यते । कारणान्तरव्युदासश्चाद्वयसिद्धावभिहित इति सत्यर्थित्वे तत एवावगन्तव्यः ॥ १५ ॥

तदेवमात्मशब्दाभिधेयस्य ब्रह्मणः पदार्थपरमार्थरूपत्वाद्द्रव्यरूपत्वमुपपाद्य सर्वशब्दवाच्यत्वं तस्यैव निगमयितुमाह ।

विद्या सा सर्वशब्दानां शब्दाश्च न पृथक् ततः ।
अपृथक्त्वे च सम्बन्धस्तयोर्नानात्मनोरिव ॥ १६ ॥

तत्तदुपाधिपरिकल्पितभेदबहुलतया व्यवहारस्यापि विद्याभूयस्त्वे प्रतिनियताकारोऽर्थ्यमानरूपभेदं ब्रह्मैव सर्वशब्दविषय इत्युक्तोऽर्थ । आत्मा ब्रह्मतत्त्वमित्यादयोऽपि हि शब्दाः समवलम्बितोपाधयोऽन्यात्मानमनु परिवर्त्तन्ते । निरुपाधिनो वाग्विषयातीतत्वाद्वाङ्मनसमतीतं हि तत्त्वमित्युपदिशन्ति ब्रह्मविदः । यदि शब्दापेक्षया त्वात्मादिशब्दाः प्रत्यासन्नाः सर्वस्य च तन्मयत्वाच्छब्दा अपि तदात्मकाः । यथाविभक्तं प्राक् अभेदेऽपि च पारमार्थिकसंवृतो लोकयात्रायां भेदोऽसत्य इतीवशब्दः । अत एव द्वित्वसम्बन्धोपपत्तिः ॥१६॥

ननु चेन्द्रजालमिदं यदवधृतरूपभेदानामपि भावानामनावृत्य तत्त्वमवसीयमानापरमार्थतोपदेयनमित्याशङ्क्य दृष्टान्तेनैतत्साधयितुमाह ।

आत्मा परः प्रियो द्वेष्यो वक्ता वाच्यं प्रयोजनम् ।
विरुद्धानि यथैकस्य स्वप्ने रूपाणि चेतसः ॥ १७ ॥
अजन्यानि तथा नित्ये पौर्वापर्यविवर्जिते ।
तत्त्व जन्मादिरूपत्वं विरुद्धमुपलभ्यते ॥ १८ ॥

स्वप्नावस्थागतः प्रपञ्चो जागरया बाध्यमानत्वादसत्य इति सर्वैवाद्यभ्युपगम । तेनैव दृष्टान्तेन जागरायामपि भावभेदस्तुरीयदशायामननुवृत्तेरसत्यो ऽवस्थाप्यतेऽयत्किल सर्वावस्थास्वनुगत तदेव सत्यमुक्तञ्च सविन्मात्रं रूपमबाध्यमानम् । अवस्थाभेदस्त्वागमापायित्वाद् बाधित तत्सुखवत् खादिवत् । तथा हि रागादयः सुखादयश्चास्वभावत्वात्सविन्मात्र रूप न विकुर्वन्ति । तथा ऽवस्थाभेदो ऽप्येनकाकारत्वबुद्ध्योपहतः । तत्र स्वप्न विरुद्धकारोल्लेखी । वैकल्पिकी दृष्टिः प्रतिमातृनियता वैकल्पिकीति को ऽभिमानः । व्यापारानुसारी ससारी भोक्ता स च भावत्वादचेतनत्वात् ब्रह्मैव । तथा च तावति स्वातन्त्र्यानिमित्तापीश्वरे ऽन्योपादानाभावात् नाभास्यापि तु प्रियाप्रियरूपतया रागद्वेषादिभयन ससारमोहेन परविभागानुसारी परसङ्कथादिषु । तदाहु वेदान्ततत्त्वनिपुणा । प्रविभज्यात्मनात्मानं सृष्ट्वा भावान् पृथग्विधान् । सर्वेश्वरः सर्वमय स्वप्ने भोक्ता प्रवर्त्तत इति । भोक्तेति प्रत्यगात्मसृष्टिरियमुक्ता । तस्य च सर्वेश्वरत्वात्, ब्रह्मरूपत्वे सृष्टिसामर्थ्यमुक्तम् । सर्वमयत्वाच्चानन्योपादानं विचित्रभावस्वभावानामात्मोपज्ञा-

नामाहुः । अत एव प्रविभज्यात्मनात्मानमिति । कर्तृकर्मभेदाभावाच्च वैकल्पिकत्वमस्य सृष्ट. स्फुटमुक्तम् बाह्योपादाना तु जागरायामैश्वरी सृष्टिर्विश्वशब्दवाच्या सर्वप्रमातृसाधारणी। स्थिरत्वास्थिरत्वग्रहाभेदा-निमित्तस्तु भेद.।अविद्याप्रवृत्तिरूपत्वात् पुनरसत्यता समानैव। केवलं सत्यामविद्यायामपरो मोहश्चिच्छक्तेरावारको निद्रा नाम । तद्वशा दत्रैव मतत्वाभिमाने ऽर्वाग्दशाम्, परमार्थदृशां तु जननमरणरहितैः प्रविभक्ते कूटस्थे परस्मिन्ब्रह्मणि चिदानन्दरूपे सर्वमेव जगज्जाग्र-त्स्वप्नाद्यवस्थागतं सृष्टिक्रियाविवर्तरूपं सत्स्वाप्नमन्वयि, चित्सामा-न्यमात्र तु परमार्थ इति सिद्धिविरुद्धमुपलभ्यत इति वदन्नवि-द्यायां विरोधमभ्युपैति । एतदेव ह्यविद्याया. स्वरूप यदनुपपद्यमान-मप्यात्मोपगमं नयति उपलब्धे विद्यैव स्यात् । तस्मादसत्यप्रपञ्च-प्रकाशनशक्तेर्ब्रह्मणो ऽनादिसिद्धा ग्राह्यग्राहकयुगलस्वानुरूपमु-परचय्याजगलाद्यमात्तोतीत्यविचारितरमणीयामिमामपनयन्ति त-त्त्वदृश. ॥ १८ ॥

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे
द्रव्यसमुद्देशो द्वितीयः ॥



समुद्देशद्वये जातिद्रव्यदर्शनभेदेन शब्दार्थं व्यवस्थाप्य शब्देनार्थस्याभिधाने सम्बन्धो हेतु, अन्यथासर्वं सर्वेण प्रत्याय्येतेति तत्र सम्बन्धं प्रतिपादयितुमाह ॥

ज्ञानप्रयोक्तृबाह्यो ऽर्थः स्वरूपं च प्रतीयते ।
शब्दैरुच्चरितैस्तेषां सम्बन्धः समवस्थितः ॥ १ ॥

प्रयोगेणाभिज्वलितैः शब्दैस्त्रितयमवगम्यते । आत्मीयं रूपमर्थश्च फलसाधनं प्रयोक्तुरभिप्रायश्च । न चैतदसति सम्बन्धे नियमेन घटत इति वास्तवः सम्बन्धावसायो न सामयिकः शब्दार्थयोः सम्बन्धः अभिधाननियमादनादेः । अत एव समवस्थित इत्याह । स्वभावत एव निरूढो न तु पुरुषेण निवेशित इत्यर्थः । तत्र स्वरूपमन्तरङ्गमभिधेये इति तेन मुख्यसम्बन्धो ऽभिधानं नियमः । अत एवान्यथा ऽपि पाठक्रमे सामर्थ्यात्स्वरूपे प्रथमं प्रतिपत्तिर्विवर्जनीया । ततो ऽप्यसत्स्वरूपे ऽर्थक्रियाकारिणी । ताभ्यामर्थस्वरूपाभ्यां शब्दस्य वाच्यवाचकसम्बन्धः प्रयोक्रभिप्रायेण तु सह कार्यकारणभावः । ननु च वाच्यवाचकभावलक्षणः सम्बन्धः प्रस्तुतः । तत्र क प्रसङ्गो ज्ञानस्वरूपयोः । सत्यम् । सर्वपार्षदं पुनरिदं शास्त्रमिति ये बाह्यस्यार्थस्य शब्दवाच्यत्वं नेच्छन्ति तन्मतोपस्कारार्थं वक्रभिप्रायारूढस्यैव शब्दार्थत्वे तत्र कार्यकारणसम्बन्धमाह । यथा वक्तृव्यापारविशेषे यो ऽर्थो बुद्धौ प्रकाशते, प्रामाण्यं तत्र शब्दानामर्थत्वनिबन्धनमिति । अत एव त्रिविधः सम्बन्धः पदार्थे व्यवतिष्ठते । योग्यता कार्यकारणभावश्चपरस्परमध्यासश्च । द्वयोरपि परमार्थ एव न पृथग्रूपम् ॥ १ ॥

यथा चोपचारसत्तांशमाविष्टस्य शब्दार्थत्वं वक्ष्यति तथा कार्यकारणभावो ऽपि स्वरूपः, सम्बन्धमुख्यमेववाच्यत्वमित्याह ॥

प्रतिपत्तिर्भवत्यर्थे ज्ञाने वा संशयः क्वचित् ।
स्वरूपेषूपलब्धेषु व्यभिचारो न विद्यते ॥ २ ॥

अय गौरयमर्थ इति शब्दार्थयोरभेदेनावभासनात् स्वरूपमभिदधदेव शब्दार्थमभिधत्त इति निश्चीयते । स्वरूपाविवेकेनैव घटपरामर्शो ऽभिधानमुच्यते । वृद्धव्यवहारात्तत्रैव सम्बन्धव्युत्पत्तेः । तथा ह्यय गौरिति सङ्केतः क्रियते, भेदेनैव घटशब्दस्यायमर्थ इति । मुख्यातु-

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R T H GRIFFITH, M A C I E.

AND

G THIBAUT, Ph D.

No 102

श्रीविश्वनाथो विजयते ।

वाक्यपदीयं ।

साङ्गवैयाकरणसिद्धान्तनिरूपणं श्रीभर्तृहरिमहावैयाकरणविरचितं

श्रीहेलाराजकृतया टीकयोपेतं च ।

VÂKYAPADIYA

A TREATISE ON THE PHILOSOPHY OF SANSKRIT GRAMMAR BY BHARTRIHARI,

With a Commentary by Helârâja

EDITED BY

Pandit Râmâvatâra Śarmâ Kavirâja Śâstrî

Vyâkaraṇâchârya,

Pandit Central Hindû College Benares

Volume II Fasciculus II

BENARES

Published by the Proprietors Messrs Braj B Das & Co,

AND SOLD BY H D GUPTA

Secretary, Chowkhamba Sanskrit Book Depot

Printed at the Vidyâ Vilas Press

BENARES

1905

Registered under Act XXV of 1867] [All Rights Reserved]

सूचीपत्रम् ।

गणपाठः	०	४	
गोलप्रकाशः	२	८	०
मगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला ~)	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठ.	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	२	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

भूमिर्न व्यवहारदशा । अत्रापि चायमिति शब्दात्तद् यदा गौरित्युच्यते तदा ऽयं सास्नादिमानर्थो बोद्धव्य इति अर्थभेदेनैव परामर्शे सङ्केतप्रवृत्ति । व्यवहारफलो हि सङ्केत । यथा च लौकिके व्यवहारे प्रतीति. तथासौ न्याय । अभेदेन च तत्र प्रतीति । प्रतीतौ हि किं चित्तटस्थमेव तामनुप्रविशदेवोपायमात्रं दृष्टं यथेन्द्रिये,किं चित्पुनश्चानुप्रविशदेव प्रतीतिं जनयदप्यधिकरणं भवति, दहन इव यथा धूमादि लिङ्गम् । शब्दस्तु जनकमात्रेण नार्थप्रतीतौ सम्बन्धमनुभवति अपि तु तत्रार्थे शब्दमान शब्दरूप एव चाभाति, तादृश एव प्रतीतिस्वभाव ।रूढत्वाच्च न क्रम । ननु न वर्णमालाऽर्थे समुपलभ्यते दर्शनाभिज्ञो देवानाप्रिय । इह शब्दा नाम वाचक. स उच्यते, यो ऽयं चिच्छक्तेर्वागात्मा व्यापार शब्दनापरपर्यायो ऽश्रूयमाणो ऽप्युपाशुप्रयोगे शब्द इति व्यवह्रियते।यत तस्य च प्रथममुद्भिद्यमानावस्थस्यायमिमागो ऽयं न शब्दार्थमयस्वभावस्य परिवागात्मना स्वरूपेणावस्थानम्। परतस्तु प्राणवृत्त्यनुप्राणितमनोभूमिसमवलम्बिननिजस्वभावस्य वाच्यवाचकरूपभिन्नशाखाद्वयावलम्बिन समवस्थानम्।अस्यां च मध्यमावस्थायां परामर्शात्मा वाचक शब्दो भिन्नचैतन्योद्रेकात्मिकां परवागवस्थामभजन्नेव स्वरूपवाच्यमुखेन तत्सम्भिन्नमर्थं परामृशति सामानाधिकरण्येन, गौरयमर्थ इति । तथा च स वाच्यो ऽर्थो वाचकाभ्यासवानुच्यते । ननु च स एव परामर्शक शब्द पूर्वावस्थावदभेदेनैव करणीति हननान्मनस्युपारूढ. श्रवणविषयतायामेनात्मना विभिन्नवाच्यवाचकरूपतया व्यक्तिमासादयन् श्रव्यो भवतीत्येतावती शब्दव्याप्ति. ।ततश्च परवागुपनिष्पन्दात्मकस्यास्मच्छब्दस्य तद्रूपानुगमात् शब्दनात्मनैकव्यापाररूपस्य स्वसामानाधिकरण्येनार्थरूपशब्दनाभेदेनैवैकया वृत्त्या स्वरूपविशेषेण विशिष्टमर्थाभिधानमवतिष्ठते। तद्यथा शुक्ल पटो ऽयमिति।शुक्लगुणच्छुरणया सकृदेव विशेष्यपरप्रत्यवमर्शे. । न ह्यस्य शुक्लगुणस्य पृथक् परामर्श ।एव घटो ऽयमिति प्रधानभूतविशेष्यानुप्रवेशेनैव घटस्य रूपपरामर्शशब्दस्यैकैवेय शब्दनात्मिका प्रतीति । शब्दार्थयो. क्व चित्तु स्वरूप एव विश्रान्ति.।तद्यथा अग्निमन्तोदात्तमधीष्व, अग्नेर्ढगित्यादौ । अत्र न ह्यनुकार्ये स्वरूपमेव प्राधान्येनावस्थितम्।वाह्यार्थप्रतिपिपादयिषाया तु स्वरूपार्थयो. सम्भेदो नावभासत इति न पृथक्त्वरूपं विमर्शे अपि तु स एव

तस्थाविषदस्तद्भेदभाजो ऽर्थस्य घटक इति हि घटशब्देनार्थवत्स्वरूपमभिधायैव विषयीक्रियते । ज्ञानशब्दप्रदीपास्त्रयो हि प्रकाशयन्तेनैव प्रकारेण परप्रकाशयन्ति तेनैवात्मानमपि । तथा च ज्ञानमर्थः प्रकाशयात् प्रथयति तथैवात्मानमपि प्रकाशयति । एव प्रदीपो रूपमात्मसमवेतं आत्मसमवायिविषयभावोपगमनेन प्रकाशयति । तथा शब्दो ऽपि वाचको ऽर्थमभिधीयमानतया प्रकाशयन्नात्मानमभिधेयतयैव प्रकाशयतीत्युचितम् । न तु श्रोत्रेन्द्रियविषयभावोपगमनेन । अर्थसामानाधिकरण्यापन्नं च स्वभावरूपमर्थमर्थवत्यपरामृश्य मन शब्दस्याभिधानविषयो ऽभिधेयम् । ननु वाचकतायामभिधीयमानतास्ति, परामर्शस्य परवागात्मनः कर्तृसमुपारूढस्य प्रकाशस्य वाचकत्वात्तत्र च परामृश्यमानतात्मकवाच्यताविरोधात्तथा चाह । न च वाचकरूपेण प्रवृत्तस्यास्ति वाच्यतेति । एव च कृत्वा सर्वघटशब्दसाधारणं सामान्यरूपमर्थपक्षनिक्षिप्तमर्थसमानाधिकरणं स्वरूपमस्य वाच्यम् । अर्थवत्तत्सामानाधिकरण्यात्तत्रापि तथा प्रतीते । सामान्यरूप एव च सङ्केतोपपत्ते । तेनैवार्थस्य सामानाधिकरण्यात्तथैव च व्यवहारे श्रोत्रा प्रतीतेः । तदनुसारेणैव प्रतिपाद्यप्रतिपादकभावार्थमकपरामर्शावस्थितौ सङ्केतोपपत्ते. । अत एव च स्वाभिप्रायानुसारेण श्रोत्रा वक्तृज्ञानस्यानुमानात्स्वय शब्दस्वरूपाध्यस्तमर्थमवबुध्य तथैव वक्तर्यनुमानमुचितमित्यभेदेनैव घटशब्दाध्यस्तप्रथोक्तृज्ञानमवसीयते । तथा ज्ञानमप्यभ्यासेनैव शब्द प्रतिपादयति वक्तृवगतमिति तत्रापि परमार्थदशाध्यास एव सम्बन्ध. । लोलीभूतानि शब्दार्थज्ञानानि घट इत्यवमवगम्यन्तायथोक्तम् । न सो ऽस्ति प्रत्यय इत्यादि।अत एव गौरित्यत्र कः शब्द इति प्रश्न । तदहर्जातस्यापयमस्त्येव शब्दसम्भेद. । सङ्केतसहस्वात् । एवं च कृत्वा तात्पर्याध्यास एव योग्यताया. कार्यकारणभाव फलत सम्बन्धो ऽवतिष्ठत इति । एव च मुख्यो ज्ञानस्यैव च परस्परसङ्क्रान्तव्यवहार इति शब्देन स्वरूपाध्यस्तं ज्ञानमपि प्रतिपाद्यते । परत्रैतदपि तस्याभिधेयतयैव प्रतिपाद्यमुपपद्यते । घटमानयेति नियुक्तो घटानयने ऽहमनेन प्रेषित इति शब्दपूर्वकमेव प्रतिपद्यते । तदाह वार्त्तिककार । न वा शब्दपूर्वो ह्यर्थे सम्प्रत्यय इति । तदेव शब्दनात्मकेन व्यापारेण परवागात्मनो व्यवहारे प्रवृत्ते प्रकाशस्य तज्जीवित्वादेकशब्दानुप्रवेशाच्छब्दार्थयो. सामानाधिकरण्याद्-

भेदाध्यासाख्य. सम्बन्धो विषयता सिद्धा । अनिभागदशायां तु पदस्यन्यभिधानायां वाच्यवाचकभेदानुल्लासान्नाध्यासविनाकाचित्। इत्थं च कृत्वा शब्दैकजीवितत्वाद्व्यवहार ऽप्यर्थस्य तद्विषयोगात्तद्विवर्त्तरूपं विश्व सिद्धमित्यास्तामेतत्पूर्वमेव स्वप्रपञ्चमस्यार्थस्य निरूपितत्वात्। तत्रान्तरङ्गत्वादहेयत्वादसाधारणत्वाच्च स्वरूपं मुख्यमभिधेयम् । तत्र हि शब्दस्य सङ्केतत्व शब्दानपेक्षा शब्दस्य वृत्ति । तच्च जात्यादिभेदेन ब्रह्मकाण्डे निरूपितम्। अभिधानाभिधेयनिमित्तभेदाच्च भिन्नरूपमिति स्वरूपेष्वित्याह। तथा हि कारणसन्निवेशि वाचकस्वरूप,मर्थपक्षनिक्षिप्त वाग्भेदेन सङ्केत्यमानं वाच्यं, सम्बन्धसम्वेदनसमयानुभूतमभिन्नश्रुतिविषयं नियामकत्वादर्थप्रवृत्तिनिमित्तमिति त्रितय सर्वत्राव्यभिचारिव्यवहाराभ्यासाच्छ्रुतिसाम्याच्च नैतत्त्रितयं विवेकेनावधार्यते। श्रुत्यविशेषाच्च त स्वरूपमिति व्यवह्रियते। न तु सर्वथैवापि भेदाप्रवृत्तसङ्केतस्यार्थे । तद्विषये च ज्ञाने सन्देहो जायते न तु श्रुते स्वरूप अर्थापरिज्ञानाच्च किमय चेदवक्तेत्ययमपि वक्तृज्ञानविषय. सन्देहो जायत एव। प्रवृत्तसङ्केतस्याप्यक्षादिसामान्यशब्दादेव चाक्षादौ सन्देहो न तु स्वरूप इति सिद्धम् ॥ २ ॥

सम्बन्ध समर्थित स्वभावत एव सिद्धः न तु सामवायिक इत्युक्त तस्य सद्भावे लिङ्गमाह ॥

अस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते ।
योगः शब्दार्थयोस्तत्त्वमप्यतो व्यपदिश्यते ॥ ३॥

अस्यार्थस्यायं शब्दो वाचको ऽस्य शब्दस्यायमर्थो वाच्य इति षष्ठ्यन्यथानुपपत्त्या ऽस्त्येव स्वाभाविक. शब्दार्थयोर्योग इत्यवसीयते। असम्बन्धानां घटपटादीनां एवमन्योन्यपारतन्त्र्येण व्यवहारायोगात्। अत एव स्वाभाविकात्सम्बन्धाच्छब्दार्थयोस्तत्त्व गौरयमर्थ इत्यभेदेन व्यवह्रियत इत्यर्थ ॥ ३ ॥

यदि वात्र षष्ठ्या सकाशात्तत्त्व स्वरूपसम्बन्धस्योच्यते नतु षष्ठीसम्बन्धस्य कार्यत्वं, स्वरूपनिवेशि तु लक्षणमुच्यतामित्याशङ्क्याह ॥

नाभिधानं स्वधर्मेण सम्बन्धस्यास्ति वाचकम ।
अनन्तपरतन्त्रत्वाद्रूपं नास्यापदिश्यते ॥ ४ ॥

इह पदार्थानां स्वरूपमवधार्य तदनुगामिशब्दनिवेशेन लक्षणं क्रियते । तत्र स्वेनासाधारणेन धर्मेण स्वभावेनोपलक्षितस्य सम्बन्धस्य वाचकं प्रत्यायनमभिधानं षष्ठीव्यतिरिक्तं नास्ति, इदंतया स्वरूपानवधारणात् । गुणा द्रव्याधीना अपि प्राधान्येन शुक्लादिशब्देन कदा चिदुच्यन्ते नैव सम्बन्ध इत्यत्यन्तग्रहणम् । नित्यपरतन्त्रो हि सम्बन्ध परोपाधिस्वरूपसम्बन्धिनो परस्परौन्मुख्यस्वभावो धर्ममात्रलक्षणः । ततो निष्कृष्य सम्बन्धशब्देन स्वप्रधान सम्बन्धिरूपतया ऽभिधीयमानो न साक्षात्कर्तुं शक्यते इत्यसंविज्ञातपदकार्यैकगम्य ॥ ४ ॥

तदाह ॥

उपकारोऽस्य यत्रास्ति धर्मस्तत्रानुगम्यते ।
शक्तीनामपि सा शक्तिर्गुणानामप्यसौ गुणः ॥ ५ ॥

उपकार्योपकारकयोरुपकारकः स्वभावत सम्बन्धो ऽसम्बन्धानामुपकाराभावात् । धर्म इति तु नित्यपारतन्त्र्यमाह । धर्मत्वे स्वातन्त्र्याद्धर्मान्तरप्राप्तेरनवस्थापातात् । न च शक्तिरेव सम्बन्ध शक्तीनामप्याधारपारतन्त्र्ये नियतकार्यजनने च सम्बन्ध एव नियामको यतः गुणानामपि च द्रव्याश्रितत्वावस्थापक सम्बन्ध एवेति परतन्त्राणामप्युपकारकत्वात्सर्वत्रानुमानस्वरूपो नित्यपरतन्त्रः ॥ ५ ॥

ननूक्त एव संयोगसमवायलक्षणः सम्बन्धः परैरिति को ऽतिशयस्तत्प्रतिपादन इत्याशङ्क्याह ॥

तद्धर्मणोस्तु नाच्छिद्यं संयोगसमवाययोः ।
तयोरप्युपकारार्था नियतास्तदुपाश्रयाः ॥ ६ ॥

पारतन्त्र्यं संयोगलक्षणमिति संयोगसमवाययोर्द्रव्यगुणादिषु तत्त्वात्सम्बन्धिशब्दप्रवृत्तिः । तस्य सम्बन्धस्यैव धर्मः पारतन्त्र्यलक्षणो ययोस्तौ तद्धर्माणौ । स्वरूपमात्रेण हि तौ सम्बन्धमनुकुरुत । तथा च तत्सम्बन्धस्यैव धर्मशब्दः । तयोर्गौण सम्बन्धशब्दः संयोगसमवाययोर्न तु मुख्यतस्तावेव सम्बन्धः । तथा हि यदा स्वतन्त्रपदार्थान्तरत्वतयोरपि स्वगतोपाधिविवक्षा तदा तदुपक्रियमाणत्वात्स्वातन्त्र्ये सति पारतन्त्र्याभावात्स्वतन्त्रपदार्थवत्सम्बन्धरूपतात्वा-

पत्ति । उपकारार्था उपकारप्रयोजना । नियता असाधारणा । तदुपाश्रय इति । सम्बन्धस्य उपर्येषा सम्बन्धानां नियामकत्वात् । इत्थं चोपाधिमन्तौ स्वतन्त्रौ चेत्सयोश्चोपाध्यवच्छेदे सम्बन्ध उपयोगी । तेन संयोगसमवायौ कथमुपाधिरूपेण पारतन्त्र्येण सम्बन्धेनैकात्म्यं भजेतामिति स्वाश्रये सम्बन्धप्रतीतिहेतुत्वात्सम्बन्धस्वभावौ तौ ॥६॥

तत्र संयोगस्य तावदुपाधय ॥

का चिदेव हि मात्रस्था कार्यमात्रमवस्तुचित् ।
कस्य चित्केन चिद्यस्मात् संयोग उपजायते ॥ ७ ॥

परस्परसंयोगेनावयवानामुपसर्पणप्रत्ययाहितेनावयवि द्रव्यं जायते इत्यसमवायिकारण संयोगो ऽवयवव्यन्यथानुपपत्त्या ऽवसीयते। तथा च द्रव्यैकनियतत्व गुणत्वेन सत्तासम्बन्ध संयोगत्वोपाधिरिति तत्रोपकार सम्बन्धेन तस्यावच्छिद्यते। यत्परतन्त्र संयोग तेनोपाधिना सम्बन्धानुगृहीतेनावच्छिद्यत इति पारतन्त्र्यं नाम सम्बन्धसामान्यरूपमस्यान्वायि न तु तदेकजीवित पारतन्त्र्यम्। अस्य गुणकर्मसामान्यादावपि भावादस्य च द्रव्यैकनियतत्वात्। किं च संयोगस्य गुणत्वात्सत्तासम्बन्धो गुणत्वसंयोगित्व सम्बन्धश्च, न पदार्थसम्बन्धस्य सर्वपदार्थसम्बन्धाद्यधर्मस्य सर्वपदार्थोपकारस्य तद्योगो द्रव्यगुणकर्मभ्यो ऽन्यत्वाद्भूतकार्यकारित्व च संयोगस्य । योजनाभावहेतुस्तु सम्बन्ध इति भेद ॥ ७ ॥

समवायादपि सम्बन्धस्य भेदे नियतोपाधिनियमितसमवायं स्वरूपानुवादेनाह ॥

निरात्मकानामुत्पत्तौ नियमः क चिदेव यः ।
तेनैवाव्यपवर्गश्च प्राप्त्यभेदे स यत्कृतः ॥ ८ ॥
आत्मान्तरस्य येनात्मा तदात्मेवावधार्यते ।
यतश्चैकस्य नानात्व तत्त्वं नाध्यवसीयते ॥ ९ ॥
तां शक्तिं समवायाख्या शक्तीनामुपकारिणीम् ।
भेदाभेदातिक्रान्तामन्यथैव व्यवस्थिताम् ॥ १० ॥
धर्मः सर्वपदार्थानामतीतः सर्वलक्षणः ।
अनुगृह्णाति सम्बन्ध इति पूर्वेभ्य आगमः ॥ ११ ॥

सत्कार्यवादे कारणमेवकार्यं भवतीति प्रतिनियतैः शब्दैस्तज्ज-न्यत इति तत्रैव तदुपलम्भो युक्त । असत्कार्यवादे तु नियतेष्वेव कारणेषु कार्यं, तन्तुष्वेव पट, कपालेष्वेव घट इत्यादिबुद्धिहेतु स-मवायो ऽभ्युपगन्तव्य. । सत्यपि च भेदे कार्यकारणयोस्तेनैव नियम-विषयेण कारणेनैव कार्यस्याविर्भावो, देशकालभेदात्प्राप्ते सम्बन्ध-रूपताया सयोगेन महाविशेषो ऽपि समवायकृत. । तथा च सयो-गात्समवायस्य भेद । अत एव च कार्यकारणयोरवयवावयविनोर्धर्म-धर्मिणोश्चैकत्व केचिदिच्छन्ति केचिन्नानात्वमिति समवायव्यामोहा-दपि परमार्थतो न व्यवतिष्ठते । अनेनायुतसिद्धि समवायस्योपाधिरुक्त । एव मयुतसिद्धानामिह प्रत्ययहेतु समवायो नान्येषामित्यय नि-यम सम्बन्धेन समवायस्यावेद्यते । यत्रैव हि पारतन्त्र्यस्य तत्रैव बु-द्धिर्भेदामच्च प्रकल्पयति । द्रव्यगुणकर्मसामान्येषु शक्तयो ऽपि वा-धारपारतन्त्र्येण न नियम्यन्ते । समवायिष्वेव च समवायस्यापि भेद, तेभ्यो नावधार्यते । समूर्छितरूपत्वेनावभासात् । इह प्रत्ययकार्यवशा-त्त्वनुमितमस्त्वन सर्वान्यव्यतिरेकेणैत्येव परप्रसिद्धम् । येनेति समवा-यमनूद्य तां शक्तिमिति शक्तित्वमस्य विधत्ते । अनुग्राहकत्वेन पदाना-मस्य तैस्तुल्यकक्षतया निर्देशानुपपत्तिरित्यर्थ. । शक्तित्वादेव च भे-दाभेदावतिक्रान्तत्वम् । तत्त्वान्यत्वाभ्यामनिर्वाच्या हि शक्तय । तथोक्तं "शक्तीनां वस्तुरूपत्वे तत्त्वान्यत्वविचारणा । युज्यते कल्पितानां तु युक्ताङ्गयविकल्पितेति "तथा हि समवायिसम्मूर्छितत्वेनावभासाच्च तता भिन्नाप्यभिन्ना । आश्रयासमवायिसम्भविन कार्यस्येह प्रत्ययलक्ष-णस्य जननादिति तत्त्वान्यत्वाभ्यामनिर्वाच्यता । अतश्चान्यथैव पदा-र्थानैलक्षण्येनेयमवस्थिता । यदि चेह प्रत्ययस्याभेदात्स्वतो ऽभिन्ना त स्यैव तु समवायिप्रकल्पितभेदत्वाद्भिन्नेत्येवमेकापि सती सम्ब-न्धनानात्वात्कल्पितभेदे ऽन्वयान्यथानवस्थिता साधनादिशक्तीनां चेयमवोपस्थाने योपकारिणी । तदेवभूतानामपि समवायाख्यां श-क्तिं सर्वपदार्थगतस्वाधीनत्वलक्षणी धर्ममतिक्रान्तो नित्यपारतन्त्र्य-लक्षणतयैवोपकारापेक्षत्व सर्ववस्तुलक्षणं ज्ञापकमस्य न समवा-यस्यैव प्रतिनियतसम्बन्धिरूपमेवेत्येकं रूपमम्बन्धो ऽनुगृह्णाति । नि-यमितपरतन्त्रे एवायुतसिद्ध वस्थापयति पारतन्त्र्यसामान्यात् व्यप-देश च निवेदयतीत्यागमज्ञा. । सम्बन्धलक्षण पारतन्त्र्यमाह । एवं वि-

धकार्यकारी सम्बन्धो नाम पदार्थलक्षण इत्यागमेन दृढयति ॥ ११॥ एव च कृत्वा सयागसमवायाविव नेह सम्बन्धो यथान्येषा च दर्शनमित्याह ॥

अपदार्थीकृत एवान्यैः सर्वत्राभ्युपगम्यते ।
सम्बन्धस्तेन शब्दार्थः प्रविभक्तु न शक्यते ॥ १२ ॥

षट्पदार्थवादिभिर्वैशेषिकैर्गुणपदार्थे संयोग प्रक्षिप्त । समवायस्तु स्वतन्त्र पदार्थ इत्युक्तेन नयेन पारतन्त्र्याच्छक्तिरूपो ऽप्यर्थो ऽपि पदार्थ कृत एव तद्रूपसमारोपासम्बन्ध । नचहास्य शब्दस्यायमर्थ इत्यतिनियमेन प्रतिभाग शब्दार्थयो. सो ऽभ्युपगन्तु पार्यत इति तद्व्यतिरिक्तस्तयोरस्ति सम्बन्ध इत्यव्याप्तिपदार्थसंग्रह वैशेषिकाणाम् । तथा हि । समवायात्स्व आधार. सा च जाति. प्रतीयते। एकार्थसमवायात्तु गुणाः स्वाधार एवते । य वा ऽऽकाशगगनादय शब्दा स्वार्थमाकाशाख्यं तत्र समवायात्प्रतिपादयन्ति स्वसमवेतां जातिं स्वरूपलक्षणां सर्वे शब्दा समवायसम्बन्धात्प्रत्याययन्ति तस्याः शब्दव्यक्तिषु समवायात् । ये त्वाकाशगुणा महत्त्वादय. तानेकार्थसमवायाच्छब्दा प्रत्यापयन्ति, महत्त्वादिशब्दानामसाधारणानां महत्त्वादिविशेषगुणानां वाकाशे एकत्र समवायात् । एवं शब्दव्यक्तिलक्षणा गर्जितकूजितरणितहंसितादयो गगनस्यासाधारणाः तदभिधायका अपि गर्जितादय. शब्दा. तदेकार्थसमवायादेव ॥ १२ ॥

तथा ॥

द्रव्यत्वसत्तासंयोगाः स्वाधारोपनिबन्धनाः ।
तत्प्रदेशविभागश्च गुणा द्वित्वादयश्च ये ॥१३॥

द्रव्यत्वमपरसामान्यमेकार्थसमवायाद् द्रव्यत्वादिशब्दैः प्रत्याय्येत । सत्ता द्रव्यत्वे हि द्रव्यत्वादिशब्दस्य य.स्व आधार आकाशः तत्रान्यत्र पृथिव्यादौ वर्तेत इति स्वान्याधाराभ्यामुपवर्ण्येते स्वात्मनि नियम्येते । तथा च स्वान्याधारवर्तिनी, स्वाश्रयपरिसमाप्तत्वात्सामान्यानामाश्रयान्तरसमवाये ऽप्येकैकत्र समवायाविरोधात्तथा चाकाशेन पदार्थान्तराणां ये प्रदेशशब्दे त्रयः सयोगविभागद्वित्वपृथक्त्वादयश्च ते ऽपि सयोगादिशब्दैरेकार्थसमवायादेव प्रमाप्यन्ते द्विष्ठत्वात्, सयोगादीनामाकाशे ऽपि समवायात् । तथा ।

"के चित्स्वाश्रयसंयुक्ता केचिच्च समवायिन । संयुक्तसमवेतेषु समवेतास्तथा परे" । स्व शब्दानामाश्रय आकाश. तेन संयुक्ता रथघटादयो रथघटादिशब्दैः समवेतसयोगात्प्रत्याय्यन्तेघटादिसमवेतरूपादिसमवेतास्तु रूपत्वादयो रूपादयो गुणा उत्क्षेपणादयश्च कर्मविशेषा स्वाश्रयसयुक्तसमवायाद्रूपादिशब्दै प्रत्याय्यन्तेघटादिसमवेतरूपादि. समवेतास्तु रूपत्वादयो रूपत्वादिशब्दै. स्वाश्रयसयुक्तसमवेतसमवायादभिधीयन्ते ॥ १ ॥

तथा ॥

स्वाश्रयेण तु संयुक्तै संयुक्तं विभु गम्यते ।
समवायस्य सम्बन्धो नापरस्तत्र दृश्यते ॥१३॥

दिक्कालात्मनां विभुत्वमाकाशेन सहाप्राप्तिपूर्विकाया प्राप्तेरसम्भवात्साक्षात्सम्बन्धाभावाद्दिक्कालादिशब्दै.स्वाश्रयसयुक्तसयोगात्ते प्रत्याय्यन्ते। आकाशेन हि संयुक्ता पृथिव्यादय.। ते सयुक्ता हि दिक्कालात्मानः। एव पूर्वानुसारेण विभुद्रव्यसमवेता गुणा तत्समवेताश्च सामान्यविशेषा स्वशब्दै स्वाश्रयसयुक्तसमवायात्स्वाश्रयसंयुक्तसमवेतस्य स्वाश्रयसयुक्तसमवायात्स्वशब्देनाभिधानम्।आकाशसमवेतस्य वेदार्थसमवायाद्दिक्कालात्मसमवेतस्य स्वाश्रयसयुक्तसमवायापेक्षया प्रतीतिरुक्ता । एवमत्र यथायोग विभजने ऽपि समवायशब्दस्य स्वार्थस्य प्रतिपादनेन क चित्सम्बन्ध स्यात्समवायस्याद्रव्यत्वात् केन चित्सयोगाभावात्स्वरूपवृत्तित्वात् समवायान्तराभावाच्च स्यादेतत्समवायशब्द आकाशे समवेतो घटादयश्चाकाशेन सयुक्तास्तेषु च समवायास्थितिरिति स्वाश्रयसयुक्तसम्बन्धात्तमभिधास्यति । नैतद्युक्तम् । समवायान्तराभावात्समवायस्य घटादिषु कालकल्पना न युज्यते ॥ १३ ॥

तथा हि ॥

सम्बन्धस्याविशिष्टत्वान्न चात्र नियमो भवेत् ।
तस्माच्छब्दार्थयोर्नैव सम्बन्धः परिकल्पते ॥ १४ ॥

यदा ऽयमर्थो विशिष्टसम्बन्धस्याभावादिति तदा तस्य सम्बन्धस्याविशिष्टत्वात्सर्वमर्थं प्रत्यापयेत् । यदा तु सम्बन्धस्याविशिष्टत्वात्तुल्यत्वादनेन साधारणत्वादित्यर्थस्तदेयं व्याख्या।आकाशशब्देन

समवायात्स्वाश्रयाभिधाने घटादयो ऽपि शब्दा गगनाभिधायिनः स्यु, आकाशसमवायस्याविशेषात् । एवं स्वसमवेतजात्यभिधाने शब्दस्य गुणत्व सत्ता च प्रतिपाद्या स्यात्। घटादिशब्दैश्च स्वाश्रयसंयोगाविशेषाद् घटादयो ऽपि प्रत्याय्येरन्निति समव्याप्त्यभिव्याप्तिभ्यां व्यवस्था शब्दार्थसम्बन्धे विशीर्यते यतः, तस्मात्संयोगसमवायरूपतया नात्र सम्बन्धपदार्थपरिकल्पनम् ॥ १७ ॥

प्रौढवादितया वैशेषिकदर्शने समर्थयितुमेतदाह ॥

अदृष्टवृत्तिलाभेन यथा संयोग आत्मनः ।
क चित्स्वस्वामियोगाख्यो भेदे ऽन्यत्रापि सङ्क्रमः॥१८॥

व्यापकस्यात्मनः सर्वद्रव्यै. संयोगस्याविशेषे ऽपि धर्माधर्मवशाच्छरीरादावेव स्वस्वामिभावलक्षणा सम्बन्धो यथा, एवमिहाप्यविशिष्टस्यापि स्वाश्रयसमवाये स्वाश्रयसंयोगे चादृष्टवशादेव प्रतिनियतः शब्दार्थो व्यवस्थास्यतीत्यतिव्याप्त्यभाव. । अदृष्टस्य धर्माधर्मलक्षणस्यात्मगुणस्य वृत्ति. फलदान प्रति व्यापार, तस्या लाभो देशकालादिसहकारिवशात्प्राप्ति. । तुच्छो ऽयं परिहारो हेयत्वादस्य पक्षस्याभिहित । भोगस्य स्वसुखदु.खसाधनभूतस्य युक्तं कर्माक्षिप्तत्वं,न तु सर्वस्य तथा भावो युक्त । अथ शब्देनार्थप्रतिपादननियमे सति, तस्य भोगत्वमित्येतदपि कर्माक्षिप्तमेवेत्युच्यते, तदा सर्वस्य जगत तथाभावाददृष्टहेतुप्रत्याख्यानं सर्वत्रायातम् । अथायमत्राशय । यथा संयोगे संयोगे समान ऽपि न सर्वस्यात्मन , नापि सर्वेषामात्मनां प्रत्यात्मगता, दृष्टनियमात्तथा सम्बन्धाभेदे ऽपि न सर्वं सर्ववाच्यम्, प्रयोगदर्शनाभ्यासजसंस्कारपारतन्त्र्यादिति तदा सर्वं एव प्रतिनियतविषयः प्रयोगदर्शनाभ्यासात्सङ्केतादवसीयमानस्वरूप संस्कारो योग्यतारूप. सम्बन्धो ऽस्तु, किमन्येन निबन्धनेन संयोगसमवायलक्षणेन नान्तरीयकेण कृत्यम् ॥ १८ ॥

समवायस्य त्ववाच्यत्वमेवाभ्युपैति ॥

प्राप्तिं तु समवायाख्यां वाच्यधर्मातिवर्त्तिनीम् ।
प्रयोक्ता प्रतिपत्ता वा न शब्दैरनुगच्छति ॥ १९ ॥

शब्दप्रतिपाद्यानां वाच्यानां गवादीनामर्थानां धर्मसंसर्गिरूपा-

च्छुरितत्वं, निरुपाधीनां शब्दविषयतायोगात् । समवायस्तु, निरुपाधिर्न हि तस्य गुणाः सामान्यादिश्च कश्चिदुपाधिः परैरङ्गीक्रियत इति वाच्यधर्ममतिक्रान्तः । तथेद तदिति प्रत्यवमर्शयोग्यत्वं वाच्यधर्ममतिक्रान्त ।नित्यपरतन्त्ररूपत्वाच्चासौ समवायशब्दादपि अवधार्यते प्रयोक्तृप्रतिपत्तृभ्यामिति न तत्स्वरूपनिवेशिसंविज्ञानं पदं किं चनास्ति । एवं भावतो ऽयं,सम्बन्धिरूपतया तु स्वतन्त्रः समवायशब्दादवगम्यते। तथा च धर्मितया प्रतीते धर्मान्तरयोगसहत्वादस्त्येव स्वाश्रयसंयोग., तदभिधानसमवायशब्दस्य सम्बन्ध इति न कश्चिद्दोष. । अर्थान्तरे समानादौ च प्रयोगदर्शनात्समवायशब्दो नाम साधारणं संविज्ञानपदमस्य। लौकिकं किं तर्हि वैशेषिकसमवाय एव रूढम । वाच्यमर्थं प्रयोक्ता विवक्षितत्वायोग्यं शब्दं प्रयुङ्क्ते। समवायस्य तु पारतन्त्र्यात्मनो वाच्यत्वाभावात्प्रयोक्तुर्यो ऽयं शब्दोदाहारे व्यापाराभावः तदभावात् प्रतिपत्तापि न तत्र कश्चिदित्युभयोपादानम् ॥ १९ ॥

अत्रावाच्यत्वे समवायस्योक्ते तथापि को वा कं छलमुद्भावयति॥

अवाच्यमिति यद्वाच्यं तदवाच्यतया यदा ।
वाच्यमित्यवसीयेत वाच्यमेव तदा भवेत् ॥ २० ॥

अवाच्यमित्यनेन शब्देन यद्वाच्यं वक्तुमभिप्रेतं तद्यदैवावाच्यतया अवाच्यशब्दे वाच्यं व्यवहर्त्तव्यं इति प्रतीयते तदैव वाच्यं भवति प्रतिपादनकाले एव वाच्यतामुपैति इत्यर्थ. । तथा च वाच्यमित्युक्ते ऽवाच्यशब्दस्यैव वाच्यमित्यवाच्यत्व विरुध्यते ॥ २० ॥

अथाप्यवाच्यमित्येवं न तद्वाच्यं प्रतीयते ।
विवक्षितास्य यावस्था सेयं नाध्यवसीयते ॥ २१ ॥

अवाच्यशब्दस्याप्यवाच्यत्वे प्रतिपिपादयिषितं शब्दानभिधेयत्वं समवायस्य न, गम्यते त्वस्य वाच्यत्व एव तथा च विरोध इत्यर्थः॥२१॥

अथ पारतन्त्र्यात्मना वाच्यो न सर्वथेत्याशङ्क्याह ।

अथान्यथा सर्वथा च यस्यावाच्यत्वमुच्यते ।
तत्रापि नैव सावस्था तैः शब्दैः प्रतिषिध्यते ॥२२॥

पारतन्त्र्यात्मना न वाच्य इत्यपि प्रकारप्रतिषेधे प्रकारवत

एव प्रतिषेधः कृतो भवति। न हि तेनान्येनान्येन सर्वेण वा प्रकारेणावाच्य इति प्रकारमात्रस्यावस्थालक्षणस्यैते. शब्दै. प्रतिषेधः। धर्म्यप्रतिषेधे तदाश्रितधर्मप्रतिषेधानुपपत्तेः। तस्माद्विशिष्टनिषेधे ऽपि प्रतिषिद्धमेव वाच्यत्वं समवायस्येति कथमवाच्यशब्दस्यायं वाच्यः स्यादिति चोद्यमेव यदि वा, तथा ऽपीहान्यथेत्यादिना निषेधे ऽपि तथैवावस्था निषेद्धुं शक्या यावदवस्था ता न निषिध्यत इति नान्तरीयको ऽस्य निषेधः। शब्दविषयतात्यवमर्शमन्तरेणाकारविशेषः प्रतिषेद्धुं न शक्यत इति शब्दविषयत्वेन तस्य वाच्यत्वोपपत्तेरवाच्यत्वेन न विरोध इति ॥ २२ ॥

पूर्वं व्याचक्षते अस्य वक्तुरभिप्रेतादर्थादर्थान्तराध्यारोपेण वाक्यच्छलस्योत्तरं वक्तुमेतत्सदृशं निदर्शनमाह ॥

न हि सशयरूपे ऽर्थे शेषत्वेन व्यवस्थिते ।
अव्युदासे स्वरूपस्य संशयो ऽन्यः प्रवर्त्तते ॥ २३ ॥

समानधर्मोपलम्भाद्विशेषानवधारणात् विशेषस्य तेष्वर्थेषु संशयिते स्थाण्वादौ स्थाणुर्वा स्यात्पुरुषो वेति, यदिदं संशयज्ञानं न जायते तत्र संशयरूपे ज्ञाने सशयिते ऽर्थे स्वविषये शेषत्वेन तद्विषयव्यवस्थापनाङ्गत्वेन स्थितम्। तदुपरि तदैवान्यसंशयज्ञानं नोत्पद्यते, अस्यार्थपरतन्त्रस्यापरित्यक्तपारतन्त्र्यस्वरूपस्य स्वविषयविज्ञानं प्रति विषयभावोपगमविरोधाद्यदि हि स्वविषयस्य संशयरूपस्य ज्ञानस्येदं विषयाभावमुपेयात्, तदा स्वरूपेणैव सन्दिग्धत्वादलब्धप्रतिष्ठः स्वस्मिन्यो ह्यविनश्यँ स्वभावे स संशयात्मनि स्वरूपे नावतिष्ठते। तथा च बाह्यार्थस्य प्रडोलायमानत्वान्न परिच्छेद्यते, युगपद्विषयविषयिभावस्यानुपपत्तेः। नैव चार्थप्रवृत्तेन संशयेन विषयवस्तुरूपस्यापि सशय्यमानतायोगो व्यापारस्यैकत्वात्। तदेवं यथासंशयमात्मरूपं वर्जयत् विषयं सन्देहयति तथा अवाच्यशब्द आत्मानं वर्जयत् विषयीकृतं वाचयतीति साधर्म्यसंशयरूपे ऽर्थे सशयाभिधाने स ज्ञानवस्तुनि वेत्यर्थ., शेषत्वेन व्यवस्थितिरर्थावस्तुविषया ॥ २३ ॥

उदाहरणान्तरमप्याह ॥

यदा च निर्णयज्ञाने निर्णयत्वेन निर्णयः ।

प्रक्रम्यते तदा ज्ञानं स्वधर्मेणावतिष्ठते ॥ २४ ॥

विशेषावधारणरूपे निर्णीयमानार्थस्य विषये निर्णयज्ञाने तदैवार्थपरिच्छेदे व्यापृते अपरस्वगतो निर्णयो न प्रवर्त्तते। ज्ञानस्य ह्यर्थपारतन्त्र्य धर्म। ततस्तु निष्कृष्टस्वरूपविचारे स्वधर्माद्विप्रकृष्येत स्वातन्त्र्येण विषय एव। अत एव ज्ञानान्तरग्राह्यत्वं न भवतीति घटज्ञानमिति प्रागेव प्रतिपादितम्। ज्ञानान्तरविषयित्वत्यागात्स्वधर्मस्याहानि। तदेवमन्यत्र व्यापृतस्य तदैव स्वविषयव्यापाराभावाद्यथा ज्ञानस्य ज्ञेयत्वं नास्त्येकस्यां संवित्तौ तथा वाचकस्य वाच्यत्वं नास्तीत्यवाच्यशब्द. प्रतिपादनावस्थो नात्मन एव वाच्यतामर्थस्य निषेधति, स्वात्मनि क्रियाविरोधात्। न च शब्दान्तरं तदानीं तद्वाच्यतानिषेधकमस्तीत्यवाच्यशब्दस्याभिधाविषयभाव अत्रोपपन्न इत्यर्थः। तथा हि शब्दान्तरस्य समवायशब्दस्य समवायस्वरूपेण वाच्य इत्येतद्वक्तुर्विवक्षितं प्रतीयत एव ॥ २४ ॥

तद्यथा ॥

सर्वं मिथ्या ब्रवीमीति नैतद्वाक्यं विवक्ष्यते।
तस्य मिथ्याभिधाने हि प्रक्रान्तो ऽर्थो न गम्यते ॥ २५ ॥

स्ववाक्यानामसत्यार्थताप्रतिपादनाय सर्वमहं मिथ्या ब्रवीमीत्युक्ते ऽस्यापि वाक्यत्वान्मिथ्याभिधाने व्यर्थता न प्रसञ्जनीया। एवं हि प्रक्रान्त विवक्षितस्ववाक्यान्तराणि मिथ्यात्वं न प्रतीयेरन्। अथ सत्यमपि मिथ्यार्थप्रतिपादकत्वे सत्यवाक्यस्य, वाक्यान्तराणामपि तथैव स्यादिति तेषां मिथ्यार्थप्रतिपादनै प्रक्रान्त मफलमित्यपरो ऽत्रार्थ ॥ २५ ॥

अत्रैव युक्तिमाह ॥

न च वाचकरूपेण प्रवृत्तस्यास्ति वाच्यता।
प्रतिपाद्यं न तत्तत्र येनान्यत्प्रतिपाद्यते ॥ २६ ॥

करणसन्निवेशिनस्तदैवाभिधेयान्ता विरुद्धा अन्यप्रतिपादनप्रवृत्तस्य तदेव प्रत्युदाहृत्यात्मनि व्यापाराभावात्। वस्तुस्वभावो ऽयं यत्कर्तृशक्तियुक्तं न तत्कर्मशक्तेरधिकरण तदैव भवति, स्वातन्त्र्यपारतन्त्र्ये व्यापारे एकत्रैकदा विरोधादित्यर्थ.। प्रतिपाद्यं न तत्त

श्रेत्यादिना सर्वदर्शनसाध्यमन्ते निगमितत्वाद्यन्प्रतिपादकं न तत्प्रतिपाद्यम् । यथा सशयज्ञानं वा प्रतिपादकवाभिधानमतो नैतत्प्रतिपाद्यमिति प्रयोग ॥ २६ ॥

ननु मा भूद्वाचकावाच्यं विरोधादात्मकर्तृकसामान्यानुप्रवेशत्वस्य मिथ्यात्मता केन वार्यते इत्येतदाशङ्क्यैतदेव निदर्शनान्तरेणोपपादयति ॥

अमाधिका प्रतिज्ञेति नेयमेवाभिधीयते ।
यथा तथा ऽस्य धर्मो ऽपि नैव कश्चित्प्रतीयते ॥ २७ ॥
व्यापारस्यापरो यस्मान्न व्यापारो ऽस्ति कश्चन ।
विरोधमनवस्था वा तस्मात्सर्वत्र नाश्रयेत् ॥ २८ ॥

साध्यनिर्देश. प्रतिज्ञा साधनाङ्गं न भवतीत्युक्ते नेयमेव सौगतस्य प्रतिज्ञान्वाविशेषात्तथा भवति, अनर्थकत्वे विवक्षितार्थासिद्धे । अपि त्वेतद्वर्जप्रतिज्ञान्तराणां सत्ता। एव सर्वं मिथ्या ब्रवीमीत्यस्यायथार्थताप्रतिपादने यो व्यापारो ऽभिधालक्षण', तस्यान्यो व्यापार , स्वविषयस्तदानीमेव नास्ति येनैकेन व्यापारेण शब्दान्तराभिधेयतां निषेधन्यपरेणान्यतो ऽप्यभिधेयतामिन्यवाच्यशब्दस्याप्यसावर्थो न वाच्य. स्यादिति विवक्षितं शब्दान्तराणामवाच्यत्व प्रतीयेतेति विरोध' स्यात्तन्निमित्ते व्यापारान्तरानुगमे वा ऽनवस्था स्यात् । तथा हि, यद्यवाच्यशब्दस्यापि विषयभावनिषेधाद्व्यापारान्तर सम्भवेत्, तदा तस्यापि व्यापारान्तरस्य स्वविषये प्रवृत्तिनिषेधाय व्यापारान्तर तदेवेत्यवश्याना्द्प्रतिपत्ति स्यादित्यर्थः । व्यापारान्तर्भावात्तु नैष प्रसङ्ग. सर्वत्रेति । तन्न केवलं वाच्यतायामेव, अपि तु सम्बन्धिभ्यां सहान्वस्य सम्बन्धस्याभावे तयोरपि सम्बन्धिनो. शब्दार्थयोः सम्बन्धो मा भूत् । न सम्बन्धान्तराकल्पने वानवस्थेत्येषानवस्था भासयितव्या । सम्बन्धस्य स्वयं सम्बन्धरूपत्वाद्न्यस्यापि दोषस्यायोगादित्यर्थ. । अथ वा सर्वत्रेति । सर्वमिद मिथ्याब्रवीमीत्यसाधिका प्रतिज्ञेत्यादावित्यर्थ. । तदेवं परप्रसिद्धसंयोगसमवायलक्षणसम्बन्धाश्रयेण शब्दार्थप्रविभागे ऽतिव्याप्तिरदृष्टवशात्परिहृता अव्याप्तिरपि । साक्षात्समवायस्यावाच्यत्वे विकल्पितेन रूपेण सम्बन्धितया वाच्यत्वेन तटस्थस्य समवायशब्देनामुखीकृतस्य समवा-

यस्यावाच्यत्वाविधाने विरोधीभावादिति प्रौढवादितया शास्त्रान्तर-सिद्धसम्बन्धाश्रयेणापि शब्दार्थनियमो व्यवस्थापित. ॥ २७ ॥ २८ ॥

इदानीं स्वनिकायसिद्ध सबन्धमुपपादयितुमाह ॥

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥ २९ ॥

समवायादिनिमित्तानपेक्षयैवोच्चरितमात्राच्छब्दादर्थप्रत्ययोत्पत्तेरकृत्रिमा शक्तिरवसीयते । अर्थभङ्गित्वेन हि शब्दमात्रस्यापि योगमप्रवृत्तसत्ता अपि प्रतिपद्यन्ते । तथा योग्यता स्वाभाविकी सिद्धा, सङ्केतास्तु तामेव द्योतयन्ति । नह्यथा चक्षुरादीनां रूपादिविषये पुरुषप्रयत्नानपेक्षा ग्राहकता । न हि यत्नेनापि रूपे रसननिवेश' शक्यक्रिय. । एव गवार्थे घटशब्दनिवेशो ऽसाधु. । तथा हि भाष्यकृतो हि गामश्व इति ब्रूयान्न जातु चित्सम्प्रत्ययः स्यादिति । यथारुचि सङ्केते हि न वाचकशक्तिपुर सरीकारेणान्यविषये शब्दाः प्रवर्त्तन्ते । प्रसिद्धा अपि समयमात्र तत् । सज्ञाशब्दानां तु सर्वसंज्ञिप्रत्यापनशक्तियुक्तत्वे ऽपि विशिष्टे संज्ञिनि शक्तयवच्छेदः सामयिकः । इयं च योग्यता शब्दानामर्थप्रतीत्यनुसारेणैव व्यवस्थापयितव्ये अभेदे,न शब्दार्थयो. प्रत्यवादध्यासफले वावस्थितेति स एव मुख्यसम्बन्ध. । अत एव प्रतीतावर्थस्यापि विषयभावेनापेक्षणात्पारन्तर्यसामान्यात्सम्बन्ध इति व्यपदिश्यते । यद्यपि चेन्द्रियाणि कारकत्वादज्ञातान्येव ज्ञान जनयन्ति, शब्दस्तु ज्ञापकत्वात्स्वज्ञानेनान्यधीहेतु , तथा ऽपि पुरुषप्रयत्नानपेक्षा शक्तिः साधारणीति साम्यम् ॥ २६ ॥

इहार्थगत्यर्थं शब्दप्रयोगः । साधीयश्चार्थगतिरपशब्देभ्य इति तेषामपि सम्बन्धो ऽर्थेन प्रसक्त इत्याशङ्क्याह ॥

असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।
वाचकत्वाविशेषे वा नियमः पुण्यपापयोः ॥ ३० ॥

पुण्यपापयोः । विवागशक्तव्यक्तीनां बालवदन्धादिवदनुमिता कृतिर्विदुषां वाचिका । न हि विद्वांसो ऽर्थमपशब्दात्साक्षादेव पश्यन्तीति नापशब्दानामर्थेन कश्चित्सम्बन्धःअत एव हि पुरा कल्पे ऽसुरादिभिरिव शब्दैरपि रक्षितासीदिति ब्रह्मकाण्डे उक्तम्।अवाचका-

एवापभ्रंशा'। ते तु सादृश्यात् साधुशब्दमनुमापयन्ति। तेभ्यो ऽर्थसम्प्रत्यय इति। तथा च सग्रहकारक शब्दप्रकृतिरपभ्रंश इति। अथ त्वे त्वधर्मबाहुल्यादनृतादिवद् बालानां रूढि। तथा चावाच्यावधानेनैवापशब्देभ्यो ऽर्थप्रतीतौ न म्लेच्छितवै नापभाषितवै साधुभिर्भाषितव्यमिति शास्त्रप्रामाण्यात्साधूनामेव धर्मोङ्गत्वमिति तदनुरुध्यति शास्त्रेण। तथा च भेदस्याभेदपूर्वकत्वात्पुरुषविकल्पो नियमेनान्तस्त्वादपशब्दानामभिन्नसाधुशब्दपूर्वकत्वमेव निश्चीयत इति शब्दप्रकृतिरपशब्द. सिद्ध इति शब्द एव विद्या। तदेवम्। यथा विद्यावस्था भिन्नब्रह्मात्मिका तथा साधुशब्दावस्था विद्या। यथा वा विद्याया भेदो वितथ, तथा ऽपभ्रंशावस्था वाप्यलरूपेति परमार्थत इति तदितरापेक्षो विकल्प.। अविद्यादशापेक्षमेव च समानायामर्थगतौ शब्देन चेति भाष्यम्। अर्थगताविति वचनात्। अर्थाभिधानमिति शब्दानामेव कर्मपतित (?) विद्यायां भूयसा ऽपशब्दै व्यवहारादर्थप्रतीतिमात्रं भवत्येवेत्यर्थ.। रूढत्वात्तु व्यवहारस्याविशेषं ग्रन्थकार आह। तत्र च शास्त्रं नियामक साधुशब्दैरेवार्थो वक्तव्यो नापशब्दैरेवं क्रियमाणमभ्युदयकारि भवतीति।पुण्यपापयो, पुण्य पापानिमित्तम्। नियम. क्रियते। साधूनामज्ञानाच्छास्त्रपूर्वकत्वात्प्रयोगाभ्युदय इति। असाधुप्रयोगे तु धर्माभाव एव पापत्वेनोपचर्यते। न म्लेच्छितवै इत्येतस्य निषेधस्यापि क्रमात्पापत्वमेव के चिदिच्छन्ति ॥ ३० ॥

समवाये सम्बन्धान्तराभाव. पूर्वमुक्त. अस्मिंस्तु दर्शने स न प्रसजतीत्याह ॥

सम्बन्धशब्दे सम्बन्धो योग्यतां प्रति योग्यता

सम्बन्धशब्दो योग्यतालक्षणं सम्बन्धं योग्यतयैव प्रतिपादयति। एवं समवायशब्दो ऽपि योग्यतयैवानादिसिद्धया स्वार्थप्रतिपादकः।तथा योग्यता सिद्धापीति सर्वत्रास्य सम्बन्धस्य व्याप्ति. ॥

सङ्केतस्य तर्हि नोपयोग इत्याह ॥

समयाद् योग्यता सम्बन्धमातापुत्रादियोगवत् ॥ ३१ ॥

अनादिसिद्धार्थविषयव्यापारस्य शब्दस्य वृद्धव्यवहारस्य परम्परापरपर्यायात्समयात्स्वाभाविक्येव योग्यता निश्चीयते न तु स-

मयमात्रादतथाभूते तथाभाव. समुचित. । न ह्रीयमस्य पुत्रस्य मातेति जन्यजनकभाव सामयिको वस्तुसिद्धस्यैव प्रतिपादनात् । अथ प्रत्यक्षपूर्वकं संज्ञाकर्मत्यस्मद्विशिष्टानामर्थे शब्दनियोगः सामयिक एव । नैतत् । तैरपि योग्यतानुसारेण पूर्वाभ्यासाद्यनिवेशात् । तदुक्तम् । अन्यगत. साभ्यास. समय कैश्चिदिष्यत इति । किं भवानाहेति वार्थमत्राविनाभावमवगम्य विशेषप्रज्ञादवधार्यते । कैश्चिदिति नकेनापि प्रतिशब्दस्य योग्यता पुरुषेणान्यत्र सङ्केतेपि प्रकृढेऽर्थे गवादिशब्दादिति प्रतिपत्ति. । न च पुरुषे नियोग. शक्यक्रिय इति वक्ष्यति ॥ ३१ ॥

इदानीं कार्यकारणभावं शब्दार्थयो. सम्बन्धमाह ॥

शब्दः कारणमर्थस्य स हि तेनोपजन्यते ।
तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते ॥ ३२ ॥

श्रोतृबुद्धयुपारूढस्यार्थस्य शब्द. कारण जनकत्वात् । शब्दार्थो ह्यर्थो बहीरूपतया ऽवस्थीयमान । तथा चान्यद्वक्तृबुद्धिनिवेशितो ऽर्थत्वात्कारणभूताच्छब्द श्रुतिविषयमनुप्राप्त प्रतीयते इत्यर्थो ऽपि शब्दकारण एवोभयथा कार्यकारणभाववर्णसाधुतादिवैलक्षण्येन शब्दार्थयोरभेदेन सम्बन्धो ऽव्यासलक्षण' प्रतिपादितो भवति। यथा हि बुद्धौ शब्दार्थयो पूर्वमभेदेनावस्थानम्न हि विवक्षितो ऽर्थः शब्दसम्भेदशून्य सङ्कल्परूपस्य तस्य प्रतिभानादनादिशब्दभावनमनु विद्यते हि निरभ्यासमपि च ज्ञानमाश्रत एव स्वानकरणव्यापारादिभिर्व्यक्तो ऽर्थरूप शब्द इति शब्दश्रोतृभिरवधारित, तथैव स्वरूपाच्छुरणयार्थमेव गमयति । प्रतिपाद्यप्रतिपादकयोर्हि परस्पराभिप्रायसंक्रान्तिर्व्यवहार इति अन्त स्थितमर्थ मूलावस्थायामप्यपरित्यक्तं वक्तृबुद्धिसमाविष्टं श्रोतृनर्पयति। शब्दश्रोतापि च तथैव स्वाभाविकानुसारेण प्रतिपद्यते समाविष्टभावन, तेन चोद्बोधितशब्दभावन. प्रवर्त्तत इति निर्णीतं वाक्यपदीये। एतदेवमेकीभावपक्षीभाव एवैकवाक्यतया सम्बन्ध. स्थित. सिद्धान्तानुगुण ।यथाविवक्षं च शब्दार्थमवगमयति नियतस्वरवर्णानुपूर्वीक इति स्वरविपर्ययविवक्षान्तरमिदं शब्दशब्देन मन्तव्यम् । परस्परभेदेनान्यत्वादस्य कारणमेव गमयति शब्द इत्यन्तरा विवक्षान्तरं लाघवादस्फुटप्रतिभासम् । प्रथमवर्णोच्चारणान-

न्तर द्वितीयवर्णोच्चारणवदनुमीयते ॥ ३२ ॥

ननु बुद्धयुपाकृढे शब्दार्थे कथमोदन भुङ्क्ते इत्यादिव्यवहार इत्याशङ्क्याह ॥

भोजनाद्यभिमन्यन्ते बुद्ध्यर्थे यदसम्भवि ।
बुद्ध्यर्थादेव बुद्ध्यर्थे जाते तदपि दृश्यते ॥ ३३ ॥

बुद्धिपरिवर्त्तेन क्रियाकारकयोर्विज्ञानतये साध्यसाधकभाव-सिद्धः प्रतिभासभाव । तथा हि बुद्ध्यर्थे बुद्धौ शब्दार्थो भोजनं भोक्ता तत्सम्बन्धश्च । यदसम्भवित्वेनाभिमत तदपि सम्भवत्येव । कथमेत्याह, बुद्ध्यर्थादेवौदनादिप्रतिभासाद्परस्मिन्ननुयुज्यमानाकारज्ञानसंवेदने जाते सति। वाक्यवादिनः पदमात्रात्प्रतीतेर्न्यायसमत्वात् । अभ्युपगमवादश्चायमाह्यनये ऽपि हि शब्दार्थस्य बुद्धिपरिवर्त्तिन प्रतीतं । क्रियाकारकभावे दृश्यविकल्पयोरभेदाध्यवसायाद्व्यवहारसिद्धिर्भवत्येव । तथा हि बाह्यार्थे सति दर्शनं, दर्शनाद्र्थनिर्भास , तस्मिन्सति वक्तुमीहा, ततः प्रतिभादेः शब्दोच्चारणमिति परम्परया बाह्य एव वाच्ये तत्र प्रवृत्तिरिति विनापि तु बाह्यार्थं, शक्यते विज्ञानमात्रदर्शने ऽपि तन्निर्भासवशेन क्रियाकारकसम्बन्धा मेलयितुमित्यवापन्यसम ॥ ३३ ॥

इतश्च बुद्धिपरिवर्ती शब्दार्थ , ततः शब्दार्थसम्बन्धो नित्य-उपपद्यत इत्याह ॥

अनित्येष्वपि नित्यत्वमभिधेयात्मना स्थितम् ।

घटादिशब्दादुच्चरितादर्थाकारत्वग्रहस्य प्रत्ययस्य सदैवोपजननात्, बाह्येन रूपेण प्रध्वंसित्वे ऽप्यभिधेयत्वेन शब्दार्थस्य नित्यत्वान्नित्यो ह्यर्थवतामर्थैरभिसम्बन्ध इति प्रवाहनित्यताश्रयेण पस्पशायामुक्तम् ॥

कूटस्थनित्यताश्रयेणाप्याह ॥

अनित्यत्वं स्वशक्तिर्वा सा च नित्यान्न भिद्यते ॥ ३४ ॥

पदार्थानां सतामसत्वविरोधादतीतानागतयोरर्थयोर्नास्ति प्रत्ययजननमद्वयस्य तत्त्वस्य सर्वस्यात्मनो ब्रह्मणो द्रव्यलक्षणस्य सामर्थ्यमेव तन्नानित्यत्वमिति.तस्य नित्यादद्वयरूपात्तस्माद्भेदाभावादनित्यशब्देनोपाधिभेदभिन्नस्य सामर्थ्य, पूर्वोक्तेनैव न्यायेन तस्यैव प्रतिपादना-

स्यात्य (भावानामभावनो भावेषु) ? कश्चिदित्यर्थ । ततश्च घटादिशब्दै सर्वावस्थमुपाधिविशिष्टं ब्रह्मद्रव्यमेव नित्यं प्रतिपाद्यत इति नित्य शब्दार्थसम्बन्ध सिद्ध । तदुक्त द्रव्ये ऽपि पदार्थे एष एव विग्रहोन्याय्य , सिद्धे शब्दे ऽर्थे सम्बन्ध चेनीति ॥ ३४ ॥

एव सम्बन्ध स्वाभाविकमवस्थाप्य तत्रैवोपोद्वलकं परमतेनाह ॥

शब्देनार्थस्य संस्कारो दृष्टादृष्टप्रयोजनः ।
क्रियते सो ऽभिसम्बन्धमन्तरेण कथं भवेत् ॥ ३५ ॥

इहार्थ क चनाप्यनभिद्यमानां शावरादिविद्यानां विषादिशमने सामर्थ्य दृष्ट, प्रतितन्त्र प्रसिद्धानां च बीजाक्षराणां जप्यमानानामदृष्टहेतुत्वमत एवोन्नीयत इति ॥ ३५ ॥

अवाचकेष्वपि शब्देषु, अर्थेन सह संस्कारान्यथानुपपत्त्या सम्बन्धसद्भावात्सर्वत्र सम्बन्धोऽवश्य इति कश्चित्त निवारयति ॥

नावश्यमभिधेयेषु संस्कारः स तथाविधः ।
दृश्यते न च सम्बन्धस्तथाभूतो विवक्षितः ॥ ३६ ॥

घटादिशब्देभ्यो ऽर्थस्य घटादेर्दृष्टादृष्टप्रयोजनस्य संस्कारस्य च दर्शनादत्र सम्बन्धो न स्यादिति नदृशसंस्कारनिमित्तमसौ विवक्षित ॥ ३६ ॥

अपि तु ॥

सति प्रत्ययहेतुत्वे सम्बन्ध उपपद्यते ।
शब्दस्यार्थे यतस्तत्र सम्बन्धो ऽस्तीति गम्यते ॥ ३७ ॥

प्रतिनियतार्थप्रत्यायनान्यथानुपपत्त्या शब्दार्थया. सम्बन्धायोग्यतालक्षणश्चक्षूरूपादिकमिवस्य(कादुपक्षमव) ? ज्याय इत्यर्थ । अर्थे नियते नियतस्य प्रतीतिहेतुत्वं सम्बन्धे युज्यते नान्यथेति यतस्तस्मादर्थप्रत्यायनात्कार्यादस्ति सम्बन्ध. शब्दार्थयोरिति निर्ध्रीयते, नार्थविशेषरूप संस्कारो ऽत्र सम्बन्धावेदक । तत्रानुपूर्वीमात्राद्विज्ञातेन प्रभावनाविनानोदयादपरत. प्रत्यायकत्वानपेक्षण इत्यर्थ । प्रतीतिनान्यमहेतु शब्दार्थयो सम्बन्ध. प्रतीतिकृतो न प्रतिलक्षणादुपकारात्तत्सिद्धि । यदपि मीमांसकै कार्यात्कल्प्य विज्ञाते

ऽर्थो विज्ञायते सम्बन्ध इत्युक्तं, तदप्यनेनैव दर्शनेन व्याख्याते। तत्कारणाच्छब्दश्रवणानन्तरमर्थज्ञानं भवति । सम्बन्ध इति सति । प्रत्ययो हेतुर्व्यभिचरेदेवोक्तं भवति, अन्यथा शब्दार्थयो ऽन्यैकारणभाववर्णनानिमित्तं नियमोक्तं स्यात् ॥ ३७ ॥

सामयिकस्तु सम्बन्धो न युज्यत इत्याह ॥

नित्ये ऽनित्ये ऽपि वाह्ये ऽर्थे पुरुषेण कथं चन ।
सम्बन्धो ऽकृतसम्बन्धैः शब्दैः कर्तुं न शक्यते ॥ ३८ ॥

नित्ये तावदर्थे जात्यादौ नित्यशब्दार्थदर्शने वा सर्वस्मिन्पुरुषेणाप्रत्यक्षतया शब्दस्य सङ्केतं कर्तुं न पार्यते। नित्यत्वादवेदानीमुपजातस्य पुरुषस्य तद्व्यापारात्पूर्वमपि । तस्मादाकाशकालदिगादिदर्शने वा ब्रह्मणा शब्दवाच्यत्वात्सर्वेषामर्थादिसम्बन्धादादिपुरुषेणापि कृतौ अशक्त्यनुसारऽणास्य प्रतिपादितत्वादादिशब्दार्थात्प्रभृति च प्रकृतवृत्तौ किमन्यन्नित्यत्वात्स्यात् । अनित्ये ऽप्यर्थे घटादौ कार्यशब्ददर्शने वा प्रत्यक्षेण सर्वग्रहणायोगाज्जातिद्वारेणापि ग्रहणे जातेर्नैकास्मन्नर्थे भूयसीनां भवे विचक्षणानुपपत्तेरनुमानेनापि शब्दानामेतदर्थस्य प्रतिपत्तेः, शब्दार्थसिद्धौ तस्यायोगात् । पारिशेष्याच्छब्दैरेव निरूप्य क्रियार्थमङ्गुल क्रियते। तथा च निरूपकाणामपि शब्दानां सङ्केत एवशक्तिरिति तत्रापि शब्दान्तरे निरूप । ऽनवस्था, प्रकृतसमयेनिरूपणस्यानुपपत्तेरिति सुदूरमपि गत्वा कस्य चिच्छब्दस्य स्वाभाविकी योग्यतैषणीया। तथा चाविशेषात्सर्वेषामपि तत्प्रसङ्ग इति सिद्धं स्वाभाविकं शब्दार्थयोः सम्बन्धं समयवशादभिव्यज्यमानं स्वरूपं ॥ ३८ ॥

इदानीं यत्तन्मतुवार्तिके भाष्ये ऽभिहितं सम्प्रतिसत्तायां यथा स्यात् भूतभविष्यत्सत्तायां मा भूदिति । तत्र भूतभविष्यतोः सत्ताव्याख्यानमिषेण प्रकृतसम्बन्धनित्यत्वं निर्वोढुमाह ॥

व्यपदेशे पदार्थानामन्या सत्तोपचारिकी ।
सर्वावस्थासु सर्वेषामात्मरूपस्य दर्शिका ॥ ३९ ॥

व्यपदेशे व्यपदेशनिमित्ते शब्देन प्रत्याय्यने पदप्रत्याय्यानामर्थानां बाह्यानां वस्तूनां बाह्यविलक्षणा सत्ता बुद्ध्योपचरिता, बाह्यार्थस-

साया ह्यन्या । प्राक् तत्संविदो ऽप्रामाणिकत्वात्सत्तामात्रगम्या सा। तत्र च प्रहतसत्त मिमान इति तदनुरोधेनोपचारसत्ता वाचोयुक्तिः सुतरां व्यवहार इति शब्देष्वव्यवहार इतीयमपि व्याख्या । तत्र चेयमेव शरणमस्यापि बाह्यार्थानामात्मनाम इव शब्दपरामर्शमन्तरेणैव रूपसंस्पर्शस्याभावात् ॥ ३९ ॥

एवं चानयैव सत्तया पूरिते व्यवहारे यद्यत्क्रियाकारणादिना (काष्ठनुसप्राष्टणकेन चिलिबन्धनेना) ? न्यासत्वात्कल्प्यते तद्धिर्यतां सा, न तत्र विनास्माक व्यवहारे तस्याद्वास्त्यनुप्रवेशो, यदि परमस्यामेव सा प्रतिबिम्बिता व्यवह्रियत इत्येतत्प्रतिपादयितुं निदर्शनोपक्रममाह ॥

स्फटिकादि यथा द्रव्यं भिन्नरूपैरुपाश्रयैः ।
स्वशक्तियोगात्सम्बन्धस्तादूप्यमुपगच्छति ॥ ४० ॥
तद्वच्छब्दो पि सत्तायामस्यां पूर्वं व्यवस्थितः ।
धर्मैरुपैति सम्बन्धमविरोधिविरोधिभिः ॥ ४१ ॥

बाह्यस्य वस्तुनो नियतरूपत्वाद्भवाभावमाधारण्यानुपपत्तेर्घट इत्युक्ते ऽस्ति नास्तीति शब्दान्तरोपधीयमानरूपसंसर्गविरोधः स्यादिति उपचारसत्तासमाविष्ट शब्दार्थ.। तथा हि सर्वसाधारण्यात्पदान्तरोपधीयमानरूपविशेषसह. कालाभ्रस्फटिकादिवत्सो ऽर्थ इति यथायथमस्ति नास्तीति भावाभावसमन्वयवशेन नियत. प्रतीयते।तथा हि स्वच्छत्वात् स्फटिकादिद्रव्यतो वाऽऽदित्यसर्गो ऽपरित्यक्तस्वरूप तद्रूपमिवाभासनो।थोपचारसत्तापि स्फटिकमणिस्थानीया सद्रूपमत्यजन्ती प्रतिषेधादिभिरुपाधानैरभिसम्बध्यमाना तादूप्यमिवायाति प्रतिषेधात्मिकेवाभाति। स्वशक्तिरच्छत्वं स्फटिकादेर्नानाकारेण ग्रहणयोग्यत्व सर्वविषये स्वीकार्ययोग्यत्व । सामान्यात्मकत्वाच्छब्दो ऽपीति शब्दार्थ., शब्द्यत इति कृत्वायद्वाशब्दोऽस्याः प्रत्यायकत्वेनावस्थितो ऽर्थद्वारेण स शब्दान्तरवाच्यैर्धर्मै. सम्बध्यते। विरोधिवचनं साकल्यप्रतिपादनार्थम । सत्तायामस्यामिति । ज्ञानाकाररूपायां, पूर्वमित्याभासावस्थायां पदात्प्रतीत्यवसरे सम्बन्धं याति । व्यवहारकाले वाक्यावस्थायामादिग्रहणे कालाद्यविरोध । अविरोधिनो धर्माभावात्मका.। ते चापचारसत्तायामनुगुणाः । यथा स्फटिकस्य मल्लिकाकुसुमादय इति न ते

रूपतिरस्क्रियाहेतव ।अत एव तत्सन्निधीयते तदात्मनोपचारसत्ताया विश्रान्तिवक्तव्यिरुद्धा हि बाह्या सत्ता तस्य पूर्वरूपतया प्रत्यासन्ना । तथा चोच्यते यत्रान्यत्क्रियापद न श्रूयत तत्रास्ति भवन्तीपर इत्यादि ।वर्तमानावस्था वर्णपूर्णत्वापकरणीति भवन्तीपर इत्युक्तं। सत्ता वा विरुद्धधर्मसामान्यमिति यथायथाविशेषैस्तस्यास्सत्वपरिपूरण । कृतविरोधिनस्तु धर्मा अभावात्मका । ते हि प्रतिषेधात्मका. रूपतिरोधानमुपचारसत्ताया जपाकुसुमादय इव स्फटिकस्य कुर्वन्ति। यद्यपि चोपचारसत्तायामुभयेषामपि समन्वयाद्विरोधाभाव. । तथापि बाह्यापेक्षयात्रैवमुक्तम्। बाह्यस्य नीलोत्पलादेरभिन्नस्य विशिष्टत्वान्नीलमुत्पलमित्युपचारसत्तायामेकविवेकाद्द्रव्यात्मा गुणसंसर्गभेदादाश्रीयते। पृथगित्यादिविशेषणविशेष्यभावे च वक्ष्यमाणा प्रतिक्रियोपपद्यते । स्फटिक विमलं द्रव्यैर्यथा युक्त पृथक पृथक । नीललोहितपीताद्यैस्तद्वर्णमुपलभ्यत इति अपरोऽत्रागमपाठ ॥ ४१ ॥

तमेव विरोध्यविरोधिधर्मसम्बन्ध क्रमण व्याचष्ट ॥

एव च प्रतिषेध्येषु प्रतिषेधप्रकल्पने ।
आश्रितेषूपचारेण प्रतिषेधः प्रवर्त्तते ॥ ४२ ॥

बुद्ध्याकारस्य नानाविधधर्मसमन्वययोग्यत्वे अब्राह्मणादिषु यथोपपत्ति. । तथा हि। सत्ताविरोधान्निषेधायोगान्न ब्राह्मणो ऽत्र सन्। असत्वे तु कथं तत्र शब्दप्रवृत्तिर्बाह्यशब्दार्थवादिनाम् ।तथा च पुनरपि निषेधो ऽनुपपन्नः। तदुक्त, न सतां च निषेधो ऽस्ति सो ऽसत्सु च न विद्यते । जगत्यनेन न्यायेन तत्रार्थ प्रलयं गत इति । यदा तूपचारसत्तासमाविष्ट शब्दार्थ तदा सामान्येन भावाभावसाधारणतया ब्राह्मणशब्देन क्षत्रियादिषु सादृश्याध्यारोपितो ब्राह्मणार्थ समुल्लिखित इति प्रतिषेधविषये दर्शिते नति निषेध. प्रवर्तते । निर्विषयस्य निषेधस्याप्रवृत्ते. । तस्यापि च बुद्ध्याकारभावस्य भावैकनियतत्वाद् बुद्धिसत्त्वैव सत्ता, नास्ति साधारणत्वेन योग इति । तस्य येयं बहीरूपता व्यावहारिकैर्दृश्यविकल्पैराकारादध्यवसिता तत्रैव निषेध. फलति। तथा हि यो ऽयं ब्राह्मणार्थ स बहिरसन् केवलं भ्रान्त्या क्षत्रिये ऽध्यवसित इति स्वाभाविक, ब्राह्मणार्थनिवृत्तिरेव च द्योत्यते। तदुक्तं भाष्ये, यदि पुनरय निवृत्तपदार्थको ब्राह्म-

णशब्द किमर्थं प्रयुज्यते, एवं यथा विज्ञायेत, नेति ह्युक्ते सन्देहः स्यात् कस्य पदार्थो निवर्तत इति । अत्र सर्वथा निवृत्तपदार्थकत्वे प्रयोग एव न स्यादिति बाह्यापेक्षयैव निवृत्तपदार्थकत्वम् । उपचारसत्तापेक्षया तु प्रयोग इति स्फुटमुक्तं भवति । प्रतिषेधविषयप्रकल्पना च प्रयोग इति तदर्थोपचारफलम् ॥ ४२ ॥

अविरोधिधर्मसम्बन्धमुपचारसत्ताविशिष्टस्यैव प्रतिपादयितुं मुख्यसत्तायां तावदसम्भवमाह ॥

आत्मलाभस्य जन्माख्या सत्ता लभ्या च लभ्यते ।
यदि सज्जायते कस्मादथा ऽसज्जायते कथम् ॥ ४३ ॥

आत्मलाभो वस्तुस्वरूपप्राप्तिः जन्म कथ्यते । तत्र च त्रितयमन्वयि, लब्धा कर्त्ता, लभ्यं कर्म, लाभश्च क्रिया एतच्च त्रितयम् । तथा च जन्मविरोधि सत आत्मलाभायोगात् । लब्धात्मा हि स उच्यते । कारणे शक्तिरूपतया ऽवस्थाने ऽपि सर्वथा ऽजन्मनो जन्मायोगादवश्यं कस्य चिदंशस्य लाभो ऽभ्युपगन्तव्य इति येन रूपेण सत् न तेन जन्म, येन च जन्म न तेनासदिति जायते ऽङ्कुर इति प्रयोगानुपपत्तिः । जन्मानुरोधादसत्त्वाभ्युपगमे धात्वर्थे कर्तृत्वानुपपत्ते प्रत्ययार्थविरोध । तदनुरोधात्सत्त्वाभ्युपगमे जन्मलक्षणधात्वर्थविरोध इत्यर्थः ॥ ४३ ॥

अत्रैवार्थे सदृशं दृष्टान्तमाह ॥

सतो हि गन्तुर्गमनं मति गम्ये प्रवर्तते ।
गन्तृवच्चेन्न जन्मार्थो न चेत्तद्वन्न जायते ॥ ४४ ॥

स्वरूपप्रसारणलक्षणा गमिक्रिया जनिक्रियासदृशी । तत्र च सत एव गमन गन्तुर्दृश्यते व्यतिरिक्तमद्रूपकर्मविषयं । एवमिहापि प्रादुर्भवितृगन्तृवत्सत्त्वे जन्मानुपपत्तिः । अथ जन्मानुरोध तदा सत्त्वाज्जायते क इति कर्तृत्वायोग । गम्यवच्च लब्धव्योऽप्यन्वयव्यतिरिक्तो नास्तीति बाह्यशब्दार्थाभ्युपगमेऽनुपपत्ति ॥ ४० ॥

उपचारसत्ताश्रयेण तूपपत्तिरित्याह ॥

उपचर्य तु कर्त्तारमभिधानप्रवृत्तये ।
पुनश्च कर्मभावेन ता क्रियां च तदाश्रयाम् ॥ ४५ ॥

अथोपचारमत्तैवं विशेषास्तनलादयः ।
जन्मना तु विरोधित्वात् मुख्या सत्ता न विद्यते ॥४६॥

तु शब्दो (बाह्यसत्तादयो विशेष) ? मुपचारमत्तया सर्वमत्त्वन सम्बन्धं द्योतयति । इह सर्वात्मना परिनिष्ठित जायत इति न व्यपदिश्यते । नापि सर्वात्मना ऽसद्रूपमाश्रितपूर्वपरावस्थ सत्तासादनोन्मुखे वस्तु जायते शब्दविषय । तथा च तन्नोत्तरसद्रूपमवस्थाविशेषं पूर्वावस्थाक रणानां कार्योन्मुखलक्षणायामुपचर्यो ऽङ्कुर इति अभिधानस्य प्रवृत्तौ जायत इति कर्तृत्वोपपत्ति. । आश्रितपूर्वावस्थत्वाच्च जन्मार्थोपपत्ति । एव च कृत्वा ऽऽश्रितपूर्वावस्थ उपचरितोत्तरावस्थश्च सम्मूर्छितार्थात्मा जायत इत्यभिधानस्य विषय । पूर्वावस्थाश्रयणाबलभ्यत्वन कर्त्तव्योपचरित कर्म नान्यदिति बुद्ध्वाविवचनमाश्रित्य तदाश्रयतया साधनयो. कर्तृकर्मणोराश्रयमात्मपदं क्रियापेक्षत्वात्साधनसाक्षस्य तन्निबन्धन, तेनाकर्तृकर्मणी आश्रयो यस्या साधनाश्रीनजन्मत्वादित्युभयथा ऽपि पाठ तां जनिक्रियां पूर्वापरीभूतावयवसमाहारात्मिकामध्यारोप्य जायते ऽङ्कुर इति प्रयोगसमर्थने अर्थत्यऽभ्युपगमद्योतनाय । एवं च सत्युपचारमत्तैवमाश्रिता भवति । तथा च तत्रैव कर्त्तव्यय जायत इति लकारो जायत इति चोक्तम् । जानवानिति च कृत्वतु . जन्माङ्कुरस्येति षष्ठी । यद्वा कर्तृकल्पनया लकार कर्त्तरि प्रत्यय , क्रियाकल्पनया धातु प्रकृति , कर्मकल्पनया कर्मकर्तृव्याख्याने वाक्यमङ्कुर आत्मान लभत इति द्वितीया कर्मणि । एवमात्मानमात्मना विभ्रदस्तीत्यादावपि वाच्यमेव विधौ वा सर्व परिकर उपचारमत्तेति निबन्धनत्वादवमभेदेन व्यपदेश. । मुख्या तु सत्ता पूर्वोक्तादिविधा पूर्वोक्ताङ्कुरोत्पाद्य सद्भच्छते । अत आत्मलाभस्य जन्माख्येति पूर्वपक्षीयसिद्धान्त आत्मलाभोन्मुखताजन्य । तथा च वक्ष्यति । पूर्वस्मात्प्रच्युता धर्मादप्राप्ता चोत्तर पदम् । तदन्तराले भेदानामाश्रयाज्जन्म कथ्यत इति । यथा पूर्वभवस्थामजहत्सस्पृशन्धर्ममुत्तरम् सम्मूर्छित इत्यार्थात्मा जायमानो ऽभिधीयते इति । पुनश्च कर्मभावेन तमिति क्वचित्पाठ । तत्र तं कर्त्तारमेव पुन कर्मभावेनोपचर्येति योजना ॥ ४६ ॥

इदानीं जन्मोत्तरकालभाविनमस्तित्वं भावविवशमङ्कुरोऽस्तीत्ययं शब्द उपचारसत्तासमाविष्टमेव प्रतिपादयति अन्यथा ऽर्थागादित्याह ॥

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते ।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः ॥ ४७ ॥

आत्मनात्मानं धारयतीत्यस्तेरर्थः । तथा च निरुक्तकार । अस्तीत्युत्पन्नस्यात्मधारणमुच्यते इति । व्यतिरिक्तकर्तृप्रतिषेधार्थमात्मनेति वचनम् । तथा च वास्तवस्य कर्तृकर्मक्रियाभेदस्याभावो भिन्नरूपत्वाद्धस्तुन इत्यर्थः । आत्मना सकर्मकत्वात्तर्ह्यस्त प्रतिषिद्धकर्मत्वमपावृत्तमित्यत्राह । अन्तर्भावादित्यादि । असावित्यसिधातुः तदर्थो वा । धात्वर्थेन कर्मणा उपसंग्रहादकर्मको ऽयं धात्वर्थ इति प्रसङ्गाद्वस्त्युत्पादयति । जीवतावापि प्राणानामप्यात्मलक्षणस्य कर्मणो धातुवाच्यत्वात्क्रियान्तरमभेदमात्मान धारयतीति व्याख्यायते । तत्र भावन कर्मयोग इत्यर्थः । यथा वक्ष्यति । न तत्र (धारिणि) ? प्राणा जीवतिस्तु क्रियान्तरमिति । एव जायत इत्यत्राप्यात्मानं लभत इत्यर्थः । निर्वचनन भूतत्वकर्मत्व द्रष्टव्यम् । यो हि धात्वर्थाद् बहिर्भूतः कर्मार्थ स कर्मव्यपदेशहेतु । धातोरर्थपूरणे हि सम्पन्ने ऽस्माद् बाह्यस्य तेन सम्बन्धभेदाधिष्ठाने सति या कर्मता गामानयेति शब्दात्, प्रविशपिण्डीमित्यादौ च सामर्थ्यलब्धा, सा च सकर्मकव्यपदेशनिबन्धनमिह तु क्रियाकारकसंसर्गपर्यन्तो दीर्घो धात्वर्थ इति भेदाभाव ॥ ४३ ॥

एवं भेदाभावात् अथ वस्तुनो व्यवहारो युज्यत इति प्रतिपाद्याधुना जायत इति वत्कर्तृयोगात्स्वरूपाभावादप्यसमुक्तोपचारसत्तायामेवोपपत्तिं प्रतिपादयति ॥

प्राक्च सत्ताभिसम्बन्धान्मुख्या सत्ता कथं भवेत् ।
असंश्च नास्तेः कर्त्तास्यादुपचारस्तु पूर्ववत् ॥ ४८ ॥

अस्तीति पूर्वापरीभूता साध्यमनावस्था प्रतीयते । अन्यस्यां चावस्थायां निष्पन्नरूपः कर्त्ता नास्ति । साधनसम्बन्धात्पूर्वमपि सद्भावो नास्ति । न चान्यत्सद्भवतिरिक्तो ऽर्थसाधनमात्रप्रज्ञापन इति सैव सत्ता साध्य च मुख्यतो न सम्भवति । तथा हि सिद्धरूपेण सा-

धर्मेण भवितव्यम् । न च सत्तामनुभवन्नेव सिद्धतया प्रज्ञायते, अनुभूत-सत्तासबन्धश्च न साध्य इति, लब्धात्मलाभस्यात्मधारणलक्षणा सत्ता, बुद्ध्या पूर्वापरीभूतयैवाभिधीयते । तत्र चोपचारसत्तारूढस्य पूर्व-भाग. कर्त्ता, अपरस्तु साध्य कर्मेत्युभयाश्रयक्रियास्वरूपान्तर्भाव-पूर्वं जायत इति वदुपचारसत्तायां कर्तृत्वमाश्रित्यास्तीति प्रयोगोपप-त्तिः । तदेवमस्ति, नास्ति, जायत इति प्रयोगत्रयमुपचारसत्तास-माश्रयणेन समर्थितम् । एते च त्रयो भावविकारा । एतेष्वेव चान्ये त्रयो ऽन्तर्भवन्ति । तथा हि, जन्मनि वृद्धिरवयवोपचयात्मिकाऽन्तर्भूते-ति पूर्वं जायत इति वद्वर्धत इत्ययमपि प्रयोग समर्थनीय. । एवं परि-णामो धर्मान्तराविर्भावलक्षणो ऽत्रैवान्तर्भूत इति परिणमत इत्यनेनैव न्यायेन प्रयोग इति सार्वत्रिकमवगन्तव्यम् । परिक्षयस्तु नास्ती-ति विनाशे ऽन्तर्भवति, तत्राप्युपचारसत्ताश्रयेण परिक्षीयत इति प्रयोगः समर्थनीय इति षड्भावविकारयोनित्वात्सर्वस्य क्रियाप्रप-ञ्चस्य वस्तुसत्ताश्रयेण (अ) प्रयोग. ॥ ४८ ॥

क्रियाभि. साधनानामाक्षेपात्तद्वाचिनामपि तथैव प्रयोग इति सार्वत्रिकीमुपचारसत्ताया शब्दार्थत्वे व्याप्तिं निगमयितुमाह ॥

तस्माद्भिन्नेषु धर्मेषु विरोधिष्वविरोधिनीम् ।
विरोधिख्यापनायैव शब्दैस्तैस्तैरुपाश्रिताम् ॥ ४९ ॥
अभिन्नकालामर्थेषु भिन्नकालेष्ववस्थिताम् ।
प्रवृत्तिहेतुं सर्वेषां शब्दानामौपचारिकीम् ॥ ५० ॥
एतां सत्तां पदार्थो हि न कश्चिदतिवर्त्तते ।
सा च सम्प्रति सत्तायाः पृथग्भाष्ये निदर्शिता ॥ ५१ ॥

बाह्यो येषां विरोधो भावनादीनां धर्माणां तैरुपचारस-त्तायां अविरोधो यथोक्तन्यायेन अन्तराकाङ्क्षया । विरोधिख्यापनायैवेति। विरोधिनां प्रकाशनाय तैस्तैर्ब्राह्मणादिशब्दैरुपगृहीता । एतैर्हि श-ब्दैर्विषय उपदर्श्यते धर्माणाम् । नच धर्मबाह्याद्वस्तुनो भिन्ना, शब्दैनैव भेदस्य परिकल्पनात्,नीलोत्पलादौ विरोधाधानं विरोधिनो वा भिन्ना वर्तमानाद्वस्तुनो ऽनीलानागतादय । विशेषणविशेष्यभावविषयनीलो-त्पलादिशब्दैरप्युपाश्रिताम्मित्याह । तत्रापि प्रविभज्य मेलनमुपचार-

सत्तायां युज्यते। अन्यथा संसक्तवस्तुनि नेयं कल्पना घटत इत्युक्तम्। अतीतानागतकालव्याप्तत्वाच्च नियतकालेष्वपि बाह्येष्वर्थेषु इयमभिन्नकाला सार्वत्रिकी। अत एव सर्वेषामपि शब्दानां प्रवृत्तिहेतुरयं चैत्रो ऽभूद्भविष्यतीति बुद्ध्यर्थं निरूप्य तत्र शब्दप्रवृत्तेरर्थेऽनिरूपिते ऽर्थे तदयोगात्। तथा हि, विद्यमानो ऽपि वर्तमानो ऽपि वर्त्तमानकालोऽपि सोऽर्थो यावद् बुद्ध्या नावधृतस्तावद्विषयः। शब्दानामपि सर्वत्रोपचारसत्तारूढ एव शब्दार्थ इत्युक्तं भवति। क्रियाकारणभाव इत्यपि चार्थानां निरूपणं बौद्धमेव। तथा हि, भाव्यमानत्वादेव क्रिया सम्प्रति नास्ति। तदभावात्तदपेक्ष साधनत्वमपि कुत इति आख्यातशब्दस्य क्रियावाचिनः सुबन्तस्य च कारकवाचिनः सर्वस्यैव बुद्धिपरिगृहीत उपचारसत्तासमाविष्टो वाच्यो ऽर्थो ऽवतिष्ठत इति सर्वेषा मितिव्याप्तिसिद्धिः। अभावस्य च जायमानत्वेन सत्त्वादेनामुपचारसत्तां सर्वे एव पदार्था नातिक्रामन्तीति सर्वेषामेव तद्विषयत्वादभावादिशब्दानामप्यर्थे नित्यमपि (अ)वियोग सिद्ध। अव्याहतोपचारसत्तायां न निर्मूलत्वमपि तु भाष्यकाराभ्युपगतत्वमेव। मतुवार्त्तिक न सत्तः पदार्थो व्यभिचरतीति अस्ति शब्दाक्षिप्तमर्थनाय, सम्प्रति सत्तायां यथा स्यात् भूतभविष्यत्सत्तायां माभूत्, गावो ऽस्यासन्, गावोऽस्य भवितार इति भाष्यवचनादुपचारसत्ता ऽस्तीति गम्यते। प्रमाणभूतत्वादस्य वचनस्य। न हि भूता भविष्यन्ती वा काचित्सत्ता या अस्तीत्यनेन निवार्येत। भूतभविष्यदुपाख्यत्वान्न काचिन्मुख्या सत्ता, अतः स्यादनुभूतत्वादनागतस्य प्रगुणकारकासांमुख्यात्। बुद्ध्या तु परामर्शे, प्रत्ययपरिवर्त्ते व्यर्थे, शब्दप्रयोग इत्युपचारसत्ता भूतभविष्यतोरुपपद्यते। तथा च तद्बुद्ध्यासाय वाक्यसत्तापरिग्रहार्थमस्तीति विशेषणं युक्तम्। बाह्यादिसत्ता सम्प्रति वर्त्तमाने काले भवतीत्यन्या ततो भूतभविष्यतोः प्रत्ययात्मना सत्तेयम्। यद्यपि वर्त्तमानावस्था ऽप्यपि बाह्यस्य प्रतीतिग्राह्यत्वेनैव व्यवहार्या सत्ता, तथापि सैव बहिर्भावादस्तीत्यनेन विशेषणेन विवक्षितवर्त्तमानकालेन गृह्यते। प्रतीतिमात्रशरणान्वितं तद्बुद्ध्यस्यते। तदेवमुपचारसत्तायां समर्पितस्वभावानां बाह्यानामेवार्थानामतीतादिभावेन प्रत्यायनाद्यर्थ एव शब्दो व्यवहार इति सम्बन्धनित्यत्वमुपपादितम्॥ ५१॥

इदानीं सर्वस्यैव शाब्दस्य व्यवहारस्य यथातत्त्वमप्रवृत्तेर्विप्लुतत्वे गवादिशब्दानामविचारसिद्धा ऽर्थवत्ता ऽभ्युपगन्तव्या । तथा च सत्तातीताद्यभावविषयाणामपि शब्दानां भावाभिमतवस्तुविषयैर्घटादिशब्दै तुल्यतां प्रतिपादयितुमुपक्रमते ॥

प्रदेशस्यैकदेशं वा परतो वा निरूपणम् ।
विपर्ययमभावं वा व्यवहारो ऽनुवर्त्तते ॥ ५२ ॥

इह शाब्दो व्यवहारो यथातत्त्वमप्रवृत्तो ऽवस्तुविषयः । तथा हि पूर्णस्य तत्त्वस्य साक्षाच्छब्दैर्द्रष्टुमशक्यत्वादविद्यापरिकल्पितप्रतिनियतघटादिप्रदेशगतः शाब्दो व्यवहारः । प्रदेशशब्देन घटादेर्ब्रह्मैकदेशत्वादभिधान कृत्स्नार्थपरिग्रहासामर्थ्यं शब्दानां प्रतिपादयितुम् । तत्रापि च मात्राकालात्मको न प्रदेशः समस्त शब्देनाभिधीयते अपि तु तदेकदेशघटशब्देन हि घटत्वजातिरुच्यते । तत्रैव रक्तशब्देन गुणः । एव शब्दान्तरैरपि प्रतिनियतभावाभिधानमुदाहार्यं परेण जात्यादिभावनिरूपायम् । ससर्गदर्शने स्फुतो गौर्न गौः गोत्वादिसम्बन्धाद् गौरिति ब्रह्मकल्पं साक्षादव्यवहार्यमेव द्रव्यं परोपधीयमानरूपविशेषं व्यवहारमनुपतति । विषयधर्मिभिन्नस्य ब्रह्मणो नानोपाधिवशेन भेदं विज्ञाननये वा ? (श्रवणभूतस्य) बहीरूपस्य बहीरूपतया भानविपरीताव्याप्तिभाव । शून्यवादिमते व्यावहारिकबाह्यस्य सर्वथैव निषेधात्, विज्ञानभावस्यमाकारान्यतात्वयोगादसवेद गन्धर्वनगरतुल्यमाभासत इत्यसत्ख्यातिः । ब्रह्मण एव वा सत्यस्य वाक्पथातीतत्वादविद्याया असदेवेदम्भेदजातं शब्दविषयः । तदेषु वपुर्षु दर्शनेषु शब्दानामर्थसम्बन्धो न भाविकः । तथा हि, आद्ये दर्शने ऽर्थो ऽस्ति गवादिशब्दानां, तत्रोपपद्यते सम्बन्धो, यदि सोऽर्थभावादेव सम्बन्धासिद्धि । तथा हि परतो निरूपणे धार्यमानरूपमेव निरूप्यते ऽभिधीयते चेति असत्यवस्तुविषयः सम्बन्धः । एवं विपर्ययाभावपक्षयोरपि वाच्यम् ॥ ५२ ॥

एतदेव दृष्टान्तेन साधयति ॥

यथेन्द्रियस्य वैगुण्यात्सत्ताध्यारोपवानिव ।
जायते प्रत्ययो ऽर्थेभ्यः, तथैवोदेशजा मतिः ॥ ५३ ॥

तिमिरोपहतनयनश्चन्द्रमेकमनेक पश्यति, कामिली च शुक्लमपीतं शङ्खं पीतमिति, इन्द्रियदोषादाकारान्तररूपितार्थावयासी प्रत्ययो ऽर्थेभ्यो जायते । अर्थानां तत्राभावकत्वान्नियतविषयत्वाद्विज्ञानां प्रत्ययधर्माध्यारोपो न, वस्तुप्रविभोषीति च शब्द एवमुद्दिश्यते प्रतिपद्यते येनेत्युद्देशशब्दः । तत्प्रत्यन्ता च बुद्धिरसदाकाराध्यारोपवती भवति॥५३॥

इन्द्रियवत्कि शब्दवैगुण्यमित्याह ॥

अकृत्स्नविषयाभासं शब्दः प्रत्ययमाश्रितः ।
अर्थमाहात्म्यरूपेण स्वरूपेणानिरूपितम् ॥ ५४ ॥

इह कारणानुरूपं कार्यं भवति । शब्दस्य च निरूपितार्थविषयत्वान्निरूपणाप्रत्यय कारणम्। तदुक्तम। यदा च बुद्धिविषयादर्थाच्छब्दः प्रतीयत इति । निरूपणाप्रत्ययश्च विषयैकैकव्यावृत्तिनिष्ठत्वाद्विकल्पतामकृत्स्नविषयाभासः । न हि विकल्पेन यथातत्त्व वस्तु स्पृश्यते, प्रदेशैकदेशादिना संस्पर्शादित्युक्तम् । अतश्चाकृत्स्नमेवार्थमध्यारोपितरूपमेवं शब्द. प्रतिपादयति । कार्यकारणसम्बन्धवशाद्विकल्पात्मको हि प्रत्ययः शब्दाज्जायते । तदुक्तम । "विकल्पयोनय शब्दा विकल्पाः शब्दयोनय" इति । तथा कार्योपादानविकल्पपरिगृहीतः शब्दार्थ इति । एवमविद्याद्या विकल्पानामितियथातत्वमवसायपाटवात्समारोपितरूपेणावसायस्य सर्ववादिभिरभ्युपगतत्वात्स्वदुपदर्शितविषयविषयाः प्रत्ययोपारूढरूपाभिधायिन सिद्धा इत्यतीताद्यभावादिशब्दानामप्यर्थसम्बन्धे न विप्रतिपत्तव्यमिति स्थितम ॥ ५४ ॥

तत्रैतत्स्यात् निरावरणख्यातानां भावतत्वसाहश्यं यथार्थ एव शब्दो व्यवहारः, ते चा ऽस्माकमुपदेष्टार इति नायथार्थ. स इत्याशङ्क्याह ॥

रूपणव्यपदेशाभ्यां लौकिके वर्त्मनि स्थितौ ।
ज्ञानं प्रत्यभिलाषश्च सदृशौ बालपण्डितौ ॥ ५५ ॥

परस्पराभिप्रायमेलनामयत्वाद्व्यवहारस्याविदितदर्शनाभावत्वदृशो ऽपि व्यवहरन्ति लोके यथा वनम् । सदृशैरन्यै रतादृग्दर्शनरूपणम् । वनमालाशलशब्दन यद्रूपण स व्यपदेशः आभ्यां व्यवहरन्तो लौकिकमार्गे तुल्याः । कव विषय इत्याह । ज्ञानं प्रतीत्यादि ।

बालस्य विपर्यासितमनेरर्थज्ञानमर्थसंविकल्पं, अभिलापो व्यपदेशरूपं च। तं प्रति तद्विषये यथा बालो विकल्पयति अर्थमभिधत्ते च एवं परमार्थदर्शनाविद्वांसोऽपि। तथा विद्वांसोऽपि निरूप्य विवक्षितत्वाविषयं यथाविवक्षमेव व्यपदिशन्त. पराभिप्रायमेलनमारभन्त इति यथा पराभिप्रायमेव पूर्वं निरूपयन्ति। तथा विनिरूप्यच तेषामपि रूपणाज्ञानं विकल्पः तत्पूर्वकश्चाभिधाया. शब्दो लौकिकसदृशः॥ ५५॥

या तु तेषां व्यवहारातीता दृग् तस्यां शुद्धज्ञानं पारमार्थमनिरूपकं, प्रतिनियतविषयग्राहकमेव ज्ञानं सदैवेति कास्य शुद्धिरित्याह॥

सर्वार्थरूपता शुद्धिः ज्ञानस्य निरुपाश्रया।
ततोऽप्यस्य परां शुद्धिमेके प्राहुरुपेक्षिकाम्॥ ५६॥

द्वे दशे शुद्धेरुपक्रमपरिसमाप्तिरूपे। इन्द्रियसन्निकर्षादिरूपोपाश्रयनिरपेक्षतायामशेषार्थावभासखचितं सर्वज्ञज्ञानमुपक्रमे शुद्धमित्युच्यते। इन्द्रियाद्यपेक्षारूपाया अविषयग्रहणे शुद्धेरवगमाभिष्ठायां चाकारकालुष्यापगमात् प्रभास्वरं प्रशान्तकल्लोलसंविन्मात्रमेकघनं शुद्धग्राह्यग्राहकशून्यं परं ब्रह्म॥ ५६॥

नियताकारावग्रहोहा शुद्धिरित्याह॥

उपप्लवो हि ज्ञानस्य बाह्याकारानुपातिता।
कालुष्यमिव तत्रास्य संसर्गे व्यतिभेदजम्॥ ५७॥

स्वच्छज्ञानस्यार्थेन संसर्गे सति यस्तेनैवार्थेन व्यतिभेदः प्रतिबिम्बवशादभेदो व्यामिश्रीभावः, ततो जातोऽयमुपप्लवो बाह्यविषयप्रावण्यं उदकस्येव सरजस्कत्वम्। एवं वशादभिधीभावात्तदपगमे क्रमेण स्वस्मिंश्च च्छेदरूपे स्थानं परा शुद्धि. सर्वदर्शनाभ्युपगता। तदुक्तम्। तदा द्रष्टुः स्वरूपे ऽवस्थानमिति। इवशब्देनार्थरूपसम्भेदेऽपि स्वप्रकाशं ज्ञानरूपमनवगतमित्याह॥ ५७॥

अर्थस्यापि व्यवहारे शुद्धिमाह॥

यथा च ज्ञानमालेखादशुद्धौ व्यवतिष्ठते।

तथोपाश्रयवानर्थः स्वरूपाद्विप्रकृष्यते ॥ ५८ ॥

आलेख्यो विषयरूपोपरागः । ततो ऽशुद्धं ज्ञानमिति प्रसाधितमर्थमर्थाशुद्धौ साध्यायाम् तच्चु दृष्टान्तयति । उपाश्रयो जात्यादिरूपाधानं, तेन च द्वारेण यथादर्शनमार्थो व्यवहारः प्रथममवतरति । निरुपाधेस्तस्याव्यवहार्यत्वादुपाधिसंसर्गश्चानत्त्वमित्यर्थः । सेयमशुद्धिर्जात्याद्युपाधिरूपेण समवेतेन शबलितमर्थवस्तु प्रतीयते ऽभिधीयते चेति तथा तद्व्यवहारमवतरति । ननु सर्वथा अव्यपदेश्यं द्रव्यं एव । बहिस्तस्यरूप यदुपाधिससृष्टं सदैव तत्संसृष्टस्य प्रत्ययात् ॥ ५८ ॥

उक्तमर्थं प्रकृते योजयति ॥

एवमर्थस्य शब्दस्य ज्ञानस्य च विपर्यये ।
भावाभावावभेदेन व्यवहारानुपातिनौ ॥ ५९ ॥

जात्यादिसंसर्गरूपोपरागो ऽर्थस्याशुद्धि शब्दस्याप्याकृत्यार्थाभिधानं तदुपाधिरूपेणाभिधानम शुद्धिर्ज्ञानस्य बाह्याकारोपरागः । एवं त्रितयमपि पर्यस्तम । तथा च भावस्यापि शब्देनाभिधीयमानस्य ज्ञायमानस्य वा परोपाधिरूपतया अभावसकल्पना । अभावो ऽपि हि घटाभावः पटाभाव इति परोपाधिरेव शब्दप्रत्ययावनुपतीति साम्यम् । बुद्ध्या निरूप्यमाणो ह्यभावो भावस्वरूपेणावच्छिद्यते । यत्तु परमं रूप तत्रैव व्यवहारास्पदम । तत्तु च विपर्यस्त प्रतिपत्तृधर्मः । तेन प्रतिपन्ने च विपर्यस्त कथ्यतां, अर्थस्तु कथं विपर्यस्त उच्यते । विपर्यासविषयत्वात्स्वरूपेण चाप्रतिभासनादर्थो ऽपि तथा शब्दो ऽपि विपर्यासहेतुत्वात्तथाच्यते । कथमभेदेन व्यवहारानुपाति इत्याह । यथाभावमुपाश्रित्य तद्भावो ऽप्यनुगम्यते । निरुपाधेरभावस्याविशिष्टत्वात् भावोपाधेर्व्यवहारावतारः । भावस्यापि मध्यावस्थायामेव सत्वात् प्रागभावाद्विच्छन्नमेव व्यवहारे तत्त्वम् । नित्यानामप्यभिव्यञ्जककालात्प्रागनभिव्यक्तेरसत्तया व्यवहारो न विशिष्यते ॥ ५९ ॥

एव मन्यापेक्षित्वे भावाभावयोर्व्यवहारे साम्यं, भेदमभ्युपगम्य प्रतिपादितं, इदानीं भावव्यतिरिक्तमभाव निगमयितुमाह ॥

नाभावो जायते भावो नैति भावो ऽनुपाख्यताम् ।
एकस्मादात्मनो ऽनन्यौ भावाभावौ विकल्पितौ ॥ ६० ॥

द्वैतनये प्रागभावोपमर्देन भावनिष्पत्ति । भावोपमर्देन प्रध्वंससम्भव । द्वयमपि चैतदयुक्तम । भावाभावयोरन्योन्यस्वभावोपगमसम्भवात् स्वभावस्यानपायात् । अतश्चात्यन्तविवेके भावोपाधितया अभावस्याभावोपाधितया च भावस्य प्रतीतिर्न स्यात्तस्मादकमेवाद्वयं तत्त्वमात्मशब्दवाच्यं व्यवहारे विकल्पदशायां भावाभावोपाधिरूपप्रविभक्तं चकास्ति । प्रकाशरूपस्य हि परस्य तत्त्वस्य सर्वत्राविभिन्नस्वभावस्य महासत्तात्मनो भावप्रतियोगिनो विद्यावशात्सावृतलोकयात्रानिर्वर्त्तनसमर्थस्य बहिरिदन्तया प्रतिभाने वर्त्तमानकालोपाधितया ऽर्थक्रियाकारिणो भावरूपता अतीतानागतकालोपादिननिवर्त्तनसमर्थनान्तरे च संस्काररूपतया ऽनुवर्त्तनान्नबाह्येन्द्रियविषयतानुपगमात्सर्वत्र मातृसाधारणार्थक्रियाकरणादभावरूपतया व्यवहार. । न च सर्वथा तदानीमसत्, स्मर्य्यमाणत्वादुत्प्रेक्ष्यमाणत्वाच्च । तथा च यदास्य संस्काररूपामते भावाद्दत्यस्मदुत्प्रेक्षागता कल्पयन्त्येव काममर्थक्रियाम् । अत एव च मध्यावस्थास्य भावस्यैव प्रागभाव. स्फुटेन रूपेणेन्द्रियापरिच्छेद्यावस्था प्रध्वंसश्चोत्तरकालमभावा व्यवह्रियत ॥ ६० ॥

ननु सर्वथा भावसंस्कारनिवृत्तावभाव कश्चित् सर्वशक्तिविरहलक्षणश्चकास्ति चेतसि । अत एव त्रय्यधिका. पदार्था. समुद्भोष्यन्त इति वा भावो नाम कश्चित्तत्तैतत्स्यात्कथं भावाभावौ विकल्पावित्युच्येते, कारणभेदात्सत्यभूतौ यथाऽवभासं कस्मान्न भवत इत्याशङ्क्य सदसत्पक्षभेदेन कार्यकारणभावानुपपत्तिप्रतिपादनपूर्वकम् द्वैतदर्शनमर्थोपनिबन्धेनाद्वैतनयं स्वमतेन सिद्धान्तयितुमुपक्रमते ॥

अभावस्यानुपाख्यत्वात्कारणं न प्रसाधकम् ।
सोपाख्यस्य तु भावस्य कारणं किं करिष्यति ॥६१॥

आह, कार्यस्यात्मलाभमुद्दिश्य कारणानि प्रवर्त्तन्ते । तत्रासत्स्वभावस्योद्देशत्वायोगात्किमवलम्ब्य कारणस्य पदसम्बन्धः स्याज्ञा-

त्यात्मना सत्त्वेनास्य नित्यत्वात्कार्यतानुपपत्तेः । पुनरपि कारणं कथं वर्त्तेत । कथं चिद्भेदो जातिव्यक्त्योरिति चेत् । व्यक्त्यात्मना तर्हि कार्यतेति तदवस्थो दोषः । नियतकारणपरिग्रहश्च न स्यात् । असत्यस्याविशेषात्सिताश्यो ऽपि तैल स्रवेत् । नियतशक्ति कारणमिति चेत् कुतो ऽवसितमेतस्मिन्सति सद्भावादिति चेत् तदैवेदं पर्यनुयुज्यते, कथमन्यन्तासतस्तस्मिन्सतीति प्रतीतत्वात् अदोष इति चेत् । प्रतीतिमात्रमस्तु किमयुक्तिजनककार्यकारणभावोपवर्णनेन । तथा च सिद्धान्तयिष्यति । "भावानां प्रागभूतानामात्मतत्वं प्रकाशयेत् ।" अथ सत्कार्यं कारण इति नैते दोषा. । अत्रापि कृतस्य कारणायोगादकिञ्चित्करं कारणम् । नत्वेतदुच्यते । न चापूर्वं किं चित्प्राप्यत इति । अथापि व्यक्तिः कारणेन कार्यस्य क्रियते सा ऽपि ततो ऽन्या ऽनन्या वा । अन्यत्वे सती वा स्यादसती वा । सत्त्वे प्रागिव करणानुपपत्तिः । अभिव्यक्त्यन्तरकरणे त्वेनदेव पुनरावर्त्तते ऽनवस्था च । असत्त्वे प्राप्तमसतो जन्म । तथा च कार्यं को विद्वेषः । अभिव्यक्तौ च कारणव्यापारात्कार्यस्य कार्यता न स्यात् । वस्त्वन्तरोत्पत्तौ च किं तस्य येनासावशङ्कितमेवाद्धो भवेत् । सत्सम्बन्धाभिव्यक्तिकारणादिति चेत्, को ऽयमजन्यजनकयोः सम्बन्ध । तत्त्वे ऽप्यभिव्यक्तौ तज्जन्यार्थं तद्विषयः कारणव्यापारो न स्यात् । कारणेनैवास्यजननात्तया कार्यस्य जनने तद्विषयो ऽपि कारणव्यापारो न स्यात् । तथा च तस्यासतो भवने असत्कार्यप्रसङ्गात्सतो ह्यभिव्यक्तौ पुनरप्येतदेव चावर्त्तते । उपकार्योपकारकभाव सम्बन्धो ऽभिव्यक्तिकार्ययोरिति चेत्, केन कस्योपकार. । स च किं व्यतिरिक्त उताव्यतिरिक्त । व्यतिरेके तस्येति क षष्ठ्यर्थ । उपकारान्तरकल्पने ऽप्येतदेव चोदनीयमनवस्था च । व्यतिरेक तु जन्यजनकभाव एव पर्यवस्यति । तत्र चोक्तो दोष । अनन्यत्वे ऽभिव्यक्ते. कार्योत्तदेव कृतं स्यादित्यसत्कार्यतयाश्रय. । तत्र चाऽनुपपत्तिरावेदितेति सङ्कटो ऽयं पन्था ॥६१॥

इत्थं च कार्यतानिबन्धात् प्रागभावप्रध्वंसाभावावपि कृतवस्तुविषयौ न स्त इति पूर्वोक्तमेवावस्थाभेदेन विकल्पितत्व भावाभावयोर्निगमयति ॥

तस्मात्सर्वमभावो वा भावो वा सर्वमिष्यते ।

न त्ववस्थान्तरं किं चिदेकस्मात्सत्यतः स्थितम् ॥६२॥

कार्यकारणभावाभावान्मध्ये जातो ऽभिव्यक्तो वा सन्, पूर्वोत्तरयोरवस्थयोरजातो ऽनभिव्यक्तो विनाशकारणायोगात् विनष्टश्च भावो नोपपद्यत इति भावाभावौ नैकस्यावस्थातु परिणामदर्शनाश्रयेण सत्यभूतावस्थात्मकौ, अपि तु व्यवहारदशायामविद्याप्रवृत्तिरूपायाम्। सत्यस्याभिन्नसच्चिन्मात्रस्य तत्त्वस्य यथायथमनवभासात् परमार्थेन सर्वं प्रपञ्चजातमभाव एवापरमार्थ एव। स च नीरूपो न कञ्चिदिति भावाव्यतिरेकं न सहते। किञ्चायं हि न कुतश्चिद्व्यतिरिच्यते। भेदमात्रस्य चाभिन्नतत्त्वाग्रहणरूपस्य शून्यत्वात्। भावत्वेन तु रूपेण सर्वभावात्मकत्वम्। प्रथमानस्य वस्तुत्वाद्वस्तुनः प्रथा ऽयोगात्। भावाना हि ज्ञायमानत्वेन ज्ञानोपरूप्यतया सत्त्वमेव। भावादेरध्यवसानाच्चापि सत्त्वम्। केवलं यो ऽयं भेदो ऽवच्छेदो ग्रहणमसौ न किं चिदविद्या। तत्र वा मन.प्रकाशो ऽनुगत इति विद्या ऽवस्थितैव। तथा च विद्याऽविद्याप्रविभागमप्रविभागं ब्रह्मेति ब्रह्मकाण्ड उक्तम्॥ ६२॥

यतश्चैवं सर्वं संवृतिमत्तत प्रचारिता दर्शनविकल्पा, तत्राभिमानमात्रमित्याह॥

तस्मान्नाभावमिच्छन्ति ये लोके भाववादिनः।
अभाववादिनो वापि न भावं तत्त्वलक्षणम्॥ ६३॥

आविर्भावतिरोभावमात्रं जन्मनाशौ सत एवेति वदन्तो भाववादिनः परमर्षयः। तेषामभावो नाम भावपृथग्भूतो न कश्चिद्भावस्यैव पूर्वोत्तरयोरवस्थयोरभावव्यवहारात्। तथा हि। मृदवस्था घटस्य प्रागभाव, कपालावस्था च प्रध्वंसाभाव इति वाच्यम्। सर्वं शून्यं जगदित्यभाववादिनामभाव पारमार्थिको न भाव कश्चिदिति ते भावं तत्त्वलक्षणं परमार्थरूपं नेच्छन्ति। एतमर्थं व्रजन्तो व्यवहारे भावोच्चावचभेदमर्थक्रियाकरणं(मार्थिकारक)? निमित्तं नापह्नुवन्ति। ततश्च संवृत्या सर्वमुपपद्यते। साम्येत्यभिनिवेशो न त्याज्य॥ ६३॥

अभावप्रतिक्षेपे तर्हि निर्निबन्धनो भावाभेद इत्यत आह॥

अद्वये चैव सर्वस्मिन् स्वभावादेकलक्षणे।

परिकल्पेषु मर्यादा विचित्रैवोपलभ्यते ॥ ६४ ॥

सर्वस्मिन्परिदृश्यमानभेदजाते स्वभावात्परमार्थरूपात् सामान्य-समावेशवशादेकस्वभावे ब्रह्ममये चित्रेषु विकल्पेषु भावत्वादिनानात्वेनानादिनियतिशक्तिनियमितेयमविद्यावशान्मर्यादा व्यवस्था नानारूपा दृश्यते । असत्यपि वास्तवे भेदे ऽविद्यानिमित्तोऽयं भेदो व्यवहारे रूढ इत्यविचारितसिद्धो ऽवगन्तव्य इत्यर्थः ॥ ६४ ॥

ननु सत्पथोत्पन्नो भावाभेद इति निदर्शनेन व्युत्पादयति ॥

चतस्रोऽपि यथा ऽवस्था नीरूपाख्ये प्रकल्पिताः ।
एवं द्वैविध्यमप्येतद्भावाभावव्यपाश्रयम् ॥ ६५ ॥

प्राक्प्रध्वंसात्यन्तेतरेतरलक्षणोपाधिवशेन नीरूपस्य रूपभेदायोगाद्यथा ऽभावस्य चतुर्धा भेद काल्पनिक, तथैव भावाभावलक्षणो ऽपि भेद काल्पनिक एवावगन्तव्य इत्यर्थः । बहिरिन्द्रियगोचरार्थक्रियोपाधिर्ब्रह्मण एव कल्पितो भाव, बहिरर्थक्रियाशून्यस्वभाव इति सङ्क्षेप ॥ ६५ ॥

वस्तुत सर्वव्यवहारातीतौ न पृथक् भावाभावावात्मतत्त्वमुद्दर्शयत इत्याह ॥

अविरोधी विरोधी वा सन्नसन्नापि तत्त्वतः ।
क्रमवानक्रमो वापि नाभाव उपपद्यते ॥ ६६ ॥

नीरूपत्वादभावस्य भावेन सह विरोधाविरोधौ युक्त्या न सङ्गच्छेते । न हि भावमभावः समुच्छिनत्ति अनुगृह्णाति वा येन तद्विरोधी अविरोधी वा यथासख्यं भवेत्ततोऽसत्त्वायोगाल्लब्धरूपस्यापि शयायोगाच्च सत्त्वमभावस्यात्मविरुद्धम् । असत्त्वमस्यातद्रूपत्वादेव व्यतिरिक्ताभाववच्चोपपद्यते । एव हि तावन्नाप्रसङ्ग । क्रमो ऽपि भावधर्मो नाभावस्य युज्यते ऽभावस्योच्छेत्तुमशक्यत्वात् । भिन्नतदपेक्षो भावस्य क्रमो नाप्यभावनिरपेक्षः । तस्यैवासिद्धत्वान्नीरूपस्य भेदाभावादेवाक्रमो ऽपि । यौगपद्यमर्थान्तरापेक्षत्वादस्य अस्ति, अन्येन सहासमानकालत्वादिति युक्तितो नोपपद्यते । अभावो नामैवंधर्मो यत्, एवं अविरोधी विरोधी वा, सन्नसन्नपि तत्त्वत, क्रमवानक्र-

भेदोऽपि । तेन भावेन सह विरोधितया च न युक्ता । एवं क्रमाक्रमावपि । अथाभावान्तरेण सह विरोधितादि विचिन्त्यते तत्रापि स्वतोऽनुच्छेद्यस्य निरतिशयं केन चिदुच्छेत्तुमनुगृहीतुं वा शक्तेस्तदनुपपत्तिरेवं क्रमाक्रमावपि भेदाभावान्न । पारमार्थिकाभेदत्वमपि नियतार्थक्रियानिमित्तमर्थक्रियान्तराकरणान्न तत्त्वतो व्यवतिष्ठते । सत्तासम्बन्धस्य चानुपलब्धेर्न तन्निमित्तप्रतिभासनाद्भेदत्वमप्यपारमार्थिकम् । इत्थं सर्वेऽपि व्यवहारा विकल्पपरिवर्तिता एवेति भावाभावावपि तथा विद्वेयौ । कल्पना वा ऽविद्याशक्तिः । सा च विद्यातत्त्वान्यत्वाभ्यामनिर्वाच्येति ब्रह्मकाण्डे निर्णीतम् ॥ ६६ ॥

कालनिमित्तोऽप्यत्र भेदो न पारमार्थिक इत्याह ॥

अभावे त्रिषु कालेषु न भेदस्यास्ति सम्भवः ।
तस्मिन्नसति भावेऽपि त्रैकाल्यं नावतिष्ठते ॥ ६७ ॥

त्रिषु कालेष्विति । कालत्रयनिमित्तोऽप्यभेदो भावविषयो नास्ति । तथा हि नीरूपत्वादभावस्य वर्त्तमानकृतस्तावत्परिच्छेदो नास्ति । तदभावात्तदपेक्षोऽतीतानागतकालयोगोऽपि न भाविकः । एवं च भावस्याप्यभावाद्वर्त्तमानत्वमपि नास्ति । नापि स्वापेक्षः, पूर्वापरकोट्योरभावात् । भावस्य कालत्रयमुक्तम् । भावे तु संख्यानां पूर्वापरकोट्योर्भावस्यैकत्वमेवाभिप्रसज्यते पुनरपि कालत्रयायोगः । अवस्थास्ततो न व्यतिरिच्यन्त इति तासामपि तदभावः । व्यतिरेकेऽपि वा तद्बहुत्वे कालभेदो न भावस्य शक्यते कल्पयितुमित्यसत्यो भेदः ॥ ६७ ॥

भवतीति भावो न भावोऽभाव इति लक्षणमनयोर्नोपपद्यत इत्याह ॥

आत्मतत्त्वपरित्यागः परतो नोपपद्यते ।
आत्मतत्त्वन्तु परतः स्वतो वा नोपकल्पते ॥ ६८ ॥

कारणाद्भावस्य सतो विनाशो नोपपद्यते । नीरूपस्य कारणसामर्थ्येन जन्यमानतायां नाशस्य रूपवत्त्वं, प्रागभावेन सम्बन्धे प्रागिव तस्योपलब्धिः स्यात् । तेन तस्य विनाशे तत्रापि तथैवेत्यनवस्थापातात् । भावनस्वभावस्य भावनाविरोधाच्च स्वतोऽपि

विनाशाभाव इत्यभावशब्दार्थो न कश्चिदवतिष्ठते । भवनमपि भावस्वभावस्य परिनिष्ठितस्य कारणान्नोपपद्यते । स्वतोऽपि भवतो भवनायोग । अभवे न खल्वस्य भावना विरुद्धेति भावशब्दोऽपि न कश्चित ॥ ६८ ॥

न चैवमपि भावाभावादेकं तत्त्वमत इत्याह ॥

तत्त्वे विरोधनानात्व उपकारो न कश्चन ।
तत्त्वान्यत्वपरित्यागे व्यवहारो निवर्तते ॥ ६९ ॥

विधिप्रतिषेधयोरेकत्वं विरुद्धम् । नानात्वे तु भावाभावयोः परस्परापेक्षया निरुपकारिणो व्यवहारो न स्यात्तदेतद्व्यतिरेकेण विकल्पासम्भवो राद्यन्तराभावादिति सर्वव्यवहारातीतत्वं भावाभावादिरूपतया प्रतिभासमान जडात्मांवृतेन रूपेणाविचारितसिद्धमिति स्थितम् ॥ ६९ ॥

परमार्थस्त्वयमत्रेत्याह ॥

यत्र द्रष्टा च दृश्य च दर्शनं वा विकल्पितम् ।
तस्यैवार्थस्य सत्यत्वं श्रितास्त्र्यन्तवेदिनः ॥ ७० ॥

ग्राह्यग्राहकादिप्रपञ्चस्य विकल्पपरिघटितस्यासत्यत्वात्सर्वप्रपञ्चसमतिक्रान्तं वाङ्मनसातीत तत्त्वमविकल्प पर ब्रह्मानादिनिधनं सत्यमिति ब्रह्मविद. प्राहु । ऋग्यजु सामात्मको वेदस्त्रयी तस्या अन्त. सारभूतार्थनिर्णयमय उपनिषद्भाग । तत्र हि भागे सक्षिप्यशास्त्रार्थसतत्त्वमाख्याय, तज्जायते तत्तच्छीलायते, एवमभेदं परमार्थरूपमाहु । नाकर्मानुष्ठानाक्षिप्तो भेदोऽविद्यापरिकल्पितो ऽक्षिभेदादिवथो वैकल्पिक । अविद्या ऽपि सतत्त्वान्यताभ्यां परस्याविनिर्वाच्या ऽनादिसिद्धजीवात्मगतभेदप्रतिभासकारिणीत्युपपादितं ब्रह्मकाण्डे विस्तरत इति तत्र एवावधार्यम् ॥ ७० ॥

तत्तदेव यथावभासमसत्यार्थानष्ठ. शाब्दो व्यवहार इत्यलब्धाभिधानतत्त्वविश्रान्तिभेदेष्वत्रोपप्लुवन इत्याह ॥

सामान्यं वा विशेषं वा यस्मादाहुर्विशेषवत् ।
शब्दास्तस्मादसत्येषु भेदेष्वेव व्यवस्थिताः ॥७१॥

सामान्यमपि सामान्यान्तराद्व्यावृत्तं शब्दैरुच्यते । तथा

विशेषो विशेषान्तराद्व्यावृत्त इत्यसत्येषु भेदेष्वेव शब्दा कृतसम्बन्धा, नाभिन्नसद्रूपं तत्त्वं स्प्रष्टुं शक्ता इति वितथ एव शाब्दो व्यवहारः । सदित्यपि व्यवहारो भावप्रतियोगी । एवं ज्ञेय प्रमेय इत्यादयो ऽपि शब्दास्समस्परिकलिता ज्ञेयादिव्यावृत्तविषया इति सर्वे भेदोपनिपाति शब्दजातम् । तदुक्तं भाष्ये । सामान्यमपि यथा, विशेषवद्वदिति । विशेषवदित्यर्हार्थेवति । विशेषमर्हति यदभिधान तद्विशेषो वा यत्रास्तीति मत्वर्थीय. । सामान्योपहितस्य विशेषवद्वदिति । विशेषवदित्यर्हार्थस्याभिधान सम्भाव्येतेति तन्निवृत्तये विशेषणमेतदिति विशेषेणापि सम्बन्ध्यते ॥ ७१ ॥

एवं तावन्नीरूपमवस्त्वभावमाश्रित्य भावाभावयोर्विरोधाद्युक्तम् । इदानीं वैशेषिकनयेन सप्तम पदार्थसभावमाश्रित्याह ॥

नह्यभावस्य सद्भावे भावस्यात्मा प्रहीयते ।
न वाऽभावस्य नास्तित्वे भावस्यात्मा प्रमूयते ॥ ७२ ॥

भावादर्थान्तरमभाव इति प्रध्वंसस्योपजने किमिति भावो विनश्यति । प्रागभावस्य च व्यावृत्तौ किमिति भावो जायत ॥ ७२ ॥

एतदेव दृष्टान्तेन द्रढयति ॥

न शावलेयस्यास्तित्वं बाहुलेयस्य बाधकम् ।
न शावलेयो नास्तीति बाहुलेय प्रकल्प्यते ॥ ७३ ॥

पृथक् सूतयोर्भावयोरसम्बन्धयोर्यथा परस्परस्य सत्तासत्ते न प्रयोजिके तथा भावाभावयोरपि तथाभूतयो स्यादित्यर्थ ॥ ७३ ॥

तदेतद्भावादर्थान्तरस्याभावस्यावस्तुत्वे ऽभ्युपगम्यमान दोषजातमित्युपसहरति ॥

अभावो यदि वस्तु स्यात्तत्रेयं स्याद्विचारणा ।
ततश्च तद्भावे ऽपि स्याद्विचार्यमिद पुनः ॥ ७४ ॥

सप्तमपदार्थरूपे भावस्य वस्तुत्वे ऽभ्युपगम्यमाने तत्सन्निधानासन्निधानाभ्यां भावस्य सन्निधानासन्निधाने न युज्येते इतीयं चिन्ता युज्यते । तथा च वस्तुत्वे भावस्य, तन्नाप्यभावान्तरस्य व्यतिरिक्तस्योदयात्तमययोरभावस्य यथायोग तौ न स्यातां, तन्नाप्यभावान्तरमित्यनवस्था च स्यादित्यपि वाच्यम् ॥ ७४ ॥

यदा पुनर्भावप्रच्युतीनां रूपमेवाभावो बौद्धदृष्ट्याऽभ्युपगम्यते ॥

अवस्तुत्वादतीतं यद्व्यवहारस्य गोचरम् ।
तत्र वस्तुगतो भेदो न निर्वचनमर्हति ॥ ७५ ॥

भवति भावो न स्वभावो नाम कश्चिद्व्यतिरिक्तो ज्ञायत इति नये नेदं विचारिणीयम् । न ह्यभावस्य सद्भाव इत्यादि भावप्रच्युतिरूपत्वादभावस्य कथमवनिष्ठते। न भावत इति भेदो दूषणमवतरति । प्रागभाववृत्तौ न भावो जायते, अपि तु भवितृरूपत्वादिति तुच्छरूपाभावो वास्तवनानात्व नार्हति। इत्थ च सर्वव्यवहारातीतो ऽसत्त्वान्नीरूपत्वादभावो वास्तवभेदादिनिरूपणासह इति प्रागेवोक्तमुपसंहृतम्॥७५॥

इदानीं कार्यकारणभावानुपपत्ति पूर्वोक्तामनूद्य स्वदर्शने विवर्त्तं सिद्धान्तयितुमाह ॥

अपेक्षे ऽर्थे पदन्यासः कारणस्य न विद्यते ।
अथ च प्रागसद्भावः कारणे सति दृश्यते ॥ ७६ ॥

उत्पत्ते पूर्वं कार्यलक्षणो ऽर्थो ऽपेक्षो ऽविद्यमानप्रत्यायको ऽसत्त्वादिति तत्र कारणस्य पदन्यासो व्यापारो नोपपद्यते। जननक्रियायोग्यवस्तुभूतकार्यनिष्ठो हि कारणानां व्यापार' पदन्यास । स चासति कार्ये नास्ति । न ह्यकिञ्चिदूपमुद्दिश्य कारणानि प्रवर्तितुमुत्सहन्ते । अथ तदुद्देश्यायोगात्मत्त्वे तु कारणानुपपत्तिरित्युक्तम् । अथ नियोक्तृबुद्ध्यनुसन्धानकार्यस्य पदन्यास सोऽप्यसत्यसम्भवी । जडस्य च कारणस्य सुतरा कार्ये पदन्यासो ऽयं नास्ति । दृश्यते कस्मिंश्चिद्धेतौ सति कार्यमिति । तत्र (यदेव) ? तत्त्वमेव प्रतिभासमानं न तु वास्तवो हेतुफलभाव कश्चिदित्यर्थ ॥ ७६ ॥

अथोत्पत्ते. पूर्वं प्रागवस्था भावस्येति नापदस्तदानीमसावर्थं इत्युच्यते तत्राप्याह ॥

कालस्य प्रागवस्थेति वस्त्वाश्रितमिदं पुनः ।
प्रागवस्थेति न ह्येतद् द्वयमप्यस्ति वस्तुनि ॥ ७७ ॥

उत्पत्ते पूर्वम, कार्यस्य का प्रागवस्थेति इदं चोद्यं वस्त्वाश्रितं वस्त्वालम्बनमेतत्पर्यनुयोगरूपमित्यर्थ. । तथा हि प्रागिति चावस्थेति

चैतद्वयमत्र पर्य्यनुयोगे । न चैतद्वयमप्यवस्तुन्यस्ति । देशत. कालतो वा युगत्वस्याभावे नीरूपे देशकालयोगायोगिन्यसम्भवादवस्थेति चावस्थात्रये ऽत्र । न चावस्थानां कश्चिदन्वयो विद्यते पूर्वमित्यसत्यतैव । तत एवमसत्कार्यनये प्रागसत्वादेतन्न युज्यते । सत्कार्यनये ऽपि प्रागर्थानुपपत्ति इदानीमपिसत्वाद्भावस्य । अत एव च जन्मायोगादवस्थातूरूपो भाव । केन चिद्रूपेण जननेनापेक्षया प्राप्तसत्वो जन्म । तथा चाप्राप्यपदो ऽर्थः ॥ ७७ ॥

विनाशे ऽप्यसत्त्वमेव नीरूपमगोचरो वाचो भावस्येत्याह ॥

नचोर्ध्वमस्ति नास्तीति वचनायानिबन्धनम् ।
अलं स्यादपदस्थानमेतद्भावः प्रचक्षते ॥ ७८ ॥

प्रच्युतेरूर्ध्वम् निरन्वयध्वंसादसति भावमार्गे ऽस्ति नास्तीत्यभिधानाय न समर्थं वस्तु सख्यादि तदानीमप्यस्तीति व्यवहरन्ति । तच्च न युक्तम् । कुत अनिबन्धनं यत । वचने निबन्धनमुपलभ्यमानता । सा च तस्य नास्ति । शब्दागोचरमनिबन्धनमसत्यमिति पूर्वापरावस्थयोरव्यवहार्यम् ॥ ७८ ॥

भावो मध्यावस्थायामेव केवलं दृश्यत इत्याह ॥

अत्यद्भुता त्वियं वृत्तिः, यदभाग यदक्रमम् ।
भावाना प्रागभूतानामात्मतत्त्व प्रकाशते ॥ ७९ ॥

सदसत्पक्षभेदेन वासु तस्य कार्यकारणभावस्य निराकृतत्वादुपपत्तिशून्यया ऽऽश्चर्यभूतया वृत्त्या व्यापारण कार्य प्रागदृष्टं निरंशं सदित्येवाक्रमम । कस्मिंश्चिन्नियमे सति दृश्यत इति प्रतिभासमात्रसार. कार्यकारणभावो ऽपि तथा वैकल्पिको ऽविद्यानेर्यथार्थं विकल्पनादेकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहितो रूपविवर्त्त परमार्थ इत्यर्थ. । अत्यद्भुतेयं वृत्तिः । का ऽसावित्याह । यदभागमित्यादि । इत्येवं पदसमन्वय. । यद्वा यस्या वृत्तौ सत्यामभागं निरंशमत् एवाक्रमं तत्त्व भावानां प्रकाशत इति सम्बन्ध. । साशत्वे सति क्रमणोपजनो विवर्त्तोऽव्यावृत्त । कारणसामर्थ्यविधारणाच्चाश्चर्यमिदं भवेद्यतस्तु तदित्यपदक्रममेव सर्वेवादिमते ऽपि कार्यमाजायते । अत. कारणव्यापारस्य विचार्यता-

नुपपत्ते', तथा प्रकाशो विद्यावशादाश्रयभूतो रूढ. ॥ ७९ ॥

तथापि ॥

विकल्पोत्थापितेनैव सर्वो भावेन लौकिकः ।
मुख्येनैव पदार्थेन व्यवहारो विधीयते ॥ ८० ॥

मध्यावस्थाभावि दृश्यमानं रूपमपेक्ष्य पूर्वापरावस्थापरिकल्पनया क्रमिकत्वम् । सति कार्यकारणभावे न भावाभावरूपतया वा ऽविच्छिन्नसिद्धो लोकव्यवहारो रूढ । एवमन्यो ऽपि य कश्चित् व्यवहार स सर्वो वास्तवतो बहिर्विद्यमानस्य वस्तुनो भिन्नस्य तावदनादिमिथ्याभ्यासवासनावशादुपजात एव साङ्गतस्तथाध्यवसायाद्-सांवृत इवाविद्याप्रवृत्तिरूपे जगति प्रूढ. ॥ ८० ॥

परमार्थतस्तु न भेदो नाम परिदृश्यमान. सत्यः, अपि त्वद्वयमेव तत्त्वं अविद्यानेत्रैरेवमविद्याख्यतच्छक्तिवशादवधार्यत इत्याह ॥

भावशक्तिमतश्चैनां मन्यन्ते नित्यवादिनः ।
भावमेव क्रमं प्राहुः, न भावादपरः क्रमः ॥ ८१ ॥

नित्यमद्वयं ब्रह्मतत्त्वं ये वदन्ति ते भावस्याद्वयस्य ब्रह्मण एवैवविधानादिजीवात्मगतां शक्ति मन्यन्ते । यद्वशात्तिरोधाय तत्त्वमभेदेन व्यवहार क्रमिक' । क्रमे ऽपि ब्रह्मणा भेदावभासनमविद्याकृतम् । तत्रैव क्रमाभासनं कालाख्यस्वानन्त्यशक्तिकृतमेव । शक्तिः न ब्रह्मणो भावात्परमार्थसतो भिद्यति सैव तदुत एव वा चकास्ति । जन्यस्य तदतिरेकिणो भास्यमानतानुपपत्ते । भासमानस्य च प्रकाशाव्यतिरेकात्प्रकाशस्य तदयोगादित्यन्यत्र निर्णीतम् । तथा च ब्रह्ममयभावोपधानेन क्रमस्यावभासनात् व्यवहारे भावव्यतिरिक्तम् । तस्य च किंक्रममिति हेतुहेतुमद्भावेन योजनादपौनरुक्त्यम् ॥ ८१ ॥

अत्र क्रमप्रतियोगियौगपद्यमिति तथा प्रतिभासनमात्रमित्याह ॥

क्रमान्न यौगपद्यस्य कश्चिद्भेदो ऽस्ति तत्त्वतः ।
यथैव भावान्नाभाव· कश्चिदन्यो ऽवसीयते ॥ ८२ ॥

एकमेव तत्त्वमविद्यानेत्राणामपारमनवच्छिन्नमशक्यप्रतिभासमिति स्वगतदेशकालपौर्वापर्याध्यारोपेण सक्रममाभाति । पदा-

र्थान्तरसाहित्येन चाक्रममिति भावनं क्रमाक्रमौ न स्तः। यथा भावाभावाविति युक्तम्। क्रमाभावो यौगपद्यम्। क्रमश्चोक्तदशा नान्या भावादित्यभावस्य पूर्वं भावाद्भेदस्य वस्तुतत्त्वस्य च निषेधाद्यौगपद्यमपि तदात्मकं न किं चिदित्यभावदृष्टान्तेन ध्वनयति। भावोपधानेन च प्रतीयमानत्वाद्भावान्तरसाहित्यं भावस्यात्मैव, तन्न्याय्यम्। न हि साहित्यं नाम सहितादन्यद्विवेकेनावधार्यते ॥ ८२ ॥

ननु च क्रमेण कृतं युगपत्कृतमिति भेदेन प्रतीयते क्रमाक्रमावित्याशङ्क्याह ॥

कालस्याप्यपरं कालं निर्दिशन्त्येव लौकिकाः
न च निर्देशमात्रेण व्यतिरेको ऽनुगम्यते ॥ ८३ ॥

अद्य भवो ऽद्यतन काल, श्वो भवश्वस्तन काल इति लौकिकानां भेदव्यपदेशादविद्यमानोऽद्यतनो ऽनद्यतनो ऽस्तीति तद्विधौ भावो वचनादित्येवं समुदायावयवभेदे, परिकल्पनया कालतत्त्वस्यैकस्यैवाधाराधेयभेदेन निर्देशो दृष्टः। न चैतावता वस्तुतः कालो भिद्यते, वैकल्पिकत्वाद्भेदस्य। एवं क्रमाक्रमयोर्व्यतिरेकेण निर्देशे ऽपि न तत्त्वतो भावात्परस्परतश्च भेद इत्यर्थः ॥ ८३ ॥

एतदेव योजयति ॥

आधारं कल्पयन्बुध्या नाभावे व्यवतिष्ठते।
अवस्तुष्वपि नोत्प्रेक्षा कस्य चित्प्रतिबध्यते ॥ ८४ ॥

शत्रोरभावे सुखं, सुहृदभावे दुःखमरातिवर्गस्य, रागादिक्लेशराशावुत्साहः, आत्मभावे निर्वाणं मोक्ष इत्येवमादौ व्यवहारे समन्यन्यथानुपपत्त्या ऽभावे परिकल्प्याऽऽधारशक्तिं सुखाद्युपेयम्। न कश्चिदवतिष्ठते। अन्तर्भावितण्यर्थत्वाच्च कश्चिदवस्थापयितुमुत्सहत इत्यर्थः। कल्पयन्नपि वाऽऽधारभावं न कश्चिदभावे ऽधिकरणभूते स्थितिमानाधेयत्वं लभते। न तत्रास्य पदबन्धं वस्तुतो ऽवकल्पयतीत्यर्थः। नीरूपस्य सर्वसामर्थ्यविरहलक्षणस्याभावस्याधेयं प्रति स्थित्याधारभावायोगात्। उत्प्रेक्ष्य त्वाधारभावं व्यपदेशः प्रवर्त्तते। एवं अङ्गुल्यग्रे करियूथशतमास्त इत्यादि नोत्प्रेक्षयाभिधान दृश्यत इति नास्ति विकल्पानामभूमिरित्यत एव सामर्थ्यम् ॥ ८४ ॥

तस्माच्छक्तिविभागेन नित्यः सदसदात्मकः ।
एको ऽर्थः शब्दवाच्यत्वे बहुरूप प्रकाशते ॥ ८५ ॥

सर्वपरिकल्पातीतं तत्त्वं सम विष्टं सर्वाभि शक्तिभिर्ब्रह्म यथायथं व्यवहारे भावाभावरूपतया तत्तदुपाधिसबिम्बशब्दा. प्रतिपादयन्तीत्यभावाभिधायिनामपि भावशब्दैस्तुल्य. सम्बन्धो ऽविशेषाच्छब्दानामिति प्रकरणतात्पर्यमुपसंहृतम् । एक इति । भेदस्य भावनिरसेन प्रतिषिद्धत्वादंत एव नित्यो भावाभावात्कार्यकारणभावस्य निषेधात् । शब्दवाच्य इति । शब्दव्यवहारार्थ निमित्तसप्तम्या प्रयोजनकथनात् । बहुरूप इति । क्रमाक्रमादिरूपतया प्रागुक्तश्चाद्वयस्यैष तत्त्वस्य प्रकाशनात् । इत्थं च सांवृतो ऽय लोकयात्रासु पदार्थो योगरूढ इति तयैवास्मिञ्छास्त्रे ऽनुगम्यत इत्यविषयास्मानन किम् ॥८५॥

को विकल्प इत्याह ॥

व्यवहारश्च लोकस्य पदार्थैः परिकल्पितैः ।
शास्त्रे पदार्थः कार्यार्थं लौकिकः प्रविभज्यते ॥ ८६ ॥

विचारितमपि तर्कविकल्पैर्भावतत्त्वं न यथाविचार लोके व्यवहारमवतरति । तर्हि दर्शनान्तरव्यवस्थितविरुद्धभावरूपतानुगमाद्व्यवहार । यद्वा विचारेण यथातत्त्व पार्थक्य, निश्चय. कर्तुं । रूपणव्यपदेशाभ्यां च सदृशौ बालपण्डितौ परस्पराभिप्रायमेलने प्रवर्त्तेते इति गर्जानमीलितेनावधार्य पदार्थे याथातथ्यं व्यवहरन्तो लौकिका दृश्यन्त । इद च लौकिकानामेव शब्दानामनुशासनं शास्त्रं तदर्थं लोकप्रसिद्धैव पदार्थक्रिया समाश्रयणीयेत्यखण्डाद्वाक्यार्थात् क्रियावचनो धातु , सत्त्वप्रधानानि नामानि, प्रत्ययतीति प्रत्यय इत्यादिशास्त्रकार्यप्रतिनिर्द्धार्थं लौकिक एव क्रियाद्रव्यगुणादिलक्षणोऽपोद्धारपदार्थ प्रविभज्यत इति लोकयात्रायामेकयोगक्षमा. सर्वे शब्दा भावाभिमतार्थविषया इत्यर्थस्य प्रवाहनित्यत्वाच्छब्दोदाहरणमात्राच्च प्रतीतेर्नित्य शब्दार्थसम्बन्ध इति सिद्धम् ॥ ८६ ॥

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे
सम्बन्धसमुद्देशस्तृतीयः ।

तदेव ब्रह्मशब्दार्थयो सम्बन्धमुक्त्वा व्याख्यानोपयोगी पदार्थ शास्त्रे कार्यार्थं लौकिक प्रविभज्यत इत्युपक्षिप्त । ज्ञाति द्रव्ये हि सर्वशब्दानामर्थ इति सिद्धे शब्दार्थसम्बन्ध इत्यवार्थनित्यतासमर्थनार्थं पूर्वमुक्त । इदानीमन्वाख्यानाङ्गमपोद्धारपदार्थोद्रव्यगुणादिक समुद्देष्टव्य इति प्रविभज्यत इत्युक्ते तस्य कुत. प्रविभाग इत्याह ॥

संसर्गरूपात्मम्भूताः संविद्रूपादपोद्धृताः ।
शास्त्रे विभक्ता वाक्यार्थप्रक्रियापत्त्यर्थवत् ॥ १ ॥
निमित्तभूताः साधुत्वे शास्त्रादनुमितात्मकाः ।
केचित्पदार्था वक्ष्यन्ते संक्षेपेण यथागमम् ॥ २ ॥

निरंशस्य वाक्यस्यैव वाचकत्वात्तदर्थान्पृथक्त्वेन पदार्थो व्यवस्थाप्यन्त । स च वाक्यार्थसंसर्ग एव रूपमात्मा यस्य । तथा क्रियाकारकसङ्घिशेषणं संसर्गो वाक्यार्थ । एतेन च प्रविभाग बीजमाह । सर्वथा निरंशे वाक्यार्थे प्रविभजनीयरूपासावसंसर्गे तु युक्तं समुद्दार्थप्रविभजनम् । अत एव सम्भूता इत्याह । संसर्गावस्थायां सम्भवतो विद्यमाना इत्यर्थ. । तत समुद्दा विद्यमाना अपोद्धर्तुं शक्यन्ते । असतामियं, खलाकाकल्पानां च परस्परान्वयेनापोद्धारभावात्संवित्संवेदनम् । अपोद्धारबुद्धिस्वस्या रूपमात्मा । ततो हेतोरपोद्धृता पृथक् कृता । एतदुक्तं भवति । यद्यपि वाक्यार्थे पदार्था कदा चिदपि विवेकेन नावधार्यन्ते, तथा च कीदृश समर्ग, तस्य भेदपूर्वकत्वादिति । तथापि प्रतिपत्तृभिरनवस्थ युगपत्प्रत्येतुमशक्यत्वात्क्रमेणांशशिकया संवेदने भेदपूर्वक समर्ग व्यवहारात्तदभिप्रायेण तथैवापोद्धारबुध्या हि विविच्यन्ते ऽर्था । तथा पानकद्रव्ये गुणादिमात्रा विवेकशून्या । अथास्वादयितृभी रसनविज्ञाने विवेकेन पृथक्कृत्य व्यवह्रियते । यदा ऽनुरूपशब्दा आकारपर्याया. तदेव लब्ध्यापया । लब्ध्योपेया च सा संविद् कल्पनाबुद्ध रूपमाकारमाश्रयतीत्यर्थ । वाक्यार्थस्यानवस्थ झटिति प्रत्येतुमशक्तेरन्तरा पदार्थाकारबुद्धयो भ्रमास्तत्र दशाच्छतरीति, इति तद्बुद्धिनिविष्ट एव त्वाकारो द्वारमित्यध्यवसाया पदार्थत्वन पार-

कल्प्यते पूर्वकक्षायामुपायभूतायां । प्रतिपन्ने तु समस्ते वाक्यार्थे सामान्यमात्रस्य भिन्नेन सत्यभूतेन बाध । किमपोद्धारे प्रयोजनमित्याह । शास्त्रे विभक्ता इति । प्रत्यासत्त्या व्याकरणशास्त्र इत्यवगन्तव्यम् । अत्र हि लक्षणवाक्यानामुपायभावेन द्रव्यगुणादेर्येऽर्था विषयभागेनोपात्ता इति । वाक्यार्थादपोद्धार एतत्प्रयोजनम् । लक्षणं यथाविभागं नियतविषयमवतिष्ठतामिति । तथा ह्युपलक्षणत्वेनार्थानामङ्गभाव. शास्त्रे समाम्नातो न विधेयत्वेनार्थानादेशादिति लोकप्रसिद्धमर्थमनूद्य स्वरादिसंस्कारायोपदेश । प्रकृतिप्रत्ययार्थवदिति । प्रकृतिप्रत्यययोर्नामाख्यातविषययो. स्वार्थो ऽत्र काल्पनिक. । तेन यथा निरवशात्पदार्थात् प्रकृत्यर्थ. प्रत्ययश्चान्वयव्यतिरेकाभ्यां पदवादिभिरपोद्धियते तथा वाक्यवादिभिरखण्डाद्वाक्यार्थात्पदार्थ इत्युभयाश्रय्यपोद्धारः समान इत्यर्थः । निमित्तभूता इति । यत्तेषां निमित्तभाव शब्दसाधुत्वविषयो ऽसौ विभक्ता इत्यर्थ । ते चार्था द्विविधा लोकप्रसिद्धा वैशेषिकादिशास्त्रपरिभाषिताश्च । तत्र लोकप्रसिद्धा पशुरयं देवतेत्यादयः । ते चेह प्रसिद्धत्वादेव न परिभाष्यन्ते । ये तु शास्त्रान्तरे परिभाषिता. तेऽपि कार्यव्यवस्थया लक्ष्यन्त इत्याह । के चिदेव शास्त्रादनुमितात्मका इति । शास्त्रादस्मादेव । प्रत्यासत्तेः व्याकरणाख्यात्र वैशेषिकादे. । अनुमानेनाभिगत आत्मा स्वभावो लक्षणं येषामित्यर्थ । तथा ह्येकशेषारम्भाद्भेद्यत्वं द्रव्यलक्षणमनुमित द्रव्याणाम् । प्राधान्येन वाच्यत्वे शब्दभेदप्रसक्तेस्तदारम्भस्यार्थत्वाद्यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति वाक्यकारवचनादाश्रितत्वं गुणलक्षणमनुमितम् । जातिरपि भावप्रत्ययाभिधेयेति गुणो ऽभावेवमुपपद्यते । तथा द्योतो गुणवचनादिति । गुणयुक्तवान्गुणवचन इति गुणस्य भूतपूर्वत्वेन द्रव्यं प्रत्यार्थाभिधानं विशेषणत्वे सति कल्पते । कालस्यापि क्रियात्मकत्वलक्षणं भूते वर्त्तमाने भविष्यतीति चैषां धात्वर्थोपाधित्वेन विज्ञायते । संख्यायाश्च भेदानात्मकत्वं जात्याख्यायामेकस्मिन्निति वचनादवगम्यते । वैशेषिकप्रसिद्धाया गुणत्वेन द्रव्यं प्रति नियमाल्लिङ्गया. पूर्वं स नपुंसकमिति सामान्येन शब्दाख्याने ऽर्थस्याङ्गभावोपादानात्संज्ञाविशेषणयोर्लिङ्गलक्षणमनुमीयते । न हि स्वाङ्गादीनां लौकिकं स्त्रीत्वं गण्डादीनां च पुंस्त्वं कुरण्डादीनां च नपुंसकत्व सम्भ-

यति । शक्तिः साधनं द्रव्यमिति शेषव्यवहारात्कर्मकर्तृत्वोपगमाद्विभक्त्यर्थे ऽव्ययीभाववचनाच्चानुमीयते । द्रव्यस्य ह्येकस्वभावत्वात्साधनत्वे शेषभावः कर्तृभावश्च नोपपद्यते । विभक्त्यर्थे च द्रव्यस्यैव वृत्तेरधिश्रीति श्रीशब्दप्रयोगाभावात्कस्य केन समासः । उपसर्गाश्छन्दसि धात्वर्थे इत्यत्रार्थग्रहणं लिङ्गसंख्यावतो द्रव्यस्य प्रतिपत्त्यर्थम् । तस्यावेदनेनत्त्वमावेद्यते । अन्यथा स धन इत्यवोच्येन किमनेन । धातुकृतो ऽर्थो धात्वर्थ इति । पुरुषोपग्रहयास्तु पूर्वाचार्यव्यवहारादेव लक्षणप्रसिद्धिश्च । क्रिये तु लोकप्रसिद्धे एव । शास्त्रे ऽपि पूर्वादीनां व्यवस्थायामिति विशेषणात्पदार्थोपाधित्व तल्लक्षणमनुमीयते । क्रियाभिर्भूवादिवार्त्तिके भाष्ये पूर्वापरीभूता साध्यस्वभावानुमानगम्या आलक्षिताः पदार्था इति यद्यपि संसृष्टानामेव सर्वथा भावस्तथाप्यपोद्धृताः । अथैकैकस्य पदस्य गुणप्रधानभूता एवार्था । तद्यथा कथानस्य क्रियाकालसाधनसंख्यापुरुषोपग्रहा नामपदस्यापि द्रव्यलिङ्गसंख्या साधनानि क्रिया काल इत्यादिपदवाच्यत्वेन वा पदार्थतोपपत्ति । केवलानां पचत्यादिपदवाच्यत्वाभावात् । यथागममिति । यादृशो वैय्याकरणानामागमः तमनुलुप्य । व्याख्यातृणामुपदेशपारम्पर्यातिक्रमेण यस्य पदार्थस्य यस्मिन् व्याख्याने ऽङ्गभावः स कथ्यत इत्यर्थः ॥ १ ॥ २ ॥

तत्र गुणादीनां द्रव्यपरतन्त्रत्वात्प्रथमं तदाश्रय द्रव्यं लक्षयति ॥

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सो ऽर्थो भेद्यत्वेन विवक्षितः ॥ ३ ॥

इह सर्वनाम्नां त्रयी गतिः । वस्तुमात्राभिधायिनः के चित्यथा सर्वादयः । विशिष्टवस्तुवाचकाश्चान्य यथाऽन्यतरादय । तत्र पूर्वैर्द्रव्यं लक्ष्यते । तथा हीदं तदिति सर्वनामप्रत्यक्षमर्शयोग्य द्रव्यम् । इदमिति प्रत्यक्षार्थवाचकं, तदिति प्रमाणान्तरावगतपरोक्षार्थाभिधानं, तेन प्रत्यक्षपरोक्षार्थाकारपरामर्शेन वस्तुमात्रवाचित्वं इदन्तदोरुपादानेन सर्वनाम्नामुक्तं भवति । तथा च प्रत्यक्षपरोक्षाकारभेदावधारणेन वस्तुमात्रं तद्वाच्यं द्रव्यं लक्षितं भवति । प्रतिपिण्डस्वभावरूपतया स्वभावो द्रव्याणामशक्यो लक्षयितुमिति सर्वद्रव्यसाधारणलक्षणमेवमुच्यते वस्तुरूपतया सर्वत्र भावादतदेव निरुक्तकारेणाप्युक्तम् ।

अत इति यत्प्रतीयते तद् द्रव्यमिति । द्वितीयमपि विशेषलक्षणमाह । भेद्यत्वेन विवक्षित इति । सामान्यादिभिरुपाधिभिरवच्छेद्यत्वेन विशेष्यत्वेन वस्तु अभिप्रेतं इत्यर्थः । विवक्षितग्रहणेन च नार्थस्येदं लक्षणमपि तु शब्दार्थस्येत्याह । तथा च जात्यादिरपि विशेष्यत्वेन चेद्विवक्षित तदा द्रव्यमिति तीर्थान्तरीयद्रव्यलक्षणानादराद्यास्पिदर्शनेन सार्वत्रिकी द्रव्यपदार्थव्यवस्था सिद्ध्यति । यथा वाजप्यायनदर्शने जातिरन्वितप्रत्ययनिमित्तमपशब्दानामप्यर्थ । क्रियास्वप्यन्वितावभासप्रत्ययान्यथानुपपत्त्या जातिसिद्धि' । कथमन्यथा प्राप्त्यवस्थायां पचत्यर्थेभिन्न. प्रत्यय स्याद्विक्लेदस्यैव पचत्यर्थत्वे ऽधिश्रयणादीनां सामर्थ्य गम्यते । शब्दार्थत्वाभावाद्देवदत्तकर्तृत्वं न स्यात् हि तद्व्यापारोऽधिश्रयणादिर्धातुवाच्य । सामर्थ्यगम्ये च लकारवाच्यस्य कर्तृव्यापारे समन्वयाभाव. । इत्थ विक्लित्तेरेव धातुवाच्यत्वात्तदैव कर्मकर्तृवत्कर्त्ता स्यान्न कदा चिदपि कर्म । स चापि विक्लेदो ऽन्यलक्षणरूपोऽक्रमो नापि निराश्रितपौर्वापर्यस्यैवार्थस्य क्रियात्वादित्थमधिश्रयणादिरपि तत्रानुप्रविशत्येव । तावन्मात्रे ऽपि च पचतीति प्रत्ययोत्पत्तेरिति प्रतिलक्षण भिन्नप्रत्ययावसेया क्रियाजातिरङ्गीकार्या । एव भ्रम्यादिक्रियालक्षणव्यङ्ग्या भ्रमणत्वादिजातिरपि ग्राह्या । तत्राप्युपक्रम एव विशिष्टेच्छादि कारणजन्यकर्मक्षणवैलक्षण्यात्सादृश्याद् दुरवधारमिति तत्सामान्याभिव्यक्ति । तथा हि, क्रमवतामपि लक्षणानां स्पष्टास्पष्टत्वेन जातेरभिव्यञ्जकत्वम् । व्यक्तिद्वारकश्च साधनसम्बन्ध । तस्याः साध्यत्वाज्जातेर्नित्यत्वे ऽपि क्रियाजातेर्देहाभावे व्यक्तिद्वार क्रियासम्बन्धो गौर्दुह्यतामिति । अस्तिक्रियायाश्च साधनभेदात्कालभेदाच्च भेदाभिन्नप्रत्ययनिमित्तमपरं सामान्यं न विरुध्यत । नित्यत्वे ऽपि च सामान्यस्य प्रतिव्यक्ति निष्पत्तौ फलदानसामर्थ्यमिति, यजेतेति व्यक्तिनिष्पादनार्था चोदनार्थवती । विनश्यत्यपक्षीयत इत्यत्र तिरोधानमपक्षयश्च क्रियाजातराश्रयो ऽस्तु । तथैव शब्दनात्तस्य वाच्यत्वोपगमादन्यथा किमपेक्षं प्राधान्य स्यात्तथा च व्यापाराविष्ट तदेव वाच्यमस्तु । दर्शनान्तरे ऽपि हि न सर्वथा गुणभूतत्वेन तिरोभावो ऽस्य वृत्तावपि चोपमर्जनपदार्थस्यादेवदत्त' भवतीति सामानाधिकरण्याभावप्रसङ्गादिति पर प्राधान्यमेव सामानाधिकरण्यान्यथानुपपत्त्या ऽस्तु । सर्वनामप्रत्यवमर्शयोग्यत्व च सशय' पचतीत्यत्र इष्यत एव । भेद्यत्वमपि

(साङ्कृत्वा)?दिष्वविशेषेणापेक्षया सममस्त्येव। लक्षणानां च साम्प्रतिकव्यापारानपेक्षणाद्भेदयोग्यता भेद्यत्वमत्र। एवमाख्यत स्यायत इति, किमादिभि परामर्थान्मुखमित्येवमादिभिश्च विशेष्यत्वात् द्रव्यमित्याख्यानार्थोऽपि व्यक्तिदर्शने द्रव्यम्। ननु च क्रियारूपस्यैव भाव्यमानस्य प्रतीतेर्निष्पन्ननिष्पन्नयोश्च विरोधाद्भावनावचनात्तिवर्थसामर्थ्याद् द्रव्यप्रतिपत्ति सामर्थ्यलभ्या, न शब्दार्थ इति मीमांसका। असदेतदन्वयव्यतिरेकाभ्यां धातोरेव भावनावचनत्वात्प्रत्ययस्य च साधनाभिधायित्वात्साध्यसाधनभावेन च सिद्धासिद्धयोरप्यस्ति समन्वय। तथा च प्रकृतिप्रत्ययौ समभिव्याहारः। अन्यथा सामर्थ्येन लभ्ये क समन्वय। प्रतीयते च क्रियाविशिष्ट कर्त्तेति कथं सामर्थ्यलभ्य इति वैयाकरणानां साधनाभिधानं पर्यवसितविवादमेव। साधनं च शक्त द्रव्य न केवला शक्तिरिति द्रव्यार्थतासिद्धौ वादयो ऽपि द्रव्यक्रियात्मभूतसमुच्चयाभिधानेन द्रव्यवचना क्रियावचना वा। तेन पदार्थस्यापि तथैव व्यक्ताव्यक्तनिर्विकल्प गुणो ऽपि सामान्यविशिष्ट उच्यमानो द्रव्यपदार्थ इत्येकदेशरूपादयो लक्ष्यन्ते। तथा समानाधिकरणन समानेन द्रव्येणेति व्याख्यातम्। समानेन गुणेनापि समासो भवति सर्वगन्ध एकरस इति। नन्वेव विप्रतिषिद्ध चानधिकरणवाचीत्यद्रव्याधिकरण द्रव्यमिति शीतोष्ण सुखदु खमित्येकवद्भाव. कथमुदाहृत। शीतादीनामनेन लक्षणेन द्रव्यवचनत्वादनधिकरणवाचीति पर्युदासो न प्राप्नोति। अत्रोच्यते सुबन्तावयवस्य द्वन्द्वस्यैव विधानात्सुबन्तस्य च सर्वस्य जात्युपहितद्रव्यवचनत्वेन अधिकरणवाचीति प्रतिषेध. सार्वत्रिक. स्यादिति विधेर्निर्विषयत्वमायातमिति विधिसामर्थ्यात्प्रतिषेध. प्रसिद्धद्रव्यविषयो विज्ञायते।शीतोष्णे उदके स्त इति। प्रसिद्ध हि लोके क्रियावद् गुणवत्समवायिकारणं द्रव्यमिति तद्वाच्ये च पर्युदस्येते। तथा च शीतोष्णादेरुदकादिद्रव्यवाचित्वे न भवत्येकवद्भाव। शैत्यादिगुणवाचित्व एव भवति। एवं समर्थवार्त्तिके, अथ हि गुण. पदार्थो भवति। सामर्थ्य हि वीरत्वं गुणो ऽन्य. पुरुषत्वमिति वीरशब्दस्यानेन लक्षणेन द्रव्याभिधायित्वे ऽपि द्रव्योपसर्जनभूतस्य परतन्त्रस्य स्वार्थस्य सामर्थ्यविषयस्याभिधानात्ससर्गादिलक्षणलक्षितगुणाश्रयेणाभिधा। तथा हि पुरुषत्वमप्येवम्। तत्र गुणमाह। लौकिकप्रक्रियया जातिरूपमपि, तस्य भाव इत्यत्राभिप्रायादावतिप्रसङ्गपरिहा-

रार्थे यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेश इत्युक्ते द्रव्यगुणयोरत्यन्तमभेदे सति द्रव्यगुणयोरत्यन्तमभेदे सति द्रव्यगुणयोरत्यन्तमभेदे सति

इदानीं गुणस्य शास्त्रीयलिङ्गानुमितं लक्षणमाह ॥

संसर्गि भेदकं यद्यत्सव्यापार प्रतीयते ।
गुणत्वं परतन्त्रत्वात्तस्य शास्त्र उदाहृतम् ॥ १ ॥

संसर्गि, आधारेण सत्पृक्तरूपसम्भेदेन वर्त्तमानं न सम्बन्धिमात्रेण। अत एवाश्रयान्तरावच्छेदमाधारस्य करोति शुक्लो ऽयं नील इति। एवं गौरयं नाश्व इत्यत्राश्रयान्तराद्यवच्छेदे गोत्वमपि गुणो भवति।तथा यद्यदिति वीप्सापदेन सर्वस्यैव प्रकारस्य सामान्यादेरपि गुणत्वमिति परिभाषा कथयन्, नेद वस्तुरूपाव्यस्थितमिति सूचयति।अनेन चावच्छेदकस्य गुणस्य विशेषमाह। सव्यापारम्। अवच्छेदकरूपेण प्रतीयमानगुणव्यपदेश्यं न रूपान्तरेणेत्यर्थ । यदेवंगुणं तस्य गुणत्वमिति सम्बन्धः। ननु किमय परिभाषैव गुण इति, अथ निबन्धनमात्रास्तीत्याह। परतन्त्रत्वादिति। लोके हि परतन्त्रो गुण इत्युच्यते। प्रतीतिरियं न परिभाषामात्रमित्यर्थः। तथा च लौकिकस्यैवाय लक्षणस्य वैशेषिकप्रसिद्ध्यपकरणायानुवाद इत्युक्त भवति। इत्थं च वीप्सा सफला। शास्त्र उदाहृतमिति। व्याकरणे व्याख्यानवाक्यानां लौकिक एव गुणो गृहीत इत्यर्थ। तथा हि, समर्थवार्त्तिके समानाधिकरणेषूपसङ्ख्यानम्। समर्थत्वाद् द्रव्य पदार्थ इति वदन्ति, वीरपुरुष। द्रव्ययोरत्यन्तभेदात्सामर्थ्याभावे द्रव्यपदार्थपक्षे समासाभावश्चोदित'। अथ हि गुणः पदार्थो, भवति सामर्थ्यम। अन्यो हि वीरत्वं गुण , अन्य' पुरुषत्वमिति। जातेरपि पारतन्त्र्याद् द्रव्ये समवायाद् गुणत्वमुक्तम्।तथा च गुणभेदात्प्रतीयमानद्रव्यैकत्वाश्रयं सामर्थ्यमिति सिद्ध समासस्तथा यस्य गुणस्य भावाद् द्रव्ये निवेश इति भेदको गुणो भेद्यं द्रव्यमित्येतदेव लक्षणमनुसृतम्। तथा हि। विशेष्यमात्रवचनाद्विशेषणमात्रवचने गुणे भावप्रत्यय। गोशब्दस्य जात्यवच्छिन्नद्रव्यवाचित्वे जातौ गोत्वमिति, जातिमात्रवचनत्वे तु शब्दस्वरूपे व्यभिचारिणि प्रवृत्तिनिमित्ते, तस्य च वाच्यत्वं च सर्वमवोपपादितम्।स्वरूपेण हि परमुपरञ्जयद्विशेषणमाश्रयाश्रयं जात्यादिगुणः।तथा स्वरूपावेशेनार्थं प्रत्याययत' शब्दस्य स्वरूपमुपरञ्जकत्वाद् गुणः प्रवृत्तिनिमित्तमर्थं तत्र रूपाध्यासेन चार्थप्रतीति। अभिधाव्यापारविशिष्टस्यैव न वाच्यत्वमपि तु साधारणस्य प्रयोगगतस्य। यथा रक्ते गुणे तत्त्वमित्यादिना च सम्बन्ध उपपा-

दित । शुक्लादीनां गुणावच्छिन्नद्रव्यवाचित्वे शुक्लत्वमिति गुणे भाव-प्रत्यय ।गुणाभिधायित्वे जातौ, तद्वाचित्वे पूर्ववत्स्वरूपे । एवं चाद्यायां शब्दप्रवृत्तौ डित्थादीनामपि स्वरूप एव भावप्रत्यय । स्वरूपाध्यासेन संज्ञया सन्निधायनात्तदेव तत्र प्रवृत्तिनिमित्तम् । तदेतत्स्याद्डित्थत्वमिति तु क्रियागुणाध्यासादन्यत्र प्रवृत्तौ डित्थत्वसहचरितयो क्रियागुणयोर्भावप्रत्यय ।तथा क्रियागुणयोरभेदाध्यासाभिप्रायं डित्थत्वम् । तदेतादृति भाष्यं यद्योत्पत्तिप्रभृत्याविनाशात्पिण्डस्यावस्थान्तरे ऽपि । प्रत्यभिज्ञाप्रत्ययनिमित्त जातिरेव भावप्रत्ययवाच्या, आद्यायां शब्दप्रवृत्तौ । राजपुरुषत्व पाचकत्वमौपगवत्वमित्यादौ तु सम्बन्धो यथायथं स्वरूपेणोपरञ्जक प्रवृत्तिनिमित्तं भावप्रत्ययाभिधेयम। विशिष्टसम्बन्धावच्छिन्नो हि सम्बन्धी प्रतीयते । तन्त्रेति । सम्बन्धस्यैवोपरञ्जकत्वाद् गुणत्वं भावप्रत्ययवाच्यता । न हि राजादिसम्बन्धानवच्छिन्न पुरुषादि. प्रतीयते, अपि तु तत्सम्बन्धावच्छिन्न. । भेदस्य चादभूतत्वाद्भेदाधिष्ठान सम्बन्ध एव प्रवृत्तिनिमित्तमभिहितो ऽन्तर्भूत । यत्र तु सम्बन्धानुरक्ता प्रतीति. भेदस्य च तिरोधानं तत्र सम्बन्ध एव जात्यादिप्रवृत्तिनिमित्त गुणो, गोत्व शुक्लत्वमित्यादौ भावप्रत्ययवाच्य' । अत्र हि न समवायोपरक्ता प्रतीति , अपि तु जाति गुणोच्छुरिता । द्रव्ये समवायवशात्तिरोहितभेदे, सम्बन्धस्तु जातिगुणयोरावारावच्छेदक । हस्तित्वमित्यादौ रूढिविषये जातिरेव वाच्या । एवं कुम्भकारत्वमित्यादौ । अत्र हि शब्दव्युत्पत्तिनिबन्धन सम्बन्धो जातिरेव शब्दवाच्या। सत्तेत्यत्रापि सतासतो सम्बन्धस्याव्यभिचारादनवच्छेदकत्वे जातिरेव भावप्रत्ययवाच्या। तदुक्तम् । समासकृत्तद्धितेषु सम्बन्धाभिधानमन्यत्र रूढ्यभिन्नयोर्गव्यभिचरितसम्बन्धेष्य इति । इत्थमत्र विशेषणं स्वरूपेण परामृपरञ्जयत्सूत्र भावशब्देन प्रतिपादितम् । भवत्यस्मात्तेनाकारेण द्रव्यमिति भाव । तथा हि पित्वङ्गवाकारेण द्रव्यं प्रतीयते शुक्लादिगुणात्तदाकारणेति परोपाधिमन्तरेणार्थानामव्यवहार्यत्वेनासत्कल्पत्वात्तत्र च विशेषणेनाभेदमापादितं शब्दो ऽभिधत्त इति शब्दप्रवृत्तिकारणमपि भेदात्मकसम्बन्धि। तेन यस्य गुणस्य भावादित्यत्र पक्षे ऽवाचिनी प्रकृति , गोर्भावो गोत्वमिति। यस्मात् सर्वे भावा. स्वेन भावेन भवन्ति स्वे षां भाव इत्यत्र पक्षे शब्दवाचिनी प्रकृति , गो-

शब्दस्य भावो गोत्वमिति । तथा हि सर्वे भावा सर्वे शब्दा स्वेन भावेन भवन्त्यस्मादिति व्युत्पत्त्या प्रवृत्तिनिमित्तलक्षणेनार्थेन भवन्ति । अनेकार्थत्वाद्धातूनां भवत प्रयोगवचनत्वात्प्रयुज्यत इति । स प्रवृत्तिनिमित्तलक्षणो भावस्तेषां शब्दानां प्रत्ययवाच्य इति तच्छब्दवाच्या शब्दात्मिका प्रकृतिरत्र पक्षे भवति । तदेवं गुणलक्षणमात्र शास्त्र उदाहृतम् । यत्र त्वस्य गुणस्य न ग्रहणं शास्त्रे, तत्र युक्तिर्वक्तव्या । तथा हि । वोतो गुणवचनादित्यत्र नायं गुण प्रातिपदिकाधिकारात् । स्त्रीत्वस्य च धर्मत्वाद् द्रव्याभिधायिन्येव किं चिन्प्रातिपदिके गुणवचनाद् गृह्यते । गुणयुक्तवान्गुणवचन इति पटवादिभ्यो गुणापसर्जनेभ्यो द्रव्यवचनेभ्य प्रत्यय । गुणश्चात्रोपसर्जनभूतो न संसर्गादिलक्षणो, जातिशब्देभ्यो ऽपि प्रसङ्गादिति परिभाषितो ऽसौ गृह्यत एव । निविशते चेतीत्यादि । नन्वेव वैशेषिकप्रणीतस्यैव गुणस्य ग्रहण स्यादिति पटवी मृद्वीत्यादावीकारो न स्यादेष दोष । पाटवादीनामन्यस्य लक्षणस्य सम्भवादेतदर्थमेव ह्यय परिभाषा ऽऽरब्धा । अन्यथा प्रतीतिबलादेव रूपादीना गुणत्वमिनीयमनर्थिका स्यात् । गुणवचनब्राह्मणादिभ्य इत्यत्रापि पारिभाषिक एव गुणो गृह्यते । तथा हि वाक्यकारेण अर्थवत्प्रातिपदिकगुणवचनसज्ञायां हि वार्त्तिका समासकृत्तद्धिताव्ययसर्वनामासर्वविभक्ति जातिरेकद्रव्योपदेशिसङ्घादिरिति समासादिसज्ञा समारब्धा । तथा च समासादिविधिर्प्रातिपदिकं व्यतमुत्पादयति । अत एव च ब्राह्मणादिग्रहणमप्युपपद्यते । ब्राह्मणशब्दस्य तद्धितान्तत्वाद् गुणवचनसङ्घावान्माणवशब्दो ऽपि तद्धितान्तो मनोरपत्यमिति । तथा वाडवशब्दोऽपि वडवाया वृषे वाच्य इति । अर्हतां नुमिति तु कृदन्तत्वात् । एवमन्यदपि ब्राह्मणादिगणे गुणवचनसङ्घासाधक याज्यमिति । तत्रापि व्यद्यथास्यादिति ब्राह्मणादिग्रहणम् । ये चाप्यमी बाधका प्रत्यया लानपि बाधित्वा व्यद्यथास्यादित्यपि ब्राह्मणादिग्रहणमुपपद्यते । तथा हि ब्राह्मणशब्दस्याव्युत्पत्तिपक्षे प्राणभृज्जातीत्यण् प्राप्त । माणवबाडवयोर्गोत्रत्वाद् गोत्रचरणादिति वुञ् प्राप्नोतीत्येवमन्यत्राप्यूह्यम् । येषा तु च तांडतांडसमावायी कश्चिदपवाद तेषामत्र प्रपञ्चार्थ पाठ । सूत्रकारमते तु गुणमुक्तवान्गुणवचन इति गुणोपसर्जनद्रव्यवचनो वचनग्रहणादत्र गृह्यते। तृतीया तत्कृतार्थेन गुणवचनेनेत्यत्रापि खण्डादिस्तृतीया-

थैकृतः कश्चिदेव गुणोपसर्जनो द्रव्यविशेषो गृह्यते । खण्डनगुण-योगादि द्रव्य खण्डशब्दवाच्यम । संख्याया गुणस्य निमान इत्यत्र समभागो गुणो ग्राह्य. । न यथोक्तलक्षण. नापि सत्त्वे निविशत इ-त्यादिलक्षण. । द्विमयमुदश्विदिति द्वौ समौ भागौ यत्रानां निमा-नमेकस्योदश्वितः क्रीयमाणस्येत्यर्थ. । साऽपेक्षत्वे ऽपि गमकत्वाद् वृत्ति. । दृष्टश्च समवायवचनो गुणशब्द. । यथा त्रिगुणा रज्जुरिति । गुणवचनेभ्यो मतुपो लुगित्यत्र मत्वभिन्नरूपो गुणमभिधाय तद्वति वर्तते शब्दशक्तिस्वाभाव्यात् गृह्यन्ते शुक्लादय । तथा चाव्यतिरेकात् सिद्धमिति प्रकृत्याख्यानमभेदादाचार्ययोग्यताश्रयेण । तेन रूपादय-स्तद्योग्या निवर्त्तिता भवन्तीति मत्वर्थीयोपाधा एव तद्वति ते साधवो रूपवान् घट इत्यादि । प्रकारे गुणवचनस्येत्यत्र सर्वस्यैव पदस्य द्वि-र्वचनमिति स्वतन्त्रगुणोपसर्जनं द्रव्यं पट्वादि गृह्यते । पूरणगुणेत्यत्र गुणशब्देनार्थग्रहणाभिसम्बन्धादेतेषां तावत्प्रत्ययनं नास्ति । आश्रित-मात्रस्या ऽपि धर्मस्य संसर्ग्यादिलक्षणस्य परिग्रहे द्रव्यसामर्थ्याद्य-सिद्धि । तस्मात्सत्त्व निविशत इत्यादिलक्षणो गुणो गृह्यते । स च वै-शेषिकशास्त्रप्रसिद्ध । तथा हि पार्थिवादीनां रूपादीनामपि सयोगादु-पजनापायौ द्रव्ये स्तः । कालाकाशात्मसु परममहत्त्वादीनां चाक्रिया-जन्यत्वमपीति, व्याप्यते तेन लक्षणपदार्थ । तथा च रूपादिभिरपि प्र-तिषेधः प्राप्त., तत्स्थैश्च गुणैरिति प्रतिप्रसव आरभ्यते । तदर्थेन सह विधेरसम्भवादभेदेनार्थ शब्दस्य व्यपदेश । तस्मिन्गुणात्मनि ये गुणा व्यवस्थिता तद्वाचिभिरिति । द्रव्यपारतन्त्र्याच्च गुणानां वास्तवस्वा-त्मन्यवच्छिन्नत्व नोपपद्यते इत्यभिधाव्यापाराश्रयो ऽय व्यवहार. । शब्देन केषां चिद् गुणानां स्वात्मप्रतिनिष्ठानां प्रत्यायनात् । स चायं रूपादिशब्दानां द्रव्यशब्दैरसमानाधिकरणानां प्रकारो घटते, द्रव्यं प्रति गुणभावाप्रतिपत्ते । इत्थं घटरूपं कपित्थरस. चन्दनगन्ध. यव-नस्पर्श. कन्यास्वन इत्यादिसमास. साधु । ये तद्द्रव्योपसर्जनत्वेनो-च्यमाना दृष्टा. ते तत्स्थविशेषणेन व्यवच्छिद्यन्ते शुक्लादय. । शुक्ल. पट इति हि द्रव्यसामानाधिकरण्येन प्रयोगो ऽस्ति । ततश्च ते प्रतिषेधविष-या. । पटस्य शुक्ल इति षष्ठ्या विशेष्यमाणस्य सर्वस्यैव गुणस्य स्वा-त्मनावस्थितत्वेन बाधान्यात्सर्वावस्थासु न समाश्रयणीयम । शुक्लाद-यश्च क चिद्तत्स्था इति विधेरपाकृता. प्रतिषेधभाज. । एवं शौक्ल्यादयो

ऽपि। शुक्लशब्दाद् गुणे भावप्रत्ययोत्पादाद् द्रव्योपमर्जनशुक्लगुणाभिधानात्। यो हि कस्या चिद्व्यवस्थायां द्रव्योपमर्जनो गुण स ऽत्र तत्स्थविशेषणेनाभिधीयते । तथा च शुक्ल गुणा इति शौक्ल्यशब्देनापि तस्य प्रत्यायने व्यवच्छेद एवमुपलक्षणे शब्दभेदस्यानङ्गत्वाद्यैवं रूपवान्घट इत्यपि द्रव्यसामानाधिकरण्यात् । रूपादयो न तत्स्था । नैतदस्ति। न रूपमात्राद् द्रव्यविशेषणं किं तु सम्बन्धो भेदविवक्षाया मत्वर्थसम्भवाद्विशेष नयन्नपि चावैयर्थ्यकरणेन गुणो, द्रव्यात्मनि अनध्यासात् न स्वात्मनि स्थितिं सहते । न हि राजपुरुष इति राजपुरुषमवच्छिन्दन्नपि तन्मयतां भजते । तस्मात्तदस्य रूपमस्यास्तीति प्रतीस्योरभेदात्सर्वदैव तत्स्था रूपादय । सूत्रेण वचनशब्दस्यानुपादानात् ये गुणमुक्त्वा तद्वति न वर्त्तन्त अपि तु गुणमात्रमभिदधति ते सम्प्रति स्वातन्त्र्यादगुणा अपि वृत्तयन्तरे दृष्टगुणभावा गृह्यन्ते इति । शुक्लद्रव्य एवैवप्रकारा गृह्यन्ते न रूपादय इति सूत्रार्थः एवं वाक्यनानत्वव्याख्यात । अत एव ब्राह्मणस्य शुक्ला इति प्रकरणापेक्षस्यैव निर्ज्ञातत्वान्मति सामर्थ्ये समासप्राप्तौ नेदं साम्प्रतिकगुणरूप प्रतिषेधोदाहरणम।गुणमात्रवृत्तेर्गृहीतत्वात्तत्र भूतपूर्वगत्याश्रयणमेव युक्तमाघृतस्य तीव्रश्चन्दनस्य मृदुर्गन्ध इति प्रकरणादिवशात्तीव्रादेर्गन्धादिविशेषणत्वे निर्ज्ञाते गन्धादेर्विशेषस्य तत्त्वात्तत्र तद्विशेषणस्यापि तथात्वाशङ्कायाम् । ननु तद्विशेषणैरित्यपरं वाक्यं तीव्रादयस्तीव्रं घृतमित्यादौ दृश्यन्तरे द्रव्यसामानाधिकरण्यात्तत्स्वत्वाभावस्फुटीकरणा । तेन शुक्लादि तीव्रादि सौम्यप्रतिषेधविषय एवेति स्फुटीकृत । ईषदकृते त्यत्र वाक्यमीषद् गुणवचनेनेति । तत्र प्रसिद्ध एव गुणो ग्राह्य।सूत्रार्थप्रदर्शनं हीदम्।तथा हि ईषच्छब्दोऽपह्नासवचन इति तद्वदभिधायिना तस्य समास ।अपह्नासयोगी च क्रियागुणलक्षणोऽर्थ ।जातिद्रव्ययोस्तद्भावाज्जातेर्नित्यत्वाद् द्रव्यस्य सिद्धस्वभावत्वात्तत्राकृतेति पर्युदासात्क्रियावाचिनां ग्रहणमिति गुणवचनपरिग्रह. सूत्रार्थ एव । यद्येवमीषद्गार्ग्य इत्यत्र नैवास्ति प्रसङ्गो ऽपत्यजातेरपह्नासायोगादितीह मा भूदीषद् गार्ग्य इति भाष्ये व्यवच्छेद्यं कथमुक्तम। यथा कथं चित्समर्थनीयमेतत्तथा हि । यथा गार्ग्यतर इति प्रकर्षस्य जातेरयोगादेकार्थसमवेतक्रियागुणनिमित्तत्वमवस्थाप्यते तथा ऽपह्नासोऽपि सम्भाव्यतेति युक्तमेतत् व्यवच्छेद्यम्।एतत्तु न सम्.क् प्रकर्षस्य

श्रूयमाणार्थसमवत्वनासमर्थवाद्युक्तं, यत्प्रतीयमानक्रियागुणनिमित्तस्वम् । समासस्तीपस्थिकुल इत्यादौ सावकाश इति कथमत्र प्रसञ्जेत् । यदपि भाष्यम्, अकृतेऽपि ह्युच्यमाने इह न स्यात्समास ईषत्कडार इति तदपि कथम् । मात्रमात्रार्थैवात्र क्रियाकारकसम्बन्ध प्रतीयत इत्यव्युत्पन्न पचाद्यमूकेवल स्वरवर्णानुपूर्वीज्ञापनाय गडे कडचेत्येवमसत्येव व्युत्पात्तराश्रि ।। तस्मात्सूत्रार्थदर्शनपरत्वेनैवैतद् भाष्य व्याख्येयम् । गुणवचनत्वादत्र समास इति । अजादीगुणवचनादेवेत्यत्र सत्त्व निविशत इत्येव लक्षणो गुणो गृह्यते न तु सत्तगोदिलक्षण । एवं हि सर्वस्य उपाधिविशिष्टार्थाभिधायकत्वात्प्रातिपदिकमात्रात्प्रत्यये गुणवचनग्रहणमनर्थक स्य द् । नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिता इत्यत्र सत्त्वगादिरूप एव गुण अ श्रीयते । तथा हि नञ उत्तरपदि सम्पाद्यर्हार्थतद्धितप्रत्ययान्तानि गुणप्रतिषेधे नोदात्त नि भवन्तीति सूत्रार्थ । अत्र प्रतिषेधभाजश्चत्वार , प्रकृत्यर्थः, प्रत्ययार्थ , तदुपाधि सम्बन्धो, वाक्यार्थरूप इति । तत्र गुणप्रतिषेध इति वचनादकर्णवेष्टकि मुखमित्यत्र कर्णावेष्टकादन्यदाश्रीयते नापि तदभाव किं तर्हि कर्णवेष्टकाभ्यां न सम्पद्यते मुखमित्येवं रूपस्य प्रतिषेधो नञा क्रियत इत्यस्य वाक्यार्थस्य सौमुख्यस्य सम्पद्यमानस्यावच्छेदिका सम्पत्तिरुपसर्जनमुपाधिभूता सा प्रतिषेध्यते । तदा च प्रकृत्या कर्णवेष्टकशब्देन तस्यासम्बन्धादसमर्थसमासो ऽस्मादेव ज्ञापकादवसेय । सत्यपि च प्रतिषेधे आद्यविभिपदोपात्तार्थनिबन्धनत्वात्तद्धितो भवत्येव । तदुत्तरकालं तु पदान्तरेण नञा प्रतिषेधो बहिरवा यक शब्दसंस्कारस्यान्तर्गतस्य । तथा च ग्राम न गच्छतीत्यादौ क्रियाप्रतिषेधे ऽपि कर्मादौ द्वितीयादयो भवन्त्येव । वाक्यार्थस्य कर्णवेष्टकाभ्यां सम्पद्यते मुखमित्यत्र रूपस्य प्रतिषेधो नञ क्रियत इत्यस्य । वाक्यार्थश्च सामान्ये वर्त्तमानानां पदानां विशेषे ऽवस्थापक सम्बन्ध । स च पदार्थविच्छेदकत्वाद्रूपमर्जन गुण इत्युच्यत । सम्बन्धस्य निवर्त्तमाने प्रकृतिप्रत्ययार्थे ऽपि सम्बन्धिनो निवृत्तिपर्यायत्वात् । अत्रापि पक्ष प्रकृत्यर्थासम्बन्धेन न समासो ऽस्मादेव ज्ञापक द्विजेन । असामर्थ्य च प्रकृते प्रत्ययार्थसापेक्षतया । सापेक्षस्यासामर्थ्यात्प्रत्ययार्थसम्बन्धेत्यनेन दोष । प्रधान हि तदा प्रत्ययार्थ प्रधानस्य सापेक्षस्यापि भवत्येव वृत्ति । अन्ये त्वाहु । प्रकृत्यर्थो ऽत्र

प्रत्ययार्थे प्रत्युपसर्जनत्वाद् गुण इति भाष्यकारमतमुन्नीयते । तथा हि, न नञ्पूर्वात्तत्पुरुषादित्यत्र भाष्यकारेणोक्तम् । आचार्यप्रवृत्तिर्ज्ञापयति सर्व एव तद्धिता सापेक्षाद्भवतीति यदयं नञो गुणप्रतिषेधे सम्पाद्यर्हेत्यादिकमाहेति । तथाहि, न पृथोर्भावो ऽर्थोऽपार्थमप्रथिमेति प्रकृत्यर्थः प्रतिषिध्यते तत्र । तथा चासामर्थ्यात्तद्धिता नैव स्यात्समर्थेना प्रथमाद्धिति वचनात् । अतो ज्ञापकेनायमर्थ उक्तः । तत्र च यथा प्रतिषिद्धस्य पृथोर्भावः पृथोर्वाऽन्यस्य भाव इत्ययमर्थः । तथा प्रतिषिद्धाभ्यां कर्मवेष्टकाभ्यां संपादि मुख ततो वान्येन सम्पादीत्येवं प्रकृत्यर्थेन तत्र सम्बन्धादिदमवसीयते प्रकृत्यर्थो गुणत्वेन भाष्यकारस्याभिमत इति । एतच्च न युक्तम् । प्रधानाप्रधानसंज्ञयौ प्रधान एव कार्ययोग इति संपद्यमानार्थविषयः प्रतिषेध एव सम्पत्तेर्युक्तो नाप्रधान प्रकृत्यर्थे । एक पदोपात्तो नार्थो ऽन्तरङ्गः सर्वगो भवतीत्यतो ऽपि सम्पत्तिरेव गुणो युक्तो न पदान्तरोपात्त प्रकृत्यर्थो विप्रकृष्टो ज्ञापक च न्यायानुवर्त्तक न ज्ञापनकारकम् । ततश्च प्रधानाभिसम्बन्ध प्रकृत्या न स्यात्समासो ऽसामर्थ्यादिति ज्ञापकेन प्रकृतेरुपश्रितसमासाया प्रत्यया ज्ञापितो भाष्यकारेण । तदेव पूर्वदर्शित एव सूत्रार्थो युक्तः । अर्हैतिकमित्यत्रार्हार्थेतद्धिता वोदाहार्याः । अवसीयत इतीत्यर्थे । अमुष्मात्परायिकमित्यत्र मत्वर्थे सम्पराया च्छन्दसीति तद्धिते । अनयादिशा अन्यत्रापि गुणप्रदेशे सूत्रवार्तिकेषु गुणस्वरूप व्याख्येयमित्यन्दिङ्मात्रमिह प्रदर्शितम् । अतिशायनसूत्रे भाष्यं, प्रातिपदिकार्थो वै द्रव्यं न च द्रव्यस्य प्रकर्षोस्ति । एवं तर्हि गुण प्रातिपदिकार्थ ॥ १ ॥

ननु षष्ठ्यर्थमपि प्रकृत्यर्थत्वात्र कुतः । एतस्य गुणस्य प्रकर्ष इति तन्नैतदुक्तम् । यस्यास्ति प्रकर्षः तत्प्रतिकर्षे भविष्यतीति भय वै प्रातिपदिकार्थ इति यद्धिङ्गसंसर्ग्यादिलक्षणो गुणो गृह्यते स हि द्रव्यापसर्जनभूत शुक्लादिप्रातिपदिकेन प्रत्याय्यतेतत्र च गुणस्यैव प्रकर्षो ऽस्ति न द्रव्यस्येत्यत्र कारण च वक्तव्यम् । शब्देन निष्पन्नरूपस्य द्रव्यवद् गुणस्यापि प्रतिपादनात्करणापन्नगुणावयवगुणवत्कार्यद्रव्यमपि कथ न प्रकृष्यत तथा गुणत प्रतीयमानः कश्चिदसिद्धीयगुणानपेक्ष एव द्रव्यस्य प्रकर्ष इत्यत्रापि कारण वक्तव्यम् । एकस्मिन्नप्यर्थे बहुनरोपाधीनां सम्भवान्नियमेनैकस्योपादानमयुक्तम् । सर्वत्र द्रव्यातिशायनास्पन्दं स गुण सम्बन्धिनियत इत्ये-

तत्कथम् । न हि गुणो निर्गुण इति वचनात्सामान्येषु वा स्वच्छेदको नास्ति । नि: सामान्यानीति सिद्धान्तात्तथा कर्मादिष्वपि नास्ति गुण इति तत्र किंनिबन्धन: प्रकर्षो भवेत्कथ चाऽन्यस्मिन्प्रकृष्यमाणेऽन्यस्य प्रकर्षो युक्त इत्येतदपि वक्तव्यम् । न अर्जुने शौर्येणेव चैत्रः । तथा द्रव्य च प्रकृष्यमाणं लोक: प्रत्येति शब्दादित्येतान्विकल्पान् क्रमेण निवारयितुमाह ॥

द्रव्यस्याऽव्यपदेश्यस्य य उपादीयते गुणः ।
भेदको व्यपदेशाय तत्प्रकर्षो ऽभिधीयते ॥ २ ॥

इहोपाधिविवेकेन निरूपयितुमेव न पार्यते द्रव्यं । न हि सामान्य विशेषार्थ विना व्यक्षयितुमिदन्तया शक्यते । यद्वस्त्वेतेन रूपेण निरूपायितुमपि न शक्यते तत्कथं स्वत: प्रकर्षेण युज्यते अतो ऽव्यपदेश्यस्येति । स्वत: प्रकर्षाभावे सामानाधिकरण्यच्छलेन हेतुरूपात्तु । तदित्थं समर्गिधर्मनिमित्त: प्रकर्ष: । गुणादिभिरेव संसर्गिभिर्विशेष्यमाण द्रव्य जातीयात्प्रकृष्यते । तत्र संसर्गिणो गुणादयो बहव: सन्निहिता इति किङ्कृतो ऽतिशय इत्याह । य उपादीयते गुणो भेदको व्यपदेशायेति । द्रव्य व्यपदिष्ट व्यवच्छेदको ऽन्यस्माद्यो गुणादुपादीयत शब्देन गृह्यते तत्कृत: प्रकर्ष प्रत्ययवाच्य: । न त्वनभिधीयमानापरसन्निहितगुणादिनिमित्त: । तस्य प्रतीयमानस्यानेकत्वाच्चियमकारणाभावात्प्रतीतेरुपप्लुवमानत्वाद् बहिरङ्गत्वादभिधीयमानस्तु गुणो ऽन्तरङ्गो नियतप्रतीति: । यदावेशेन हि द्रव्यमभिधीयते तदात्मन एवानिश्चयमानता नान्याया प्रकृत्यर्थत्वोपाधित्वादतिशयस्य । अभिधीयमानस्यैव च प्रकृत्यर्थत्वाद् गुणो भेदक इति स्वशास्त्रलक्षितं गुणरूपमत्र गृह्यते इत्याह । संसर्गि भेदकं यद्यदिति हि लक्षणम् । भेदकत्वं चात्र मुख्यं गुणलक्षणम् । असमवेतस्यापि दण्डस्य दण्डिव्यवच्छेदेन । तदेव शुक्लेनर: पट इति शुक्लगुणनिमित्तो गन्धरसादिप्रतीयमानगुणनिमित्त ॥ २ ॥

यथा च निरुपाधिता द्रव्यस्य प्रकर्षो नास्ति तथा द्रव्यान्निष्कृष्टस्य स्वतन्त्रस्य गुणस्यापि शुक्लनर रूपमिति स्वत: प्रकर्षो नास्ति अपि तु तदवस्थायां द्रव्यमाणत्वाद् गुणस्यापरसम्बन्धनिमित्त एव प्रकर्ष इत्याह ॥

सर्वस्यैव प्रधानस्य न विना भेदहेतुना।
प्रकर्षो विद्यते नापि शब्दस्योपैति वाच्यताम् ॥ ३ ॥

गुणोऽपि प्रधानेन शब्देनाभिधीयमानो द्रव्यलक्षणमिदं तदिति सर्वनामप्रत्यवमर्शयोग्यस्वभावमनुपतनीति तस्य निरुपाधेर्व्यपदेशाविषयत्वाद्यदुपाधिर्व्यपदेशः, तन्निमित्त एव प्रकर्षः। तत्र जातिर्व्यपदेशहेतुरपि नून तत्प्रकर्षे स व्यापारसमानजातीयाधिप्रकर्षः। तत्र जातरभेदः। अत एवाक्ते भाष्ये जननेन प्राप्यत इति जाति.। न चैतस्यार्थस्य प्रतिकर्षापकर्षौ स्त इति जन्मकालसम्बन्धः। जातिशून्येऽतिजन्मकालेऽपि तेनैव रूपेणासावस्थिता व्यक्तेरविर्योगेन प्रवर्त्तमानतज्जातीयादेव व्यवच्छेदं प्रापयितुं शक्नोतीत्यर्थ.। अतश्च ज्ञातेरतिशायकत्वासम्भवात्तदेकार्थसमवायि भासुरत्वं वैमल्यं रागान्तराव्यतिभिन्नतेत्येवमादयो विशेषाः प्रकर्षवृत्तिनिबन्धनम्। यद्यपि चाग्निसंयोगेन स्वत एव गुणस्य प्रकर्षो भवति। तथाऽप व्यपदेश. परोपाधरेवेति तत्तन्निमित्त एव प्रकर्षो न्याय्यः। न हि स्वगतो विशेषः शब्देन सर्वैःशक्यते ऽभिधातु, रूपादिशब्देन रूपत्वादिजातीयस्याविशेषेण सर्वस्याभिधानात्। एव शुक्लादिविशेषशब्देनापि शुक्लत्वादिजातीयस्याविशेषेण प्रतिपादनात्। अत एव च यदा भास्वरादयोऽपि प्राधान्येन व्यपदिश्यन्ते तदा तदाश्रितधर्मद्वारैक एव प्रकर्षो विज्ञेयो भासुरतर इति। तत्रापि धर्मान्तरस्य प्राधान्येन तद्गुणाश्रितनिमित्त एव प्रकर्ष इति यावत् सम्भवति शब्दव्यापारः तावदपर्यवसानमेव धर्माणामिति "गुण. प्रकर्षहेतुर्य. स्वातन्त्र्येणोपदिश्यते। तस्याश्रितगुणादेव प्रकृष्टत्वं प्रतीयत" इत्युक्तमेव। अत एवात्र सर्वस्यैव प्रधानस्येति व्याप्तिरुक्ता सर्वग्रहणेन। यदा तु शब्दव्यापारोपरम' तदा धर्मान्तरपर्येषणा पर्यवस्यति ॥३॥

ननु च भासुरत्वादय शुक्लशब्दस्य न वाच्या इत्यशब्दवाच्यप्रतीयमानधर्मद्वारक. सान्निध्यानादनियम प्रसज्यत एवेत्याशङ्क्याह।

विद्यमानाः प्रधानेषु न सर्वे भेदहेतवः।
विशेषशब्दैरुच्यन्ते व्यावृत्तार्थाभिधायिभिः ॥ ४ ॥

इह प्रधानेषु द्रव्येषु वस्तुसन्तो बहवो ऽस्मात्सजातीयविजातीय-

व्याप्यवच्छेदादयोधर्माः। चैते न सर्वज्ञेनावच्छेदेन शक्यन्ते ऽभिधातुम्। अनेकव्यावृत्तिनिवृत्त्यैकस्य शब्दस्याभावात्। एकैकव्यावृत्तिनिष्ठा हि बहव शब्दा वस्तुनि प्रवर्त्तन्ते। तथा च तेऽत्रविशेषशब्दा इत्युच्यन्ते प्रतिनियतविशेषाभिधायित्वात्। यदि सर्वविशेषविशिष्ट द्रव्यमेकेन शब्देनाभिधीयेत, स्यादसावेक शब्द साधारण.। नचैवम्। तस्मात्प्रतिनियतव्यावृत्तिविशिष्टार्थाभिधायिभि शब्दै सर्वविशेषाणामसंस्पर्शादुपात्तावशेषहतुक एव प्रकर्ष । सूक्ष्माणां च विशेषाणामसंविज्ञानपदानां भासुरत्वादीनामस्त्येवं शुक्लादिशब्दैर्वाच्यता नदुपाधिविविक्तस्य शुक्लस्य प्रधानस्य शब्दविषयाभावोपगमायोगात्। ससर्गिरूपोपहितत्वाच्छब्दवाच्यस्य जातिहेतुकप्रकर्षासम्भवात् शुक्लतरं रूपमित्यादिप्रयोगदर्शनाच्चात्र भासुरत्वादिहेतुकः प्रकर्षो निश्चीयते। न चाशब्दवाच्यधर्मनिमित्तं स , अतिप्रसङ्गादिति भासुरत्वादीनामपि प्रयोगप्रामाण्यादत्र शब्दवाच्यत्वं निश्चीयताम् ॥४॥

ननु भवतु स्वतो ऽव्यपदेशस्य द्रव्यस्य संसर्गिधर्मनिमित्ता व्यपदेशप्रवृत्ति । तत्रैव तु व्यपदेशे संसर्गिण उपक्षयापकर्षे ऽपि कथं तस्य व्यापारः कल्प्यत इत्याह ॥

वस्तूपलक्षणे तत्र विशेषे व्यापृतो यदि ।
प्रकर्षो नियमाभावात्स्यादनिज्ञानहेतुकः ॥ ५ ॥

वस्तुनिर्देशमात्रचरितार्थत्वे विशेषस्योपाधिभूतस्य यः शुक्लो दृष्ट स गरिमादिना प्रकृष्ट शुक्लतर इति प्रतीयते । तथा च विशष प्रकर्षस्य निबन्धनं न ज्ञायेत। न चैव प्रसिद्धि शुक्लगुणनिमित्तस्यैव प्रकर्षस्यानो ऽवगमात्ततश्च यथा प्रतीति यथा च युक्ति प्रकृत्यास्तत्तरस्याच्छब्दवाच्यस्येति । तथा प्रकर्षे व्यपदेशहेतोरेव विशेषस्य व्यापार कल्पयितु न्याय्य इत्यर्थ ॥ ६ ॥

इह कथ प्रकर्षप्रत्यय. निकृष्टतर प्रकृष्टतर इत्याशङ्क्याह ॥

सर्वं च सर्वतो ऽवश्यं नियमेन प्रकृष्यते ।
संसर्गिणा निमित्तेन निकृष्टेनाधिकेन वा ॥ ७ ॥

व्यपदेशहेतुप्रकर्षे ऽर्थप्रकर्षप्रत्यय इति निकृष्टोपाधेरभिधाने

निकर्षापेक्ष एव प्रकर्षो वाच्यः प्रकर्षोपादेश्चाभिधाने प्रकर्षापेक्ष इति सजातीयापेक्षायां सर्वस्य प्रकर्षसम्भवादेतदुपपद्यते । निकृष्टस्य निकृष्टत्वादेव प्रकृष्टस्य प्रकृष्टत्वादेवानिशय सम्भवत्येव । एव गुणप्राधान्येऽप्यपरधर्मनिमित्त प्रकर्ष इत्यनवस्थां पूर्वप्रदर्शितामप्यनेनाह । इह गौतरेति प्रयोगो दृश्यते तत्र च न जातिनिमित्त प्रकर्षइत्युक्तम् ॥ ७ ॥

न चान्यत्र निमित्तान्तरमत्र सव्यापारं प्रतीयत इति निमित्त प्रकर्षाद् द्रव्यस्य । एवं शुक्लतरादावपि भविष्यतीति किमिति गुणहेतुक प्रकर्ष समुद्भाव्यत इत्याशङ्क्याह ॥

नापेक्षते निमित्तं च प्रकर्षे व्यापृतं यदि ।
द्रव्यस्य स्यादुपादानं प्रकर्ष प्रत्यनर्थकम् ॥ ७ ॥

द्रव्यं निर्ह्रासोपचयसम्बन्धायोग्यं स्वत इति न स्वनिमित्त प्रकर्षमनुभवति । तद्यदुपाधिरूपनिमित्तं प्रकर्षे सव्यापारं नाङ्गीकरोति तदा प्रकर्षे प्रतिपाद्ये तस्योपादानं निष्प्रयोजनम् । युक्ततर इत्यादिः प्रयोग एव न स्यादित्यर्थः । तस्मात्प्रयोगप्रामाण्याद्यथोपपत्ति प्रकर्षोऽनुविधेय इति व्यपदेशहेतु स्वसंसर्गिधर्मनिमित्तः स व्यवस्थाप्य । सर्वत्र जातेश्च व्यपदेशहेतुभूतायास्तदसम्भवे यथा शुक्लतरं रूपमित्यत्रैकार्थसमवेतभासुरत्वादिधर्मद्वारकत्वात्प्रकर्षो व्यवस्थाप्यते तथा गौतरेत्यत्राप्येकार्थसमवेताद्धाहदोहादेर्धर्मादसौ व्यवस्थाप्य । भासुरत्वादेरिव चात्र प्रयोगप्रामाण्याद्धाहदोहादेरपि शब्दार्थत्वमवसेयम् । ततश्च प्रकृष्टवाहदोहा गौर्गौतरेति भण्यत इति सर्वं सुस्थम् ॥ ७ ॥

प्रकरणार्थं समापयितुमाह ॥

सव्यापारो गुणस्तस्मात्स्वप्रकर्षनिबन्धनः ।
द्रव्यात्मानं भिनत्त्येव स्वप्रकर्षे निवेशयन् ॥ ८ ॥

द्रव्यस्य स्वतो निरतिशयत्वात्स्वनिमित्तभू प्रकर्ष नोद्युक्तः । स सगुणः स्वातिशयहेतुकेन विशेषेणाश्रयान्तराद्व्यवच्छेदं विदधाति, कथमन्यस्य प्रकर्षोऽन्यप्रकर्षमित्याशङ्क्याह ॥ ८ ॥

अरूपं गुणरूपेण द्रव्यमाख्यायते यथा।
अपकर्षे प्रकर्षेण गुणस्याविश्यते तथा ॥ ९ ॥

निरूपस्य निरुपाधिनो द्रव्यस्य शाब्दव्यवहारोपगमायोपाधिरूपावरितस्य तदुपगमे सर्वशब्दार्थपृष्ठपाती व्यवहारः स्त्रोपाधिनियमितशरीर इत्यर्थः। उपाध्युपाधिमतोश्च विवेकस्य दुरवधारत्वात्सङ्कर इति व्यवहारेण गुणप्रकर्षो गुणिनि विश्राम्यति, न गुणात्मन्येव निष्कृष्टगुणिनि व्यवतिष्ठते नापि गुण्यात्मन्येव निष्कृष्टगुण इति सिद्धम्। इति ॥ ९ ॥

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे
गुणसमुद्देशः पञ्चमः ॥

सम्प्रत्येकयोगक्षेमान्पदार्थान् तन्त्रेणोद्दिश्य क्रमेण विचारयितुमाह ।

शक्तिरूपे पदार्थानामत्यन्तमनवस्थिताः ॥ १ ॥
दिक् साधनं क्रिया काल इति वस्त्वभिधायिनः ।

दिगादिशब्दा अर्थसिद्धस्वभावद्रव्यधर्मतया स्वार्थं प्रतिपादयन्तो यथा तं लक्षितादिगाद्यर्थसंस्पर्शविकलपा तथा हि परोपाधिरूपाः शक्तयो दिगाद्याः पारतन्त्र्यं च शक्तिलक्षणमिति क्रिया ऽपि द्रव्यपरतन्त्रा शक्तिरिति व्यपदिश्यते । वैशेषिकनये च दिक् द्रव्यं नोपपद्यते । कार्यानुमेयत्वेन पदार्थोपकारकरूपस्य शक्तित्वस्य न्याय्यत्वात् । एवं विध शक्तिरूप सिद्धस्वभाव एव वस्तुवाचकैः शब्दैः साक्षान्न स्पृश्यत इत्यसाधारणमेतत्पदार्थरूपं लक्षणेनावस्थापयितव्यम् । अस्ति ह्यर्थो शास्त्रे, ऽस्मिन्व्यवहारो दिक्शब्देभ्यो दिग्देशकालेत्यादि' ॥ १ ॥

तत्र साधनादीनां शास्त्रादनुमितमेव लक्षणं विभजनीयम् । दिक्कालादीनां तु स्वरूप वक्तव्यम् । तत्र दिशस्तावत्स्वरूपं लक्षयति ।

व्यतिरेकस्य यो हेतुरवधिप्रतिपाद्ययोः ।
ऋजित्वेनैव यतोऽन्येन विना बुद्धिः प्रवर्त्तते ॥ २ ॥
कर्मणो जातिभेदानामभिव्यक्तिर्यदाश्रया ।
सा स्वैरुपाधिभिर्भिन्ना शक्तिर्दिगिति कथ्यते ॥ ३ ॥

इदमस्मात्पूर्वं पश्चाद्देत्येवमस्मादित्यवधेरिदमिति प्रतिपाद्यावधिमतो व्यतिरेकः प्रातिपदिकार्थे भेदो ऽवध्यवधिमत्सम्बन्धो लक्षणः स पदार्थस्वरूपादनुपपद्यमानो निमित्तान्तरमावेदयते । तन्निमित्तान्तरं दिगित्युच्यते । न हि जात्यादिनिमित्तो ऽयं प्रत्ययः । तदनुरागाप्रतीतेः । परिशेषादिनिमित्तः । यदाहुर्वैशेषिकाः । इत इदमिति यतस्तद्दिशो लिङ्गमिति । कार्यकल्प्यत्वे च सदैव पदार्थोपाधितया प्रतीतेः । स्वतन्त्रा द्रव्यरूपता कास्ति विदिशः । न हि पृथिव्यादिवदिगुपलक्ष्यते । अत एव कालो ऽपि शक्तिरिति वक्ष्यते । समवायस्य तां शक्तिमिति समवायाक्षयो ऽप्युक्तः । तथा ऋजुपृष्ठयो ऽ

वश इति प्रत्ययोऽन्यत्र विना ऽवधरण्यनपेक्षणात्पृथिव्यादिनिमित्तान्तरोपकारमन्तरेण जायत । स चैकदिक्समवयवाना प्रसरणादिदिङ्निमित्तरूढ्यर्थस्यापलक्षणत्वाद् । चक्रादबुद्धिरपि दिङ्निमित्ता व्याख्यया । तथा कर्मलक्षिका नियगूर्ध्वमधश्च जायमानानां कर्मत्वमहासामान्यव्यतिरेकेण भ्रमणात्वोत्क्षेपणत्वाद्यपरजातिव्यक्तिर्दिङ्निमित्ता । तथा ह्यूर्ध्वादिदिक्सयोगविभागकार्या कर्मलक्षणाविशिष्टा सन्तो नियतजातिव्यञ्जने समर्था भवन्ति । कर्मण इति कर्मसामान्यस्यावान्तरजातिभेदादुत्क्षेपणत्वादय । जातावेकवचनं भ्रमणादिक्षणानां ये जातिभेदा इत्यर्थ । दिग्लिङ्गविशेषाद्धि शेषलिङ्गाभावाच्चैका दिगिति काणादा । एका ऽपि च दिक् निमित्तोपाधिप्रकल्पितत्वाद्दशधा व्यवह्रियते । तथा च एवमाहु । आदित्यसम्प्रयोगाद् भूतपूर्वाद्भविष्यतो भूताच्च प्राचीति । सवितुरहरादौ येन प्रकल्पितदिक्प्रदेशेन संयोगो ऽभूद्भवति भविष्यति वा तस्मादादित्यसम्प्रयोगात्प्राचीति व्यपदेश. । प्राच्युच्यत इति कृत्वा तथा दक्षिणाप्रतीच्युदीचीनां चेति सूत्रम् । तस्मादेवादित्यसयोगादक्षिणादिव्यपदेश. । तथा हि यत्र प्रतीपमञ्चत्यस्तगमनाद्रवि. सा प्रतीची । मूर्त्तिपरिच्छिन्नेन ह्यादित्यमण्डलेन य सयोग. स परिमितदेशव्यापतेन चातीतेन भविष्यता वर्त्तमानेन वावच्छिन्नो नियतदिशामव्यवस्थापको भवतीत्यदृश्यमानगमिक्रिया या परिहरति पृष्ठकरणेन सा दक्षिणा । या न परिहरति सा उत्तरा । मध्यान्हे रविबिम्बमुदङ्मुखमञ्चत्यतो ऽसावुदीचीत्यपि भण्यते । अनेनैव च प्रकारेण पूर्वदक्षिणादीन्यन्तरालरूपाण्यपि दिगन्तराणि व्याख्यातव्यानीत्युक्तं सूत्रम् । एतेन दिगन्तराणि व्याख्यातव्यानीत्युक्तम् । तथा हि मेरु प्रदक्षिणमावर्त्तमानस्य सवितुर्लोकपालपरिगृहीतप्रदेशसयोगापेक्षो दशधा विभाग इति शास्त्रान्तरे विस्तरेण निर्णीतं तत एवावधार्यम् । इह त्वद्य ते परं दिगिति न विभज्य कथ्यते । न चायमस्मादुपचरितो भेद एतदुपचारस्य प्रत्ययधर्मत्वाद्दर्शे न समाविशेत्सूर्यसंयोगादिविशेषं तु सहकारिणमपेक्ष्य विचित्रकार्यं प्रभावयतीति कल्पनया मेरावपि दिशो व्यपदिश्यन्ते । अत एव वास्तवे ऽपि भेदे ऽवश्यं सहकारिणो ऽभिव्यञ्जकत्वेनापेक्षा । अत एव कार्यं भेदादपेक्षिष्यन्त इति तस्यान्यथोपपत्त्या दिश एकत्वमुपेयत् । एको हि प्रामाणिक. स कार्यस्य भेदमुपगच्छन् कारणनानात्व

प्रत्याचक्षीत । वास्तवे च दिशो नानात्वे सर्वत्र कार्यदर्शनात्तासां विभुत्वात् पूर्वापरादिप्रत्यया सङ्कीर्येरन् तस्माद्भावत एका दिक्कार्यवैचित्र्यं तु सहकारिभेदादित्येवमुक्तम् ॥ ३ ॥

न च सहकारिण एव दिगनपेक्षाकार्यं युक्तं तस्य स्वतोऽपूर्वापरादिरूपस्य तद्भावस्य दिक्सम्बन्धकत्वाच्च तदनुरूपकारणमिति दिगेव प्रत्याख्येया पूर्वापरादिप्रत्ययालिङ्गं कालश्चेति तयो रन्यत्वे लिङ्गस्य विशेषमाह ॥

परापरत्वे मूर्त्तानां देशभेदनिबन्धने ।
तत एव प्रकल्प्येते क्रमरूपोऽनुकल्पनः ॥ ४ ॥

मूर्त्ति सर्वगतद्रव्यपरिमाणम् । अभेदाध्यवसायाच्च धर्मिणोऽत्र निर्दिष्टा । व्यापकादीनामाकाशादीनां परत्वापरत्वे न स्तः । पूर्वः पर इति भावेष्वव्यापकेषु पूर्वापरदेशसम्बन्धनिमित्तो व्यवहारः । देशस्यापि पूर्वापरत्वं दिङ्निमित्तमिति तत एव दिशः परत्वापरत्वे देशनिमित्ते तात्पर्यतः । पूर्वमभूद्भविष्यति परमिति तु क्रियापौर्वापर्यं कालशक्तिकृतप्रतिबन्धाभ्यनुज्ञावशाद्भवतिष्ठत इति नास्ति दिक्कालयोर्लिङ्गसंस्कार इत्याशयः ॥ ४ ॥

अमूर्त्तानामपि कालपनिके परत्वापरत्वे स्त इत्याह ॥

आकाशस्य प्रदेशेन भागैश्चान्यैः पृथक् पृथक् ।
सा संयोगविभागानामुपाधित्वाय कल्पते ॥ ५ ॥

संयोगिधर्मिभेदेनाकाशस्य तेन सह मूर्त्तद्रव्यगतैर्भागैरव्यावृत्तत्वात् यथायथं ये संयोगविभागाः तेषां दिगवच्छेदाय पूर्वापरादिभिन्ना प्रभवतीति तदुपाधिः प्रदेशानामाकाशस्य कल्पितानां पूर्वापरादिव्यवहारस्तथा च पूर्वाकाशसंयुक्तं परं इत्यादिर्मूर्त्तेषु व्यवहारः सिध्यतीत्यमूर्त्तपूर्वको ऽसावित्यर्थः । इह देशानां दिक्कृता पूर्वापरादिव्यवस्था, दिशस्तु किंकृता अर्थान्तरनिमित्तत्वे तस्यापि कुत इत्यनवस्था दिशः ॥ ५ ॥

अत एव पूर्वादित्वं देशैरपि किमपराद्धमित्याशङ्क्याह ॥

दिशो व्यवस्था देशानां दिग्व्यवस्था न विद्यते ।
शक्तयः खलु भावानामुपकारप्रभाविताः ॥ ६ ॥

देशोनास्वतन्त्रं रूपमाधारादिस्वभावमर्पयत इति तत्र पूर्वापरादिभावस्य स्वरूपादेवाभावादन्यन्निमित्तं दिगाख्यं कल्प्यते नैवोपकारेण । तत्र परतन्त्रस्वभावाकलनानापरं पूर्वादि परादि तावत्स्वभावमवलम्बितुमुत्सहते । येन तद्वानास्थितस्वभावे देशवत्पूर्वापरादिभावार्थं निमित्तान्तरमेषणीयं स्यात् । यादृक्भावा हि सा कार्यपरिकल्प्या तावदेव तत्त्वं नापरं तत्र शक्तीनां पारतन्त्र्यस्यैवोपपत्तेः । शक्त्यन्तरकल्पने शक्तिमन्त्वापत्तेः । शक्तिमतो ऽतिप्रसङ्गात्सूर्यसयोगस्तु पूर्वापरादित्व तापूर्वं तत्र धत्ते अपि तु स्वभाव एव शक्तिरित्यभिप्राय ॥ ६ ॥

शक्तित्वमेवास्याः स्वतन्त्रं भावरूपतायाःकारणाय पोषयितुमाह॥

प्रसक्तरूपा भावेषु दिक् पूर्वेत्यभिधीयते ।
पूर्वबुद्धिर्यतो दिक् सा समाख्यामात्रमन्यथा ॥ ७ ॥

प्रत्यस्तमुपाधित्वेन भावेषु समारोपितं रूपमस्याः तथाभूता पूर्वा दिगिति व्यवह्रियते । तथा यस्याः सकाशात्पूर्वबुद्धि पूर्वो ऽयमर्थ इति ज्ञान, पूर्वत्वमुपलक्षणं परत्वादिरपि गृह्यत दिक् सा परोपाधिरूपेत्यर्थः । अन्यथा उपाधिरूपानपेक्षा अस्खलन्त्याश्रयणे भावतो दिग् भवति अपि तु सा तदानीं समाख्यामात्रं दिगिति । नयति स्वतन्त्रद्रव्यं विषयं शब्दमात्रवस्तुसंस्पर्शी । तथा ह्युक्तं " दिक् साधन क्रिया काल इति वस्त्वभिधायिन । शक्तिरूपे पदार्थानामत्यन्तमनवस्थिता" इति । तदेवं नित्यपारतन्त्र्याया दिशः कार्यैककल्प्यायाः स्वतन्त्रपदार्थगतविकल्पानवसर इति स्वतो नानास्वभावे सहकारिसूर्यसञ्चाराविशेषेण किमेकस्वभावं सेवासहकारिभेदो ऽपि न विचित्रे कार्ये कुर्यादित्येतदशक्यं वक्तुम् । यथा पूर्वापरादिप्रत्ययलक्षणेन कार्येणानानुमितसत्त्वा तथाभ्युपगन्तव्या शक्तिरूपा दिक्॥७॥

ननु च पूर्वापरादिप्रत्ययः सम्मुखादिनिमित्तो भविष्यति तथा चोक्तं भारते यथा ऽभिमुखं भक्ता ताः प्रविशन्ति सा पूर्वा दिङ्मन्तव्यति तथा लोके ऽप्यभिमुख. पुरोवर्ती भण्यते पृष्ठतः

स्थित' पश्चात्स्थित इत्युच्यते । तथेह हस्तदक्षिणः पन्था, इह हस्तवाम इत्यादिव्यवहार स्वाङ्गनिमित्त, इति नास्ति दिक्कल्पनानिमित्तमित्याशङ्क्याह ॥

स्वाङ्गाद् व्यवस्था या लोके न तस्यां नियता दिशः ।
प्रसङ्मुखस्य यत्पश्चात्तत्पुरस्ताद्विपर्यये ॥ ८ ॥

स्वाङ्ग मुखादि इति, वा स्वमवधिमपेक्ष्य या पूर्वादिव्यवस्था तत्र दिशो नियता न व्यवतिष्ठन्त । पश्चान्मुखस्य यद्वस्तु हि पश्चादभूत्तदेव प्राङ्मुखत्वे तस्य पूर्वस्मिन्दिशे भवतीति प्राङ्मुख उदङ्मुखो वा भुञ्जीतेति व्यवस्था न स्यात् । तस्मादनादिरूढादङ्गनिमित्तपूर्वापरादिव्यवस्था ऽङ्गीकार्या ॥ ८ ॥

का चित्तु दिगनपेक्ष्याऽपि पूर्वापरादिता देशानां रूढेत्याह ॥

देशव्यवस्थानियमो दिक्षु न व्यवतिष्ठते ।
रूढमप्यपरत्वेन पूर्वमित्यभिधीयते ॥ ९ ॥

दिक्षु दिङ्निमित्त, पूर्वदेशदक्षिणापथोत्तरापथादीनां नियमो न व्यवस्थितः । तथा हि दिगपेक्षया पाश्चात्योऽपि पूर्वदेश इति व्यवह्रियते । तथा च दक्षिणापथात्पूर्वदेशं गच्छन् पूर्वप्रदेशं गच्छामीति ब्रूते । दिग्व्यवस्थायां तु स न भवति । तस्मात्पूर्वत्वादि दिगनपेक्ष संरूढम् । दिगनपेक्षया तु यथाद्रव्यं व्यवहारोऽत्राप्युपपद्यते । तथा चेह कस्मान्नभवति पूर्वस्मिन्देशे वसतीति भाष्ये चोदयित्वा, नैष दोषो देशविशेषणमेतदिति परिहृतम् । नाथ पूर्वशब्दो रूढित्वादवध्यपेक्षः प्रवृत्तः, तेन दिक्शब्दः सन् देशे वर्त्तते । देशसामान्यं तु देशशब्दादवगम्यमानं विधिनाष्टु । ततो दिक्शब्दादेशवृत्तेर्विधीयमानः प्रत्ययो जातो, रूढात् शब्दाद्भवतीति भाष्यार्थः । के चिद्वाचक्षते नायं पूर्वशब्दो दश देशरूपेण कथयति देशशब्देनैव तस्याभिहितत्वात् । देशाधिकरणस्तु कश्चिद्विशेषो देशशब्दादप्रतीयमान पूर्वशब्देनाभिधीयते विशेषावच्छेदनिबन्धन इति । एतदयुक्तम् । देशसामानाधिकरण्यादेशवृत्तेश्च प्रत्ययस्यष्टे । अवश्यं दिक्कालयोर्व्यवच्छेदार्थं देशशब्द उपादातव्य इति तत्र प्रत्ययाभावे को विषयः स्यात् । तदेवं पूर्वदेशो दक्षिणापथ इत्यादावनन्यापेक्षरूढेऽपि पूर्वादित्वे

सहजे, दिङ्निमित्तमपरं रूपान्तरमपि भवति । यथा स्वाङ्गनिमित्तो ऽन्यथा व्यवहारो दिङ्निमित्तो ऽन्यथा व्यवहार इति मुख्यदिङ्निमित्तमव पूर्वादित्वमित्युपपादितम, यथा च दिश्यपरोपाधिका पूर्वादीना वृत्ति दश तद्दिक्सम्बन्धादिति भाष्येण॥ ९ ॥

सम्पादयति ॥

अतो भाषितपुस्कत्वात्पुवद्भावो न सिद्ध्यति ।
अस्मिन्नर्थे न शब्देन प्रसवः क्व चिदुच्यते ॥ १० ॥

दक्षिणोत्तराभ्यामतसुजित्यत्र भाष्यम् । अकार. किमर्थ । तसुरेव क्रियताम् । एव च स्वरार्थश्चकारो न करिष्यते प्रत्ययस्वरेणैव सिद्धे । तत उक्त लिङ्गविशिष्टपरिभाषया दक्षिणाशब्दादेव्यय भवति। तत्राप्यत्यकार यस्येति लोपो न स्यादिति । अत्र प्रत्ययस्याकारमादिश्य लिङ्गविशिष्टपरिभाषया टाबन्ताभ्यां विधावसत्यकारे यस्येति लोपाभावाद्दक्षिणात उत्तरत इति रूपन सिद्ध्यादिति। असत्यकारे आकारलोपो न । तयोरकारस्तु श्रूयत इति । तदुक्तम् । समानायामाकृतौ भाषितपुस्कस्य पुवद्भाव ।आकृत्यन्तरे चैतौ भाषितपुंस्कौ । दक्षिणोत्तरा इति दिक्शब्दा, दक्षिण उत्तर इति व्यवस्थाशब्दाविति। तत्तेनद्भाव्य रूढशब्दत्वे दिशि पूर्वादीनां युज्यते नान्यथा। तथा हि अयमर्थ । भाषित. पुमान्यस्मिन्नित्यर्थे ऽन्यपदार्थ. समाश्रीयते, स स्वाभिधेयो नोपपद्यते । तस्य पदार्थ आत्मा स्वभाव इत्यन्ततो व्यपदेशेन भाषितपुस्क नाव्यभिचारात्किमनेन व्यवच्छिद्येत। तत्तस्मात्प्रवृत्तिनिमित्तलक्षणो ऽर्थो ऽन्यपदार्थ । तत्रापि भिन्न प्रवृत्तिनिमित्त सर्वत्रैव भाषितपुस्कता । ततो ऽर्थस्वभावादिशब्देनेत्येकस्मिन्प्रवृत्तिनिमित्ते सामर्थ्याद्भाषितपुस्कता समाश्रीयते । अर्थे च कार्यस्यासम्भवादभिधेयधर्मेण तद्वचन शब्दो भाषितपुंस्क इत्युच्यते, इति प्रवृत्तिनिमित्तस्यान्यपदार्थत्वे समानायामाकृतौ यो भाषित पुस्क शब्दस्तस्य पुवद्भाव इत्यर्थो ऽवतिष्ठते । दिशिच दक्षिणोत्तरेति स्वाभाविकत्वादभिधानस्य, अस्मिन्दिग्लक्षणे ऽर्थे प्रसव पुंस्त्वमाभ्यां शब्दाभ्यां न क्व चिद्विषयो ऽभिधीयते ऽपि तु दिङ्निमित्ता यदादेशे तयावृत्तिस्तदा व्यवस्थाशब्दौ प्रसवमभिधत्त. । परस्प-

रापेक्षत्वाच्चिनिर्व्यवस्थया । यथा दक्षिणशैलासीन इत्युक्ते कुत इत्यवधिप्रतीतिः । तत्रैव तौ भाषितपुंस्कादित्याकृत्यन्तर भाषितपुंस्कस्यादेकस्मिन्प्रवृत्तिनिमित्ते तदभावात्पुवद्भावो न भवत्यत्रासौ । सर्वनाम्नो वृत्तिमात्रे पुवद्भाव इत्यौपसख्यानिक पुवद्भावमाश्रित्य भवतीत्यमिन दक्षिणोत्तरशब्दाऽभ्यामतसुत्राऽकारं विनापि सिद्ध । शश्वत् सर्वप्रत्ययो नेति विशेषणार्थो ऽकारो व्यवस्थापित । अत्र तु चोदितम् । ननु च दक्षिणोत्तरेत्येतावपि व्यवस्थाशब्दाविति । अयमर्थः । उत्तरा पूर्वेति चोक्ते कुतश्चोत्तरेत्यवश्यमवधिरपेक्षणीय । विनाऽनेन स्वार्थासम्भवात्तथा च दिग्देश्यव्यपेक्षत्वात्पूर्वादिशब्दानां प्रवृत्तेस्तत्रापि व्यवस्थाशब्दत्वमित्यस्यां व्यवस्थापकताऽस्त्येवेति भाषितपुंस्कत्वम् । केवलं च परापाश्रयत्वाद्दिशि वृत्तेर्देशशब्देभ्या दिक्शब्दा भिद्यन्ते । अतः परमुक्तम् । दिक्शब्दकार्यापेक्षेव न प्राप्नुवन्तीति नामधेयत्वेन दिशामप्रवृत्तेस्ते मे दिक्शब्दाः स्युरित्याशय । तन्नोत्तरं दिशो यदा व्यवस्थां वक्ष्यन्ति ॥ १० ॥

यदि तर्हि या यो दिशि वर्त्तते स स दिक्शब्दो रमणीयादिष्वतिप्रसङ्ग इति । यथा हि पूर्वादय शब्दा व्यवस्थानिमित्ता देशकालसाधारणा अपि यदा दिशि वर्त्तन्ते तदा दिक्शब्दा इत्युच्यन्ते । तथा रमणीयादयो ऽपि गुणनिमित्ता दिशि वर्त्तमाना दिक्शब्दाः स्यु. । अत्र परिहार उक्त । दिशि दृष्टः शब्दो दिक्शब्द । दिशं यो न व्यभिचरतीति । तत्र देशकालयोरपि व्यवस्थाशब्दा पूर्वादयो वर्त्तन्ते । तथा चाभेदेन दिक्शब्देभ्यो दिग्देशकालेषु वर्त्तमानेभ्य इत्युच्यत इति, कथं दिशं यो न व्यभिचरतीत्युक्तमित्येतद्दाष्य समर्थयितुमाह ।

दिक्शक्तेरभिधानेन नियतं दिशि दर्शनम् ।
पूर्वादीनां यथा षष्ठेर्नीवितस्यावधारणे ॥ ११ ॥

शक्तिग्रहणेन तत्रार्थान्तरानपेक्षरूढानां पूर्वादिशब्दानां प्रवृत्तिर्देशकालयोस्तु तदुपाधित्वाद्व्यवस्थानिमित्तेति सूच्यते । तथा च नियतमव्यभिचारि दिशि शब्दानां प्रयोग । देशकालयोस्तु व्यवस्थानिमित्तत्वेन रूढ प्रयोग । पूर्वा दिगित्युक्ते नामधेयत्वेनानवच्छिन्नरूढप्रतीति । पूर्वो घट इति, कुत इत्यवधिमपेक्षते । घटशब्दाच्च स्वार्थे ऽवगते तदुपरि

व्यवस्थां गमयति पूर्वशब्दो न तु तस्य नामधेयम् । तथा दिक्शब्देभ्यो देशकालशब्दानामर्था भवति भेद एव, सादृश्यात्तभेदाध्यवसाय । न हि रूढानां नैमित्तिकै· सह भेद· सम्भवति । तथा च दिक्शब्देभ्यो दिग्देशकालेष्वित्यत्र पूर्वादिशब्दानां कार्यभावन विवक्षितत्वाद् शब्द-ग्रहणसामर्थ्याद् दिक्शब्द इव शब्दो येषामिति देशकालप्रवृत्तयो रू-पसाम्यादिहोच्यन्ते । सहशानां च शब्दानां क्वचिद्विषये स्वभावानिय-तेव शक्तिर्दृश्यते । तद्यथा षष्टिभूत षष्टिक इति जीवितपरि-माणे प्रतिपाद्ये कालवाचिनियमेन संख्याशब्दः षष्टिशब्द । तथा च कालाधिकारविहित प्रत्ययमुत्पादयति तमधी-ष्टो भूतो भूतो भावीति। वृत्तिविषये न षष्टिशब्दो वाक्यसङ्ख्याशब्दे ऽपि नियतं कालसङ्ख्येयमुपादत्ते शब्दशक्तिप्रतिनियमादतो हि शब्द-(द्विषरिव्ययं)? च कालो जन्मनः परिमाणं प्रतीयते। न च वृत्तौ काल वचन प्रयुज्यते येन तत्सामानाधिकरण्यात्कालवृत्तित्वं सङ्ख्याशब्द-स्यापि प्रक्रियेतेति, मासादिशब्दवत्पदान्तरानपेक्षः काले प्रपञ्चोऽयं रूढ । तथा च तदस्य परिमाणमित्यत्र जीवितपरिमाणे चेत्यनर्थक-वचनं कालादिति सिद्धत्वादित्युक्तम् । यो हि षष्टिवर्षाणि भूतस्तस्य षष्टिर्जीवितपरिमाण भवत्येवेत्युपसङ्ख्यानेन नार्थः। नन्वेवं रमणीया-दिष्वतिप्रसङ्गस्तेषाङ्काले नियतत्वस्याप्रतीतेः। प्रयुक्तानां चेदमन्वाख्या-नमिति लौकिकी प्रतीतिरनुसर्त्तव्या। तथा चोक्तं अनभिधानाद्रमणी-यादिषूत्पत्तिर्न भविष्यतीति। तदेवं यथा षष्टिशब्द· सङ्ख्याशब्दः स-ङ्ख्येयविषयो व्यवस्थास्वभावात्काले सङ्ख्येये रूढ·। तथा च पूर्वादि-शब्दो यत्र देशे काले च व्यवस्थावचनो ऽपि दिशि अभावानियमेन रूढ इति युक्तं उक्तं दिशं यो न व्यभिचरतीत्यर्थ· । इत्थं च दिशि नियतत्वात्प्रयोगस्य, समानायामाकृतौ भाषितपुंस्कत्वाभावात्सर्ववृ-त्तिमात्र इत्युक्तम् । व्यवस्थायामसंज्ञायामिति तु सर्वनामसंज्ञायामव-धिनियमानुगमाद्दिग्देशकालवचना अपि पूर्वादयो विशेषणविशेष्य-न्ते । तथा हि अवधिना ऽयं प्रतिपादितो रूपावच्छेदः पूर्वादित्वम् । त-स्यानुगमो ऽस्ति । देशकालयोरिव दिक्षु व्यवस्थितार्थाभिधानात्पूर्वश-ब्दादवधिभिन्नमेवावस्थितां दिशमाह । अवधिरुपाधित्वेन स्पृशति यथा शोणशब्दो लोहित एवार्थे वर्त्तते । अथ लौहित्यं प्रवृत्तिनिमित्त-त्वेन चापेक्षते। कृष्णशब्दश्च भगवति वासुदेवे वर्त्तते। न च कृष्णं गुणं

निमित्तत्वेनोपादत्ते । तदित्थमन्तर्भावितावधयो दिक्शब्दा. पूर्वादयो रूढा । देशकालयोस्तु शब्दोपात्तावप्यपेक्षा, इत्येतावान् विशेष. । अवधिनियमस्तु समान इति व्यवस्थायामित्यपि विशेषणादिग्वाचिनां पूर्वादीनां सर्वनामसंज्ञाकार्यं प्रवर्त्तत एव ॥ ११ ॥

इदानीं कार्यान्तरमपि दिश. प्राह ॥

छायाभाभ्यां नगादीनां भागभेद: प्रकल्पते ।
अतद्धर्मस्वभावेषु भागभेदो न कल्पते ॥ १२ ॥

छाया निरालोक । आभा आलोक: । दिनकरकरोत्तेजित: पर्वतशिखर एको, बहुलच्छायाच्छुरितश्चापर इत्यवयवविभाग:, छायातपाभ्यामुपक्षितो ऽसत्यां दिशि न कल्पते पूर्वापरावधित्वाभावात्तदुपाधिकावयवनानात्वात् । तथा ह्यविषहमान स दिगुपाधिको धर्म: पूर्वापरादित्वं येषां मूर्त्तानामर्थान्तरेष्वेवंविधावयवभेदाभावात्तदुपाधिकावयवनात्वाभाव इति दिक्सम्बन्धनिमित्तो ऽवयवभेदो ऽपि दिग्लिङ्गमित्यर्थ: ॥ १२ ॥

तथा हि मूर्त्तानां प्रथमत एव भागभेद. प्रकल्पते दिगायत्त इत्याह ॥

परमाणोरभागस्य दिशा भागो विधीयते ।
भागप्रकल्पनाशक्तिं प्रथमान्तां प्रचक्षते ॥ १३ ॥

अकृतक्षतानां नित्यानां निरवयवानामपि परमाणूनां पार्श्वचतुष्टयमूर्ध्वाधोभागरूपं च दिशा परिकल्प्यते । न हि परमाणोरभागस्य वास्तवो भागभेद इति दिगाहित एव स. । तथा च तत्रस्थै: षड्भि: परमाणुभिर्योगो भवति । सति च योगे द्व्यणुकादिक्रमेण कार्यमाजायते । ततश्च तत्रापि पूर्वापरादिव्यवहार । असत्यां तु दिशि षड्भिर्योगे ऽपि निरवयवस्यापि तस्याणुमात्रक इति स्थूलावयवस्य व्युत्पत्तिर्न स्यात्तस्मादुत्पत्तिप्रकृतिभागसमारोपे प्रथमा दिशामेव शक्तिरिति दिग्भि: सर्वे पदार्था मूर्त्ता भागभेदप्रकल्पनेनोपक्रियन्ते । अन्ये नगादीनां सावयवानां छायातपाभ्यां भागभेद. प्रकल्पते । येषां तु निरवयवानां छायातपनिमित्त. स न भवति तेषां परमाणूनां दिङ्निमित्त इति व्याचक्षते । तथा हि यत्र निमित्तान्तरं नास्ति तत्रातद्धर्मसु निर-

वयवेषु दिशां व्यापारो, यत्र त्वन्यन्निमित्तमस्ति भागभेदस्य ज्ञापकं छायातपादिक सावयवादीनां पर्वतादीनां, तत्र तदेव भागभेदव्यवहारप्रवर्त्तक, एतस्मिन्प्रथमश्लोकेनोक्तम् दिग्व्यापारस्तु द्वितीयश्लोकेन कथित । तथा हि यतो निरवयवत्वाच्छायादिको भागभेदप्रकल्पको ऽतोऽत्र परमाणौ दिक्पदार्थेन भागो ऽभिधीयते । भागव्यवहार पूर्वादिक प्रवर्त्तन इत्यर्थ । यदि वा यथा हेत्वन्तरकृतो भागभेदव्यवहार पर्वतादिषु, परमाणुष्वपि छायातपाऽयां संयोगविभक्तेषु निमित्तान्तरमेषणीयम् । तद्यदिति दृष्टान्तो ऽयमुपन्यासो ऽयमहमहमिकया कृत इत्यपरे व्याचक्षते । तदेतत्सर्वमनुपपन्नम् । तथा हि ये घटस्यैकस्मिन् पार्श्वे सूर्यरश्मय पतन्ति ते तद्देशै. कपालैरेव सम्बध्यन्ते । तदन्यपार्श्वे च छायया कपालानामेव संयोग इति घटस्य च्छायातपाभ्यामसम्बन्ध । अथ तद्देशत्वात्सन्निहितमवयवि द्रव्यमपि सम्बध्यते। तदभिन्नदेशत्वमवयविनो न स्यादातपेन संयुक्तत्वात्संयुक्तश्चेदवयवो ऽपि वावयवीति तत्रापि छायादिसम्बन्धो ऽवयवानामेवानेन न्यायेन। तत्राप्यवयवान्तराणामिति परमाणुपर्यन्तं न । ततश्च दिव्यसम्बन्धादेव परमाणुवत्स्थूलो ऽपि पदार्थ. पूर्वापरादिभागमुच्चनीचत्वादित्वं च प्रतिपद्यते। तथा च निर्भागात्मकता तुल्या परमाणोर्घटस्य चेत्यादि वक्ष्यत्येव ॥ १३ ॥

ननु स्वत एव पदार्था विशिष्टसंस्थानाः प्रभवन्ति, क एषां दिक्कृत एकाक र इत्याशङ्क्याह ॥

अदेशाश्चाप्यभागाश्च निष्क्रमा निरुपाश्रयाः ।
भावाः ससर्गिरूपात्तु शक्तिभेदः प्रकल्पते ॥ १४ ॥

प्रकल्पते, विभूनामाकाशादीनां नास्ति देशः पृथिव्यादीनां तु मूर्त्तानामवयविनामात्मभूतदेशाभावः । उभयेषामपि च कल्पिता देशा. संयोगिन समवायिनश्च । एवं स्वत पदार्थानामवयवा न सन्ति, कल्पितास्त्वर्थान्तरभूता संसर्गिणः । अवयवभेदाभावाच्च क्रमो ऽप्यमुख्यभेदाधिष्ठानत्वात् क्रमस्य । तथा अविद्यमान उपाश्रय उपाधित्वाभावान्न्यायत्वापादको येषां ते निरुपाश्रया. । एवं भूता अपि च भावाः संसर्गिरूपोपहितेन शक्तिभेदेनासत्यपि स्वरूपान्यथात्वे न प्रतीयन्ते । तथा ह्यपरया दिशा योगासम्बन्धाविशेषे ऽपि कश्चिदाधा-

रतां च प्रदिश इति दिङ्निमित्तो देशव्यवहारश्च। एवं च देश समवायवशेन तिरोहितभेद इति भागे ऽवयवभेदश्च व्यवह्रियते। तद्वशेन च क्रमेण चोत्पत्ते। क्रमावभासो गुणादिभिश्च समवायाद्भेदापोहे विशिष्टावसाय इति संसर्गिनिमित्तो भावानां व्यवहार.। आत्मा तु तेषां तत्र योगात्स्वभाव.॥ १४॥

तदेवं यथादेशादिकार्यभेदेशाद्या अपि भावा। संसर्गिभेदभिन्न प्रतीयमानावयवो महापरिमाणो घटादिरवयवी इष्यत इति कथं तत्रादेश इहाप्युपपद्यत इत्याशङ्क्याह॥

निर्भागात्मकता तुल्या परमाणोर्घटस्य च।
भागः शक्त्यन्तरन्तत्र परिमाणं च यत्तयोः॥ १५॥

स्वभावभूता ऽवयवशून्यता घटपरमाण्वो समाना। दिग्लक्षणेन शक्तिविशेषेण तु प्रकल्पितपौर्वापर्या. स्वाभाविका एव समवायवशादविवेकेन भासमाना शक्तिनिमित्तत्वाच्छक्तिव्यपदेशस्या भागा इति व्यवह्रियन्ते। स्वतो भागवत्व एकत्वायोगादर्थान्तरसम्बन्धनिमित्ता च भागवत्ता न मुख्या, परमाणोरपि प्रसङ्गात्तत्रापि परिणामकृतो मुख्यो भागभेद परिमाणस्यापि तयोर्घटाणवोर्महत्त्वाणुत्वलक्षणस्य भावादर्थान्तरत्वान्महदणुप्रत्ययहेतुर्हि शक्तिविशेष. परिमाणम्। अत एव परिमाणविशेषात् घटाणवोर्विशेष॥ १५॥

नन्ववयवसम्बन्धासम्बन्धाभ्यामित्युपाधिसम्बन्धानपेक्षायामव्यपदेश वस्तु ब्रह्मकल्पं सर्वं समानम्। न चापि धस्तूनामुपाधिनिहितो भेद स्वरूपसमवायीत्याह॥

यतः प्रकल्प्यते भेदो ऽभेदस्तत्रापि दृश्यते।
अदृष्टोपरतिं भेदमतो युक्ततरं विदुः॥ १६॥

अवयवैरवयविनां भेद अवयवानामपि स्वावयवैः तेषामपि स्वावयवैरिति यावत्परमाणुपर्यन्त प्राप्ति। तत्रापि दिशा भागभेदप्रकल्पनमादिगाद्यनाश्रितभेद कथं भेदायोपकल्पेत। दिग्भेदो ऽपि सूर्यसंयोगादाहित। ते ऽपि सूर्यसयोगा मेरुप्रदेशभेदात्तत्राप्यवयवभेदाभेद। तत्राप्यवयवभेदाभेद. तत्राप्यवयव इति पुनर्दिश्येवावस्थानम। तत्राप्येवमिति चक्रतुल्यमिदमित्यदृष्टा उपरतिर्निष्ठा यस्य

भेदस्य नमनवस्थादोषादतिशयेनानुपपन्नं मन्यन्ते । न केवलं धर्मो भेदो युक्तो भावानां यावदुपाधीनामप्यन्यापेक्षणादपर्यवसितो भेदः सुतरां भावभेदेन नालमिति प्रकर्षः । तदेव तु देशादिभेदस्य भावेषु स्वत उपाधिवशादप्यनवगाह्यनहारमात्रं सांवृतेन रूपेण प्ररूढमशक्यापह्नवमिति निगमयिष्यति चैतन्यवदित्यादिना ॥ १६ ॥

सम्प्रति व्यापकत्वामूर्त्तत्वे दिश प्राह ।

सर्वत्र तस्य कार्यस्य दर्शनाद्विभुरिष्यते ।
विभुत्वमेतदेवाहुरन्यः कार्यवतां विधिः ॥ १७ ॥

व्यतिरेकादेशे पूर्वोदितस्य कार्यस्य सार्वत्रिकत्वाद्व्यापिनी विभिन्नभुक्तभावा । अमूर्त्तानां तु शरीरिणामवयवैर्विततदेशव्याप्तिर्विभुत्वम् ॥ १७ ॥

इदानीं पूर्वोक्तं निगमयति ।

चैतन्यवत् स्थिता लोके दिक्कालपरिकल्पना ।
प्रकृतिं प्राणिनां तां हि को ऽन्यथा स्थापयिष्यति ॥१८॥

सन्नपि हि पदार्थो यावन्न संवेद्यते तावदप्राप्तत्वादेव नार्थक्रियायां प्रयुज्यत इति चैतन्यं ज्ञानं सर्वैवादिभिरशक्यापह्नवम् । आत्मा चैतन्यम् । यथाहु सांख्याः, चैतन्यं पुरुषस्य स्वरूपमिति । तच्चाशक्यापह्नवम् । तद्वदनुपपद्यमानभेदापि दिक्कालयो परिकल्पना यथाप्रतीति रूढा । भावानां हि परमार्थतः पूर्वोक्तभेदभयेन भेदाभेदभावादिरूपैरयोगादनादिप्ररूढाविद्यावशादविद्वान् व्यवहारो रूढ प्रवृत्ति स्वभावमिव व्यवहर्तृणां प्राप्त इति तद्विद्भिरपि तथा तत्त्ववेदिभिरन्यथा व्यवस्थापयितुं न पार्यते । तथा हि चैतन्यं स्वभावभूतम् । एवं सर्वव्यवहाराणां पूर्वापरादित्वेन दिक्कालावपि रूढौ भावान्तरेणार्थक्रियानिष्पत्तेः । प्राणित्वमेव विघटतेति प्राणिग्रहणमेव सूचयति । (यतियति)? व्यवहारे च यथाप्रतीति पदार्थप्रत्याख्यानं न युज्यते ॥ १८ ॥

यस्मात् ॥

सङ्करो व्यवहाराणां प्रकृतेः स्याद्विपर्यये ।
तस्मात्पञ्चत्रिमान्भावान्पुनरेवावलम्बते ॥ १९ ॥

दृष्टादृष्टफला व्यवहाराः प्राङ्मुखो ऽश्नानि भुञ्जीत, अपराह्णे श्राद्धं कुर्यादित्यादय , प्रत्याख्याने दिक्कालयोर्न कल्पेरन् । प्रकृते स्वाभावरूपरूपतां प्राप्तायां दिक्कालकल्पनाया विपर्यये, वैपरीत्ये, अपूर्वापरादिनिमित्तत्वे ऽङ्गीक्रियमाणे मिथोभावो ऽनवस्थितत्वं प्रत्यक्षागमकदानां सन्ध्योपासनादिरूपाणां व्यवहाराणां स्यात्तस्माद्यद्यप्यपूर्वापरं हीदं विश्व, मूर्त्तिनः क्रिया ततश्च, तथा ऽपि विद्वान् व्यवहारपतित. व्यक्तप्रपञ्चावभासो ऽपि प्रपञ्चमवलम्बत एव, इमान् दिक्कालप्रकारानर्थान्बोधकानां सोपन्यासेन निराकुर्वन्नप्यवलम्बते । तदुपाधिप्रत्ययस्यानिवार्यत्वात् ॥ वृद्धवचनेन नावयव्यादिरप्यर्थो ऽशक्यपरित्यागो व्यवहार इति दर्शयति । त्यजन्नवलम्बत इति । समानकालत्वेन त्यागावलम्बनयोरतिशयोक्त्या युगपद्विरुद्धाख्यार्थाभ्युपगमात्परस्य स्ववचनविरोधं ध्वनयति ॥ १९ ॥

यथा च कालो ब्रह्मण शक्तिभावेषु प्रतिबन्धाभ्यनुज्ञाव्यापारो ऽध्यस्तनानात्वात्तथा दिगपि स्वोपाधिभिन्ना पूर्वापरादिभावभेदव्यवहारनिबन्धनीत्याह ॥

तस्यास्तु शक्तेः पूर्वादिर्भेदो भावान्तराश्रयः ।
भिन्ना दिक्तेन भेदेन भेदायैवोपकल्पते ॥ २० ॥

सा स्वैरुपाधिभिर्भिन्नेति सामान्येनोक्ते ऽपि पूर्वादितया विशेषरूपेण भेद पुनरारोपित. । सूर्यसयोगश्च भावान्तराव्याख्यात. । भेदायैव तत्तद्विशेषणोपरक्तविशेष्यप्रत्ययजननायेत्यर्थ । अवधारणेन भिन्नविशेष्यप्रत्ययकाल एवौपाधिक भेदं समवलम्बते नान्यदा स्वतो भिन्नादिमित्याह ॥ २० ॥

इदानीं दिङ्निमित्तं शास्त्रे कार्यमाह ॥

अवधित्वेन वापेक्षायोगे दिग्लक्षणो विधिः ।
पूर्वमस्येति षष्ठ्येव दृष्टा धर्मान्तराश्रये ॥ २१ ॥

इदमस्मात्पूर्वं परमिति मर्यादारूपेणापेक्षणं लौकिकं कार्यं, तत्रैव शास्त्रीयं दिग्योगलक्षणापञ्चमी विशेषविषया । कथ तर्ह्यत्र विषये षष्ठी दृश्यत इत्याह । पूर्वमस्येति षष्ठ्येव दृष्टेत्यादि । अवध्यव-

धिमत्सम्बन्धे ऽपेक्षिते पञ्चमीति तया षष्ठी तत्रैवापवादत्वाद् बाध्यते । धर्मान्तरस्यावयवत्वस्य त्वपेक्षायामवयविनि षष्ठ्येव भवति पूर्वं कायस्येति । न ह्यवधित्वेनावयविनो ऽपेक्षेति दिग्योगपञ्चम्या अविषयो ऽयम् । अवयवावयविसम्बन्धे तु न पञ्चमी किं त्ववधर्वाधमत्सम्बन्धे । अत एव चावयवान्तरापेक्षा । अवयवान्तरस्य तु पूर्वतति-सम्बन्धिभेदादविरोधे विभक्तिद्वयोपपत्ति । समासविधौ एकदेशिनेत्यवयविपरिग्रहे हि पूर्वता नाश्रीयते ॥ २१ ॥

शब्दव्यवहारे त्वपूर्वादिभावः पूर्वादिदिङ्निमित्तो ऽर्थानां, न स्थाननिमित्त इति नानवस्थित इत्याह ॥

पूर्वादीनां विपर्यासो दृष्टश्चावध्यसङ्करे ।
ऋज्वेतदस्येत्येतच्च लिङ्गं न व्यतिकीर्यते ॥ २२ ॥

अवधेरपेक्षणीयस्यासङ्करे अमा नियताभावे पूर्वादीनां विपर्यासो दृष्ट इति, व्यवस्थित एवायं व्यवहारस्तथा हि, यदपेक्ष्य पूर्वत्वं व्यवह्रियते तदेवापेक्ष्य तस्यैवापरत्वमिति परत्वापरत्वे दिक्कृते अनियते एव । अस्य वंशस्य ऋजु स्पष्टं मूलं इत्येतदपि दिशो लिङ्गं न व्यतिकीर्यते । अवधेरेवानपेक्षणादवध्यपेक्षायां हि साङ्कर्यं सम्भाव्येतापि । अवधेरनवस्थितत्वान्न चात्र लिङ्गे अवध्यपेक्षेत्यव्यतिकीर्णा एव दिश । इत्थं च स्वाङ्गादपि व्यवस्थाने ऽवधिनियमासाङ्कर्यमेव । दृष्टादृष्टप्रयोजनस्तु व्यवहारो ऽनादिसिद्धादित्यसम्प्रयोगाख्यावधिनिबन्धनदिग्व्यवस्थानियत एवैषणीय इति न यः कश्चनावधिराश्रयणीयः ॥ २३ ॥

एवं तावद्बाह्यार्थनयेन दिक्समर्थिता । इदानीमन्तः क्षेपनयेनाह ॥

अन्तःकरणधर्मो वा बहिरेवं प्रकाशते ।
अस्यां त्वन्तर्बहिर्भावः क्रियायां न विद्यते ॥ २३ ॥

अन्तरवस्थितं करणं व्यापारो यस्येति चैतन्यमेवेयुच्यते । तस्य ह्यनाद्यविद्यावशात्स्वरूपनिष्कर्षेणेदमिति बहिराकारावभासे ऽपि परमार्थतो बाह्यस्यायोगात्स्वभावे च जगत्प्रत्यवभासते इत्य-

न्तरवस्थितस्यैव व्यापारस्तथा च वक्ष्यति "द्यौः क्षमा वायुरादित्यः सागराः सरितो दिश । अन्तः करणतत्त्वस्य भागा बहिरवस्थिता. "। इतिवस्यान्तः करणतत्त्वस्यायं धर्मो बाह्यार्थानपेक्षो ऽविद्यावशात्स्वभावभूतो ऽवभास', एव पूर्वाद्याकारेण बहिरध्यवसीयतेऽसति बाह्ये कथं बहिरित्युच्यत इति चेदाह । अस्यामविद्यावशादवभासस्यैव बाह्यत्वावभासरूपायां करणतायामन्तारूपता बहीरूपता वचनमुख्या । परानुरोध्यनुप्रतिभासवशेनैवमुच्यत इत्यर्थः। असति हि बाह्ये तदपेक्षमान्तरत्वमपि मुख्यमिति काल्पनिको ऽन्तर्बहिर्भाव.।एवं च पूर्वापरत्वमविद्याध्यस्तं भावेषु अन्तारूपेषु अनादिमिथ्याभासवासनालक्षणान्त करणधर्मरूपं चकास्तीति न बाह्या का चिद्दिगस्ति ॥ २३ ॥

अतश्चैकत्वनानात्वविचारो ऽपि निष्फल एवेत्याह ।

एकत्वमासां शक्तीनां नानात्वं वेति कल्पने ।
अवस्तुपतिते ज्ञात्वा मत्यतो न परामृशेत् ॥ २४ ॥

नानोपाधिरूपाणां पूर्वादित्वेन भिन्नानां दिक्शक्तीनां मुख्यमेकत्वं, उपाधिभेदात्तु नानात्वम्।मुख्यमेव चानादिसिद्धमेकत्वं, नानात्वं भिन्नकार्यानुमेयमित्येते द्वे कल्पने अवस्तुपतिते।दिशः परमार्थतोऽवस्तुत्वाद्विज्ञाननये व्यतिरिक्तवस्त्वभावादित्यवस्तुविषये, बुद्ध्या परमार्थतो न विचारणीये इत्यर्थः । यथाप्रतीति व्यवहारसिद्धे. । अत एव सम्वेद्यमानत्वम् । प्रतीतिभेदात्तत्त्वं अभिप्रेत्यासामिति बहुत्वेन निर्देश. ॥ २४ ॥

न च पदार्थाविचारे किं चित्प्रयोजनमस्ति । तथा हि ॥

विकल्पातीततत्त्वेषु सङ्केतोपनिबन्धनाः ।
भावेषु व्यवहारा ये लोकस्तत्रानुगम्यते ॥ २५ ॥

इह पदार्थास्तीर्थिकपरिकल्पितनियतसङ्केतपरिघटितशरीरास्ते तीर्थिकपरिकल्पितान्विकल्पानतिक्रम्य भावतो वर्त्तन्ते। न हि प्रतिदर्शनदर्शितविरुद्धरूपयोगवत्त्व भावानाम्। तस्मादविचारितरमणीया लोकसिद्धाः पदार्था. समाश्रयणीया विद्वद्भिरपि । अतोऽलं प्रतिष्ठितनिमित्तैः तर्कविकल्पैस्तथा च लोके प्रसिद्धा दश दिशः सिद्धा ॥ २५ ॥

तर्कविकल्पैस्तु भेदाभेदो ऽपि न व्यवतिष्ठत इत्याह ॥

नैकत्वमस्ति नानात्वं विनैकत्वेन नेतरत् ।
परमार्थे तयोरेष भेदो ऽत्यन्तं न विद्यते ॥ २६ ॥

अन्योन्याश्रयश्च रूपस्यैकासिद्धावितरासिद्धिप्रसङ्ग इति दिशामेकत्वनानात्वे न व्यवतिष्ठेते । व्यवहारे गर्जानिमिलतेन तु यथात्र भासं लौकिको व्यवहारो रूढः । परमार्थविचारे तु परस्परप्रतियोगिनोर्भेदाभेदयोरप्यसत्यता, मुख्याभिन्नस्य परस्यैव तत्त्वरूपत्वादित्यर्थः । किं च परोपाधितया शक्तिर्दिगित्युक्तम् ॥ २६ ॥

शक्तेश्च भेदाभेदविचारा न सन्तीत्याह ॥

न शक्तीनां तथा भेदो यथा शक्तिगतां स्थितिः ।
न च लौकिकमेकत्वं तासामात्मसु विद्यते ॥ २७ ॥

शक्तिमतां स्वतन्त्राणां पदार्थानां पृथगेवावधारणाद्भेदो निश्चीयते न शक्तीनामाधारपारतन्त्र्येणावभासमानानामस्मादाधारात्परतश्च भेदः प्रत्यक्षसिद्धः । न चापि स्वतन्त्रस्याशक्तिमतो यथा भेदो, घटादेरेकत्वं लोकप्रसिद्धं भेदावभासात्तथा शक्तिमतां कार्यनानात्वोन्नीयमानभेदानां स्वत आधाराच्चाभेदो ऽस्तीत्यनिर्वाच्या एव भेदाभेदाभ्यां सर्वे शक्तयः । अत एवाविद्याशक्तिब्रह्मणोर्भेदं नैनापत्ति ॥ २७ ॥

यदुक्तं नैकत्वमस्ति नानात्वमित्यादि तदेवाव्यवस्थितत्वेन, निगमयँस्तार्किकाणामेकवत्तावलम्बनं न युक्तमित्याह ॥

नैकत्वं व्यवतिष्ठेत नानात्वं चेन्न कल्पयेत् ।
नानात्वं चावहीयेत यद्येकत्वं न कल्पयेत् ॥ २८ ॥

प्रतियोगिभूतं नानात्वं यदि बुद्ध्या न कल्पयेत् नाश्रयेत् एकत्वं कर्तृ, तदा न स्वरूपमनियतं लभेत । एवं नानात्वमपि यदि प्रतियोगिभूतं नाश्रयेत् तदा तदपि नावतिष्ठेतेति परस्परापेक्षत्वादनयोर्नैकत्वाद्यवस्थातुं पार्यते इत्यविचारितरमणीया दिगाश्रयणी या लौकिकीति सिद्धम् ॥ २८ ॥

इति श्रीभूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे
दिक्समुद्देशः षष्ठः ॥

निरन्तरा ऽभ्यात् दिक् साधनमिति दिशो ऽनन्तरं साधनमुद्दिष्टं लक्षयितुमाह ॥

स्वाश्रये समवेतानां तद्देवाश्रयान्तरे ।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः ॥ १ ॥

क्रियानिर्वृत्तौ द्रव्यस्य शक्तिं, साधनं साध्यते ऽनेन क्रियेति भाष्यकारप्रभृतयो विदुः । तथा हि गुणः साधनमिति भाष्य उक्तम् । शक्तिरेवात्राधारपारतन्त्र्यादन्यस्माच्च स्वाश्रयस्य भेदकत्वाद् गुणशब्देनोक्ता कृदाख्यातैरभिहितयोर्भावयाभेदाभिधानप्रसङ्गहेतुः । यद्भाव्यं क्रियाभिनिर्वृत्तिं प्रति साधनभावमुपैतीति तदन्यत्राह । नित्यद्रव्यस्य साधनत्वे (कदा सा)ऽच्छक्तिव्यधानाश्रयेण भवितव्यम् । शक्यं हि द्रव्यं साधनं, न तु निराधारा शक्तिः सम्भवति । परोक्षे लिङित्यत्रापि यदि गुणसमुदाय साधनं, साधनमप्यनुमानगम्यम् । अथान्यद् गुणेभ्यः साधनं, भवति प्रत्यक्षपरोक्षतायाः सम्भव इति यद्भाव्यं तदेवं नेतव्यं, शक्तेर्नित्यपरोक्षत्वात् । क्रियावद्विशेषणमव्यभिचारादयुक्तमिति परोक्षताविशेषणसामर्थ्यात् शक्त्या विशिष्टद्रव्यं साधनमुपन्यस्तम् । एवमुपसर्गाच्छन्दसि धात्वर्थ इति साधने यद्भवलिङ्गसङ्ख्याभ्यां शोभन इति भाष्ये साधनशक्तिविशिष्टं द्रव्य इति व्याख्येयम् । तथा हि धातावित्येवोक्ते शब्दे कृत्यसम्भवात् क्रियाप्रतिपत्तौ सिद्धायामर्थग्रहणाद्धातुकृतो ऽर्थ इति समाप्तप्रतिपत्त्यर्थं द्रव्यमाश्रितम् । वस्तुपर्यायो ऽर्थशब्दः । द्रव्यस्य च स्वरूपेण सिद्धस्वभावत्वात् क्रियाया करणानुपपत्तेः, कर्मादिकारकरूपेणैव तस्य करणत्वम् । क्रिया हि कारकाणि करोति तदपेक्षत्वात्तद्व्यवहारस्येति साधनात्मना द्रव्यस्य क्रियया करणादेवमुक्तम् । धातुरर्थं प्रयोजनमस्येत्येतत्तु भाष्यव्याख्यानमयुक्तम् । एवं हि शक्तेरेव क्रियासाध्यत्वेन प्रयोजनमिति द्रव्यं न प्रत्याय्येत । यत्तु साधनं वै द्रव्य, न च द्रव्यस्य प्रकर्षापकर्षौ स्तः द्रव्य द्रव्यप्रकर्षव्याख्यानम् भाष्ये द्रव्यस्य साधनत्वाभिधानं तच्छक्तिशक्तिमतोर्भेदाविवक्षयेत्यवगन्तव्यम् । तथा हि तिङन्तक्रियासाधनाभिधायिनः प्रकर्षे प्रत्यय इति, शक्तिः क्रियालक्षणकार्यानुमेया कार्यद्वारेणैव प्रकर्षकार्यम् । प्रकर्षे प्रत्ययस्य स्पष्टसङ्गहे द्र-

व्याधारत्वशक्तेः कार्यमुखत्वात्कारणभूतद्रव्यमुखेनापि कर्तृ न प्रकर्षे इत्याशङ्क्य द्रव्यस्य तद्भाव इत्येतदभिधातुमेतदुक्तमिति व्यतिरेको ऽनादृत । तत्र कर्तृकर्मणो क्रिया समवैतीति स्वाश्रयसमवेतक्रियानिष्पत्तौ तयो , क्तादिकृतां करणादीनां तु पराश्रयसमवेतायां क्रियायां साधनभाव । न हि करणादिषु क्रिया समवैति। क्रियाणामिति व्यक्तिभेदापेक्षं बहुवचनम्।गुणक्रियापेक्षया वा सर्वेषां स्वाश्रयसमवेतक्रियापेक्षं साधनत्वम्। गुणक्रियायां हि कर्त्तारः सर्वे। अकिञ्चित्करस्य साधनत्वानुपपत्ते । अत एव करणं कारकमित्यादि साधनसामानाधिकरण्योपपत्ति । इत्थं च क्रियाणामिति बहुवचनं सुष्ठु गमितं भवति। कर्तृकर्मस्था तु प्रधानक्रिया करणादीनामाश्रयान्तरसमवेता॥१॥

कथं पुनरेतदवगम्यते शक्ति. साधनं न पुनर्द्रव्यमित्याशङ्क्याह ।

शक्तिमात्रामयूहस्य विश्वस्यानेकधर्म्मणः
सर्वदा सर्वथाभावात्क चित्किं चिद्विवक्ष्यते ॥ २ ॥

घटादयो भावा विश्वशब्दवाच्या ते च तत्तदुदकाहरणादिकार्यसाधिकानां शक्तीनां समूहरूपा । अत एव ता. शक्तय. तत्र मात्राभागा इति शक्तिसमाहारमात्रं घटादय । ताश्च शक्तयो ऽनेकविधा । काश्चित् स्वहेतोरेव दैवात् भवन्ति, आश्रयादिनाशं मत्वेव न च विनश्यन्ति। यथा बोधप्रदीपानां प्रकाशशक्तय । काश्चित्पौरुषे ऽप्यन्त स्थिता एवाश्रये निरुध्यन्ते । यथा बाधादिशक्तय. । ता हि समभ्यासेन दृष्टद्रव्योपयोगेन जायन्ते। अन्या सत्यो वा अपरपुरुषप्रयत्नेन विध्वंस्यन्ते। यथा विषस्य मारणशक्ति ।बीजस्याङ्कुरजननशक्ति.। अन्या.प्रभावातिशयवता विपरिवर्त्यन्ते। यथा योगिना सर्वभावानां रूपपरिवृत्तिराधीयते । काश्चित्कालपरिवासेन व्यज्यन्ते । यथा धर्माधर्मशक्ति.फलदान इत्याद्यनेकविधमुन्नेयम्। एवमनेकस्वभावत्वे शक्तिसमुदायस्य विचित्रे कार्ये यथाशक्ति भेदविवक्षायां प्रतिनियतसाधनभावोपपत्ति। द्रव्यस्य तु साधनत्वे तस्यैकरूपत्वात् कार्यवैचित्र्यं न स्यादित्यर्थ । तदुक्त भाष्ये गुणसमुदाय. साधनमिति। प्रधानक्रियाया एकैकशक्तिसाध्यत्वाभावात् समुदायग्रहणम्।गुणक्रियापेक्षया तु

प्रत्येकं शक्ते साधनता। तस्याश्च प्रधानक्रियापेक्षया वैचित्र्यात्। कर्माकर्मादिविरूपताया वा प्रत्येकं साधनत्वेऽपि समुदायग्रहणं शक्तीनां साधनत्वेनासां भेदादेकस्य कार्यभेदोपपत्तिव्याख्यापनार्थम्। तेनानेकशक्तेरपि पदार्थस्य सत्येव तथा स्थानेऽपि का चिच्छक्ति. क चिदुद्भूता विवक्ष्यत इति घटं पश्य घटेनोदकमानय घटे उदकं निधेहीत्यादिकर्मकरणादिभावो नियमेनोपपद्यत इति न कारकसाङ्कर्यप्रसङ्ग.। द्रव्यस्य त्वेकस्वभावत्वात् कर्मकरणादित्वं नोपपद्यत इति गर्भीकृतेयमत्र शक्ति शक्ते साधनत्वे बोद्धव्या ॥ २ ॥

ननु च यत्र सन्ति शक्तय तत्र युक्तं यत् नियमेन विवक्षा। इष्यन्ते पुनरसत्यस्तत्र कथं तासां विवक्षा। तद्यथा शक्तिमादधाति शक्त्या साधयति शक्त्या वर्तते शक्तेर्व्यभ्येतीति। न हि शक्ते शक्त्यन्तरयोग अनवस्थापातात्। तथा धनविनाशं करोति धनाभावो न युक्त इति निरूपाख्ये भावे का शक्ति। स्थाल्यां पचति स्थाल्या पचति स्थाल्या पचतीति च सम्भवनधारणोपकारा स्थाली करणाधिकरणभिन्ना कथमित्याशङ्क्याह।

साधनव्यवहारश्च बुध्यवस्थानिबन्धनः।
सन्नमन्वार्थरूपेषु भेदो बुध्या प्रकल्प्यते ॥ ३ ॥

विवक्षारूपाया बुद्धे. शब्दनिमित्ता ये ऽवस्थाविशेषाः प्रतिनियतशब्दनिबन्धना. तदाश्रय' कर्त्रादिकारकव्यवहारस्तथा हि। निरूपिते ऽर्थे शब्दप्रयोगाद्यथानिरूपणं शब्दोपपत्ति। निरूपणं चानपेक्ष्यापि बाह्यार्थं स्वातन्त्र्यपरिकल्पापतितम्। ज्ञानार्थविशेषात्। तथा हि सत्यपि वस्तुनि यावद् बुध्या निरूपणं नास्ति तावदविषय' शब्दानामव्यवहार्य इति व्यवहारेषु बुद्धिरेव प्रभवतीति। सन्निति दर्शनगर्भमभिधानम्। तत्र शक्तेर्द्रव्यायमाणाया बुद्धया स्वातन्त्र्येणानिरूपणाच्छब्देनाभिधाने शक्त्यन्तरयोगो विरुद्ध। न हि तदा शक्त्यवस्थायामेव तस्या योगो येनानवस्था स्यात्। अपि तु द्रव्यावस्थायामभावो ऽपि बुध्या निरूपिताकारो द्रव्यायमाण एव शब्दापवाच्य। एवं तनुनरकपालत्वात् स्थालीपाकोऽनपेक्षितकर्तृविनियोगास्वातन्त्र्येण विवक्षित इति कर्त्रा इन्धनोपकारानपेक्षया तस्या एव

साधकतमत्वविवक्षायां तु करणं, वास्तवाधारविवक्षायां त्वधिकरणमिति सर्वमुपपद्यते । अत एव हन्त्यात्मानमात्मना, आत्मनः स्वात्मनि व्यवस्थितमित्यादयो ऽपि प्रयोगाः प्रथितसाधनाः । वक्ष्यति चैतत् । बुध्यैकं भिद्यते भिन्नमेकत्वं चापगच्छतीत्यादि । इत्थविकयोरभेदाध्यवसायेन व्यवहारोपपत्तेः बहिरन्याव्यावृत्तिपरतया समन्वयो ऽत्र समर्थनीय । स्वात्मनि नान्यस्मिन् । स्वात्मन एव नापरस्यावस्थानमित्यादि । यथा शिलापुत्रकस्य शरीरमिति । इत्थं वाक्यादपोद्धृतस्यापि पदस्य संस्कारे प्रथमत एवाप्रयुक्तपदान्तरे विवक्षितस्यापि विशेषस्य रूपसामान्यादनवधारणे सम्भवत्येव, पदावधिकमन्वाख्यानम् । सन्निबन्धिसामान्यापेक्षितोऽन्यथा बुद्ध्या नियतमर्थरूपं क्रियादिसम्बन्ध्यपेक्षं कथं निरूप्येत । अनपेक्षितसम्बन्धरूपस्यार्थसामान्यस्याभावाद्भ्युपगमे च पदावधिकमन्वाख्यानम् । शास्त्रे धातुसम्बन्धे प्रत्यया इत्येवमादीनामप्रत्याख्यानात् । यत्र च सर्वथा ऽसङ्गतिः स्थालीमोदनेन काष्ठे पचतीत्यादौ, तद्वाक्यमेव न भवतीति कथं वाक्यादपोद्धृतानां पदानामन्वाख्यानप्रसङ्गः । अत एव चाक्षिणी मे दर्शनायेत्यादेर्विप्रयोगस्य निवृत्तये शास्त्रं सामर्थ्यवदेव । सामान्यमपि हि पदार्थरूपमर्थान्तरसंसर्गयोग्यमेव । संस्क्रियत्वेन त्वङ्गुल्यग्रे करिशतमास्त इत्याद्यसमुचितमेव । एवं च कृत्वा छन्दसि, च षाळं ये अश्वयूपाय तक्षतीत्यादावसावेकत्वशङ्का । यत्तु तत्र व्यत्ययो ऽर्थवानेव नियतानुपूर्वीकस्य च्छन्दोवाक्यस्यासम्भवात्तत्तथैव पदापोद्धारस्य न्याय्यत्वात् । लोके नावस्थितं नियतानुपूर्वीकमसङ्गतं वाक्यमिति न ततो ऽपोद्धारप्रसङ्गः । तस्माद्वाक्यादपोद्धृत्य पदानुशासने ऽपि निर्दोषमेव पदावधिकमन्वाख्यानम् । तत्र च समस्तविशेषणविशिष्टस्यार्थस्य निरन्तरत्वादपोद्धारे सामान्यमात्राधिकल्पितशरीरैव । उपक्रमे एव तु विशेषापेक्षायां वाक्यावधिकमन्वाख्यानं कथ्यते । न तु वाक्यस्यानन्त्यात् साक्षादन्वाख्यानं युज्यते । प्रकृतिप्रकृत्ययादिविभागकल्पनया हि पदस्यैवानुशासनमुपपद्यते । तस्य च केवलस्य च सम्भवाद्वाक्यस्थत्वे सम्बन्धिसामान्यापेक्षायां पदावधिकं तद्वाक्योपात्तसम्बन्धविशेषापेक्षायां तु वाक्यावधिकमन्वाख्यानमितीयाननयो पक्षयो विशेष ॥ ३ ॥

बौद्धे साधनव्यवहारे भाष्यकाराभ्युपगमं संवादकमाह ।

बुद्ध्या समाहितैकत्वान्पञ्चालान् कुरुभिर्यदा ।
पुनर्विभजते वक्ता तदा ऽपायः प्रतीयते ॥ ४ ॥

कुरुभ्यः पञ्चाला अभिरूपतरा इति पञ्चमी विभक्त इति पञ्चम्यर्थे सूत्रं भाष्ये प्रत्याख्यातं, बौद्धस्यापायस्य सम्भवादपादान इत्येव सिद्धे । तथाह्यभिरूप्येण समानगुणेन कुरुभि सह पञ्चालान् बुद्ध्यैकत्वं समुदायभावमापाद्य अतिशयाभिरूपतावशात् कुरुभ्यः पञ्चालाः पृथक् क्रियन्त इत्यस्ति संश्लेषपूर्वको विश्लेषो ऽपायः । तदुक्तं भाष्ये यस्तै साम्यं गतवान् एवं प्रयुङ्क्ते इति । तै. कुरुभि. पञ्चालानां सादृश्यसम्प्रधारणमर्थादाभिरूप्येण प्रथमं यो गतवानित्यर्थः । अनेन चैकबुद्धिनिवेशित्वेन कुरुपञ्चालानां देशप्रत्यासत्तिमाह भाष्यकारः । तत्पूर्ववस्तुन सातिशयस्य निरतिशयाद्विभागात्पञ्चमीशब्दोऽपादानसंज्ञात्वाश्रोक्तो भाष्यकृता । सूत्रारम्भवादिनामपि निर्धारणाश्रयत्वेनैषां बुद्ध्यैव समुदायभावो ऽसमानगुणात्वादाश्रयणीयः । अन्यथा निर्धारणाधिकारादेव विभागे लब्धे विभक्तग्रहणादत्यन्तविभागप्रतीतौ न वास्तवः समुदायभावो युज्येत । तदेवं बौद्धः साधनभावो यस्मादवसीयते, कारकप्रकरणे च तमप्ग्रहणात् प्रकर्षो न विवक्ष्यत इति गौणे ऽप्यन्वये ऽपादानसंज्ञा भवति ॥ ४ ॥

अन्यमपि भाष्योक्तं संवादमाह ।

शब्दोपहितरूपाँश्च बुद्धेर्विषयतां गतान् ।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥ ५ ॥

हेतुमति चेत्यत्राख्यानात्कृतस्तदाचष्ट इत्येवमाद्युपसङ्ख्यानेन वा सामान्यतोणिच. कृतत्वाद्धेतुमतीत्यविशिष्टमित्येवं प्रत्याख्यातम् । चित्रगुरित्यादौ हि प्रकृतिरूपस्य प्रयोज्यप्रयोजकभावाध्यवसायात्, कंसं घातयति, बलिं बन्धयतीति सिद्धम् । एवं कृतानुकरणेनाद्येऽपि (महानयनां)? कंसवासुदेवानुकारेण सादृश्यात्तद्रूपतोपपत्तिः । तत्र ग्रन्थिकेषु कथमिति चोदितम् । तत्र ग्रन्थिकाः कथकायत इति वृत्तिरूपेणैव कंसवधाद्याचक्षते । तत्र च प्रकृतिरूपस्याभावात् कथं प्रयोज्यप्रयोजकत्वमिति पर्यनुयोगः । तत्र परिहार उक्तः । ते ऽपि हि तेषामुत्पत्तिप्रभृत्याविनाशाद् बुद्धीर्व्याचक्षाणाः सन्तो बुद्धिविषयान्प्रकाशयन्ती-

ति चिरकालातीतत्वात् कंसादीनां बहिरसत्वात् बुद्धिगोचरतया सतो विद्यमानॉस्तान्प्रकाशयन्ति, शब्देनावभासयन्ति । बुद्धिप्रतिभास्येव ह्याकार. शब्दार्थो न वस्त्वर्थ' । तथा च कथक श्रोतरि कंसाद्याकारप्रत्ययजननात् बुद्धिवासुदेवेन बुद्धिकंसं घातयतीति प्रयोजकत्वसमारोपात् प्रयोगोपपत्तिः । तथा हि कथको ऽतीतशब्दसामर्थ्योपक्षयात् रूपविशेषान् श्रोत्रबुद्धिगोचरमापतितान् सव्यापाररूपान् कंसादीन् कर्मादिसाधनतया भाष्यकारो मन्यत इति बुद्ध्यवस्थानिबन्धन' साधनव्यवहार सिद्ध । गौणे ऽपि च प्रयोजके कारकप्रकरणे प्रकर्षानाश्रयाद्धेतुसंज्ञायां तद्व्यापारे ऽत्र णिचि सूत्राप्रत्यक्षमित्यव्ययीभाव.। तत्र क्रियाविशेषणं चैतत् । इन्द्रियनिमित्तेन ज्ञानेन परिस्फुटार्थं नावधारयतीत्यर्थ' । एतच्च वृद्धीर्व्याचक्षाणा इति भाष्यस्याभिप्रायाद्व्याख्यानम् । प्रभावातिशययुक्ते हि वस्तुन्यादरवशात् स्पष्टरूप प्रत्यय' प्रस्तूयते । स्पष्टे च ज्ञाने ऽवभासमान आकारो बाह्यात्मको ऽवसीयते ॥ ५ ॥

तदेवं बुध्या साधनव्यवहारोपपत्तावेकस्यापि वस्तुन शक्तिनानात्वं बौद्धं उपपद्यत इति निगमयति ।

बुद्धिप्रवृत्तिरूपं च समारोप्याभिधातृभिः ।
अर्थेषु शक्तेर्भेदानां क्रियते परिकल्पना ॥ ६ ॥

बुद्धे प्रवृत्तिर्व्यापारः परिच्छेदलक्षण' तस्या रूपमाकारो विषय आभासमानस्तमर्थेषु बाह्येष्वध्यस्य तेषां शक्तिनानात्वं परिकल्प्यते वक्तृभि.।अयमर्थ ।इदंविकल्पयोरभेदाध्यवसायात् बौद्ध शक्तिभेदो बाह्य एवेत्यभिमानः । तत्र चित्रं साधनभावमभिमन्यते । बुद्धिप्रतिभासस्य स्वप्रतिष्ठत्वेनानवगमात्तत्तद्क्रियाभेदं प्रतिवक्तृव्यपेक्षां चानुवर्त्य वस्त्वेव नानाशक्तिकमवगम्यत इति बहिरर्थे शब्द प्रमाणम् । क्रियाकारकससर्गस्य बाधकाभावात् सति संवादे च वाक्यस्य प्रामाण्यमुपयन्ति व्यवहर्त्तार' । सौगतानां तु विकल्पप्रतिबिम्बस्य भेदानध्यवसायात् बहिष्प्रवृत्ति ।माध्यं तु वक्त्रभिप्राय एव । शब्दानां तु बाह्ये व्यभिचारशङ्कानादन्यव्यावृत्तिमात्रनिष्ठता तु बहि. । वैय्याकरणानां तु व्यावृत्तवस्तुविषयता तथाध्यवसायात्तत्रैव च प्रामाण्यमिति निदर्शनभेद. । नियतोपाधिनियमत्वाच्च न सांङ्कर्यम् । उपका-

रिकाश्च शक्तय प्रत्युपादिभि संमूर्च्छितशरीरत्वाद्वस्तुनस्तत्त्वान्यत्वाभ्यामनिर्वाच्या इति नानोपाध्युपकाराङ्गत्वादेरपमङ्ग. ॥ ६ ॥

बुद्ध्यवस्थासमाश्रये च साधनभावे सतीदमपि सिद्धं भवतीत्याह ।

व्यक्तौ पदार्थे शब्दादेर्जन्यमानस्य कर्मणः ।
सा-ानत्त तथा सिद्धं बुद्धिरूपमकल्पितम् ॥ ७ ॥

जातौ पदार्थे तज्जातीयाभेदेनानागत निरूप्य योग्यसाधनविनियोगाज्जातिद्वारेण क्रियासिद्धावङ्गता, व्यक्तिद्वारेण तु निर्वर्त्यमानता कर्मणो युज्यत इत्युक्तं, निर्वर्त्यमानं यत्कर्म जातिस्तत्रापि साधनमिति। व्यक्तौ तु पदेन प्रत्याय्यायां शब्दं जनयति संयोगं करोतीत्यादौ जन्यमानस्य निर्वर्त्यस्य शब्दादेरेतत्कर्मणो ऽनागतस्यापि वर्त्तमानत्वम्। व्यक्तिमात्र्याद्यमत्यपि जाते प्रत्यायने भेदाध्यवसायो बुद्ध्याकारमुल्लिख्य योग्यसाधनविनियोगात्। बौद्धस्यैव बहीरूपता चाध्यवसायात्। बाह्येन तु रूपेण निर्वर्त्यमानता। बौद्धो न तु साधनभावो युज्यत इत्यर्थ । जन्यमानस्येत्येतेन विकार्यप्राप्ययोर्व्यवच्छेद ॥ ७ ॥

विकार्यं हि प्रकृतिरूपेण स्थितमेव। प्राप्यमपि स्थान एव क्रियाद्वारा बुध्याऽन्धाराप्यत इति व्याप्तिमाह ।

स्वतन्त्रपरतन्त्रत्वे क्रमरूपं च दर्शितम् ।
निरीहेष्वपि भावेषु कल्पनोपनिबन्धनम् ॥ ८ ॥

सदसत्पक्षभेदेन कार्यकारणभावस्य निराकृतत्वात् सर्वभावाः क्रियारहिताश्चेष्टा अन्यास्तत्र क्रियायां स्वातन्त्र्यपारतन्त्र्यलक्षणं कर्तृकरणादिरूप कारकत्वं, क्रियारूपमेव च क्रमवत्त्वं यथाभासमनादिमिथ्याभ्यासवासनावशेन कल्पनाबुद्ध्युपचरितसत्त्वम् । अपूर्वादस्यापि भावतो विश्वरूपपरतया स्वातन्त्र्यादिना स्वभासनादिति मिथ्यावभासो ऽयमर्थेषु क्रियाकारकभाव इत्यर्थ । अत्र द्वैतनये हि सर्वमुपपद्यते असत्यत्वादिति विकल्पपरिघटित शाब्दो व्यवहारो यथाप्रतीत्यविचारितसिद्धो ऽप्युपगन्तव्य इति दिगादिपदार्थवत् साधनपदार्थसिद्धि । दर्शितमित्यद्वैतनयावलम्बिभिर्भाष्यकारप्रभृ-

तिभिः कूलं पिपतिषतीत्यादिप्रयोगप्रसिद्ध्यर्थमाख्यातमित्यर्थः ॥८॥

एवं तावद् द्रव्यव्यतिरिक्तशक्तिदर्शनेन साधनं लक्षितं, अव्यतिरिक्तशक्तिदर्शनेनाप्याह ।

शक्तयः शक्तिमन्तश्च सर्वे संसर्गवादिनाम् ।
भावास्तेष्वस्वशब्देषु साधनत्वं निरूप्यते ॥ ९ ॥

समवायवशाद्धर्मधर्मिणोरभेदमिव भेदमपि ये वदन्ति संसर्गवादिनो वैशेषिकास्ते च स्वरूपं सहकारिणश्च भावनां स्वकार्यजनने शक्तिरिति प्रतिपद्यन्त इत्यसहकारिणः शक्तेः पदार्थव्यतिरिक्ता विद्यते।एवमपि साधनत्वं भावानामपादानादिशब्दैर्न प्रत्याय्यते, अपि तु विभक्तिभिरेव । तथा च प्रत्यायनयोग्यतामात्रेण त्वपादानादिशब्दप्रवृत्तिः।घटं पश्यतीत्यादावेव द्वितीयादिभिर्महत्त्वाधारनियतं प्रत्याय्यमानं शक्तिसाधनं भवति आधारानवच्छिन्नम्। स्वमहत्त्वादिकर्मत्वादिशब्दवाच्यो न किं तव । नापि साधयतीति तद्भावो विभक्त्येकसमधिगम्यः । प्रातिपदिकादाधारवाच्यस्य उत्पत्तेः । आधारसमवाये साधनत्वस्य संस्पर्शादुपकारावस्थायां च शक्तित्वं च उपकार्यावस्थायां तु शक्तिमत्त्वं प्रमाणदृष्टमिति न काचिदनुपपत्तिः । सत एव शक्त्यवस्थायां शक्त्यन्तरेणायोगादनवस्था ऽपि नास्ति। अभावस्यास्मिन्दर्शने सप्तमपदार्थरूपत्वेन भाव्यत्वात् अशक्तियोगो विरुद्धः ॥ ९ ॥

तत्र को भावः कस्य का शक्तिरित्युदाहरणमाह ।

घटस्य दृशिकर्मत्वे महत्त्वादीनि साधनम् ।
रूपस्य दृशिकर्मत्वे रूपत्वादीनि साधनम् ॥ १० ॥

घटं पश्यतीति दर्शनक्रियाकर्मभावापन्नस्य घटस्य द्रव्यत्वरूपाणिशक्तिस्वसमवेतानि साधनं कर्मकारकं । तथा हि कणादसूत्रं । महत्त्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिरिति।अस्यार्थः ।अनेकद्रव्यं समवायि कारणं यस्य तदनेकद्रव्यं द्व्यणुकादि । तद्यस्यास्ति तदारब्धस्य तदनेकद्रव्यवत् तद्भावस्तत्त्वं तस्माद्धेतोरुपलब्धिर्महति द्रव्ये । तेन बहुव्रीहिणा मतुपा च द्वौ मत्वर्थावुक्तौ, तत्रैकेन परमाणोर्व्यवच्छेदान्महारूपवानन्यनेकस्य द्रव्यस्यारम्भकाभावान्नोपलभ्यते । अपरेण

तु मत्वर्थेन द्व्यणुकादेर्व्यवच्छेद.। अत एव सूत्रान्तरमुक्तं, द्रव्यत्वात्परमाणावनुपलब्धिरिति । परमाणुग्रहणमत्र दृश्यमानस्योपलक्षणार्थम् । महति दृश्यमाने चानेकद्रव्यवत्त्वं दर्शनहेतुरिति द्व्यणुकस्य कारणबहुत्वप्रचयेभ्यो महत्वस्योत्पत्तिरिति त्रिभिर्द्व्यणुकैरारम्भान्महतोऽनेकद्रव्यवत्त्वे ऽपि तदभाव:।महतां हि दृश्यमानस्यानुवादेनेदं विधीयत इत्यदृश्येना(पवेरस्मौनास्या)? दृश्यताप्रतिः। न हि मत्वर्थेन दर्शने कारण विधीयते । एवं ह्येकस्या आकृतेश्चरित' प्रयोग इति न्यायप्रक्रमाभेदार्थं पञ्चम्येव क्रियते । अनेकद्रव्यवतश्च महत्-वाव्यभिचारान्महतीति न हेतुनिर्देश., अपि तु विषयोपलक्षणमेव। रूपादिति च द्वितीयो दर्शनहेतु । नीरूपस्य वायोर्महतो ऽनेकद्रव्यवतश्चाप्यनुपलम्भात्तदुक्तं सूत्रं, रूपसंस्काराभावात्तु वायावनुपलब्धिरिति, हेतुत्वं न महत्त्वस्यापि। ततो द्वयोरेव व्यतिरेकाप्रदर्शनम् । महत्त्वस्याकारणत्वे ऽपि च तद्विषयत्वाद्दर्शनस्य पारम्पर्येणोपयोगान्महत्त्वादीनि साधनमिति बहुवचनम्।यस्त्वद्रव्यत्वादीनां सामान्यविशेषाणामप्यादिशब्देन सङ्ग्रहणात् बहुवचनमत्र सामान्यम्, विशेषादि प्रधानं दर्शननिबन्धनं, तदुपाधिकत्वेनार्थानां, पररूपव्यावृत्तस्यात्मन उपलम्भात्।महतीत्येव सूत्रे व्यभिचार आकाशादिनेत्यनेकद्रव्यवत्त्वादिति मतुपा ऽवयविद्रव्ये प्रतीतिरभिव्यज्यते। अनेकद्रव्यवत्वादिति पुनरुच्यमाने तत्पुरुषसम्भावनया द्रव्यप्रचयमात्रं गम्यते। तत् रूपं पश्यतीत्यत्र रूपस्य दर्शनक्रियायां रूपत्वं स्वसमवेतं सामान्यमनेकद्रव्ये च समवाय साधनं च। तथा सूत्रे अनेकद्रव्ये रोगसमवायाद्रूपविशेषाच्च रूपोपलब्धिरिति।अनेके यस्यावयवा अवयविद्रव्यस्य तदनेकद्रव्यं तेन समवायात् तत्र समवतत्वाद्रूपस्य विशेषतद्भूतत्वम् । अतो न्यायेन अस्मिन् रूपं तेन सद्रव्येणाभिभूतमपोह्यते । अन्ये तु रूपं विशेष्यते व्यावर्त्यते ऽनेनान्यस्माद्रसादेरिति रूपत्वमेव सामान्यविशेष एवमपरिहृतं, इति वर्णयन्ति । अनेकद्रव्यत्वाभावाच्च परमाणोस्तद्गतरूपस्याद्दृश्यतया योग्यदेशत्वादयो ऽपि सामर्थ्यात्साधनमिति बहुवचननिर्देश ॥ १० ॥

स्वैः सामान्यविशेषैश्च शक्तिमन्तो रसादयः ।
नियतग्रहणा लोके शक्तयस्तास्तथाश्रयैः ॥ ११ ॥

सामान्यविशेषा समवेता रसादीनां रसनादिक्रियासाधनं । तथा हि ते स्वैर्नियतग्रहणा । नियतं स्वजातिबलादेव दृश्यन्ते न तु द्रव्यत्वादनियतग्रहणा । द्रव्य हि कदाचित्सामान्यापाधिना गृह्यते द्रव्यमिति, कदा चिद् गुणेन शुक्लमिति, कदा चित्कर्मणा गच्छतीति । रसत्वादीनां तु शक्तीनां स्वाधारा एवावच्छेदका स्वरूपग्रहणे शक्ति । यथा हि रसोपलम्भे रसत्वमप्युपलभ्यते तद्विशिष्टस्य तस्योपलम्भादित्याश्रिताक्षेप । तथा रसत्वोपलम्भ ऽपि स्वाश्रयाक्षेप । तथा रसत्वोपलम्भे तदाश्रयद्रव्यमपि शक्तिरित्यपि ज्ञेयं । पूर्ववत्त्वनेकद्रव्ये समवायो गृह्यते परमाणुगतस्य रसादेरनुपलम्भात् । एव शब्देष्वपि वाच्यं । इत्थ परस्परशक्तिमन्तो भावा । तथा च न का चिन्नियता शक्ति । ससर्गिणां परस्पर तत्त्वात् अन्यस्य च योग्यदेशादेः सहकारिण. ॥ ११ ॥

तथा चोदितम ॥

इन्द्रियार्थमनः कर्तृसम्बन्धः साधनं क्व चित् ।
यद्यदा यदनुग्राहि तत्तदा तस्य साधनम ॥ १२ ॥

आत्मेन्द्रियमनोऽर्थसन्निकर्षात् ज्ञानं निष्पद्यते रूपादाविति सयोग एव साधनम । सुखादौ त्वात्मान्तःकरणसंयोगादिति क्व चिदित्याह । किं च तत्र परिगणनया यद्यत्रोपकरोति तत्तत्र साधनमिति यथायोग सर्वे भावा. शक्तिमन्तः । तथा हि । सख्याः परिमाणानि पृथक् सयोगविभागौ कर्म च रूपिद्रव्यसमवायात्तद्रूपाण्युक्तानि । अवयवानामवयविनिष्पत्तौ संयोगशक्तिगुणानिष्पन्नो ऽवयविसमवाय. शक्तिरिति परोपकारि परतन्त्रं सर्व शक्तिलक्षणमनुपतति ॥ १२ ॥

सा च स्वकीयपरतन्त्रावस्था साधनादिना सिद्धस्वभावार्थाभिधायिना शब्देन नाभिधातु शक्यते, अपि तु यथायथं विभक्त्यादिरस्या प्रत्यायने समर्थ इत्याह ॥

स्वशब्दैरभिधाने तु स धर्मो नाभिधीयते ।
विभक्त्यादिभिरेवासावुपकारः प्रतीयते ॥ १३ ॥

स धर्मः क्रियां प्रति शेषभावः। कारक साधनमपादानमित्या-

दिशब्दै क्रियोपकारोपलक्षित द्रव्यमभिधीयते। सामान्येन क्रियोपकारलक्षणसाधनभाव. समुद्भूतोऽस्मात्प्रतीयते । तथा ऽन्यत्रापि द्रव्यरूपतया साधनमुल्लीकरोति। क्रियोपकारलक्षणो धर्मो द्वितीयां प्रतिपद्यत इति परिगृहीतक्रियोपकारद्वितीयादिविभक्तिप्रतिपाद्यधर्मस्विति शक्तिर्विभक्तिवाच्या । क्व चित्तांङ्गुलत्राच्या । शनेन क्रीतः शन्य शनिक इति क्रये साधकतमत्वं प्रत्ययवाच्य । यत्र तत्रेत्याधारभावो वाच्य । पय पयो जरयति. मधु निरीक्षते, दधि अक्षातीति प्रातिपदिकादेव शक्ति प्रतीयते । अन्तरा त्वा च मां च कमण्डलुरित्यन्तराशब्दो व्यपोविकरणमाहेत्यादिग्रहणम् ॥ १३ ॥

क. पुनरासामुपकारलक्षणो धर्मः, साधनमित्याह ॥

निमित्तभावा भावानामुपकारार्थमाश्रितः ।
नातिरावर्जनेनेवं सिद्ध साधनमिष्यते ॥ १४ ॥

साध्यस्वभावानां क्रियाणामुपकाराय सिद्धस्वभावानां भावानां निमित्तभावो हेतुभाव । नतिर्नमनमुपकाराभिमुख्य, आवर्जनमङ्गभावेन स्वात्मनः प्रत्यर्पणं क्रियोपजननमतान्पर्यते, इति शब्द प्रकार इत्येवमादिभि शब्दैरभिधीयमानो ऽन्यो ऽपि सिद्धो निष्पन्नः तथा प्रतीयमानेन एवम्भूतेन वा धर्मेण निश्चितवस्तुसम्भवमात्रेण साधनमित्युच्यते ॥ १४ ॥

एवं मीमांसकवैशेषिकदर्शनेन शक्तिः साधनमित्युपपाद्य व्यतिरेकाव्यतिरेकग्रहं त्यजति ॥

स तेभ्यो व्यतिरिक्तो वा तेषामात्मैव वा तथा ।
व्यतिरिक्तमुपाश्रित्य साधनत्वेन कल्प्यते ॥ १५ ॥

स इति हेतुभाव शक्त्यपरपर्याय.। शक्तय सर्वभावानां कार्योपत्तिगोचरा इत्यतीन्द्रिया । पदार्थाव्यतिरिक्ता शक्तय केषां चिद्भवन्तु । सहकारिसमवधानोपकृतो भाव. स्वरूपेणैव कार्यजनक, किमदृष्टशक्तिपरिकल्पनेनेत्यात्मैव भावानां शक्ति । संसर्गिणः सहकारिणो वा ऽर्थान्तरभूता. । स्वकारणपरम्परया हि पदार्थः समुपजायते विशिष्टो, यस्तत्सहकारिसम्पर्के तत्तत्कार्यजननशक्तिरिति किमदृष्टव्यतिरिक्तया शक्त्या । तत्कल्पने तस्या नियमहेतुर्भो-

वस्वभाव एव वक्तव्य इति परं स एवास्तु । तदत्राव्यतिरेकवादो वा ऽस्तु व्यतिरिक्ता वा शक्तय सन्तु, नास्माकमत्र कश्चिद्ग्रहो व्यतिरेकवादोशब्दप्रमाणका हि वयं यच्छब्द आह तदस्माक प्रमाणम्। शब्दश्च पदार्थानां व्यतिरिक्तमेव साधनभावं प्रत्याययति।घटस्य हीक्रियाया कर्मभाव इत्यादाविति, व्यतिरेकोपाश्रय. शब्दनिबन्धनो व्यवहार । तथा च प्रातिपदिकेन द्रव्ये ऽभिहिते यक्तौ कृतपदबन्धा विभक्ति प्रवर्तते ॥ १६ ॥

यद्यदा यदनुगृहीतन्तदा तत्र तत् साधनमिति (व्यपिमुक्तां)? क्रियाया अपि साधनत्वं भाष्यकारामिमतेन संवादयितुमाह ।

संदर्शनं प्रार्थनायां व्यवहारे त्वनन्तरा ।
व्यवसायस्तथारम्भे साधनत्वाय कल्पते ॥ १६ ॥
पूर्वस्मिन् या क्रिया सैव परस्मिन्साधनं मता ।
सन्दर्शने तु चैतन्यं विशिष्ट साधन विदुः ॥ १७ ॥

सम्प्रदानसंज्ञायां क्रियाग्रहणं कर्तव्यमित्युक्तम् । इह कश्चित्कंचिदर्थं सम्पश्यति । स दृष्ट्वा प्रार्थयमान., व्यवसाय करोतिअव्यवसाये प्रारम्भः प्रारम्भे फलप्राप्तिरिति सन्दर्शनादिभिराप्यमानत्वात् क्रिया ऽपि कृत्रिमं कर्मेति भाष्य उक्तम्।तत्र साध्यस्वभावाया अपि सन्दर्शनादिक्रियाया. साधनत्वमापेक्षिकम्। सम्यक् समन्ताद्वा दर्शनफलविषय.सङ्कल्प , तत्प्रार्थनायां फलोपायविषये ऽभिलाषे साधनत्वाय कल्पते साधनं भवति । (अथ दर्शमाह सत्यकिपि भावोत्पत्ति.)?। व्यवसायात् दृढमाहितक्रियाविशेषस्य फलसाधनत्वेन निश्चय. । तत्रानन्तरा प्रार्थना साधनं अभिलाषे सति निश्चयकरणात्। व्यवसायश्चारम्भक्रियायां (मानस्यां)? प्रवृत्तौ साधनं, व्यवसायभावभेदार्थं क्रियाकरणारम्भात्। तया च क्रियया ऽऽप्यमानत्वात् भौतिकी क्रिया कर्म भवति सङ्क्षेपत । पूर्वस्मिन् या परापेक्षिता या कर्त्रर्थत्वात्, सैव पूर्वस्माच्चिवृत्ता पूर्वकालभाविता क्रिया परस्मिन्नुत्तरोत्तरभाविनि साध्ये साधनं भवति। तदात्मलाभे सिद्धत्वोपयोगात्।तदयमर्थ. । पूर्वस्मिन् दर्शने क्रिया या प्रार्थनादिका सैवोत्तरां प्रति साधनमता।अथ दर्शनक्रियायां क्रिया साधनमित्याहासन्दर्शनं तु चैतन्यमिति । तुर्विशेषद्योतकःचिन्मेव अन्यायो भक्षभाषान्विशेषोऽस्य

फलाभिलाषयोग्यता। यद्यपि च क्रिया साध्यस्वभावा निष्पन्ना, तथापि निष्ठावस्थायां सिद्धत्वात्साधनशब्देन च शक्तेस्तत्रासमवायो ऽपि व्यतिरेकेणाश्रयाद्युक्त.। साधनं निष्पादकं भवति। तदा हि कर्तु. क्रियानिष्पत्तौ कारणान्तरं नास्तिभावानां नांशो, न तेनांशेनाप्यमानत्वात्कर्म भवति।कर्त्रा हि क्रियादीप्सित, तत्कर्म विक्रियान्तर एवेप्स्यते। अपरेण सिद्धेन क्रियांशेनेत्यारम्भेण मानसव्यापारेणाप्यमानत्वात् भौतिकी क्रिया कर्मेति तेनाभिप्रेयमाणस्य सम्प्रदानत्वं सिद्धम्।शुद्धाय संजयते, श्राद्धाय.निगलभत इति। गत्यर्थधातुविषये सन्दर्शनादीनां भेदाभेदविवक्षा, पच्यादावभेदविवक्षैव, श्राद्धाय निगलभत इत्यादौ भेदविवक्षैवेति च वक्ष्यते। तदेवम् "व्यतिरेकमुपाश्रित्य साधनत्वेन कल्पत" इति क्रियाया अपि साध्यसाधनभावो व्यतिरेकाश्रयेणोपकार्योपकारकभावेन भाष्योक्त उदाहृत इति स्थितमेतत्॥शक्तिव्यतिरेका क्रियोपकारार्थमाश्रिता साधनमिति सामान्येनोच्यत इति वार्त्तिककारमतमिति,संज्ञा संज्ञिनिर्देशेन कर्तव्या। अन्वर्थसंज्ञाविज्ञानात्साधकस्य लाभ इति ॥ १७ ॥

नन्वन्वर्थमिति चेदकर्तरि कर्तृशब्दानुपपत्तिरित्युक्तम् । तद्वाकर्त्तरि करणादिकर्तृशब्दस्य कारक इत्यस्य चोपपत्तिं समर्थयितुमाह।

निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके ।
व्यापारभेदापेक्षायां करणादित्वसम्भवः ॥ १८ ॥

सामग्रीसाध्यत्वात् सर्व एव कारकत्वं क्रियानिष्पत्तिविषयमभेदेन प्रतिपद्यन्त इति । यदा तु क. कथं पचतीति विवक्षा तदा प्रधानक्रियानिष्पादनात् विचित्रव्यापाराणि यथास्वं व्यापारातिशयवशेन करणादिसंज्ञा. प्रतिलभन्ते। तथा हि । साधनान्तरवियोगव्यापारः कर्ता निवृत्तिविकारप्राप्त्याहितसंस्कारःकर्तुः क्रिययेप्सिततमं कर्म । हेतुनामनुभवत् कारकान्तरव्यापारैरव्यवहितव्यापारं करणम्। प्रेरणानुमननानिराकरणव्यापारकर्मणा सम्बन्ध्यमानं सम्प्रदानम्।अपाय. मवधिभावोपगमनेन साधयदपादानम्। कर्तृकर्मव्यवहिताक्रियाऽऽधारक. मधिकरणम्। स्वतन्त्र प्रेषयन्हेतुरिति।सामान्यपूर्वकत्वाच्च विशेषस्यावान्तरव्यापारे ऽपि कारकत्वमनुवृत्तिकरणं कारकमिति करणं कारकमित्यादिसामानाधिकरण्योपपत्ति. । अकारकस्य च विशेषसं-

ज्ञाभाव । वृक्षस्य पर्णं पततीति। अनपेक्षिते च कर्तृव्यापारे, स्थाली पचति, एधा. पचन्ति, असिश्छिनत्तीति,प्रधानक्रियायामेवैषां कर्तृत्वम। सम्प्रदानापादानयो. स्वव्यापारे स्वातन्त्र्यविवक्षा नास्ति । क्रियान्तरस्याऽऽदातुरवगन्तुश्चापेक्षणात्। अत एव सिद्ध तु पचादीनां प्रधानकारकं क्रियाभेदादिति प्रधानक्रियार्थेषु यथास्व कारकव्यापारेषु पचादीनामेव निर्वृत्तिर्वर्णिता। तदेतद्भाष्य उक्तं, "सामान्यभूता क्रिया या वर्त्तते तस्या निवर्तक कारकमिति" ॥ १८॥

अत्रैव दृष्टान्तमाह ॥

पुत्रस्य जन्मनि यथा पित्रोः कर्तृत्वमुच्यते ।
अयमस्यामिव स्वस्मादिति भेदो विवक्षया ॥ १९ ॥

पितरौ पुत्रं जनयत इत्यविवक्षिते जननव्यापारभेदे जनिक्रियाकर्तृत्वमुभयो प्रसिद्ध । क कथ जनयतीति भेदविवक्षायामपि पिता बीजमादधदस्यां मातरि गर्भमाधत्ते । इय तु माता ऽस्मात्पितुः पतद् बीजं धारयतीति क्रियाकर्तृत्वमनुभवतीत्यधिकरणत्वं मातु , पितु कर्तृत्वमपादानत्व च पितु कर्तृत्व मातुरिति भिद्यते प्रवृत्ति । सामान्यपूर्वकत्वाच्च विशेषस्य, जनि सामान्येनात्मलाभवचना विशेषविषये पोषणबीजधारणबीजच्युतिवचन. । यद्वा प्रकृत्यर्थो ऽशिष्ट प्रत्ययार्थस्तु लर्थो जनयतीति प्रेषणा यत्रायं विभाग । साध्यपक्षाक्षिप्तमपीदं प्रसिद्धत्वादिदृशैनम ॥ १९ ॥

तदेवं प्रधानक्रियायामेव सामान्यविशेषभावेन कारकं करणमित्यादि सामानाधिकरण्यमुपपादितम् । इदानीं गुणक्रियापेक्षया स्वातन्त्र्यं प्रधानक्रियापेक्षया पारतन्त्र्ये सत्यनपगतमिति प्रकारान्तरेण सामान्यभूता क्रिया वर्तते इत्येतद्भाष्यं गमयितुमाह ॥

गुणक्रियाणां कर्त्तारः कर्त्रा न्यक्कृतशक्तयः ।
त्यक्तायामपि सम्पूर्णैः स्वैर्व्यापारैः समन्विताः ॥ २० ॥
करणत्वादिभिर्ज्ञाताः क्रियाभेदानुपातिभि ।
स्वातन्त्र्यमुत्तरं लब्ध्वा प्रधाने यान्ति कर्तृताम् ॥ २१ ॥

ज्वलनाद्यवान्तरव्यापाररूपाणां गुणक्रियाणां स्वातन्त्र्या-

त्मवै कर्त्तारः, प्रधानक्रियाविषये तु कर्त्रा, स्वतन्त्रेण विनियोक्त्रा न्यक्कृता तिरस्कृता शक्ति स्वातन्त्र्यमेषामिति । तेन यथायथं न्यग्भावमस्वातन्त्र्यमापादिता सन्तः, त्यक्तायां न्यग्भावे ऽपि स्वव्यापार स्वातन्त्र्यानवगमादकिञ्चित्करस्य क्रियासिद्धौ हेतुभावानुपपत्तेर्यथास्व व्यापारानुष्ठानेन स्वभावक्रियाङ्गभावागमनात्कर्तृविनियोगेऽपि यथायथमात्मीये सर्वैरेव ज्वलनादिव्यापारैरवियुक्तास्तक्रियाविशेषविषये करणादिसञ्ज्ञाकैरधिगताः सह्यमर्थं जनयन्ति । योगोत्तरकालमपि स्वव्यापारानुष्ठानलक्षणं स्वातन्त्र्यमासाद्य यस्मिन् क्रियाभेदे स्वतन्त्रा प्रधानक्रियायामेव कर्तृतां कारकत्वं भजन्त इति करणं कारकमित्याद्युपपत्तिरित्यर्थः । करणानि हि कर्तृप्रेषे ऽन्यसूत्तानि स्वव्यापारमनुतिष्ठन्ति, तथा भवन्तीति, कर्त्रा स्वव्यापारे कर्तृत्वायैवैषां नियोगानां नियुक्तानां सता स्वव्यापारे स्वातन्त्र्यमनुभवतां करणादित्वे प्रधानक्रियानिष्पत्तिरिति, विरोधात् स्वातन्त्र्यपारतन्त्र्ययोः, यदेव हि स्वव्यापारे स्वातन्त्र्यं तदेव प्रधानक्रियायां पारतन्त्र्यं नान्यत्किञ्चित्। तच्च कर्तृविनियोगे सत्युत्तरकालमेव भवति पूर्वतः कर्तृविनियोज्यताआक्षेपेण स्वातन्त्र्यमुच्यते। इत्थं च करणं कारकमिति विषयभेदो ऽपि नास्ति । स्वव्यापारे स्वातन्त्र्यस्यैव प्रधानक्रियायां करणादित्वात्। नन्वेतदुक्तम्। सिद्धं प्रति कारकं क्रियाभेदात्पचादीनां करणाधिकरणयोः कर्तृभाव इति "तत्राधिश्रयणादिकाले चैत्र" इत्यादिना । कर्तृकरणाधिकरणादीनां गुणक्रियामुक्त्वा ऽपादानादीनां तत्र सिद्धमिति पुनश्चोदितेन वा स्वतन्त्रपरतन्त्रोक्तयोः पर्यायेण वचनं, वचनाश्रयात्, सञ्ज्ञेति पुनः सिद्धान्तितम्। तथा हि पलाहको विद्योतत इति विद्युद्भेदविवक्षायां प्रयोगात् स्वव्यापारेऽन्यव्यापादनस्य स्वातन्त्र्यमित्याहुः ॥ ग्रामं आगच्छतीत्युक्ते ऽर्थान्तरावगमादपादानव्यापारानवसायात्प्रयोज्याभावः । अस्ति तु ग्रामस्यापादानस्य क्रियासिद्धौ कश्चिद्व्यापारो ऽवधिभावापत्तिलक्षणः । अन्यथा ग्रामस्य समीपादागच्छतीतिवत् ग्रामादागच्छतीत्यत्रापि किं ग्रामस्य कारकत्वं स्यात् । सम्प्रदानस्यापनिराकरणात् कर्तुः प्रेरणानुमतिर्ह्यां च तत्त्वमित्यस्यैव स्वव्यापारः। ब्राह्मणो ददातीति तु प्रयोगाभावः । सम्प्रदानत्वे ब्राह्मणस्यास्मद्विवक्षितार्थानवसायात्। अत एवापादानमासम्प्रदानव्यापारे धातोर्न वृत्तिः, अपि तु कर्मकरणादिव्यापार एव, पच्यते

ओदनः स्वयमेव, असिश्छिनत्ति, स्थाली पचतीत्यादौ।तदेवं सर्वत्र क्रियाभेदसम्भव इति तत्र स्वातन्त्र्यात्करणादित्वे ऽपि कर्तृशब्दः प्रवर्तते । यद्येवं करणादित्वे ऽपि स्वातन्त्र्यात्कर्तृसंज्ञा स्यात् । नैतदस्ति । कारकाधिकाराद्धुण्धे स्वातन्त्र्ये स्वतन्त्रः कर्त्तेति पुनश्रुतिः पारतन्त्र्यानाच्छुरितस्वातन्त्र्यप्रतिपत्त्यर्थेति, मुख्य एव स्वतन्त्रे कर्तृसंज्ञा ऽवतिष्ठते। एवमपि परत्वात् करणादीनां करणादिसंज्ञाबाधितत्वात् कर्तृसंज्ञा प्राप्नोति।नैष दोषः। करणादिसंज्ञानामनवकाशत्वात्,ताभिः कर्तृसंज्ञाया अत्र बाधनात्।कारकाव्यपदेशस्त्वनुवृत्तिसामर्थ्यादेवेति।अथ वा स्वातन्त्र्यनिमित्ता कारकसंज्ञेति नात्र बाध्यबाधकभावो निमित्तनिमित्तिनोः । अत्र हि स्वातन्त्र्यनिमित्तं पारतन्त्र्यमिति करणादिभावे ऽप्यनुमितस्वातन्त्र्य निविशत एव । कारकसंज्ञेत्यपादानादिसंज्ञाभिः समावेश एवास्याः।अत्र तु पारतन्त्र्यविवक्षा नान्तरायिका स्वातन्त्र्यविवक्षायाः.तत्र करणं पराणि बाधन्त इत्युच्यते।तद्यथा धनुर्विध्यतीति। तत्र हि धनुषः साधकतमत्वाविनाभाविनी भाविनी स्वातन्त्र्यविवक्षा । स्वतन्त्रः कर्त्रेत्यत्र च नैवमवधार्यते यत्सर्वास्ववस्थासु स्वतन्त्रमिति, अपि तु यत्स्वतन्त्रमेवेति स्थाली पचतीत्यादावपि कर्तृसंज्ञासिद्धिः । अधिकारसामर्थ्याच्च करणाद्यवस्थायामप्यनुमितस्वातन्त्र्यहेतुककारकशब्दप्रवृत्तिरविरुद्धेति सर्वं सुस्थम् । तदेवं पूर्वक्रियाया अभेदमाश्रित्य निष्पत्तिमात्रे कर्तृत्वमिति सामान्यभूता क्रिया निष्पत्तिमात्रस्वभावा ॥ २० ॥ २१ ॥

व्यापारे पारतन्त्र्ये दृष्टान्तमाह ॥

यथा राज्ञा नियुक्तेषु योद्धृत्वं योद्धृषु स्थितम् ।
तेषु वृत्तौ तु लभते राजा जयपराजयौ ॥ २२ ॥
तथा कर्तृनियुक्तेषु सर्वेष्वेकार्थकारिषु ।
कर्तृत्वं करणादित्वैरुत्तरं न विरुध्यते ॥ २३ ॥

यथा राज्ञा स्वामिना नियुक्तेषु प्रेषितेषु योद्धृत्वं व्यवस्थाविभागादिना योद्धृषु स्थितम् । तेषु युध्यमानेषु च या वृत्तिः शत्रुभङ्गदेशोत्सादनादिका, तस्यां कृतायां, राजा जयं पराजयं वा ऽपि पर्यायेण लभते । एतदाह । योद्धारो योद्धृत्वे कर्त्तारः । पूर्वं तद्व्यापारस्य

तत्र सत्वात् । पुनः जनियोगादस्वतन्त्राः । पुनश्च तन्नियोगनिरपेक्षाः स्वतन्त्रा एव कर्त्रा नियुक्तेषु सम्भूयार्थं पाकादिकं कुर्वत्सु भृत्येष्विव करणादिषु यत्स्वातन्त्र्यं ज्ञायत नियोगादुत्तरकालभव तत्कारणत्वादिभिर्नियोगादुत्तरकालभावि निगमनं विद्यत इत्यर्थ.। तदेवं कारक इति संज्ञानिर्देशस्येव संज्ञिनो ऽपि निर्देश । इतरथा ह्यनिष्टप्रसङ्गो ग्रामस्य समीपादागच्छतीत्यकारकस्येत्यादिना साधकं वा निवर्तकं वोध्यम् । निर्देष्टव्यमिति चोदित इत्यन्वर्थसंज्ञाविज्ञानाद्विशिष्टसंज्ञिसिद्ध्या परिहृते ऽधिकारेणोत्तरत्रानुवृत्ते. कारकसंज्ञायाः क्रियाद्विष्वनुपपन्नत्वात्तद्भाविनायां निष्पत्तिमात्रापेक्षया कर्तृत्वाश्रयणेन प्रतिकारकं क्रियाभेदेन गुणक्रियाणां स्वातन्त्र्याश्रयणेन च परिहृतमिति प्रकरणार्थः ॥ २३ ॥

यत्त्वन्वर्थसंज्ञाश्रयेण क्रियानिर्वर्तकस्य साधकत्वे ऽभिहिते हेतुरपि क्रियानिर्वर्तक इति करण इत्यव सिद्धायां तृतीयस्यां किमर्थं हेतावितिं पुनर्विधानमित्याशङ्क्य हेतो. साधनाद्व्यतिरेकं दर्शयति ॥

अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते ।
आश्रितावधिभावं तु लक्षणे लक्षणं विदुः ॥ २४ ॥

व्यापारमनाश्रित्य विवक्षितत्वार्थसिद्धौ योग्यतामात्रेण निमित्तत्वेनाश्रीयते य. स हेतु । स च कारकविभक्ते. शेषलक्षणाया विषय', तृतीयस्याः सम्बन्धषष्ठ्याबाधिकाया. । तद्यथा अध्ययनेन वसतीति । अध्ययनहेतुर्वासो हेतुमान् । तयोः सम्बन्धे शेषषष्ठ्यां प्राप्तायां हेतौ तृतीया। नैय्यायिकास्त्वाचक्षते । गुणद्रव्ययोर्यन्निमित्तं स हेतु । स च कारकविभक्तेर्विषय.। यत्तु क्रियापदोपात्तायाः क्रियाया निमित्तं तत्कारकमेव । यथा विद्यया वसतीत्यादाविति । अनुर्लक्षण इत्यत्र हेतोरपि लक्षणशब्देनाख्यानादविशेषमनयोः सम्भाव्यापाकरोत्याश्रितेत्यादिना। लक्षण इत्यत्र लक्षणशब्दो भावसाधनः । लक्षणं विदुरित्यत्र तु करणसाधन । लक्षणे लक्ष्यमाणवस्तुप्रकाशने हेतु. । आश्रितावधिभावम्, आश्रितो ऽवधिभावो मर्यादारूप यत्र, लक्ष्यते तेनेति लक्षणं ज्ञापक विदुर्जानन्ति तज्ज्ञाः । यत्रा-

वधिर्न प्रज्ञायते तावपि तल्लक्षणं। अत एव तुर्विशेषाद्योतकः । अन्ये त्वाहु.। कार्योत्पत्तावुपयोगो हेतोः प्रत्ययोत्पत्तौ तु लक्षणस्येति तदसत्। हेतोरपि प्रत्ययोत्पत्तौ व्यापारदर्शनाद्विद्यादेरपि हि वासादिनिश्चयो व्यापारालक्षणे वस्तूपजने योग्यतामनादृत्यावधित्वेनाश्रितो जनको भवतु मा वा भूदिति लक्षणम्। तद्यथा वृक्षमनु विद्योतते विद्युदिति।विद्युतो वृक्षो लक्षणं विद्योतनस्य। वृक्षं प्राप्य विद्योतत इत्यर्थः कथं तर्ह्यनुर्लक्षण इत्यत्र शाकल्यस्य संहितामनु प्रावर्षदित्युदाहरणम। यावता संहिता नावधिमात्रेण वर्षणस्य परिच्छेदिका प्रतीयते । अपि तु जनकत्वेन । जनकश्च हेतुर्न लक्षणमिति हेतुरेवात्र ज्ञेयत्वसामान्याल्लक्षणशब्देनोक्तव्यविशेष. । ननु च धूमो ऽग्निना प्रसिद्धसाहचर्यो ऽसकृद्दर्शनावधृतः । केवलो ऽप्यदृश्यमानमग्निं कारणान्तरप्रभवं लक्षयनीत्येव लक्षणं स्यात् । संहिता तु प्रथममेव दृश्यमाना, न तस्या असकृद्दर्शन दर्शनावृत्तिरस्तीति कथमसौ लक्षणं स्यात्। अत्रोच्यते । यद्यप्येतदस्ति लोके। येनासकृल्लक्ष्यते तल्लक्षणमिति तथापि प्रवर्त्तते कार्योदये शक्तिर्यस्य कारकस्य तथाविधमपि कारणं लक्षणं भवति। कार्यस्य हि य परिच्छेद तत्र हेतुभावेन कारणमपि लक्षणं कार्यपरिच्छेदकत्वात् । तथैव हि भूयो दर्शनेन गृहीताविनाभावो ऽन्य गमयति । तथा हेतुरपि परानपेक्षो जननकार्यस्याव्यभिचारात् परिच्छेदकत्वेन भवति लक्षणम्।यथा मेघोदयो वृष्टे. कारणत्वेन नियतो ऽतो ऽसत्यामपि वृष्टौ तत्परिच्छेदक इति लक्षणं भवति। लोको मेघं दृष्ट्वा वृष्टिमनुमिनोति । एवं अन्वयव्यतिरेकबलाद्धेतुत्वं निश्चीयते यस्मिन्सति यद्भवति । अन्यस्मिंस्तु सत्यपि, विना वा तेन भवति स तस्य हेतु । अन्वयव्यतिरेकौ सकृद्दर्शनाद्भवत.। सकृद्दर्शने अन्वयव्यतिरेकयोरनिश्चयात् । संहिताऽपि यद्यपि कारणं प्रवर्षणस्य तथा ऽपि सकृत्प्रधानै. निश्चीयते तत्र कारणम्। तत्काले संहितार्थान्तरादपि कदाचित्कार्योत्पत्तेः सद्भावात् । एवं च मेघोदयवल्लक्षणमसौ युज्यते । अत्र ब्रूम । सकृद्दर्शनादपि हेतुभावो गम्यते। यस्य हि यज्जनक भवति तस्मात्सकृदपि तत् न दृश्यते। यथा शाल्यङ्कुरो यवानाम्। न च तत्कालभावो ऽन्यो जनको ऽन्यदा तस्मादृष्टे ।तथा चाहु ।यस्मिन्सति भवत्येव यत्तेभ्यो ऽन्यस्य कल्पने। तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थितिरिति॥न च काकतालीय-

न्यायेन तदुत्पत्ति । अत स्वभावस्य सकृदप्यजननात्। संहिता च प्रत्यक्षेण दृश्यते वर्षं जनयन्तीति सकृज्ज्ञानादपि हेतुभावो ऽत्र निश्चीयते। किं चागमादपि हेतुत्वमत्र निश्चीयते सहिताया प्रवर्षण इति हेतुरेवात्र ज्ञापकत्वमामान्यालुक्षणमित्युक्त. । तदुक्तं भाष्ये लक्षणेन हेतुमपि व्याप्नाति । लक्षणस्य व्यापकत्वात् । कारणमपि हि कार्यं लक्षयति लक्षणं भवति यथा मेघोदयो वृष्टे.। न च व्यभिचार:।समग्रस्याधिकलस्य जनकत्वात्।तथा विवेचने वा व्यभिचारात्।प्रायेण शक्तिश्च प्रामाण्य न प्रमैवेति न्याय ।यदि तर्हि लक्षणशब्देन पदार्थान्तरपरिच्छेदहेतुभावो वर्ण्यते तदा श्रितावधिभावमित्येतत्कथम्। आश्रितावधिभावेन लक्षणे परिच्छेदहेतुत्वमेव लक्षणमन्यथा कथमलक्षयल्लक्षणा स्यात्।इयांस्तु विशेष ।यद्वृक्षो ऽवधिभावन परिच्छेदहेतु ,संहितादेस्त्ववधित्वस्यानाश्रये ऽपि ज्ञानत्वसामान्यालक्षणत्वम्।बहुधा हि लक्षण भवति क्व चिद्वधिभावेन। यथा विद्यानमानायां विद्युता॥ (वनस्पतिरसवसाय निबन्धने)? । क्व चित्करणविच्छेदेन, यथा धूमो वन्हे । क्व चित्कार्यपरिच्छदहेतुतया यथा मेघादयो वृष्टेः । संहिता ऽपि चोक्तेन प्रकारेण लक्षणं हेतुश्चेति । यद्येव लक्षणेत्थम्भूताख्यानेत्यादिना सामान्यलक्षणेनैव सिद्धायां कर्मप्रवचनीयसञ्ज्ञायामनुर्लक्षण इति पुनर्विधानमनर्थकं व., सामान्यकृतत्वादिति । अत्रोत्तर हेत्वर्थे तु वचनमित्युक्तम् । नायमभिधापर्यायो ऽर्थशब्दः किं तु निवृत्तिवचन कार्ये तु कारणशब्दमुपचर्य हेतुशब्देन हेतुतृतीयोक्ता बाधा ऽपि बाध्या नान्येति हेतुरेवार्थो निवर्त्यो यस्येति समास.। तेन हेतुतृतीयाबाधनार्थं पुन. सञ्ज्ञाविधानमित्युक्तं भवति।ननु च पुन. संज्ञाविधानात् प्रदर्शेषु संज्ञिप्रत्ययास्थिरत्वे भवेत्तृतीया तु कथ बाध्येत । परत्वेन हि बाधिका ऽसौ । नैतत् । असकृद्विधीयमाना संज्ञा कर्मप्रवचनीययुक्ते द्वितीयेत्यादिप्रदेशे द्विरुपतिष्ठते । तत्रैकमुपस्थानं द्वितीयार्थं । यत्तु द्वितीयमुपस्थानमनुर्लक्षण इति तदनर्थकं मा भूदिति हेतुतृतीयां बाधित्वा द्वितीयामेव स्थिरयति । ननु च द्विरुपस्थानात् संज्ञिप्रत्ययो द्विर्भवेत्। न तु द्वितीयाविधि. (प्रचयमनुधि.)? । भवति कार्थार्थो संज्ञा गुणभूता।कार्यं द्वितीयाख्यं प्रधानम्। ननु च गुणभेदे प्रधानभेद. किमर्थम् । न हि गुणो द्विरुक्तो निरर्थको भवति न द्वितीयां प्रधानमावर्त्तते । यद्यपि च प्रधानमात्मसंस्का-

र्थं गुणदेशं गच्छति। यत्तां गत्वा तृतीयां बाधेत। ननु च प्रधानमन्तरेण गुणानां स्वरूपावहानप्रसङ्गाद् गुणान्तरमकृतार्थं प्रधानान्तरमाविर्भावयेत्। यथा ऽमात्या राजाभावे स्वात्मनो गुणरूपमीहमाना राजान्तरं स्थापयन्ति। तत्स्थापने तेषामात्मरूपं सम्पद्यते। राजानमन्तरेण अमात्यादेरभावात्। नैतत्समानं, राजामात्ययोः परस्परोपकारकभावात्। गुणप्रधानभावादिप्रपञ्चस्यैव निश्चयात्।तथा हि राजा प्रकृतिधर्मशास्त्रोक्तायां मर्यादाया स्थापयति। स्वयं ता अनुवर्तते ता. प्रकृतयो ऽपि राजानं विनयन्तीति प्रधानभेदादेव तत्र गुणभेद.। एवं तर्ह्युपायविधिरेवोपेयविधिर्भवति। तद्यथा अनीकस्था भवेत्युक्ते अनीकस्थता हस्तिरात्रयवसरक्षासम्पादनेन कृतेति अनीकस्थताविधानवदेव कार्यं भवति। एव कर्मप्रवचनीयसंज्ञाविधानद्वारेण तत्कार्यं द्वितीयास्थमेव विहितं भवति। तथा च पुनर्द्वितीया विधीयमाना बाधकबाधनार्था जायते, येन नाप्राप्तिन्यायेन। सम्बन्धेन षष्ठी प्राप्ता तस्या बाधिका कर्मप्रवचनीयद्वितीया तस्या अपि हेतुतृतीया तस्यां प्राप्तायामनुर्लक्षण इति कर्मप्रवचनीयसंज्ञाविधानद्वारेण द्वितीया येन नाप्राप्तिन्यायेन। चतुर्थसस्थानप्राप्तौ कष्टबला बाधिका। अत्र प्रवचनसामर्थ्यं निबन्धनम्।अन्यथा पुन संज्ञाविधानमेव द्वितीयाविधानार्थं कथमुपपद्यते। इत्थ च कृत्वा कल्पनान्तरमप्युपपद्यते। गुणभेदे प्रधानभेद इति वचने न्यायस्य बाधनात्। तथा च भाष्यम्। दृष्टान्तस्यापि पुरुषारम्भो निवर्त्तको भवति। यद्वा संज्ञाभेदादनुशब्द. संज्ञा भिद्यते। ननु द्वितीयाविधि. प्रधानभूत. येनान्याय्यो गुणभेदात्प्रधानभेदो भवेत्। सन्निभेदाच्च बलातिशयो द्वितीयाविधिस्तृतीयाविधिं बाधते। यथोद्देशपक्षे च गुणदेश गच्छत्प्रधानमेकेन गुणेन कृतार्थं भवति। तत्प्रकरणगतेन सर्वेणार्थित्वात् सम्बन्धस्य विशेषात्। अत एव प्रधानान्तर गुणो ऽकृतार्थः कल्पयतु राजान्तरं यथा प्रकृतयोऽन च वै सादृश्यं, प्रकृतीनां राजकृतोपकारापेक्षित्वे ऽपि सर्वथा गुणत्वात् तदङ्गभावपरिपोषार्थमेव हि तत्र कृतोपकारापेक्षणम्। ननु स्वप्रधानार्थं कार्यकालपक्षे ऽपि कार्यवाक्ये संज्ञाद्वयं, भेदेन च संज्ञिद्वयमुपस्थापयति। तस्मात्पुन. संज्ञाविधानलक्षणाद्वचनसामर्थ्यात् प्राप्तातिशय कक्ष्यान्तरप्राप्तो द्वितीयाविधि परमपि तृतीयाविधिमपसारयतीत्येवमुक्तम्।तथा च वक्ष्यति।हेतुमतोर्योगपरिच्छेदे ऽनुना कृते आर-

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः कोचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्तिकम् खण्डानि १२	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं खं० १	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ४ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड २)	५	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) खं० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्पटीका खण्डानि ४	४	०

पातञ्जलदर्शनम्श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स० १ ०
व्याकरणमिताक्षरा । श्रीमदन्नभट्टप्रणीता खण्डानि ६ ६ ०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ ३ ०
भेदधिक्कार. व्याख्यासहित श्रीमदप्पयदीक्षितकृत उपक्रमप-
राक्रमसहित. खण्डे २ २ ०
बोधसारो नरहरिकृत तच्छिष्यदिवाकरकृतटीकया स० स० ५ ५ ०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिर्रचिता । १ ०
दैवज्ञकामधेनु अर्थात् प्राचीनज्योतिषग्रन्थ । १ ०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम ।
गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य-
व्याख्या संमतम । २ ०

ब्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस

Registered under Act XXV of 1867. (ALL RIGHTS RESERVED.)

BENARES SANSKRIT SERIES.

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, Ph. D.

No. 130.

श्रीविश्वनाथो विजयते ।

वाक्यपदीयं ।

साङ्गवैयाकरणसिद्धान्तनिरूपणं श्रीभर्तृहरिप्रणीतं वैयाकरणविरचितं

श्रीहेलाराजकृतप्रकाशाख्यटीकासहितम् ।

VÂKYAPADÎYA,

A TREATISE ON THE PHILOSOPHY OF SANSKRIT GRAMMAR BY BHARTRIHARI,

With a Commentary by Helârâja.

EDITED BY

Pandit Râmachandra Śastrî Kohlbhâskara,

Vyâkaraṇâchârya,

Pandit Central Hindû College, Benares.

Volume II Fasciculus III

BENARES

Published by the Proprietors Messrs. Bray B. Das & Co.

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,

BENARES

1907

73

सूचीपत्रम् ।

	रु०	आ०	पा०
गणपाठ	०	४	०
गोलप्रकाश	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रह	०	१	६
दत्तकमीमांसा	०	८	०
धर्मशास्त्रसंग्रह	०	१	६
धातुपाठ (शिला -)	०	२	०
धातुरूपावली	०	२	०
परिभाषापाठ	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	२	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका (प० मथुराप्रसादमिश्र कृत) (टिप्पणीसहित)	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
शब्दरूपावली	०	१	०
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपस्कारवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

स्माद् बाध्यते प्राप्ता हेतुलक्षणा तृतीयेति । तदित्थमनुर्लक्षण इत्यत्र हेतुरेव लक्षणव्यापकत्वं कथयितुं लक्षणान्तरोपात्त. सत्यन्यवान्तरभेद तथा. । तथाहि लक्षणहेत्वो. क्रियाया इत्यत्र लक्षणाद्वैदन जनकत्वविवक्षया हेतुरूपादेरत्र तदेव निमित्तसामान्य क्रिया विभक्तम् । स्वरूपपदेन क्रियानिर्वर्तकं कारकं, सामान्येन जनको हेतु., ज्ञापकं लक्षणमिति ॥ २४ ॥

जनकत्वसाम्येऽपि हेतुसाधनयोर्विषयभेदाद् भेदमाह ।

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् ।ऽऽ

द्रव्यगुणक्रियासाधनसमर्थवस्तु द्रव्यादीनां हेतु. । तद्यथा बीजेनाङ्कुर', धनेन कुल, कन्यया शोक , विद्यया यश., शिल्पाभ्यासेन नैपुण्य, अग्निना पाकक्रियासाधनसमर्थवस्त्वनाश्रितव्यापारं हेतुरेवेति । पाकादया यद्यपि क्रिया , तथाऽप्यत्रापरतव्यापाराणा सन्निधानमात्रोपकारेणया तेज.प्रभृतीना विवक्षितत्वादविद्यमानकरणभावा एते तु तृतीयया सम्बध्यन्तावनेन सह सम्पत्तिक्रियाप्रभाविन कुलस्य सम्बन्ध , कुलस्य हि धनेन प्रसिद्धिरुपजन्यते । तत्र चोपरतव्यापारं धन यास्यतामाह कुलस्य । हेतुरिति शेषषष्ठीवाचिकया हेतुतृतीयया सयुज्यते । कन्यापि जनयितु. शोकस्य हेतुरिति प्राप्तिक्रियाजनितोऽत्र शेषसम्बन्ध । एवमन्यत्रापि यथायोगमभ्यूह्यम् । शिल्पाभ्यासेन नैपुण्यमध्ययनेन वसतीति गुणक्रियाविषयता हतो. । क्रियासाधननियत तु कारकम् । तत्र हि क्रियैव विषयभूता । विषयता व्यापारविशिष्टत्वं च स्वरूपभेद. ।

कस्य चित्तु व्यापारविशिष्टस्यापि क्रियाविषयस्य शास्त्रीयं हेतुत्वमुक्तमित्याह ॥

कर्त्ता कर्त्रन्तरापेक्षः क्रियायां हेतुरिष्यते ॥ २५ ॥

कर्त्ता प्रयोजक प्रयोज्ये कर्तृशक्तिव्यवधाने क्रियायामुपयुज्यमान प्रयोज्यकर्त्तार प्रेषयंस्तत्प्रयोजको हेतुरिति शास्त्रे हेतुत्वेनेष्यते । वचनात्कारकविशेषो ऽपि न त्वयं रूढो हेतुरित्यर्थ ॥ २५ ॥

इदानीं क्रियाविषयत्वे समाने ऽपि हेतुकारणयोर्विशेषमाह ।

क्रियायै करणान्तस्य दृष्ट. प्रतिनिधिस्तथा ।
हेत्वर्था तु क्रिया तस्मान्न स प्रतिविधीयते ॥ २६ ॥

क्रियासाधनाय प्रकृष्टोपकारकं करणमप्रधानं क्रिया तु साध्यस्वभावा प्रधानमतः अत एव प्रधानानुरोधित्वाद् गुणानां, मसति श्रुते करणे शिष्टैः प्रतिनिधिराचरितः ।प्रधानभूता हि क्रिया साध्यत्वात् योग्यसाधनापेक्षासमर्थेति साधनसामान्यस्याक्षेपेऽध्यवसायार्थं श्रुतसाधनवियोग इति । तदसम्भवे ऽपि प्रधानेन क्रियास्वरूपेण यदाक्षिप्तं साधनसामान्यं तद्विशेषान्तरेणापि परिपोष्यमाणं न श्रौतार्थत्यागाय प्रभवति । सामान्यस्यापि श्रुतत्वात् तस्य च सर्वविशेषेषु स्वीकारयोग्यत्वादिति प्रतिनिध्युपपत्तिः । पूर्वमेव चर्चितो विस्तरः । अङ्गप्रधेषो ऽपि प्रधानानुच्छेदान्न प्रधानक्रियास्वरूपसंरक्षणाय । शिष्टैः सम्प्रदायपारम्पर्यावगतं सदृशमङ्गं मुख्यबुध्यैवोपाधीयत इति क्रियायाः प्राधान्यस्यैतत्फलम् । अत एव के चित्करणशब्दो ऽत्र सर्वकारकवचनो, जातौ वैकवचनमिति सर्वाणि कारकाणि गुणभूतानीति तस्य प्रतिनिधिरुपपद्यत इति व्याचक्षतेऽध्ययनेन वसतीति तु वसतिक्रिया ऽऽख्यातात्तथा प्राधान्येनापि प्रतीयमाना वस्तुसामर्थ्यादध्ययनाख्यहेतुपरतन्त्रा । तथा ह्यध्ययनार्थो ममात्र वास इति वक्तारो भवन्तिान च गुणान्तरो ऽप्रधानमित्यध्ययनाभावे वा समर्थमन्यत्किं चिदत्र प्रतिविधातुं युक्तम । अन्यस्याप्युपादाने तादर्थ्यं क्रियायाः प्रतीयते, इदानीं स एव मुख्यो हेतुः स्यात् । तस्माद्ध्ययनमेव सम्पाद्यं प्रधानमिति निर्व्यापारं योग्यतामात्रेणोद्देश्यमध्ययनं वासस्य हेतुस्तेन वासो न निर्वर्त्यते अपि तु वासस्याध्ययनमेव हेतु ।व्यापारविशिष्टत्वेऽध्ययनस्य, वासं प्रत्यानुकूल्यविवक्षायां भिक्षादिवत्तत्समर्थाचरणात् प्रयोजककर्तृत्वं, अध्ययनं वासयतीति । तदेव कारकविषये क्रियाप्रधानं कार्यपरक गुणभूतम् । हेतुविषये तु स विपर्यय इत्यनेनापि विशेषेण कारकाद्धेतोर्व्यतिरेक उक्तः ॥ २६ ॥

इदानीं चतुर्थीविषये तादर्थ्यं तृतीयविषयाद्धेतोर्व्यतिरेचयितु माह ।

प्रातिलोम्यानुकूल्याभ्यां हेतुरर्थस्य साधकम् ।
तादर्थ्यमानुलोम्येन हेतुत्वानुगतं तु तत् ॥ २७ ॥

अपचीयमानावस्थो हेतुरचिततमेव कार्यं जनयत्यप्रातिलोम्यो पलक्षितः । तद्यथा जलमानय संसर्गवशोपजनाय पचतिरूपमुत्तरो-

तरं पचतितरां, पचतितमाम् । लक्षणावस्थापरम्परासादनानुगुणमर्थान्तरसंसर्गोपचीयमानरूपविशेषं तु कार्यमुपचिततरमेव जनयत् कारणमानुकूल्योपलक्षितो हेतु । तद्यथा बीजमुदकातपसयोगाहितविशेषमुच्छूनतरतमावस्थमङ्कुरप्रसवसमर्थम् । इत्थं द्विप्रकारो हेतु । तद्विशेषस्तु तादर्थ्यम् । आनुकूल्यैकनियतमर्थसिद्धिनिमित्तमानुकूल्ये यद्धेतुजनकत्वं तदनुगतहेतुविशेषरूपम् । तादर्थ्यं कार्यकारणसम्बन्धस्याद्भुत रूपमित्यर्थ । अत्र चतुर्थी कुण्डलाय हिरण्यमितितस्मा इदं तदर्थमिति इदमोपकारस्य निर्देशः । तच्छब्देनोपकार्यस्य समासाद्भावप्रत्ययेन सम्बन्धस्यादृभूतरूपमभिधानम् । तत्र चोत्तरपदार्थस्य कारणरूपस्य प्रज्ञापनीयत्वेन प्राधान्यात्तच्छब्दवाच्ये गुणो ऽसम्बन्धःपदं बध्नाति । तत्र ह्यसावुद्भूत इति तादर्थ्यकारणस्योपकारित्वे गम्यमाने कार्यकारणसम्बन्धोद्भवे चतुर्थी विधीयमाना कार्यवाचिन एव भवति । तयैव कारणगतस्यापि सम्बन्धस्य निर्भागात् । कारणवचनात्तृतीया न भवति कार्यमेव प्रयोजकतया परिणतं तदर्थमित्युच्यत इत्युक्तमभिधानम् । उत्तरपदार्थप्रधानत्वात्तदर्थशब्दस्य कारणवचनता न्याय्या यतः, अत एव हेतुत्वानुगतं तादर्थ्यम् । कारणविशेषो न कार्यम् । यदर्थमस्य गमनं तदनेन साधितमित्यत्र उपसर्जनस्यैतच्छब्देनोच्छिष्टस्य सामानाधिकरण्ये शब्देन निर्देशात् सर्वनामार्थः कार्ययोगीत्युक्तः ॥ तत्वेतावतेदं सर्वनामार्थस्य प्राधान्यमुत्तरपदार्थे गुणत्वात् ॥ २७ ॥

एवं कारकं हेतुत्वालक्षणं तादर्थ्यमिति निमित्तसाम्ये ऽपि प्रविभक्तस्वरूपविषयाः पदार्था इति न तत्र लक्षणसाङ्कर्यप्रसङ्ग इत्यानुषङ्गिकेऽर्थे निर्णीते प्रस्तुतमेव कारकविषय विचारं प्रस्तावयति ॥

सर्वत्र सहजा शक्तिर्यावद्द्रव्यमवस्थिता ।
क्रियाकाले त्वभिव्यक्तेराश्रयादुपकारिणी ॥ २८ ॥

अनित्यानां पदार्थानां स्वतन्त्रेरेव शक्तानामुद्भव इति सहजता शक्तेः । न ह्यनाधेयातिशयत्वात् भावानामशक्तस्योत्पत्त्यनन्तरमाधातुं शक्यते शक्तिः । नित्यानां तु स्वाभाविकी शक्तिः । आश्रयसमवेतास्तु शक्तयः, तदपाये निराधारा नावस्थातुं पारयन्तीति यावद्द्रव्यभाविन्यः । एवमपि सहकारिसन्निधाने कार्योन्मुक्ताः शक्त्यभिव्यक्तिमाश्रयन्ते भावा इत्यभिव्यक्तिकाः । त एव कार्यो-

पकारित्वात् साधनमित्युच्यन्ते नान्यदा सत्त्वं ऽपि ॥ २८ ॥

तथा हि

कुड्यस्यावरणे शक्तिरस्त्रादीनां विदारणे ।
सर्वदा स तु सन् धर्मः क्रियाकाले निरूप्यते ॥ २९ ॥

आवारकं कुड्यं विदारकं च शस्त्रं, छेद्यावरीतव्यवस्तुसन्निधाने ज्ञाप्यन इति विद्यमानशक्तिविषयोपपन्नाऽभिव्यक्तिः । परिच्छिद्यते त्रिकाला ऽन्यदर्शने ऽपादानेनियमाधिकार्यात् पूर्वमपि शक्ति(रतस्त) ? पुनरपि कार्यकरणादुत्तरकालमपि ॥ २९ ॥

आगमेनाप्येतत्समर्थयति ।

स्वाङ्गसंयोगिनः पाशा दैत्यानां वारुणा यथा ।
व्यज्यन्ते विजिगीषूणां द्रव्याणां शक्तयस्तथा ॥ ३० ॥

दैत्यानां स्वकर्मनिर्माणा वारुणा पाशा स्वहस्ततलाच्चलिता. सदा सन्निहिताः शक्तिरूपेणेत्यागमहेतुपरसैन्यायत्तजयवेलायामभिव्यज्यन्त इति श्रूयते। एव द्रव्याणा सदा सन्निहिता शक्तय स्वकार्यनिष्पादनकाले प्रकाशन्त इत्यपि युक्तम् ॥ ३० ॥

यदुक्तमस्त्रादीनां विदारणे शक्तिरिति तदेव प्रतन्यते ।

तैक्ष्ण्यगौरवकाठिन्यसंस्थानैः स्वैरसिर्यदा ।
छेद्यं प्रति व्याप्रियते शक्तिमान्गृह्यते तदा ॥ ३१ ॥

निबिडतरं संहननानामवयवानां क्रमेणाग्रे सूक्ष्मीभवनां तनुत्वप्रकर्षस्तैक्ष्ण्य छेदनिमित्तो धर्मः, भिन्नजातीयावयवसंभेदविच्छिद्यमाने विच्छिन्नान्तराधीनामवयवानामुपचयात् गौरव नियत न हेतुधर्मः । पावकोत्तेजितानां लोहावयवानां निबिडत्वं काठिन्यं नाम धर्मो यतः प्रहारविशेषो निष्पद्यतेऽसनिवेशविशेषो मण्डलाग्रादिव्यपदेशनिबन्धनमभ्यन्तराङ्गभागहेतु संस्थानम्, यत प्रहारविचित्रता जायते। तदेतैर्धर्मैरसियष्टिश्छेद्यविपाटवमारभमाणा शक्तिमती निगद्यते। व्यापारशून्या तु सत्यप्येतेषु धर्मेषु न तथा व्यवसीयते । एवमन्येषामपि पदार्थानां यथायोगं वाच्यम्। असेरुपलक्षणत्वात् ॥ ३१ ॥

पक्षान्तरायत्र साधने सम्भवन्तीत्याह ।

प्राङ् निमित्तान्तरोद्भूत क्रियायाः कैश्चिदिष्यते ।
साधनं सहज केश्चित् क्रियान्यैः पूर्वमिष्यते ॥ ३२ ॥

सिद्धिसत्त्वे व्यक्तिप्रतीक्षा साधनम् । सत्त्वमेव तु शक्तीनामर्थानुमेयत्वात् क्रियात पूर्वमसिद्धमिति क्रियाया पूर्वमपक्षणीयनिमित्ताच्छक्तयो द्रव्याणां क्रियानुगुणा जायन्त एव । सत्त्वे ऽप्यभिव्यक्तिनिमित्तमपेक्षणीयमिति तदेव जनकम् । तथा हि सहकारिसव्यपेक्षाणा भावानां जनकत्वात् परस्परप्रतिहतशक्तयस्ते स्वकार्ये हतत्व इत्युपनीयन्त कवलानामजनकत्वात् । न तदा नि शक्ता इति न स्वाधारजनकादेव शक्तिजन्म अपि तु निमित्तान्तरादेव । प्रत्यभिज्ञायमानत्वाच्च शक्ताशक्तत्वे ऽपि न वस्तुभेद इति कोचित् । अत एवापादानानियमो ऽपि योग्यतावधारणादसिद्ध । अन्य तु शक्तिर्वस्तुनो ऽनन्यत्वात् स्वभावभेद एव । शक्तत्वे ह्यन्ये सहज कैश्चित्साधन शक्तिद्रव्याणामिष्यते इति पूर्वप्रतिपादितपक्षानुवाद । के चित्तु येनैव कारणेन क्रिया जन्यते न तेनैव साधनं, अपि त्वन्येनैवेति क्रियापेक्षया निमित्तान्तरत्व मन्यमाना सहजत्वमपि क्रियापेक्षयैव व्याचक्षते । तथा च येभ्य एव क्रिया ज्ञायते तेभ्य एव शक्तय इति सहजत्वम् । तदुपजातशक्तयस्तु लक्षणान्तरे नित्यतैका इति साध्यसाधनभावे नास्ति क्षति । न हि साध्यसाधनयो सदसत्त्वमेव प्रमाणोपपन्न ॥ ३२ ॥

अभेदे तु साधनात्पूर्वप्रभाविनी क्रिया इत्याह ।

प्रवृत्तिरेव प्रथमं क्वचिदप्यनपाश्रिता ।
शक्तिरेकाधिकरणे स्रोतोवदपकर्षति ॥ ३३ ॥

अनपेक्षितत्वे तु सा क्रियाऽनपाश्रिता क्वचिदपि भण्यते । स्वाश्रये तु समवेतैव । अत एव तत्राश्रय सा न शक्तिराविर्भावयति प्रतिनियतस्वकार्यसम्पादिका । अन्ये त्वनाश्रितैवेत्याहु स्रोतोव्यापारप्रवहद्रूपा नदी प्रवाहवत्तृणपर्णलतादीन् साधनाशक्ती. प्रवृत्तिलक्षणी क्रियाऽपकर्षति वहन्तीति केषां चिज्जरन्मीमांसकानामागम. । इतो लक्षणा वा प्रवृत्तिरित्या सर्वभावेष्वनुयायिनी स्वकार्यप्रसवसमर्था कार्याणि जनयतीति साङ्ख्यनय । व्यापाराविष्टस्य सर्वस्य कार्यजनकत्वाद्व्यापार पूर्वभावी समवस्थित , तत्रैव च शक्त्याक्षेप इति युक्तम् ।

केयं प्रवृत्तिरनपाश्रया नित्येत्याह ।॥ ३३ ॥

इतो ग्रन्थपातसन्धानाय फुल्लराजकृतिर्लिख्यते । इदानीं मतान्तरानुसारेण साधनस्वरूपं वर्णयितुमाह ।

अपूर्वं कालशक्तिं वा क्रियां वा कालमेव वा ।
तमेव लक्षणं भावं के चिदाहुः कथंचन ॥ ३४ ॥

अपूर्वं धर्माधर्माख्यमदृष्टसंज्ञक केचिदेवंरूपं सामर्थ्यलक्षणं भावमाहुः । अदृष्टवशाद्धि सर्वं भवति वा न वेत्यदृष्टमेव सर्वकार्याणां निमित्तं बोद्धव्यम् । केचित्तु वादिनः कालशक्तिमेव भगवतो ब्रह्मणः सम्बन्धिनः साधनमाहुः । कालशक्त्यनुप्राणितं हि सर्वं क्रियायै प्रभवति । क्रियां वा राजसीमन्तरोपवर्णितस्वरूपां साधनमाहुः । नन्वन्तरकालभावि किं चन साधनं नाम शक्यं निरूपयितुम् सर्वक्रियामूलं साधनं व्याख्यातम् अधुना क्रियैव साधनमिति विशेषः सैव हि स्वयं प्रतिभाविशेषा भवतीति कालमेव वा नित्यमेकमित्यादिलक्षणलक्षित द्रव्यकालवादिनः साधनमाहुः । कालवशाद्धि सर्वे भावाः प्रभवन्ति कार्यसम्पत्तये इति काल एव साधनम् । यदावक्ष्यति, यदि न प्रतिबध्नीयादिति ॥ ३४ ॥

अथ शक्तेः सामर्थ्यादिलक्षणायाः साधनत्वेन पूर्वं निरूपितायाः सङ्ख्याविचारं कर्तुमाह ।

नित्याः षट् शक्तयो ऽन्येषां भेदाभेदसमन्विताः ।
क्रियासंसिद्धयेऽर्थेषु जातितत्समवस्थिताः ॥ ३५ ॥

अन्येषां मते चार्थेषु नित्याः षट् शक्तयः पृथग्लक्षणलक्षिताः कर्मोद्या व्यवस्थिता इति । ता कीदृश्यो भेदाभेदसमन्विताः, एकान्तेन योऽर्थस्तद्भेदसमन्विता अभिधीयेरन् अर्थस्य शक्तिवैकल्याच्छीरूपता स्यात् । अथाभिन्नाः कथ्यन्ते तर्हि विभिन्नकार्योदया नावतिष्ठन्ते । तस्मात्कथं चित् भेदेनेति भेदाभेदाभ्यां समन्विताः शक्तयो ऽर्थजातिवदवस्थिताः यथा सद्द्रव्यत्वगोशावलेयत्वादिजातयः सततं भेदाभेदसमन्वयेनार्थेष्वित्येके मन्यन्ते ॥ ३५ ॥

तासां च द्रव्यभेदेनानन्त्ये ऽपि षट्त्वमेव षड्विधत्वमेव तत्त्वं नाभिवर्तत इत्याह ।

द्रव्याकारादिभेदेन ताश्चापरिमिता इव ।
दृश्यन्ते तत्त्वमासां तु षट् शक्तीर्नातिवर्तते ॥ ३६ ॥

द्रव्यभेदेन भिन्ना शक्तिः । यथा दात्रमन्यार्थं छिनत्ति खण्डो-ऽन्यथेति।आकारभेदेन खण्डा ऽन्यथा ऽवयवी ह्यन्यथेति। आदिग्रहणाद्दृशकालभेदेन सैव दहनशक्तिरग्नेर्वैचित्र्यमुपपादयन्ती वस्तुनस्त्वरूपं नातिक्रामति ॥ ३६ ॥

अथैकैव शक्तिर्निमित्तभेदाद्विशेषरूपतया षोढात्वमापन्ना वा साधनमित्याह ।

निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते ।
षोढा कर्तृत्वमेवाहुस्तत्प्रवृत्तेर्निबन्धनम् ॥ ३७ ॥

यस्मात्कर्तृत्वमेव निमित्तभेदेनेष्टतमत्वादिना, ज्वलनत्वादिभावः षोढा ऽवस्थित. सन् तत्प्रवृत्तेः शक्तिभेदप्रवृत्ते कारकव्यवहारभेदस्य नियन्धनं निमित्तभूतं बोद्धव्यम्।यथोक्तं यथा पच्यन्तां विक्लित्त्यै, एधा ज्वलिष्यन्तीति ज्वलने क्रियाकरणस्य पाक इत्यादिन्यायेन कर्तृत्वमेवावान्तरव्यापारविवक्षया करणादिव्यपदेशरूपतां भजते ॥ ३७ ॥

तदेवमेकानेका वा शक्तिरुपपादिता । अथासौ व्यतिरिक्ताऽव्यतिरिक्ता वेत्याशङ्क्याह ।

तत्त्वे वा व्यतिरेके वा व्यतिरिक्त तदुच्यते ।
शब्दप्रमाणको लोकः स शास्त्रेणानुगम्यते ॥ ३८ ॥

भेदाभेदाभ्यां तावदनिर्वाच्यासौ केवलं भेदाभेदसमन्विते त्युक्तम्।अथात्र (निष्टंणिकां)? करोषि तत्त्वया सहास्माक किं प्रयोजनम। सर्वथा शक्तिमतोरेकान्तेन तत्त्वमव्यतिरेको वा भेद. । एवं च वैय्याकरणनयानुसारिभिरस्माभिस्तत्सामर्थ्यं व्यतिरिक्तमेवोच्यते । यस्मात् शब्दप्रमाणको लोकः।शास्त्रेण चानेन स एवानुगम्यत इत्याह। शास्त्रेणानुगम्यते । लोकप्रतीत्यनुसारेण हि शब्दस्यार्थो वितन्यते । लोकश्च शब्दक्रियानिमित्तायाः शक्तेर्व्यतिरेकमेवानुगच्छति । अव्यतिरेके हि सततं क्रियानिष्पत्तिप्रसङ्ग इत्युक्तम् ॥ ३८ ॥

अथ परमार्थपर्यालोचनां विना निर्वृतिमुपलभन्ते ते तदोच्यते किं चिदित्याह ।

परमार्थे तु नैकत्वं पृथक्त्वाद्भिन्नलक्षणम् ।
पृथक्त्वैकत्वरूपेण तत्त्वमेव प्रकाशते ॥ ३९ ॥

पृथक्त्वाद्भिन्नलक्षणं पृथक्त्वव्यतिरिक्तं नैकत्वमस्ति पृथक्त्वैकत्वरूपेण हि तत्त्वमेव प्रकाशते । अविद्याव्यवहारदशायां पृथक्त्वेन प्रकाशते । अविद्याविलये त्वेकत्वेन प्रकाशत इति बोद्धव्यम् ॥ ३९ ॥

एतदेव व्याख्यातुमाह ।

यत्पृथक्त्वमसन्दिग्धं तदेकत्वान्न भिद्यते ।
यदेकत्वमसन्दिग्धं तत्पृथक्त्वान्न भिद्यते ॥ ४० ॥

असन्दिग्धं यथा तथाऽवगमात् सन्देहं विना कृतं पृथक्त्वं तदेकत्वान्न भिद्यते । यच्चैकत्वमसन्दिग्धं विगतभ्रमं तत् पृथक्त्वाज्ञानात्त्वाग्न भिद्यते ॥ ४० ॥

तथा च यदैकत्व काष्ठामनुप्राप्तं तदा सर्वत्र तदेव प्रकार इत्याह ।

द्यौः क्षमावायुरादित्यः सागराः सरितो दिशः ।
अन्तःकरणतत्त्वस्य भागा बाह्यवास्थिताः ॥ ४१ ॥

अथवाऽऽस्तां कतिपयवस्तुविषय एकत्वानेकत्वविचारः । चरमे द्यौश्चाकाशं पृथिवी च द्यावापृथिव्यौ महत्यौ महाभूतमेके जलद्युती तदन्तरे च वायुरपि तृतीय । यदादित्यलक्षणमपि सकलतेजसां प्रधानं दिव्यतेजः, आपः सरितः समुद्राः गौर्वा वितितरा, सर्वाण्येवैतानि महाभूतानि सकलजगज्जीवितभूतानि दिशो वा, लोकव्यवहारनियमनिमित्तभूतः कालश्च वक्ष्यमाणः, तदेतत्सर्वमन्तःकरणतत्त्वस्येति अन्तःकरणत्वेनान्तररूपतया प्रतिभासमानं यत्र तस्यैवैते भावा प्रतिबिम्बकाः, आभासा बहिरवस्थिताः । परमार्थे तु कीदृशोऽन्तर्बहिर्भाव । एकमेव सच्चिन्मय परं शब्दब्रह्म यथातथावस्थितमिति कारिकार्थः ॥ ४१ ॥

महाभूतरूपत्वं दिग्रूपताञ्चाभिधाय कालरूपतां तस्यैव प्रतिपादयन्नाह।

कालविच्छेदरूपेण तदेवैकमवस्थितम्।
स ह्यपूर्वापरो भागः पररूपेण लक्ष्यते॥ ४२॥

स ह्यपूर्वापरः परमार्थतः। अथ वा कालशक्तिवशात् चिरक्षिप्रादिक्रमेण लक्षितं तदेव पदार्थसामर्थ्यलोकप्रसिद्ध वैय्याकरणमतेन साधनम्। अथ वा बुद्धिप्रकल्पनारूपं विज्ञानवादाभिप्रायेण, संसर्गिरूपं वा पदार्थान्तरभूत संसर्गवादानुसारेण, अदृष्टलक्षणमपूर्वशब्दवाच्यं वा मीमांसकदृष्ट्या, ब्रह्मसम्बन्धिनी वा कालशक्तिरद्वैतदर्शनेन, क्रिया राजसी प्रकृतिरूपा वा साङ्ख्यदर्शनानुसारेण, नित्यमेकं द्रव्यलक्षण वा कालरूपं द्रव्यकालवादिनां मतेन विज्ञेयम्। साधनप्रस्तावेन च कारकशब्दविचारस्तत्प्रसङ्गेन च हेतुलक्षणकारककरणतादव्यानां भेदपूर्वं निरूपणम्। पूर्वकाले कृत. स्वरूपमुक्तम्। तत. शक्तेः किं सह प्रागुत्तरकालं वा भाव इति कालविकल्प.। सा च किं कर्मादिभेदेन भिन्नैवाहो स्विदेकैव सैव तथा परिकल्प्यत इति सङ्ख्याविकल्पः। सा च किं पदार्थस्वरूपाद्व्यतिरिक्ताऽव्यतिरिक्ता वेति व्यतिरेकाव्यतिरेकौ। व्यतिरेकं विना तत्प्रस्तावे तु ब्रह्मस्वरूपनिरूपणमिति प्रकरणसमुदायार्थः॥४२॥

इदानीं प्रकृतं वैय्याकरणमतमेवानुबन्धयञ्छक्तेः व्यतिरेकमेवान्वयव्यतिरेकमुखेन परिघटयन् सद्भावमुपपादयितुमाह।

दृष्टो ह्यव्यतिरेकेऽपि व्यतिरेकोऽन्वये सति।
वृक्षाद्यर्थान्वयस्तस्माद्विभक्त्यर्थोऽन्य इष्यते॥ ४३॥

अव्यतिरेकेऽभेदेऽपि प्रकृत्यर्थस्य वृक्षे वृक्षायेत्यादौ विभक्त्यर्थस्य साधनलक्षणस्य व्यतिरेक.। तथा तत्र च विभक्त्यर्थस्यासत्यत्वम्। येन प्रातिपदिकार्थे ऽस्यान्वये ऽनुगमो दृष्टः, ततो मन्यामहे ऽस्ति कश्चिद्व्यतिरिक्त प्रत्ययार्थभूतो ऽनपह्ववनीय. साधनलक्षणशक्तिशब्दवाच्यो ऽर्थ इति साधनसिद्धिः॥ ४३॥

इदानीं व्याख्यातस्योपसंहाराय व्याख्येयस्योपक्रमाय कारिकामाह।

सामान्यं कारकं तस्य सप्ताद्या भेदयोनयः ।
षट् कर्माख्यादिभेदेन शेषभेदस्तु सप्तमी ॥ ४४ ॥

सामान्यं कारकमिति व्याख्यानार्थोपसंहारः । तस्य सप्ताद्या इत्यादिना व्याख्येयार्थोपोद्घातः । तत्राद्या प्रधानभूता. सामान्यसाधनापक्षया । भेदरूपाश्च ता योनयः स्वकानां भेदानामिति भेदयोनयः । अथान्या. सप्त भेदानां च स्वकानां योनय. कारणानि । कथमित्याह । षट् कर्माख्यादिभेदेनेत्यादि । कर्मादिव्यपदेशभेदेन सप्तप्रकारकशक्तयो लक्ष्यन्ते ऽधुनेति साधनसमुद्देशसङ्गतिः ॥ ४४ ॥

कर्मादिभदेन सप्तभेदभिन्नं तावत्कारकमुद्दिष्टम् । अथ तदनुक्रमेण कर्म तावत् संख्याभेदप्रदर्शनपूर्वकं व्याख्यातुमाह ।

निर्वर्त्यं च विकार्यं च प्राप्यं च त्रिविधं मतम् ।
तत्रेप्सिततमं कर्म चतुर्धा ऽन्यत्तु कल्पितम् ॥ ४५ ॥

कारकविशेषनिर्देशश्च विभक्त्यनुक्रमानुसारेणेह प्रदर्शितः । सूत्रेषु तु विप्रतिषेधपरिभाषाऽनुरुध्यापादानादिक्रमेणोक्तम् । तत्र विभक्तय. स्वौजसमाद्या. । कारकमभिहितमनभिहितं च भवति । तत्र प्रथमा ऽभिहितकारकविभक्तिः प्रातिपदिकार्थमात्र एव विधीयते । द्वितीयाद्यश्च सर्वा अनभिहितकारकविभक्तय इत्येकप्रक्रमत्वाद्द्वितीयाद्यर्थानुसारेणैवोपक्रमन्ते । द्वितीयाद्यर्थश्च कर्मादि । यदुक्तं कर्मणि द्वितीयेत्यादि । अतः कर्मण एवादौ व्याख्यावसरे सूत्राद्यनुसारेणात्र कर्तुं. क्रियया यदीप्सिततममाप्तुमिष्यमाणतम तदेव लक्षणम् प्रथमसूत्रनिर्दिष्टम् । कर्म त्रिभि. प्रकारै. निर्वर्त्यविकार्यप्राप्यरूपैर्भिन्नमनेकत्वान्निर्दिष्टं बोद्धव्यम् । अथान्यत् सूत्रान्तरनिर्दिष्टमपि भेदमिममाह । चतुर्धा ऽन्यत्तु कल्पितमिति ॥ ४५ ॥

कथमित्याह ।

औदासीन्येन यत् प्राप्तं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥ ४६ ॥

औदासीन्येन तात्स्थ्येन यत्प्राप्तम् । यथा ग्रामं गच्छन् वृक्षं स्पृशति

तथा यच्च कर्तुरनीप्सितम् । चौरविषादि । एतत्तथायुक्तं चानीप्सितमिति द्वितीयसूत्रनिर्दिष्टम् । तच्च द्विविधम् । तथा च येनैव प्रकारेण कर्तुरीप्सितमेव चेदनीप्सितमीप्सितादन्यथा विषादि । इतरच्च यदादाम्नीन्येन प्राप्तं वृक्षमूलाद्युक्तम् । तथा संज्ञान्तरैरपादानादिसंज्ञाभिरनाख्यातमपि क्रियानिमित्तमेतदुक्तमिति तृतीयसूत्रनिर्दिष्टं वेदितव्यम् । तथा यच्चाप्यन्यपूर्वकमिति । अन्यत्कारकं पूर्वं यस्य । यथा देवदत्तमभिक्रुध्यति देवदत्तमभिद्रुह्यतीति । अत्र हि क्रुधद्रुहोरुपसृष्टयोरुपसर्गसम्बद्धयोर्यं प्रतिकोपः, तत्कारकं पूर्वसूत्रेण संप्रदानमप्यकर्मसंज्ञमेव भवति । तथा ऽक्षान्दीव्यति इत्यत्र दिवः कर्म चेत्यनेन दिवः साधकतमं यत् पूर्वसूत्रेण तत्करणसंज्ञमपि कर्मसंज्ञं भवति ॥ ४६ ॥

अथ निर्वर्त्यं द्विविधमुद्दिष्टं व्याख्यातुमाह ॥

सती वा विद्यमाना वा प्रकृतिः परिणामिनी
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥ ४७ ॥

यस्य निर्वर्त्यस्य घटादेः प्रकृतिः सती वा यथा मृदादिका अविद्यमाना वा यथा शब्दसंयोगादेः ॥ परिणामसमापादिता अभेदेन नाश्रीयते मृदो घटं करोतीत्याद्येवंरूपतया न विवक्षिता किं तर्हि मृदा घटं करोति इत्यादिभेदेनैव ॥ यदा प्रकृतेस्तु विवक्षायां विकार्यं प्रकृतेः । कारणस्य परिणामित्वेन यदा विवक्षा क्रियते मृदा घटं करोति, काष्ठैः कटं करोति, अङ्गारान् भस्म करोतीत्यादि । तदा विकार्यं कर्म प्रचक्षते ॥ ४७ ॥

अथापरथा मतान्तरोपन्यासच्छलेन प्रकारभेदकथनवाञ्छया निर्वर्त्यविकार्ये निरूपयितुमाह ।

प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा ।
निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् ॥ ४८ ॥

कथमित्याह ॥

यदभिजायते भद्भा जन्मना यत्प्रकाश्यते ।
तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम् ॥ ४९ ॥

यदसद् वैशेषिकाद्यनुसारेण जायते साङ्ख्यमतेन सदेव वा जायते तदुभयथापि जन्मना प्रकाश्यमानत्वात् निर्वर्त्यं कथ्यते । एतदुक्तं भवति सत्कार्यवादिनामस्माकं निर्वर्त्यं कर्मास्तीति वक्तव्यं पार्यते । सतीत्यस्य प्रकृतिर्भवत्वसती वा । सर्वथा जन्मना प्रकाश्यमाना । न वै निर्वर्त्यस्य न काचित् क्षति । सदसद्वा जन्मना यत्प्रकाश्यते तन्निर्वर्त्यं । असज्जायत इत्यविद्यमानप्रकृते कर्मणा निर्वर्त्यमानमित्यतः पूर्वोक्तनैवान्तरितोऽसज्जन्मना प्रकाश्यत इति । अयमत्र विशेषः । तथथा पुत्रं प्रसूते शब्द प्रयुङ्क्ते इत्यत्र कुक्षिस्थस्य सत एव पुत्रस्य विवक्षितस्य च शब्दस्य प्रसवयोगाऽर्थां प्रकाशनमा सत. प्रकाशनाद्धि जन्मात्र विवक्षितम् । जन्मग्रहणेन प्रकृतिविवक्षायां विकार्यतामाह । अन्यथा ऽभिव्यज्यमानस्य निर्वर्त्यकर्मता स्यात् । तदभावमपि जन्मग्रहणेनाह । तेन वेदमधीत इत्यादौ वेदादेरध्ययनेन प्रकाश्यमानस्य निर्वर्त्यकर्मताभावात् कर्मणिनिर्वर्त्यमानो विक्रियमाण इति चेद्वेदाध्ययनादीनामुपसङ्ग्रहानमित्युच्यते । इत्थं च प्रकृत्यर्थविवक्षायामेवैतान्निर्वर्त्यं कर्मोक्तमिति कैश्चित् अन्यथेत्यसङ्गतम् । तस्मात्सदसत्कार्यवादिमतभेदेनैतद्व्याख्येयम् । पूर्वं लोकप्रतीत्यनुसारेणोक्तम् । इह तु तीर्थिकमताश्रयेणापीति विशेषः । विकार्यं तु कर्म द्वेधा व्यवस्थितम् । प्रतिव्यक्ति लक्षणं प्रतिलक्षणं व्यक्तिभेदः ॥ ४९ ॥

पूर्वमुक्तं लक्षणमाह ।

प्रकृत्युच्छेदसम्भूतं किं चित्काष्ठादिभस्मवत् ।
किं चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥ ५० ॥

निरन्वयविनाशात्प्रकृतेरुच्छेदः । यथा काष्ठादेर्भस्मादि । काष्ठानि भस्म करोति । पूर्ववत् प्रकृतिविकारयो क्रियासम्बन्धो योज्य । पूर्वेण तु लक्षणेन निर्वर्त्यमेतत्कर्म प्रकृतेरविवक्षया । विवक्षायां तु विकार्यम् । इह त्वविवक्षितायामपि प्रकृतौ भस्मादिकार्ये रूपविशेषादेव काष्ठादिकमुपमृद्योपजातमिति प्रतीतेर्विकार्यम् । पूर्ववत् प्रकृतिः साक्षाद्विकार्यकर्म, तद्भेदे अविकारो ऽपि । इह तु साक्षाद्विकार एवेति विशेषः । काष्ठानि दहन्तीति तु प्रकृतिरेव शब्दवती सामर्थ्यगम्यस्तु विकारो भस्म । एवं काण्डानि लुनाति कर्म करोतीत्यादौ वेदितव्यम् । का चित्तु प्रकृतिरत्यजन्ती स्वरूपं संस्थानान्तरापत्त्या विकृतेत्युच्यते

इति गुणान्तरसन्निवेशादेर्धर्मस्योत्पत्त्योपलक्षितमपरं विकार्यं कर्म । तद्यथा सुवर्णं कुण्डले भवत इति । असत्कार्यवत्या यद्यप्यत्रापूर्वोत्पत्तिं तथापि प्रत्यभिज्ञानाल्लोके तत्त्वाध्यवसायात् गुणान्तरमात्रापत्तिरुच्यते । एतच्च प्रकृतिविवक्षायां पूर्वलक्षणेनापि सङ्गृहीतम् ॥ ५० ॥

इदानीं प्राप्यकर्मलक्षणमाह ।

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥ ५१ ॥

निर्वर्त्यकर्मणि निर्वृत्तिरात्मलाभ एव क्रियाकृतो विशेषो दर्शनात्प्रत्यक्षादेवावधार्यते । विकार्यंतु भस्मकुण्डलादौ विकारः क्रियाकृतो विशेषोऽवधार्यते प्रत्यक्षेण । क्व चित्पुनरनुमानाद्विशेषावसायो यथा प्रजानितानां सुखादीनां मुखप्रसादादिना लिङ्गेनावसाय । जलावसेकादिक्रियाविशेषश्च वनस्पतीनां विशेषं प्रतिजलमवाप्य जन्मसूक्ष्मत्वादुत्पत्त्यनन्तरमवगीयमानश्चरमावस्थायां प्रचिततरविशेषदर्शनादवधार्यते । न ह्ययं प्रचिततरो विशेषो न वेक्षितक्रमो झटित्यशङ्कित एवोहितु प्रभवतीति प्रतिक्षणमनुमीयमानः सूक्ष्मरूपस्तस्य हि सूक्ष्मरूपस्य तु स्वाधारत्वम् । तथा षट्जादिस्वरविशेषयोरुपघोरानितारयो । तदेवं विधो विशेष एव क्रियाकृतो न संदृश्यते । कर्तुं क्रियाविषयभावमात्रेणैप्सिततमत्वात्प्राप्यं कर्म । तद्यथा आदित्यं पश्यति, नगरमुपश्रयति, वेदमधीत इत्यादावादित्यादीनां हि सन्दर्शनक्रियया कश्चिदाहितो विशेषो नावधार्यते । प्रमाणाश्रयां क्रियासम्बन्धमात्रं तु लक्ष्यते । न च स एव विशेषः । घृते क्रियासम्बन्धे वस्तुगतस्य भेदस्य निर्वर्त्यविकार्ययोरदृष्टत्वात् । नगरे तु गमनक्रिया जनितः संयोगो द्विष्ठो विशेष्यो भवन्नपि । नगरस्य महापरिमाणत्वात् अल्पपरिमाणेन देवदत्तेन हि भवदंगुलिसम्बन्धवदलक्ष्यः पृथिव्येकदेशश्च स्वावयवापेक्षया कथिनो विशिष्टस्वाधाराधेयरूपो न प्राप्यशब्दवाच्यः प्रसिद्ध एव वेति न कदाचिदनुपपत्तिः ॥ ५१ ॥

नास्त्येव प्राप्यकर्म सर्वत्र क्रियाकृतविशेषावधारणादिति के चित् । तथा हि ।

विशेषलाभः सर्वत्र विद्यते दर्शनादिभिः ।
केषां चित्तदभिव्यक्तिसिद्धिर्दृष्टिविषादिषु ॥ ५२ ॥

दर्शनादिक्रियाहितविशेषाधो विकारः सर्वत्र विद्यते सौक्ष्म्यात्तु नावधार्यते। सर्वेति। केषांचिन्मतम्। तस्य विशेषस्य दृष्टौ विष येषान्तेषु तद्विषये ऽभिव्यक्तेर्निश्चयस्य सिद्धि.। दृष्टिविषैरहिभिर्निरीक्षितो विषयो ज्वलनज्वालालीढो लक्ष्यते तत्साधर्म्यादन्यत्रापि दर्शनादिना हित. कश्चिद्विशेषो विषये समुन्नेयः। तैजसं हि चक्षु प्राप्यकारीति तेन युक्तो विषयो ऽवश्यं क्रियते यथा दृष्टिविषदर्शनेन। हर्यास्तु विशेषो हर्यादिशेषः, तेजस्त्वदुत्कटविषसम्पर्काद्विषयं दहति अन्यत्र तनुतरक्षिति.। आदिशब्देनायस्कान्तादीनां ग्रहण। तत्सन्निधौ लोहं भ्रमति। कतकफलसन्निधौ हि जल प्रसन्नवतीत्यस्त्वेव क्रियाकृतो विकारः। एतच्च शास्त्रकारस्य मतम्। केषांचिदन्यतमत्वेनोपन्यासात् क्वचिद्विशेषदर्शनेऽपि हि न सर्वत्र तथाभावो दृश्यमानविशेषोऽपि युक्त । किं च क्रियाफले ऽत्र विकारो ऽभिप्रेत.। परिदृश्यमानस्तु विषयो दृशिक्रियाया हेतुर्न फलम्। दृष्टिविषादावपि तेज. सयोगाद्विषये विकारो न क्रियाबलात्। एवमयस्कान्तादेर्नस्तुस्वभावो ऽयं न तु क्रियाकृतो विकारः कश्चित् (समादधेस्त्येवं)? प्राप्यं कर्म क्रियाकृतोपकारानपेक्षम् ॥ ५२ ॥

न चेद्विकारयोगः प्राप्यकर्मण कथमस्य क्रियासिद्धावङ्गभावः साधनतासम्पत्त्यर्थं । उच्यते ॥

आभासोपगमो व्यक्तिः सोढत्वमिति कर्मण. ।
विशेषा प्राप्यमाणस्य क्रियासिद्धौ व्यवस्थिताः ॥५३॥

योग्यदेशावस्थानेन दर्शनपथमवतरति विषय इति योग्यदेशतापत्तिराभासोपगमः। स्वभावदेशस्य दर्शनादुपकार यो ऽन्यदेशस्थितस्यापि नीहारादिप्रकाशप्रतिबन्धकभानुप्रदीपादिनिमित्ता व्यक्तिरङ्गं विषयस्य। प्रकाशयोग्यदेशस्थितस्य सत्यव्यापारको ऽदृश्यस्वभाव. पिशाचादिरिति सोढत्वम्। बाधक्षमतामदृश्यस्वभावताङ्गं एतैरतिशयैर्दर्शनसाधनभावमनुभवति प्राप्यकर्म। एते च दर्शनक्रियाहेतवो न कृता.। ग्राम गच्छतीत्यादावपि यथायोग सोढत्वा-

दयो ग्रामादेर्वाच्या.। समोदा विषयीकृता हि रामादयो ऽवभासमाना गमनादिसहा. साधयन्ति गमनादिक्रियामेवमध्ययमानं वेदादि अध्ययनसहम् । मातरं स्मरतीत्यपि माता कृतोपकाराकूरहृदयस्यापि स्मृतिपथमनुपतन्ती साधयति स्मृतिम् । ईप्सिततमत्वानपेक्षायां तु सम्बन्धित्वसामान्यविवक्षायां शेषषष्ठी मातु स्मरतीति ॥६३॥

एव तावद्यथाविभागं कर्म लक्षितम् । इद तु वक्तव्यं, पूर्वमुक्तं गुणक्रियाणां कर्त्तारः सर्वे साधनविशेषा इति तत्कथं कर्म तासम्भव इति कर्मकर्तृविचारपातनिकां करोति ॥

निर्वर्त्त्यादिषु तत्पूर्वमनुभूय स्वतन्त्रताम् ।
कर्त्रन्तराणां व्यापारे कर्म सम्पद्यते ततः ॥ ५४ ॥

निर्वृत्ति. विक्रियाभासापत्तिः । क्रियासु यथासंख्यं निर्वर्त्यप्राप्यलक्षण कर्म स्वातन्त्र्यकर्तृत्वमाश्रित्य तदपेक्षया स्वेषां निर्वर्त्यादिकर्मविषयत्वात् बहूनां कर्तृणां निर्वर्त्तनादिव्यापारे प्रैषलक्षणे कर्मे जायते तेनाप्यमानत्वात्तथा हि निवर्त्तते विकुरुते आभासमुपैति प्रकाशत इति कर्त्तरि स्वव्यापारे कथं भेदाः प्रधानकर्तृव्यापारे विवक्षिते निवर्त्तयति विकारयति आभासादिविषयभावमापादयतीति कर्तृप्रैषे स्वामिसन्निधाविव भृत्या न्यग्भवन्तः कर्मभावमनुभवन्ति ॥ ५४ ॥

एव तर्हि कर्माभूत कर्त्ता कथं भवतीति येन कर्मकर्तृसम्भव इत्यत आह ॥

तद्व्यापारविवेके ऽपि स्वव्यापारे व्यवस्थितम् ।
कर्मापदिष्टान् लभते क्वचिच्छास्त्राश्रयान्विधीन् ॥ ५५ ॥

भिद्यते कुसूलमित्यादौ यदा कर्तृप्रैषस्य निवृत्ति. कुसूलादेर्विशरणरूपतया स्वयमेव भिदा तु भवति । लूयते केदार इत्यादावपि शुष्कतरत्वात् कर्तृप्रयत्नानपेक्षणात् । पच्यते ओदन. स्वयमेवेत्यादावपि सौकर्यातिशयवशात् कर्तुरनपेक्षणात्तदा स्वव्यापारस्वातन्त्र्याश्रये कर्तृत्वे शास्त्रेण यत् कर्मकार्यप्राप्त्यर्थं कर्मबद्धावो विधीयत इति कर्मणि अपदिष्टान् विहितान्विधीन् कार्याणि कर्त्ता ऽपि सन् प्राप्नोति । कर्मवत्तव्य व्यापारफलनेन हि स्वव्यापारे कर्तृ-

त्वात् कर्मकार्याणि न स्युरिति शास्त्रारम्भ । क चिदिति । कर्मस्थ-भावानां कर्मस्थक्रियाणां च धातूनां विषय इत्यर्थः ॥ ५५ ॥

ननु च कर्तृव्यापारे निवृत्ते तदायत्तं कर्मत्वमत्र माभूत् कर्तृत्व न्तु कथं येन कर्मकर्त्तेति व्यपदेश । तथा हि सति प्रधानकर्त्तरि कर्मण. स्वक्रियायां व्यापारा दृष्ट इति तदभावे कर्मत्ववत्ता । कर्तृ-त्वमपि कुत इत्याशङ्क्याह ॥

निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम् ।
निवर्तमाने कर्मत्वे स्वे कर्तृत्वे ऽवतिष्ठते ॥ ५६ ॥

धात्वर्थानुकूल्येन चेष्टनं कर्तु प्रेषणं स्वव्यापार. । कर्त्तृकारकविनियोगलक्षण , तदनभिधीयमानकर्त्तरि पच्यते ओदनः स्वयमेवेत्यादौ निवर्त्तते । कर्त्राश्रयस्य व्यापारस्य कर्त्तरि प्रत्य-येनाभिधीयमाने धातुना ऽभिधीयमानत्वात् । प्रतीयमानत्व तु तस्य द्वयर्थः पचिरिति भाष्यविरोधादसङ्कल्पनमेवाख्यातान्तानि धात्वन्त-राणीति वक्ष्यमाणत्वाद्विषयविभागेन धात्वर्थता कर्तृव्यापारस्य ग्रन्थ-कृतो ऽभिप्रेता । तस्मिन्निवृत्ते स्वस्मिन् क्रियावयवे प्रधानक्रियापेक्षया गुणभूते स्वव्यापारे कर्म स्थित, कर्तृभूतया भूतपूर्वगत्या तस्य कर्म-व्यपदेशः । यद्यपि च कर्तृव्यापारे विवक्षिते स्वक्रियायामेवावस्थानं तद्द्वारेण प्रधानक्रियानिर्वर्तनात् कारकं कर्मेति सामानाधिकरण्याच्च तथापि सामर्थ्यादत्र प्राधान्येनावस्थानं बोद्धव्यम् । अत एव कर्तृव्यापारापेक्षस्य कर्मत्वस्य (निमित्तावात्मीये)? सर्वत्र भवति स्वक्रि-याविषये कर्तृत्वे ऽवतिष्ठते इति कर्तृव्यापारापेक्षया पूर्वकर्म भूत्वा सौकर्यादिप्रतिपादनपरतया तदविवक्षायां कर्त्ता सम्पद्यत इति भवति कर्मकर्त्ता । अयं भावः । न केवलं कर्तृव्यापारस्याविवक्षामात्रे कर्मकर्तृता, अपि तु तस्य स्वव्यापारे स्वातन्त्र्यविवक्षायामपि सत्यम् । ततश्चाप्राप्तानि यगादीनि कर्मकार्याणि कर्मवत्तुल्यक्रिय इति शास्त्रेण प्राप्यन्ते । तदुक्तं वार्त्तिककृता कर्मकर्त्तरि कर्तृत्वं स्वातन्त्र्यस्य विवक्षितत्वादिति । तत्र यदा यतो यज्ञेरपि भिदादौ कुसूलादेः परानपेक्षा प्रतिपादिता भाष्ये । यदय निवाते निरभिवर्षे चिरकृतः कुसूलो भिद्यत इति । निवात इति समीरसम्पातनाप्येति कर्तृव्यापारो व्युदस्तनिरभिवर्ष इति सलिलकलासस्पर्शेऽप्युदस्तः

अचिरकृत इति कालान्तरपरिवासाधीयमानविशेषव्युदासः। एते हि पानहेतवः कुसूलस्य सम्भाव्येरन्निति व्युदस्ताः। एवं चाहढसन्निवेशत्वात् स्वयमेव शीर्यत इति कर्तृत्वोपपत्तिः। यत्रापि, अत्र हस्ते देवदत्तः पतितः दृश्यते, लूयते केदारः स्वयमेवेति, अत्रापि तीव्रकरकिरणसम्पर्कसमुत्सारितस्नेहः परिजर्जरभुवनालेः स्वयमेव विशीर्यमाणः केदारः नात्यर्थाद् व्रीहिरूपो लवने सुकरतामेति। सामग्रीसाध्यत्वाच्च क्रियाणां प्रत्येकव्यापारोत्कर्षणार्थं स्वातन्त्र्याध्यारोपेणाप्युपपन्नः प्रयोगः, देवदत्तः छिनत्ति, असिः छिनत्ति, स्थाली पचतीत्यादिः। अत्र कर्मण एव कर्तृ कर्मवद्भावो नान्यस्य क्लिद्यते रज्जुः, पच्यते ओदनः स्वयमेवेति। तदेतदुक्तं भाष्ये। तत्रापि यासौ सुकरता नाम तस्या अपि नान्यः कर्तेति सौकर्यातिशयवशाद्व्यापारे केदारे समीहिते, न देवदत्तश्छेदस्य कर्तृव्यपदेशं प्रतिपत्तुं योग्योऽपि तु केदार एवेत्यर्थः। ओदनविभक्तौ तु, छेदनकर्तृव्यापारोऽपि नावश्यमपेक्ष्यः। अनपेक्षितकर्तृप्रयत्ना एव हि तण्डुला विक्लिद्यन्ति। करणादिकारकविनियोग एव ह्यत्र मुख्यकर्तृव्यापारो लक्ष्यते ॥ ५६ ॥

ननु चैक एव पच्यादिर्धातुः क्वचित्कर्तृव्यापारे गुणभूतमर्थमाह, पचत्योदनं, भिनत्ति कुसूल, लुनाति केदारं देवदत्त इति। क्वचित्तु कर्तृव्यापारे प्रतिपन्नगुणभावं स्वप्रतिष्ठार्थमाह, पच्यत ओदनः स्वयमेवेत्यादाविव रूपभेदे धातूनां विवेको दुर्लभ इति कर्तृप्रत्ययवाच्यैव भावना भवन्तीत्याशङ्क्याह ॥

तानि धात्वन्तराण्येव पचिसिद्ध्यतिवद्विदुः।
भेदे ऽपि तुल्यरूपत्वादेकत्वपरिकल्पना ॥ ५७ ॥

कर्मकर्तृविषयाणि पच्यादीनि विक्लित्त्यादिमात्रवचनानि, तदुपसर्जनविक्लेदनादिव्यापारवाचिपच्यादिधातुभ्यो धात्वन्तराणि बोद्धव्यानि। अर्थभेदेन शब्दभेदात्। प्रधानं हि शब्दानां प्रतिपाद्योऽर्थः। प्रधानानुयायी च गुण इति न्यायात् प्रत्ययैः भिद्यते शब्दः। तद्यथा पचेर्विक्लेदनवचनत्वात् सिध्यतिरन्यो धातुर्विक्लित्तिवचनः। धात्वन्तरत्वे हि चैकत्वेन रूपाभेदादुपदेशो धातुपाठे डुपचष्पाक इत्यादिभिन्नरूपो ह्येकत्वकल्पनासहस्तु। यत्र तूपदेशभेदे फलभेदोऽस्ति

तत्र द्विस्त्रिरुपदेश' । तद्यथा हि पच्यादीनां विकरणभेदात् क्षि क्षये भ्वादौ, क्षि निवासगत्योरिति तुदादौ दिवादौ च, क्षि हिंसायामिति च क्रयादौ ॥ ५७ ॥

इदानीमेकमाहुरनेकार्थं शब्दमन्ये परीक्षका इति नयेनाह ॥

एकदेशे समूहे च व्यापाराणां पचादयः ।
स्वभावतः प्रवर्तन्ते तुल्यरूपसमन्विता' ॥ ५८ ॥

तुल्येनाभिन्नेन रूपेण स्वभावेन युक्ता एते धातवो भिन्नाः । अवाध्यमानस्यैकाकारप्रत्ययस्याभेदादेकत्वादनेकार्थत्वमेव बाधकमिति चेन्न । शक्तिभेदेन तदुपपत्तेः । अनेकार्थप्रतिपादनशक्तिर्ह्येको ऽपि शब्दो दृष्टः । यथा ग्रामशब्दः शालासमुदायवाटपरिक्षिप्तदेशजनस्य वचनः । यथा चाक्षादिशब्दाः । तत्र कर्मकर्तृविषये विक्लित्तिमात्रवचनः परिपच्यते ओदनः स्वयमेवेति । देवदत्तस्य कर्तुः प्रत्ययेनानभिधानात्तद्व्यापारस्यात्र धातुवाच्यत्वाभावः । प्रधानभूतो हि धात्वर्थो विक्लित्तिः सर्वत्र सम्भवात् । अपेक्षितेऽपि हि कर्तृव्यापारे देवदत्तः पचतीत्यत्र विक्लित्यर्थत्वाद्विक्लेदस्य कर्तृव्यापारस्यार्थेन रूपेण विक्लित्तिरेव । प्राधान्यात्समूहे वृत्तित्वम । अत्रैव वृत्तिरुक्ता कर्मकर्तृविषय तु कर्तृप्रत्ययस्याभावात् तद्व्यापारो भावना नाभिधीयते । कर्मैव कर्ता, तद्व्यापारश्च विक्लित्तिरेवेति सैवाभिधीयते । तद्यथा विक्लिद्यन्ति सिद्ध्यन्ति तण्डुला इति विक्लित्तेरेव कर्तृव्यापारस्याभिधानम् । एव भिद्यते कुसूल स्वयमेवेति द्विधाभवनं धात्वर्थः । भिनत्ति कुसूलं देवदत्त इति तदुपमर्जनं द्विधा भावनमित्याद्युदाहार्यम् ॥ ५८ ॥

तदेवं विचित्रशक्तिवशाच्छब्दानां विषयभेदेनार्थविवेकः समुदित । इदानीं कर्मकर्तृप्रसङ्गेन णेरणौ यत्कर्मेत्यत्र कर्मकर्तृत्वात्सिद्धमित्युक्तत्वात् विचारयति ।

न्यग्भावना न्यग्भवन रूढौ शुद्धे प्रतीयते ।
न्यग्भावना न्यग्भवन प्यन्ते ऽपि प्रतिपाद्यते ॥ ५९ ॥
अवस्थां पञ्चमीमाहुर्यन्ते तां कर्मकर्तरि ।
निवृत्तप्रेषणाद् धातोः प्राकृते ऽर्थे णिजुच्यते ॥ ६० ॥

इहारोहयते हस्ती स्वयमेवेत्ययं हस्तिव्यापाराभिधायी प्रयोगोऽस्ति कर्मकर्तृविषय.। तस्य च व्याख्यानोपायपरिकल्पना कर्तव्या। तत्रारूपसामान्यानुगमप्रवृत्ति । तेन रेखापचयादवयवभावापोद्धारेणा तदर्थाश्रयणेन च आख्यान प्रवर्त्तते। तथा च;यावतीषु सोपानस्थानीयास्वर्थविभागभूमिषु पदं विन्यस्य इयं प्रयोजिका पर्यन्तभूमिं प्राप्यते ता अन्तरा न भाविन्यो गण्यमाना भूमय ऽवस्थाशब्दवाच्या । तत्राद्ये भागे रुहिधातु प्रत्यभिज्ञायते । तस्य चान्यत्रावस्थाक्रियारूपोऽर्थ. प्रसिद्ध स एवेहाङ्गीक्रियते। तदेतदाह। स्वयमवनं रुहौ शुद्ध प्रतीयते। शुद्ध केवले णिजरहित इत्यर्थ । आरोहन्ति हस्तिन हस्तिपका इत्यत्र स्वयमवन्त स्वयमावयन्तीत्यर्थ ।अत्र च धात्वर्थमात्रप्रदर्शन तात्पर्यम्। विकरणप्रत्ययाद्युपादान तु नान्तरीयकम् । नान्यथा प्रयोगार्ह प्रदर्शक शब्द उपपद्यते, इत्यारोहयते हस्ती स्वयमेवेत्यस्यैव धातोरयमर्थ प्रदर्शितो भवति । एवं च कृत्वा एकेन शब्देन धातुना नान्तरीयकतयोपात्तप्रत्ययसहायेनावस्थाक्रियं स्वयमवनस्वयमावनालक्षणमुपात्तम् । धातुभागादूर्ध्वं चात्र गुणायादेशलक्षणकृतविकारो णिच् प्रत्यभिज्ञायेत । स यदि यथास्थितप्रकृत्यर्थनिष्ठप्रयोजकव्यापार व्याख्यायते तदा स्वयमावनिष्ठापरप्रयोजकव्यापारप्रतीतिप्रसङ्गात् प्रकृतवैगुण्यं स्यात् । तेन रुहिधात्वर्थसङ्कोचलक्ष्यं मध्ये ऽवस्थान्तर प्रकृत्यर्थत्वेन णिच आश्रीयते हस्तिव्यापारमात्ररूपम् । तत्पर्यन्ते पूर्वशङ्कापरिहाराय दर्शितम्। निवृत्तप्रेषणादित्यादिना । ततस्तन्निष्ठे प्रयोजकव्यापारे प्रागवस्थापचयकारिणो णिजुत्पादितः केवलरुहिबुध्यर्थतां सम्पादयति । तदाह । स्वयमावना स्वयमवनं व्यन्ते ऽपि प्रतिपाद्यत इति। आरुह्यते हस्ती स्वयमेव। आरोहन्ति हस्तिपका इत्युदाहरणाक्षयमत्र । एकेन प्रयोज्यव्यापारेण च प्रकृत्यर्थरूपो दर्शित.। स च नान्यथा शक्यदर्शन इति यगात्मनेपदकर्मवद्भावाप्राप्ते' । नान्तरीयकतयोपात्ते द्वितीयेन, णिजर्थो हस्तिपकव्यापार प्रदर्शितः । स च प्रयोज्यव्यापारपृष्ठपातित्वेन शक्यदर्शन इति रुहिरुपात्त।प्रत्ययाद्युपादानं तु नान्तरीकतया पूर्ववत्।तदेतादाह।तस्रो ऽवस्था.। तत्र ऊर्ध्वमात्मनेपदस्वरूपो भागो दृश्यते हस्तिव्यापारमात्रप्रतीतिश्च । एतच्च कर्मकर्त्रवस्थामन्तरेणाशक्यमिति पूर्वावस्थां सम्बन्धलक्ष्यामाश्रयते । तदाह। अवस्थां पञ्चमीमित्यादि ।तदेवं

कर्मकर्तृत्वादारोहयत इत्यात्मनेपदे सिद्धे णेरणावित्यत्र कर्मकर्तृत्वा-त्सिद्धमिति चेद्यक्विचणोः निवृत्त्यर्थं वचनमिति वार्त्तिककारेणोक्तम्। तत्र न वा यक्विचणोः प्रतिषेधादित्यादिना कर्मवद्भावेनैवात्मनेपदमि-ति सिद्धान्तितम्। गण्यति गणः स्वयमेवेत्यत्र तु आत्मनेपदनिवृत्त्यर्थं नियमार्थतया णेरणाविति सूत्रं वार्त्तिककारेण स्थापितम्। न्यग्भावनं न विक्लित्तिवत् कर्मस्थमिति रुहिः कर्मस्था क्रिया वाक्यकारस्य कर्मवद्भाव । दृश्यते च धातूनां प्रकृत्यन्तरम् ॥ ५९ ॥ ॥ ६० ॥

ण्यन्तानां केषां चित्समानो ऽर्थ इत्यत्र दृष्टान्तमाह ।

ब्रवीतिपचतेरर्थं सिद्ध्यतिर्न विना णिचम् ।
स ण्यन्तः पचतेरर्थे प्रकृते व्यवतिष्ठते ॥ ६१ ॥

सिद्ध्यत्योदन इति विक्लित्तिमात्रवचनो धातुः । पचत्योद-नमिति विक्लित्युपसर्जनं विक्लेदनलक्षणं पचत्यर्थं णिच्सहितो ऽभिधत्ते साधयत्योदनमिति। एवमाहुर्हि ण्यन्तो ऽपि क्वचित्तदर्थे व-र्त्तत इति। इदमत्र तात्पर्यम्। भिन्नावेव रुही प्रकृत्यन्तण्यन्तरूपौ पचति साधयतिवदेकार्थौ ण्यन्ते तु प्रैषस्य निवृत्तावारोहयते हस्ती स्वय-मेवेत्यपि न्यग्भवनवचनो ऽन्य एव धातुरेवमुपायपरिकल्पनया व्यु-त्पाद्येत । नन्वयमत्र परमार्थतो णिच् येनार्थनिवृत्तौ कथमवतिष्ठते इति चोद्यते। अन्वाख्येयं हि लौकिकं शब्दमुद्दिश्य प्रतिपादकशब्दनि-ष्ठमुपायपरिकल्पनया प्रकृतिप्रत्ययविभागेनासत्येन सर्वत्रानुशासनं लौकिकार्थानुसारेण नैवं क्रियते। नन्वेवमप्यसत्यस्यापोद्धारपदार्थ-स्यासम्भवे कथं तच्छब्द' । एवं तर्हि कर्मव्यापारातिशयस्य णिच्प्र-त्याय्यस्यास्ति सम्भव इत्यशेषः ॥ ६१ ॥

तदेवं प्रैषस्य निवृत्त्या कर्मणः कर्तृत्वमुपपाद्य प्रैषाध्यारोपे-णाप्युपपादयितुमाह ॥

केषां चिद्देवदत्तादौ व्यापारो यः सकर्मके ।
स यदा देवदत्तादेः कटादिषु विवक्ष्यते ॥ ६२ ॥

कटं करोतीत्यादौ सकर्मके धात्वर्थे देवदत्तादिप्रधानकर्तृ-विषये प्रधानकर्तुः प्रयोजकस्य यः प्रैषलक्षणो व्यापारः, असौ यदा

सौकर्य्यातिशयविवक्षया कर्मणः, तदा कर्त्तारमन्तरेण तत्र कर्माणि विवक्ष्यन्ते । यथा हि देवदत्तः प्रयुङ्क्ते एवं करोति देवदत्त इति भवति विवक्षणात् ॥ ६२ ॥

एतत् सामान्येनोक्तं प्रकृते योजयति ॥

निवृत्तप्रेषण कर्म स्वस्य कर्तुः प्रयोजकम् ।
प्रेषणान्तरसम्बन्धे ण्यन्तत्वेनाभिधीयते ॥ ६३ ॥

कर्तृव्यापारः प्रैषः कर्मणोऽध्यारोपित इति निवृत्तप्रेषणं तद्विवक्षितप्रयोजकव्यापारं स्वानन्त्र्यापेक्षायामात्मीयस्य प्रयोजकत्वसौकर्य्यातिशयवशात्प्रतिपाद्यमानम् । तच्च कटादिकर्मसम्बन्धिनि देवदत्तादिकर्तृविषये प्रेषणान्तरे प्रयोजकव्यापारान्तरे णिचि सति कार्यते कटः स्वयमेवेति ण्यन्ताद्याकारेण कर्मकर्तृविषयेणाभिधीयत इति णिजभिधेयः प्रैषोऽस्तीति भावः।अत्र चोपायपरिकल्पना, प्रैषो णिचो न तु अण्यन्ते तत्संभव इति प्रयोज्याक्षेपाभाव।तथा च प्रयोज्यकर्मसम्भवादविद्यमानकर्मान्तरसम्बन्धाद्धातोर्विधीयमान णेरणावित्यात्मनेपदं कथमिति न चोदनीयम् ।तथा हि सौकर्य्यातिशयप्रतिपादनात्कर्मणो वास्तवः प्रैषाध्यारोपोऽपि न, इति प्रतीयतेतस्मिन् प्रयोजकत्वस्याविवक्षणात् । कर्मकर्तृत्वप्रतीतिसामर्थ्यात्तु भूतपूर्वप्रेषणावस्था ऽवगम्यत इति तद्विषयो णिच् स्वयं निवर्त्तेतेएवं कर्मकर्तृप्रसङ्गेन णेरणावित्यत्र विचारितं त्यदादिषु दृशो नालोचने कञ् चेत्यत्र वार्त्तिके कृदर्थानुपपत्तिरिति चोदितम् । कर्त्तरि कृदिति वचनात् कर्त्तरि प्रत्ययार्थेन भाव्यम् । स चात्र नोपपद्यते । सदृशलक्षण ह्यर्थे तादृशादयः शब्दाः प्राहुः ॥ननु दर्शनक्रियायां कर्त्तारमिति वार्त्तिकार्थः । तत्रोक्तं, इवार्थे चायं तद्धित इति इवे प्रतिकृतावित्यत्र प्रकरणे ऽय तद्धितसंज्ञः प्रत्ययो वक्तव्यः। तथा च स इव तादृश इत्यादयर्थसिद्धिरित्यर्थः । तच्च वार्त्तिककारेण सिद्धान्तितम् । भाष्यकारस्तु कृदर्थानुपपत्तिरिति बोद्धव्यम् । यथान्यासमेव परिहर्तुमाह । कर्मकर्तृत्वासिद्धेरिति । तत्र दृशेः कर्तृस्वभावकत्वात् कर्तृव्यापारदर्शनमात्रवाच्यतया प्रैषस्याभावेन कथं कर्मकर्तृत्वसम्भवः । प्रेषणाध्यारोपे तु णिच् स्यात् । अण्यन्तश्चसूत्रे दृशिरुपात्त. ॥ ६३ ॥

अत्र निवृत्तप्रेषणं कर्म स्वक्रियात्रयवे स्थितं। निवर्त्तमाने कर्मत्वे स्व कर्तृत्वे ऽवतिष्ठत इति, अनेन न्यायेन कर्मकर्तृत्व के चित्समर्थयमाना. प्राहु ।

सदृशादिषु यत्कर्म कर्तृत्वं प्रतिपद्यते ।
आपत्त्यापादने तत्र विषयत्वं प्रतिक्रिये ॥ ६४ ॥

सदृशतादृशादिशब्देषु व्युत्पाद्येषु यत्कर्म कर्तृत्वं प्रतिपद्यते यत्कर्मण कर्तृत्वमुक्त तत्र दृशेर्विषयाभावाविषयेच्छापत्त्यापादने क्रिये ते इति वाच्ये इति तदाश्रयेण कर्मकर्तृत्वसमर्थना। तथा हि पश्यतीति को ऽर्थ। विषयं घटादिकं दर्शनविषयभावमापाद्यमानमापादयतीति। तत्र विषयस्य परिच्छेद्यत्वेन व्यापार आपत्ति' कर्मभूतस्य तद्विषयमापादनं कर्तृव्यापारो दृश्यर्थो न केवल:। तत्र च कर्तृव्यापारे आपत्तिलक्षणो विषयव्यापारो न्यग्भवतीतितत्सन्निधौ स्वव्यापारे स्वातन्त्र्यं विषयस्य तिरोभवति। यदा तु योग्यदेशावस्थित स्पष्टतरो लोकमध्यपरिवर्त्ती विषयः तदा सुदर्शनो भवत् स्वयं दर्शनकर्तृविनियोगमुपकरोतीति स्वव्यापारे स्वातन्त्र्यविवक्षायां कर्म भूत्वा कर्त्ता सम्पद्यत इति भवति कर्मकर्तृविषय ॥

इह दृशे कर्तृस्थ दर्शनमात्रं वाच्यं पश्यतीति। न ह्यतो विषयभावापत्तिरवगम्यते। किं तु विषयज्ञानमेव धात्वर्थ । विषयभावापत्तिर्हि सर्वस्य धात्वर्थो ऽस्तीति विशिष्टमेव दर्शनं दृशेरभिधेयं न्याय्यम्।तव दर्शनं विषयप्रतिष्ठामित्यस्मात् कुतश्चित्सामर्थ्याद्विषयाक्षेपद्वारेण विषये भावोत्पादिपदाध्याहारेण विषयगतव्यापारप्रत्यायनात्तदुपसर्जनकर्तृव्यापारवाचित्वकल्पने दर्शनासनाद्यभिधायिनामपि कर्मस्थभावकत्वमेव स्यादिति न कश्चिद्धातु' कर्तृस्थभावक्रियो नाम स्यात् ॥ ६४ ॥

इहापि पतितग्रन्थो हेलराजकृतिः फुल्लराजकृत्या सन्धीयते ॥
अथैतदयुक्तमिति प्रतिपादयितुमाह ।

कुतश्चिदाहृत्य पदमेवं च परिकल्पने ।
कर्मस्थभावकत्व स्यादर्शनाद्यभिधायिनाम् ॥ ६५ ॥

आपाद्यमानमापादयतीत्येवं विचक्षणतया यत. कुतश्चिद्ध्या-

ह्यन्य भवतेदमुपकल्प्यते । तदेवं सति दर्शनाद्यभिधायिनां दृश्यादीनां धातूनां कर्मस्थभावकत्व स्यात् । आदिग्रहणाद्दासनाद्यभिधायिनामासिप्रभृतीनामपिनचैतदुपपन्नं कर्तृस्थभावकत्वाद्दृश्यादीनामिति । अत्र कर्मस्थभावकत्व स्यादित्यभिदधता कर्तृस्थभावकत्व यदुपपन्नमेषां तदेव विघटते इत्युक्तं भवति ॥ ६५ ॥

अथ कथ कर्तृस्थभावकत्वं विज्ञायेतेत्याशङ्क्य तद्व्याख्यातुमाह ॥

विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता । ऽऽ

यत्र कर्त्तरि कर्मणि वा विशेष कश्चित्परिदृश्यते तत्रैव क्रियाव्यवस्थितेति बोद्धव्यम् । सपरिस्पन्दसाधनसाध्या क्रिया अपरिस्पन्दसाधनसाध्यो भाव इति विशेषमनपेक्ष्य सूत्रकाराभिप्रायेण क्रियया भावो ऽभिधीयत इति टीकाकारस्याभिप्रायस्तथा च लक्षणहेत्वोः क्रियाया, यस्य च भावेन भावलक्षणमित्यादावभेद एव सूत्रकारस्य क्रियाभावयोश्चेतसि वर्त्तते ॥ ऽऽ

अन्ये त्वेवं नेच्छन्तीत्याह ॥

क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकाश्यते ॥ ६६ ॥

एतदुक्तम्भवति । ये ऽपि कर्मस्थभावकाः पच्यादयः तथा ऽपि कर्त्तर्यपि परिश्रमादिको विशेषः परिदृश्यते ततो नैतद्व्यवस्थापकम्, विशेषदर्शनं यत्र क्रिया तत्रेति । तस्माच्छब्दैरेव च यत्र विशेष प्रकाश्यते प्रतिपाद्यते तत्रैव क्रिया स्थितेति वक्तुं युक्तं । शब्दप्रमाणकानां हि शब्द एव हि यथार्थमभिधत्ते तथैव तस्याभिधानमुपपन्नम् । न तु वस्तुमुखप्रेक्षितयाशब्दश्च पश्यति घटमित्यादिदृशिक्रियाविषयं विशिष्टमेव प्रत्याययति । काष्ठ भिनत्तीत्यादौ तु भिदिक्रियाविषयं सविशेषमभिधत्त इति तद्वशेनैव कर्तृस्थभावकत्वं चाभिधानीयम् । एवं च दृश्यते स्वयमेवेति न भवत्येवेति मन्तव्यम् । यत्त्वपरिस्पन्दसाधनसाध्यो भाव इत्यादि लक्षणमभिधाय, कर्मस्थ. पचतेर्भाव इत्यादिकमभिदधति तदप्यव्यवस्थितमिव लक्ष्यते । तथा च पीलुपाके घटं पचतीति घटस्यानलसम्पर्कादवयवक्रियाद्वारेणावयवसंयोगो विनाशपूर्वकम् । पूर्वकार्यविनाशे उत्तरोत्तरकार्यद्रव्यविनाशात् परिस्पन्दपरमाणुविषयपरिक्रिया ऽपि । ततश्चाव्यवस्थितमेवैतत् ॥ ६६ ॥

एवं तावत्प्रथमसूत्रलक्षितं निर्वर्त्यविकार्यप्राप्यभेदेन त्रिधा भिन्नं कर्म व्याख्याय तत्प्रसङ्गेन च निर्वर्त्यविषयं मतभेदेन निवृत्तप्रेषणप्यन्तधातुविषयमध्यारोपितप्रेषणं च कर्मकर्तारं प्रदर्श्य प्राप्यविषयस्य प्रदर्शनपूर्वकं प्रत्याख्यानमुक्त्वा तत्प्रसङ्गेनापि कर्मस्वभावकत्वकर्तृस्वभावकत्वे मतभेदेनैव व्यवस्थाप्य, इदानीं सूत्रान्तरनिर्दिष्टान्यपि कर्माणि व्याख्यातुमुपक्रमते । तत्राकथितसूत्रे कालभावाध्वगन्तव्या. कर्मसंज्ञा ह्यकर्मणां देशश्चेत्युक्तं तावदनारभणीयमिति प्रतिपादयितुमाह ॥

कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः ।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते ॥ ६७ ॥

अकर्मकाणां कथं कर्मणा योगः स्यादिति कालादीनां तत्प्रयोगे कर्मत्वं वक्तव्यमुपजायते । अत्रोच्यते । नात्र कर्मसंज्ञा वक्तव्या यस्मात्कालादीनामकर्मकैर्धातुभिर्योगे कर्मत्वमुपजायत एव । कथमिति विशेषयितुमाह । अन्तर्भूतक्रियान्तरैरिति । अन्तर्भूतं प्रधानक्रियापेक्षया क्रियान्तरं येषामिति ते तथाभूते योगे सम्बन्धे सति । अत्र क्रियान्तरापेक्षया तेषां कर्मत्वं सिद्धमेवेति किमुपसख्यानेन । तथा च मासमास्ते, गोदोहमास्ते, क्रोशं स्वपिति, कुरून् स्वपितीत्यादौ मासादीन्व्याप्यास्त इति व्याप्यद्वारायामासनादिक्रियायां धातुवृत्तेः । व्याप्त्यादिक्रियया व्याप्तुमिष्यमाणत्वात् कालादीनां स्फुटमेव कर्मत्वमिति यत्नान्तरेण नार्थः । यद्येवमिदानीमासिप्रभृतय. कालभावाध्वभिः कर्मभिः सकर्मकाः सम्पन्नाः, ततश्च तेभ्यः कालादिष्वेव कर्मसु लक्ष्यलक्षणखलर्था. प्राप्नुवन्ति न भावे । तत्र मासमास्यते देवदत्तेनेति भावे लकारो न स्यात् । मासमासितव्यं, मासमासितं, स्वास मासमिति च कृत्यक्तखलर्था भावे न स्युः । भावे चाकर्मकेभ्य इति वचनात्तत्रापि इष्यते । तस्मात्कालादिकर्मसद्भावादकर्मकत्व कथमासकर्मकत्वे भावे लकारः कथमिति । उच्यते । द्विविधं कर्म अन्तरङ्गं बहिरङ्गं च तत्र द्रव्यकर्मान्तरङ्गं तेनैव च पूर्वं सम्बन्धः । बहिरङ्गं कालादिलक्षणं कर्म । यद्वक्ष्यते शक्तिप्रमाणेत्यादिश्लोकेनातत्र सकर्मकत्व व्यपदेशो ऽन्तरङ्गेणैव न्याय्य. । तथा चोक्तमकर्मकाणामित्युच्यत इत्यादिना भाष्येण । एवं च लादिभिरप्यन्तरङ्गतामेवाह । आधारेति । इतः

प्रकाश एव॥गोदोहं स्वपिति। यावता कालेन गवां दोहः समाप्यते इति कौशलादि' पुनः स्वकालपरिमाणेन क्रियान्तरं परिच्छिनत्तीति । देशो ऽपि कुतश्चिद्वधे. प्राप्यमाणतया परिच्छिनत्ति इति कालादीनां सर्वेरेवाकर्मकै' सकर्मकैश्चापि धातुभिर्योगे प्राक्तनमेव कर्मत्वमुपजायत इति नैषा कर्मसंज्ञोपसङ्ख्येयेत्यर्थः । तथा हि। न द्वितीयाविधानार्थमेव कर्मसंज्ञाऽत्र, अपि तु लाघर्थाऽपि । तथा च कालाध्वनोरत्यन्तसंयोग इत्यत्र वार्त्तिकम्। अत्यन्तसंयोगे कर्म च लाघर्थमिति। लक्ष्यलक्षणार्था अपि संज्ञाफलमिष्यन्त इत्यर्थः । अत्र क्रियान्तरस्य व्याप्तिलक्षणस्याप्यास्यादिधातुभिरङ्गीकृतत्वाद्व्याप्तिक्रियाविषयभावापगमनेन मासादिः प्राप्यं कर्मेप्सिततममेवेति प्राक्तनमेवैतद् कर्म यथा घटं करोति, शकटं करोतीति भाष्ये उक्तम् । तथा हि । मासमास्ते, गोदोहमास्ने, कोष्ठं स्वपिति, कुरून् स्वपितीति व्याप्तिं गोदोहमासासनादिधातुभिरभिधत्ते मासं व्याप्यास्ते, मासमासनया व्याप्नोतीत्यर्थः। एवमन्यत्र यथायोगं योज्यम् । यथा बलाहका विद्योतन्ते विद्युदिति नि.सरणाङ्गे विद्योतने धातुर्वर्तते तथा ऽत्र प्राप्यङ्गे ऽर्थे धातुर्वृत्ति' । क्रियान्तरमेवेदमन्तर्भूतव्याप्तिकं कालादिविषयम् । देवदत्तः किं करोति, आस्त इत्यत्र तु व्याप्तिरहिते धातुरासनमात्रे वर्त्तते। तदेतदाह ॥ एकदेशे समूहे च व्यापाराणां पचादयः। स्वभावतः प्रवर्तन्ते तुल्यरूपसमाश्रिताः । पचति, पच्यते स्वयमेवेति तथा ऽत्र बोध्यम्। एवं चोपसंख्यानस्य प्रत्याख्यानादकर्मकग्रहणमनर्थकं, सकर्मकाणामपि मासमोदनं पचतीत्यादौ मासादेर्व्याप्तिविषयत्वेन कर्मतासिद्धि । मासमोदनपाकेन व्याप्नोतीत्यत्रार्थः । एतदर्थं चात्र सर्वग्रहणं व्याख्यातम्।कालादिकर्मणा पचतीत्यादीनां द्विकर्मकत्वेऽपि प्रधाने द्रव्यकर्मणि लादिविधिरुक्त', प्रधानकर्मण्याख्येये लादीनाद्विकर्मकाणामिति । सत्यपि वास्यादीनां व्याप्तिक्रियान्तर्भावे कटं आस्त इत्यादौ कटादेरासनया व्याप्तिर्नास्ति, अपि तु मासादिरेवासनादिक्रियापरिच्छेदायोपादीयमानो व्याप्त इति तस्यैव कर्मता न तु कटादेरुपश्लिष्टमात्रस्याधिकरणस्येति सर्वं सुस्थम् ॥ ६७ ॥

कथं पुनः कालादिकर्माप्रधानं द्रव्यकर्म तु प्रधानमित्याह ।

आधारत्वमिव प्राप्तास्ते पुनर्द्रव्यकर्मसु ।

कालादयो भिन्नकक्ष्यं यान्ति कर्मत्वमुत्तरम् ॥ ६८ ॥

कर्तृकर्मव्यवधानेनाधारः क्रियां धारयति यथा, एवं मासादिरपीत्याधारच्छायां लभते। तथा ह्युदिते जुहोति, रात्रौ भुङ्क्त इति प्रयोग । क्रोशं शेते कुरून् स्वपितीति च स्फुटमेवाधिकरणत्वमध्वदेशयोः कर्तृचारणात् । मासमोदनं पचतीत्यादौ द्रव्यविषये च द्रव्यकर्मधारणं स्फुटमेव । व्याप्तिविवक्षायां तु कर्मत्वमाधारभावस्यावगमादनीत्र शब्दः। यद्वा कर्तृकर्मव्यवधानेन यथाधारः क्रियायोगं भजते तथा द्रव्यकर्मव्यवधानेन कालादीत्युपमार्थं । द्रव्यकर्मणा च पूर्वं क्रियायोग । तद्द्वारेण तु कालादिकर्मणेति भिन्ना कक्ष्यावस्थास्य कर्मत्वस्य । तथा हि । शक्ति प्रमाणं संख्यादेर्द्रव्यधर्मादिशिष्यते । क्रियासु कालयोगस्तु प्रायेणो द्रव्यकर्मणोत्युक्तम्। कठिनपाकस्य द्रव्यस्य चिरेण निष्पत्ति ,महापरिमाणस्य बहुसंख्याकस्य च विपरीतस्य स्वचिरेणेति द्रव्यकर्मापेक्ष कालादिविशेषः । एवं गोदोहं स्नापिति, इषुपातं पचतीत्यत्रापि वाच्यम। क्रोशमधीते स्वाध्यायं, कुरून् पञ्चालानधीते इत्यध्ययनप्रचयापचयोपपत्तावध्वदेशयोर्बुद्धिह्रासाविति विप्रकृष्यते कालादिक्रियासम्बन्धं प्रति द्रव्यकर्मापेक्षया । अत एवोत्तरकालभवमेतेषां कर्मत्वम्।समस्तसाधनसम्बन्धे हि वृत्ते क्रियायाः पर्यन्तच्छेदकाः कालादयो ऽपेक्ष्यन्त इति भिन्नकक्ष्यास्ते ऽकथित चेत्युत्तरेण योगेन कर्मसंज्ञां लभन्ते नेप्सिततमत्वेन ईप्साप्रकर्षाभावात् । दुह्यादिपरिगणने चाकथितसूत्रे कालभावाध्वगन्तव्या कर्मसंज्ञा ह्यकर्मणां देशश्चेत्यत्रैवोक्तम् । गुणप्रधानसन्निधौ च प्रधानमेव कार्येण युज्यत इति द्रव्यकर्मणि लादिविधि । मासमोदन पचते, पक्व , पक्तव्य , सुपच , क्रोशमधीयतेऽनुवाक इत्याद्युदाहार्यं । द्वितीया तु भिन्नशब्दोपादाना कालादिकर्मण्यपि भवति । एको हि लादिर्गुणप्रधानभूत कर्माऽयमशक्तोऽभिधातुमिति प्रधानकार्यसम्प्रत्ययाभिन्नरूपप्रातिपदिकक्ष्यात्तु विभक्तिरुत्पद्यमाना कर्मद्वयमपि प्रत्याययति॥६८

यतश्च कालादीनां सर्वधातुविषयं भिन्नकक्ष्यं च कर्मत्वम्,

अतस्तैः कर्मभिर्धातुर्युक्तो द्रव्यैरकर्मकः ।
तस्य कर्मणि भावे च निमित्तत्वाय कल्पते ॥ ६९ ॥

यत्रास्ति द्रव्यकर्म तत्र तदपेक्षया कालादिकर्मणो ऽप्राधान्या-
ल्लादिस्तत्र न भवति । यत्र तु द्रव्यकर्म नास्ति तत्र कालादावेव कर्मणि
लादिः । लग्रहणस्योपलक्षणार्थत्वाच्च लकृत्यकृखलर्थाः । आस्यत मा-
स्त , आसितव्य , स्वास इत्यादि।अकर्मकत्वव्यपदेशश्च धातूनां द्रव्यक-
र्माभावनिमित्तः। कालादिकर्मण सर्वत्र सम्भवात्। सम्भवव्यभिचा
राभ्यां विशेषणयोगादिति कालादिकर्मसम्भवे ऽप्यकर्मकत्व ।देशत्व
द्रव्यकर्माभावनिमित्तस्याव्यावृत्तेर्भावे लकार सिध्यति । मासमास्यते
भवतेत्यादि।मासमाश्रितो देवदत्त इति चाकर्मकत्वात् कर्त्तरि क्त । ग-
त्यादिसूत्रे चाकर्मकत्वाश्रया प्रयोज्यस्य कर्मसञ्ज्ञा सिध्यति मास-
मासयति देवदत्तमित्यादौ । अत एव न चावाकर्मकग्रहणे कालकर्म-
णामुपसंख्यानम् । सिद्ध तु कालकर्मणामकर्मकवद्वचनादिति वार्त्ति-
कार्थो न्यायसिद्ध. । तथा च भाष्ये, न के चित्कालभावाध्वभिरक-
र्मका अत एवं विज्ञास्याम क्व चिद्धे ऽकर्मका इति अथ वा येन कर्म-
णा सकर्मकाश्चाकर्मकाश्च भवन्ति तन कर्मणा । न चैतेन कर्मणा कश्चि-
द्द्रव्यकर्मक' । अथ वा यत्कर्म भवति च न भवति, तेन कर्मणाऽकर्मका-
णाम् । न चैतत्कर्म क्व चिदपि न भवति इति परिहारत्रये को विशेष ।
उच्यते शब्दकर्माकर्मकाणामित्यत्र अविवक्षितकर्मका अकर्मका
आश्रीयन्ते । एवं ह्यास्ते शेते इति क्रियामात्रविवक्षायां कालादि-
भिरव्यकर्मकत्वं सम्भवति । तथैव पचादीनामप्यविवक्षया कर्मस-
म्बन्धे ऽपाकृते अणि कर्तुर्यौ कर्मसञ्ज्ञाप्रसङ्गात्तस्माद्यस्यायन्तम-
सम्बन्धः कर्मणा सो ऽकर्मक' । स च यदि धात्वर्थ आश्रीयते तदा
तस्य क्रियात्मनो विवक्षावशेन कर्मसम्बन्धासम्बन्धयोर्भेद काला-
दिभिरव्यकर्मकत्वे च तस्य चरितार्थत्व भवेत् । तस्माद्विद्यमान
कर्मास्येति धातुरन्यपदार्थत्वेनाश्रीयते । गत्यर्थत्वेनाणौ णाविति
सैव, विशेषणीयत्वेन प्रक्रमात् । अथ पाके पच् धातो कर्म-
योगे च रूपस्याविशेषात् अकर्मकत्वं नोपपद्यते, कालादिकर्मभिः
सर्वेषां धातूनामवियोगात् । एव च विशेषणसामर्थ्याद्विशिष्टा
एव धातवो द्रव्यकर्मसम्बन्धरहिता समाश्रीयन्ते । द्रव्यकर्मवि-
षये ये ऽकर्मका इति पूर्वपरिहारार्थः । द्वितीये तु परिहारे वर्त्तिप-
दार्थस्य कर्मणः साक्षात् क्रियोपकारकत्वेनान्तरङ्गत्वविशेषमा-
श्रितः । तृतीये तु परिहारे भवति न भवतीत्यभिनिष्पद्यमानस्य

सम्बन्धस्य विशेष आश्रीयते न कर्मणा कदा चित्सम्बन्धो भवति । तेनैव द्रव्यकर्मणा नित्यसम्बन्धो न कालादिकर्मणेत्यर्थः । द्रव्यकर्मापेक्षितत्वाच्च सकर्मकाकर्मकव्यपदेशस्य, उदश्वरः सकर्मकादित्यनेन प्रासमुच्चरति धूम इत्यात्मनेपदं न भवतीत्याहुः ॥ ६९ ॥

न च कालादिकर्मैव भिन्नकक्ष्यमर्पोहति ॥

सर्वं वा ऽकथितं कर्म भिन्नकक्ष्यं प्रतीयते ।
धात्वर्थोद्देशभेदेन तत्रेप्सिततमं किल ॥ ७० ॥

गां दोग्धि पयः, पौरवं गां याचते, गामवरुणद्धि व्रजं, माणवकं पन्थानं पृच्छति, वृक्षमवचिनोति फलानीत्यादि सर्वमेवापादानादिविशेषकथाभिरकथितं द्रव्यकर्मापि गवादि पयःप्रभृतिप्रधानकर्मापेक्षयोपायभूतं नान्तरीयकम् । धात्वर्थस्य हि दोहोद्देश एव भेदो विशेषस्तेन हेतुना गवादीप्सात्प्रकर्षरहितम् । पय. प्रभृति क्रिलोद्दिश्य धात्वर्थः प्रवृत्तः। तत्र तूपायभूता गवादयो नान्तरीयकाः । धात्वर्थेन चोद्देशो विषयीकरणं तस्य भेदः पूर्वापरकालत्वं। पूर्वं हि धात्वर्थेन प्रधानं पयःप्रभृति विषयीकृतं पश्चान्निमित्तभूत गवादीन्यर्थ्यं वा दोहादिकमुद्दिश्य यस्माद् गवादयो भेदेनोपायत्वेन प्रवर्तन्ते, अतस्ते भिन्नकक्ष्याः । क्रिलेत्यस्मिन्पक्षेऽरुचिं सूचयति। तथा भिन्नमेव मिति सिद्धान्तयिष्यति । ननु कालादीनां द्रव्यकर्मायत्तत्वात् भवतु भिन्नकक्ष्यत्वं तदादौ तु विपर्ययात् कथमेतत् । तथा हि गवाद्यपेक्षाविषयः पयःप्रभृतीति कर्मणि । तथा चोक्तं गुणकर्मणि लादिविधिः पूर्वं गुणकर्मणा भवतियोगात्॥ मुख्यकर्मप्रेप्सुर्यः स्याद् गव्येव यतते प्राक् । तस्माच्छुद्धस्य दुहेर्भवति गवा पूर्वमेव सम्बन्धः । गोर्दुहिना पयसस्तु प्राक्तस्माद्दुह्यादयस्तस्मिन् इति सत्यमेतत् ॥ प्रधानाप्रधानकृतः कक्ष्याभेदः ॥ ७० ॥

तथाहि ।

प्रधानकर्म कथितं यत्क्रियायाः प्रयोजकम् ।
तत्सिद्धये क्रियायुक्तमन्यत्त्वकथितं स्मृतम् ॥ ७१ ॥

यदुद्दिश्य फलभूतक्रियाप्रवर्तने साधनानि सज्जीभवन्ति यदा वा तान्युदासते तदीप्सात्प्रकर्षगृहीतं प्रधानं कर्तुरीप्सिततमं कर्मसंज्ञायाः

प्रथममेव कथितमायतश्च पयः प्रभृति तदर्थं तु यदनीप्सितमपि नान्तरीयकं क्रियया समन्वेति, तदेवाविशेष कर्म कथितं कर्म प्रधानत्वात् भिन्नकक्ष्यमित्यर्थः। तद्यथा गवादेः पूर्वं प्राधान्येऽपि क्षीरोपायत्वात् प्रथमं क्रियायोगे लादिविधौ निमित्तत्वाय कल्पते। अनपेक्षिते तु पयसि गौरेव प्रधान क्षीरविच्छेदस्तु तस्या मा भूदित्येवमनर्थ्यपि क्षीरेण सम्प्रति गोसंस्कारार्थं दोहे प्रवर्तत इत्यपादानमुत्तराणि गां दोग्धीत्युदाहरणमुपपद्यत। विप्रतिषेधे अन्यथा अकथितकर्मत्वे अपादानसंज्ञाभावात् कथं विप्रतिषेधोदाहरणमेतत्। अपादानादिविशेषकथाभिरसंस्पृष्टं ह्यकथित कर्म तदेव निमित्तभावेनावस्थितत्वात्। भिन्नकक्ष्यत्वे ऽकथितयो कर्मणारभेदादप्राप्ता गवादीनां कर्मसंज्ञा अकथितञ्चेत्यतेनारभ्यत इति स्थितम्॥ ७१॥

इदानीं नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चय, इति भाष्यार्कं व्याचष्टे।

दुह्यादिवन्नयत्यादौ कर्मत्वमकथाश्रयम्।
आख्यातमुपयोगे तु नियमाच्छेष इष्यते॥ ७२॥

अजा नयति ग्रामं, पथान्वहति नगरं, हरति भारं सुवाहं। गत्यर्थग्रहणेन गतिवत्तद् गुणकर्म गवादि तदेव नान्तरीयकत्वादकथितकर्मैव द्रव्यं, परिगणने। ननु नियमेनाख्यातानुपयोगे कर्मसंज्ञा यां व्यावर्त्तेनोनटस्य शृणोतीत्यादौ च यदि उपयोग विशेषकथानाक्रान्तत्वात् भवेदकथित कर्मेति परिगणनलक्षणात् नियमाच्छेषो ऽयं षष्ठीविषयः॥ ७२॥

तदेव प्रधानेतरभावेन कर्मभेद उक्तः। के चित्तु प्रधानमेवेदं कर्मेत्याहु॥

तथा हि।

अन्तर्भूतणिजर्थानां दुह्यादीनां णिजन्तवत्।
सिद्ध पूर्वेण कर्मत्वं णिजन्तनियमास्तथा॥ ७३॥

अन्तर्भूतो वाच्यतया णिचो ऽर्थः प्रयोजकव्यापारः प्रेरणा येषां दुह्यादिप्रभृतीनां तेषां प्रयोगे गां दोग्धि पय इत्यादौ कर्तुरीप्सिततमत्वेनैव गवादीनामपि सिद्धा कर्मसंज्ञा। तथा गमय-

ति ग्रामं देवदत्तो यज्ञदत्त, इत्यत्र णिजन्तविषये प्रयोज्यस्य प्रयोजकव्यापारेणाप्यमानत्वादिति नियमार्थं सूत्रं गम्यादीनामेव पयन्तानां प्रयोज्य कर्म नान्येषां पक्वयादीनामित्यणयन्तविषये न प्रवर्त्तते।तथा हि गौ पय' क्षरति । तद्देवदत्त. तां क्षरन्तीं क्षारयतीति दुहेरर्थ । तत्र क्षरणोपसर्जनस्य क्षारणस्य शब्दार्थत्वात् गौरेव प्रधानं कर्मेति तत्रैव लादय' । क्षरणेनाप्यमानत्वात्पय' कर्म क्षारणेनाप्यमानत्वात् गौ.। यद्यपि चार्थेन रूपेण पय' प्रधानभूतं तदुपायभूतस्तु गौ , तथा व्यभिधायनेन गौ. पयः दोग्धव्या, दुग्धा, सुदोहेति । अप्रधाने दुहादीनामित्यर्थेन रूपेणाप्रधानमुच्यते । यद्यपि चापायविवक्षया विनाकारेण नोपपद्यते तथा व्यपादानमुत्तराणीति कर्मसञ्ज्ञा वा ऽत्र भवति परत्वात्। यदि ह्यकथितसूत्रे कापि संज्ञा नोच्यते तदा ऽपादानमुत्तराणीति कर्मसञ्ज्ञैवाकथितत्वात्कथितत्वेनासौ न स्यात् । पूर्वसूत्रेण तु कर्मसञ्ज्ञायामुभयसम्भवे परत्वादपादानमुत्तराणि गां दोग्धीत्युक्तम्। तथा चापादानविभावनेति समीचीनं । एवं पौरवं गां याचते दापयतीत्यर्थ । पौरवा गां ददाति तं प्रयुङ्क्तोयाचकश्रद्धोत्पादनेनेति याचेरर्थः। प्रैषो वाक्यनान्तर्भूत' । तत्र दानस्य गौ' कर्म प्रैषस्य पौरव । गामवरुणद्धि व्रजमिति प्रविशन्तीं प्रवेशयतीत्यर्थ. । प्रवेशस्य तु गौः ॥ यदा तु स्थापयतीत्यर्थः तदा व्रजस्याधिकरणत्वात्तुभयसञ्ज्ञाप्रसङ्गे तु परत्वात्कर्मसञ्ज्ञा उक्ता, अधिकरण कर्म । गेहं प्रविशतीति प्रवेशोपसर्जनमत्र स्थानमर्थः । गेहप्रवेशनेन व्यापृत एतीति निमित्तनिमित्तिभावेन प्रवेशस्थानं प्रतीयते । तत्र प्रवेशापेक्षया ऽधिकरणमित्युभयप्राप्तौ परत्वात्कर्मोदाहृतं।माणवकं पन्थानं पृच्छति । माणवक प्रयुङ्क्ते तमाख्यापयतीत्यर्थ' । आचिख्यासति माणवक तं प्रयुङ्क्त आचिख्यापयतीत्यर्थ'।एवं यो गां दित्सति तं प्रयुङ्क्ते याचक इत्यर्था ऽवगम्यते।एवं भिक्षेरप्यर्थो वेदितव्य. । वृक्षमवचिनोति फलानीति । मुञ्चति फलानि वृक्ष न मोचयतीत्यर्थ । अपायविवक्षायामपि अपादानमुत्तराणीति कर्मसंज्ञाऽत्र। माणवक धर्मं ब्रूते प्रतिपादयतीत्यर्थ' । तत्र प्रतिपत्तर्धर्मः कर्म, प्रेषणस्य तु माणवक ।माणवकमनुशास्ति धर्ममिति।शिक्षते धर्मं माणवक तं शिक्षयतीत्यर्थ । कर्मणा ऽभिप्रेयमाणस्य तु माणवकस्यात्र सम्प्रदानसंज्ञा न भवति । तदानीं कर्मत्वाभावात् सामान्ये । न तु भाष्यकारमतेन सम्प्रदानसंज्ञायां प्रधानव्यापारविवक्षया कर्मसंज्ञ-

यात्र बाध्यत इति वक्तव्यम्। यद्वा कर्तुरीप्सिततमं कर्म तेनाभिप्रेयमाणस्य सम्प्रदानत्वम्। यथोपाध्यायाय गां ददातीति। गोर्हि दातुर्वल्लभा तत एव गुणवते दीयतेऽधर्मस्तु कर्तुर्नाभिमत पूर्वमेव सिद्ध। तेन तु माणवको ऽनुग्रहीतुमभिप्रेत इति प्रयोज्यस्यापीप्सिततमं कर्म न प्रयोजकस्येति न सम्प्रदानसंज्ञाविषयो ऽयमित्यन्ये। एवं नयत्यादावपि पूर्वेणैव कर्मत्वम्। अजां नयति ग्रामं प्रापयतीत्यर्थः। प्रापणेन प्रधानेन सम्बन्धादजा प्रधानं कर्मेति प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति न्यायसिद्धम्। अजा नीयते ग्राम, नेतव्या, नीता, सुनयेति। एवमन्यत्रापि यथायोगमुदाहार्यम्। सत्यपि चात्र पयर्थान्तर्भावे गत्यादिनियमेन प्रयोज्यस्य कर्मसंज्ञा न व्यावर्त्यते सजातीयापेक्षत्वनियमस्यान्यत्र पयन्ते एव तेन निवारणात्। अत्र प्रैषो पयर्थो धातुनैव स्वीकृत इति णिच् न भवति। ननु वास्तवेन रूपेण पयआदेः प्राधान्यात्तस्यैवेप्सिततमत्वं न्याय्य, न तु गवादे. प्रतीयमानोपसर्जनभूतक्रियापेक्षमीप्सिततमत्वं युज्यते प्रधानसन्निधाने गुणस्येप्साप्रकर्षविषयत्वाभावात् ॥ ७३ ॥

न च कारकप्रकरणे साधकतमं करणमिति तमबग्रहणात् प्रकर्षो न विवक्ष्यत इति शक्यते तत्र वक्तु, ईप्सिततममिति साक्षात्प्रकर्षविवक्षार्थं तमप उपादानात्। लिङ्गस्य त्वन्यत्र कृतार्थत्वं च। गङ्गायां घोष इत्यादावधिकरणसंज्ञा यथा स्यादिति। श्रुत्या हि लिङ्गबाधा। श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पूर्वे पूर्वे बलीयो ऽर्थविप्रकर्षादिति न्यायविद्विरुक्तत्वात्कथं गवादे. पूर्वेण कर्मसंज्ञेत्याशङ्क्याह।

करणस्य स्वकक्ष्यायां न प्रकर्षाश्रयो यथा।
कर्मणो ऽपि स्वकक्ष्यायां न स्यादतिशयस्तथा ॥ ७४ ॥

यथा कारकान्तरापेक्षया लब्धप्रकर्षस्य करणसंज्ञायां सजातीयकरणान्तरापेक्षया प्रकर्षो नाश्रीयते येन सर्वस्यैव कार्ये प्रवर्त्तते। अनेन यया दीपिकया याति, पादाभ्यां व्रजति वलेन पादेनादत्त इति। अन्यथा स्वादेरेव प्रकृष्टतमस्य भवेदिति। तथा कर्मणो ऽपि करणादीनामपि क्रियायामुपयोगादीप्सिततममिति कारकान्तरापेक्ष-

या साधिनेप्साप्रकर्षविषयभावस्य कर्मान्तरे ऽपेक्षयात् अतिशयो नाश्रीयत इति सिद्धा निमित्तनिमित्तिभावस्थितस्यापि सर्वस्यैव कर्मणः पूर्वेणैव योगेन कर्मसंज्ञेति मास्त्वकथितकर्मेत्येकीयमते नास्योपन्यासः ॥ ७४ ॥

एतत्तु न युक्तमित्याह ।

कर्मणस्त्वाप्तुमिष्टत्वे आश्रितो ऽतिशयो यतः ।
आश्रीयते ततो ऽन्यन्तभेदं पूर्वेण कर्मणा ॥ ७४ ॥

इह साधनभावस्य सर्वकारकविषयत्वाद्युक्तं यत्कारकान्तरापेक्षया लब्धातिशयसाधनभावकरणं स्वकक्ष्यागतं प्रकर्षं नाद्रियेत । कर्मस्त्वीप्साप्रकर्षविषयभावं कारकान्तरापेक्षया प्रतिपत्तुमसमर्थम् । न हि कारकाणामीप्सितानि । कर्त्रा क्रियया यदाप्तव्यं तदीप्सितं । कारकान्तराणि तु क्रियायै करणादीन्याप्तव्यानि । न तु क्रियया । तस्मात्तुल्यजातीयापेक्षत्वादतिशयस्य कर्मण आप्तुमिष्टत्वे ईप्सित इत्येवमाप्तुमभिप्रेतत्वं आश्रीयते । तमप उपादानादतिशयो यस्मादङ्गीक्रियते तस्मादीप्सितार्थान्तरापेक्ष एवासौ प्रकर्षो ऽभ्युपगन्तव्य इति स्वकक्ष्याकृत एव सः । तथा च पय प्रभृति गवादीप्सितापेक्षया प्रकृष्टमीप्सित पूर्वयोगस्य विषयो, गवादेस्तु पूर्वेणासिद्धायां कर्मसंज्ञायां मकथित इत्यनेन सिद्धिरित्येष एव पक्षो व्याख्यः । ततश्च भिन्नकक्ष्यं कर्मद्वयमेतत् । स्वकक्ष्यापेक्षेऽनाश्रिते तु कर्मणः प्रकर्षे तमबवचनमनर्थकं स्यात्तथा चोप्सितमात्रस्य कर्मसंज्ञायां वारणार्थानामीप्सित इत्यत्र यवेभ्यो गां वारयति, कूपात्तु वारयति, अग्नेर्माणवक वारयतीत्युदाहरणं । तस्मात् गवादेरपि कर्मसंज्ञाप्रसङ्गात् । ततश्चैतत्सूत्रं निर्विषयं भवेदिति विषयविभागार्थः कर्मोपादानयोः स्वकक्ष्यागतः कर्मणो ऽतिशय मिच्छन्तिन । तथा च वार्त्तिक, वारणार्थानां कर्मग्रहणानर्थक्य कर्तुरीप्सिततम कर्मेति वचनात्भाष्यमपि । यत्तु कथितं पुरस्तादीप्सितयुक्तं च तस्य सिद्ध्यर्थं ईप्सिततममिति । वारणार्थानामित्यनेनाधारादरीप्सितेन कूपादिना युक्तस्य कर्मसंज्ञा न सिद्ध्यतीति ईप्सितमित्यनेन सिद्ध्यतीत्यर्थः । यत्पुनरीप्सितमात्रमपादानसंज्ञाभिरकथित तस्याकथितसूत्रेण गवादेः कर्मसंज्ञेत्यपि भाष्ये ऽभिहितम् । ईप्सितमेव तु यत्स्यात् तस्य भविष्यत्यकथितेनेति ॥ ७४ ॥

यत्पुनरेतदुक्तं नयत्यादीनां णिजन्तवत्सिद्धं पूर्वेण कर्मत्वमिति तदप्याह ।

णिजन्ते च यथा कर्त्ता सक्रियः सम्प्रयुज्यते ।
नयत्यादौ तथा कर्त्ता निष्क्रियोऽपि प्रयुज्यते ॥ ७५ ॥

गमयति ग्रामं देवदत्तमित्यादौ णिजन्ते प्रकृतिप्रत्ययवाच्ये द्वे क्रिये भिन्ने प्रतीयेते इति तदपेक्षं द्वयोः कर्मत्वं युज्यते । गां दोग्धि पय इत्यादौ तु प्रकृतिवाच्यैकैव क्रियेति कथं कर्मद्वययोगः । न चाप्यन्तर्भूतणिजर्थत्वेन तदुपपत्तिः । णिजर्थस्यायोगात् । प्रैषो हि णिजर्थः, स च प्रवृत्तक्रियस्य स्वव्यापारस्य कर्तुरुपलभ्यते । तथा हि तस्य स्वतन्त्रस्य प्रयोजको यो हेतुः तद्व्यापारे णिच्श्रुतेः । अत एवाप्रवृत्तक्रियाणां करणादीनां प्रयोजकस्य स्वतन्त्रस्य कर्तुर्हेतुसंज्ञा न भवति । तदेवं गवादेर्निष्क्रियत्वान्न तद्व्यापारेणाप्यमानत्वं पयआदेः कर्मणः अपि तु दोहेन देवदत्तव्यापारेणैव गोपयसोर्द्वयोरपि आप्यमानत्वमित्यतिशयायोगात् पयआदेरेव पूर्वेण कर्मत्वं, गवादेस्त्वकथितमिति अनेनैवारभ्यते ॥ ७५ ॥

ननु च यथा गच्छन्तं सम्प्रयुङ्क्ते गमयतीति प्रयोगः, तथा हरन्तीं हारयति दोग्धीत्यर्थे इत्याशङ्क्याह ॥

भेदवाक्यं तु यत् प्यन्ते नीदुहिमकृतौ च यत् ।
शब्दान्तरत्वान्नैवास्ति संस्पर्शस्तस्य धातुना ॥ ७६ ॥

गच्छन्तं प्रयुङ्क्ते इत्यादिना गमयतीत्यादौ यत्यन्ते प्रकृतिप्रत्ययार्थयोर्विभागप्रदर्शनाय यद्वाक्यं ग्राम प्राप्नुवन्तीमजां प्रयुङ्क्ते, हरन्तीं गां प्रयुङ्क्त इत्यादि च नयति दोग्धीत्यादौ प्रकृतिविषये प्रकृत्यर्थप्रदर्शकवाक्यं, तत्सर्वं गमयतीत्यादेर्प्यंताप्यति दोग्धीत्यादेश्च प्रयोगाच्छब्दान्तरं भिन्नार्थमेव । नह्येषोऽत्र धात्वर्थः । आदरविप्रकर्षेण च धात्वर्थमात्रकथनमेतत् । यथा राजपुरुषादौ राज्ञः पुरुष इत्यादि । तथा हि गच्छन्तं प्रयुङ्क्त इत्यादौ वाक्ये प्रयोगकर्तुर्निर्देशनं गमयतीत्यादौ प्यन्ते प्रयोज्यक्रियामात्रं प्रतीयते । प्रयोज्यस्तु स्वशब्दोपादानो देवदत्तमिति ॥ यत्र चैतद्भेदकवाक्यं विदूरप्यन्ते, तत्र नयत्यादीनां सुतरां विदूरता । नह्यत्र वाक्यार्थो धातूपादानः क-

श्रित्।अतस्तस्य वाक्यस्य वाक्यार्थस्य वा दुहादिधातुना नास्ति सम्बन्ध.। तस्माच्चात्र ण्यन्तान्तर्भाव इति क्रियाद्वयाश्रयेणापि कर्मविशेषसमर्थनं समीचीनम्। तदेतदेकैवेयं विलक्षणा कर्मद्वयविषया क्रियेति, सर्वै चाकथितं कर्म भिन्नकक्ष्यं प्रतीयते । धात्वर्थोद्देशभेदेन तन्नेप्सिततम किलेत्येष पक्षो ऽवस्थापितः । अप्राधान्ये ऽपि चाकथितकर्मणो वास्तवे ऽन्तरङ्गत्वात्प्रथमं क्रियायोगाद्दुहादिविधिरुक्तः । नयत्यादौ तु प्राधान्यमजादेरिति तत्रैव लादयः । ण्यन्ते तु ण्यर्थस्य प्राधान्यात्तेनाप्यमानत्वात् प्रयोज्यकर्तैव प्रधानं कर्मेति तत्रैव लादय.। ततश्च प्रधानकर्मण्याख्येये लादीनाद्दुर्द्विकर्मणां । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मण इति न्यायसिद्धमुदाहृतम् ॥ ७६ ॥

इदानीं सिद्धान्तमुद्घाटयति ॥

यथा चैकमपादानं शास्त्रे भेदेन वर्णितम् ।
तथैकमेव कर्मापि भेदेन प्रतिपादितम् ॥ ७७ ॥

ध्रुवमपाय इत्यनेनैव सर्वत्रापादानसञ्ज्ञा भाष्येऽपि प्रतिपादिता । भीत्रार्थादिविषये ऽपि बौद्धस्यापायस्य भावात् । अबुधबोधनार्थं हि भीत्रार्थानामित्यादिना भेदेन कथनम् ॥ तथा च वक्ष्यति, निर्धारणे विभक्ते यो भीत्रार्थानां च यो विधि. । उपात्तापेक्षितापाय सोऽबुधप्रतिपत्तय इति । एवं कर्मापीप्सिततममेकमेव, कर्तु. क्रियया ऽप्यमानत्वस्य सर्वत्र भावात् । मन्दबुद्धयनुग्रहाय तूत्तरसूत्रप्रपञ्च इति कारिकार्थः । यद्यपि च पय प्रभृत्यर्थं गवादेरुपादानं तथाप्यस्त्येवधात्वर्थेन तस्याप्यमानत्वं । तद्यथा तण्डुलानोदनं पचतीत्यत्र । तण्डुलानां हि विक्लित्तिविशिष्टा विक्लेदना पचेरर्थ.। न हि विक्लित्त्याख्यगुणद्वारेण तण्डुला अपि कर्म विक्लेदनस्य, साक्षात्स्वोदनम्।तण्डुलान्विक्लेदयन्नोदनं निर्वर्त्तयतीत्यर्थ ।इत्थं च गुणप्रधानभूतैकधातुवाच्यक्रियाभेदाश्रयेणात्र यथा कर्मभेद', तथा क्षरणोपसर्जनक्षारणार्थतायां दुहेर्गोपयसी सममेककर्मभावमनुभवतः । तथा च ण्यर्थान्तर्भावो ऽपि युक्त. । ण्यन्ते ऽपि प्रकृत्यर्थविशिष्टस्य प्रत्ययार्थस्य प्राधान्यान्निष्क्रियत्व स्वतन्त्रस्य ॥ न ह्यत्र णिच् क्रियते येन सक्रियप्रयोगस्तु यदा स विषयो णिच इति न्यायो ऽनुवर्त्येत। धातुवाच्यस्तु ण्यर्थः । तद्यथा साधयतीति ण्यर्थ. पचतिवाच्यः,

भेदवाक्यं तु भवत्यदूरविप्रकृष्टं भिन्नार्थमत्यन्तविशेषापेक्षया त्वे-कार्थमेव राजपुरुषवृत्तिवाक्यवत्। तथा च प्रतीयत एवैकत्व तद्वा-क्यार्थो ऽत्र प्रयोगे ॥ न चापि गवादीनां निष्क्रियत्वं न्याय्य क्रिया-समवायाभावे कारकत्वाभावात् । आरभ्यमाणे ऽप्यकथितयोगे कर्मसंज्ञा न स्यात् । प्राक्प्रयोगान्निष्क्रियत्वमिति चेत् एवन्ते ऽपि समानमेतत् । यथा च तत्र सम्भावितक्रियस्य कर्तुः प्रयोजकः इति तद्व्यापारोपपत्तिः, तथा ऽऽनेति न किंचिदवद्यम्। तमब्ग्रहणस्य च प्रत्याख्यानादीप्साप्रकर्षानाश्रयणम् । यत्तु तमग्रहणस्योदाहरणं दध्ना भुङ्क्तेयेति, तत्र समकक्ष्यतया दध्नौदनस्येप्सितत्वे तमग्रहणमकि-ञ्चित्करमभ्यर्हितत्वे हि दध्नस्तस्कृतस्यौदनस्यैवेप्सितत्वमिति नास्त्येतदु-दाहरणमतथा च भाष्यम् । तस्याप्योदन एवाप्सित. न तु गुणेष्वस्या-दर इतीयदपि कर्मापादनयोर्विषयविभागदर्शनार्थं तमग्रहणमित्युक्त-मूनत्रापि वारणार्थानां वारयितव्यानां वारणमर्थयन्तइति वारणयो-ग्यानां यदीप्सितं तदपादानमित्येवं व्याख्यानाददोष. । तथा हि वा-रयितव्याः प्रतिषेधयितव्याः गवादयः तेषामीप्सिता यवादय एवा-पादानं तदेवमीप्सितमेवं सर्वं कर्म । इत्थं च दुह्याद्युदाहरणार्थं न परिगणनमेतद् । नटश्च शृणोतिक्रियाया निमित्तमात्रं न त्वीप्सित-त्वेन विवक्ष्यत इति कर्मसंज्ञाभाव । शृणोतिक्रियायां च सव्यापारो नटः कारकमुपयोगग्रहणादपादानसंज्ञया व्युदस्यते । न चान्या सं ज्ञाऽस्यविहितेति शेषो ऽयं षष्ठीविषयः । हेतुतृतीयायास्त्वयमविषय , अनाश्रिते तु व्यापारे निमित्त हेतुरिष्यते । द्रव्यादिविषयो हेतु. का-रकं नियतक्रियमिति वचनात् ॥ ७७ ॥

ननु निर्वर्त्यादिभेदेन कर्म भिद्यत इति कथमेकमेव कर्मे-त्याशङ्क्याह ।

निर्वर्त्यो वा विकार्यो वा प्राप्यो वा साधनाश्रयः ।
क्रियाणामेव साध्यत्वात्सिद्धरूपो ऽभिधीयते ॥ ७८ ॥

इह साधनाश्रयशक्त्याधारो निष्पन्नरूपो नामपदैरुच्यते । आख्यातपदैस्तु साध्यस्वभावः क्रियात्मार्थो ऽभिधीयत इति क्रिया-द्रव्ययोः सिद्धसाध्यस्वभावरूपं शब्दप्रतिपाद्य तद्रूपेण कथ्यते । यद्धात्वर्थे, क्रियाचेद्यदि भाव्यते स्वभावसिद्धं द्रव्यत्वमितीतथाच कटं

करोति तण्डुलानोदनं पचति सूर्यं पश्यतीति नामपदैः कर्म शक्त्याधारमविलक्षणं सिद्धतया प्रत्याय्यत इति नास्ति तस्य स्वरूपभेदः स्वतः क्रियार्थत्वाच्च वस्तुतः साधनानां क्रियाधर्मेण व्यपदेशः । निवृत्तिविपरिणतिप्राप्तिलक्षणा हि क्रियाः स्वग्रामव्यावृत्तमुपकारकं कर्म निदर्शयन्त्यो विभिन्नव्यपदेशनिमित्ततामापादयन्ति । एवं च कृत्वा शब्देन रूपेण सिद्धत्वात् कर्मणः साधनभावो ऽप्युपपद्यते । क्रियाविशेषावेशितव्यपदेशभेदानाश्रये तु क्रियाविषयकारकनिमित्ततयेप्सितमित्येव सामान्याख्यया सर्वं कर्म कथ्यत इति सिद्धम् ॥७८॥

गतमदः, इह कथमीप्सितत्वं, विषं भक्षयति चोरान्पश्यतीत्याशङ्क्याह ।

> आहितेषु यथा लौल्यात् कर्तुरिच्छोपजायते ।
> विषादिषु भयादिभ्यस्तथैवासौ प्रवर्त्तते ॥ ७९ ॥

वाय्वादिधातुवैषम्यनिमित्तेषु यथा ऽऽतुरस्य हितमिति भोजननियमासहिष्णोरभिलाषो भवति तथा स्वाम्यादिभयपरिपीडितस्य क्षत्रियस्य व्याधिदुःखार्त्तस्य वा वरं विषभक्षणमेव ज्याय इति मन्यमानस्य भवति विषं भक्षणेनेप्सितमिति तथा युक्तं चानीप्सितमित्येतदपि कर्म पूर्वेणैव सिद्धं । तदाह भाष्यकारः । य एष मनुष्यो दुःखार्त्तो भवति सो ऽन्यानि दुःखान्यनुनिशम्य विषभक्षणमेव ज्यायो मन्यते । लौल्यादिति । न प्रेक्षापूर्वकारितावघटिता सर्वत्रेप्सा अपि तु प्रकारान्तरेणापि सम्भवतीत्यर्थः । भक्षणक्रियाविषयभावापत्तिरेवात्रेप्सितत्वं तथायुक्तग्रहणादेवावसीयते । सूत्रारम्भेऽपि परोपहितं चाविज्ञातविषभावं भक्ष्यमाणमीप्सितमेव । प्रवृत्त्यनुमेया वेप्सा सर्वत्र समानैव । भयादपि च पराशयानुवर्त्तनार्थं भक्ष्यमाणमीप्सितमेव विषम् । एवं दशिक्रियया वा चोराः । ईप्सितादन्यच्चेप्सितं नानीप्सितं वृक्षमूलादि तदपि पूर्वमनभिसंहितमपि तदानीमुपसर्पणवेलायामीप्सितमेवान्यथोपसर्पणक्रियाविषयभावतामेव नोपेयात् । तमग्रहणं च प्रत्याख्यातमिति श्रमापनोदार्थं ग्रामगमने ऽप्यन्तरा वृक्षमूलोपसर्पणमभिसन्धितमिति सिद्ध्यतीप्सितमात्रस्य कर्मसंज्ञा पूर्वेणैवासंज्ञान्तरपूर्वकमपि कर्मेप्सितमित्येव सामान्यलक्षणेन सिद्धम् । ग्राममभिशेते नगरमुपतिष्ठतीत्यादावुपसर्गसम्बन्धे सकर्मकत्वा-

क्षात्नां परत्वात्कर्मसंज्ञायामधिकरणं कर्मगेहं प्रविशतीत्युक्तम्। अनुपसर्गत्वे अधिकरणसंज्ञा भवति। अक्षान् दीव्यतीति,विजिगीषोपसर्जनपातनवचने दीव्यतावीप्सितत्वेनाक्षाणां, क्रियार्थत्वे त्वक्षैर्दीव्यतीति करणता ऽक्षाणामित्युभयसिद्धौ समावेशार्थे कर्मसंज्ञायामवकाशो मनसा दीव्यतीत्यादि मनसादेव इति कर्मण्ययप्रत्ययः। करणसंज्ञायां तु देवनो ऽक्ष इति करणे ल्युडिति परत्वाद् द्वितीयां बाधित्वा तृतीयैव स्यात्।मनसस्तृतीयाया इत्यलुकि करणसंज्ञाया अवकाशो मनसादेव -इत्येतदेवोदाहरणम्। सूत्रारम्भे तु चकारसहिते संज्ञाद्वयसमावेशान्यथानुपपत्त्या द्वितीया तृतीयापि हि सिध्यति। एवं क्रुधद्रुहोरप्यनुपसर्गयो. सम्प्रदानता, उपसृष्टयोस्तु परत्वात्कर्मतेत्येवं जातीयमेव कर्म प्रागेव प्रतिपादितमस्माभि. पुनरपि स्मारितम् ॥७९॥ गतमेतत्। इदानीं चिन्त्यते इह कर्मद्वययोगे प्रधानमर्थमाश्रित्य प्रधाने लादिरुक्त।द्वितीया तु प्रातिपदिकादिद्वयादप्युत्पद्यत इति तत्र गुणप्रधानभूतक्रियाद्वयविषयायामपि शक्तावेकस्यां लादिनोक्तायां परशक्त्यभिधानाय द्वितीया कस्मान्नोत्पद्यत इत्याशङ्क्याह ॥

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥ ८० ॥

इहार्थानामेकवाक्योपात्तानां समन्वयो भवतिाद्वयोः प्रधानयोःसमत्वात् मिथो ऽङ्गाङ्गिभावो नोपपद्यते नापि द्वयोर्गुणयोर्गुणानां च परार्थत्वादसम्बन्ध. समत्वात्स्यादिति। गुणप्रधानभावेन तु समन्वयोपपत्तावेकवाक्यता भवतीत्याह। प्रधानेतरयोर्यत्रेति ॥ ८० ॥

तत्र प्रधानानुयायित्वाद् गुणानाम्प्रधानक्रियाविषयकर्मशक्त्यभिधाने द्रव्यस्य गुणस्य क्रियाप्यभिहितवत्प्रकाशत इति प्रधानानुरोधं सामान्येनोक्तं व्याख्यातुमाह।

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्ता ऽपि प्रकाशते ॥ ८१ ॥

प्रधानक्रियावाचिनो धातोरुत्पन्नेन प्रत्ययेन लादिना यदा प्रधानक्रियाविषया कर्मशक्तिः प्रतीयते तदा गुणक्रियाविषया

साक्षादनुक्ता ऽपि तद्धर्मप्रकाशत इतीयमनुक्तिः व्याख्याता ॥ ८१ ॥

अत्रोदाहरणमाह ॥

पचावनुक्तं यत्कर्म क्तान्ते भावाभिधायिनि ।
भुजौ शक्त्यन्तरे प्युक्ते तत्तद्धर्मः प्रकाशते ॥ ८२ ॥

पक्वौदनो भुज्यत इत्युदाहरणम् । अत्र, क्तप्रत्ययस्य तुमर्थग्रहणानुवृत्त्या भाष्यकारमतेन भावे विधानम् । वार्त्तिककारो क्त्वा च तुमुन् समानाधिकरणा इति यथावकाशं शकधृषेत्यादि विधीयमानादातुमुन्प्रत्ययादनुप्रयोगधातुना समानाभिधेया णमुलादयः प्रत्यया वक्तव्या इति वार्त्तिकार्थः । तेन स्वादुङ्कारं भुज्यते यवागूर्देवदत्तेनेति णमुला कर्माभिधानाद्यवागूशब्दात् द्वितीया न भवति। देवदत्तशब्दाच्च तृतीया भवति।अन्यथा कृत्वात्कर्तरि णमुलापत्तौ देवदत्ते तृतीया न स्यात्। अनेनैव न्यायेन पक्वौदनो भुज्यत इत्यत्रापि क्तप्रत्ययो भुज्यत इत्यनुप्रयोगधातुना समानाभिधेय एककर्मण्येवोत्पद्यत इति नास्ति कस्याश्चिदपि शक्तेरनभिधानं इति वार्त्तिककारमतेनेदमुच्यते । भाष्यकारस्तु पक्वौदनं गम्यते ग्राम इत्यत्रानेन न्यायेन द्वितीया न स्यादिति वार्त्तिकं व्याचष्टेातुमर्थग्रहणानुवृत्त्या णमुलादीनां भावे विधानं गम्यते। तुमर्थो हि भावः। कृत्वात्कर्तरि सिद्धे क्तप्रभृतीनां तुमर्थ इति वचनात् कर्तुरपकर्षो न वाच्यस्तुमुनोऽर्थो ऽनिर्दिष्ट इत्यनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति स्वस्याः प्रकृतेरर्थो भावः सिद्धः । एवं क्तान्ते पक्तेत्यस्मिन्भाववाचिनि पचिक्रियाविषयौदनस्य कर्मशक्तिरनुक्ता । भुजिक्रियाविषयायां कर्मशक्तौ तेनाभिहितायां तथैव तद्धर्मः तस्य प्रधानस्यैव धर्मः प्रत्यायितत्वलक्षणो यस्य तद्धर्मः प्रकाशत इति द्वितीया न भवत्योदनात्।पक्वौदनं भुङ्क्त इत्यत्र पचिक्रियापेक्षादेव देवदत्तात्कर्तुस्तृतीयापि न भवति । पक्त्वौदनं गम्यते ग्राम इत्यत्र तु गमिप्रत्ययेनौदनगता कर्मशक्तिर्नाभिहितेति भवति द्वितीया । यद्यपि च साधनैकार्थसमवेतायां सङ्ख्यायां भुज्यत इति विभक्तिरुत्पद्यते, तथापि पचिविषयकर्मोपाधिसङ्ख्यानभिधानात् भवेत् द्वितीयेति न्याय ऽयमुद्घोष्यते।एकत्वादिष्वपिहि विभक्त्यर्थेष्ववश्यं कर्मादयो गत्वा नापक्षणीया इति ॥ ८२ ॥

उदाहरणान्तरमप्याह ।

इष्येश्च गमिसंस्पर्शाद् ग्रामे यो लो विधीयते ।
तत्रेषिणैव निर्भोगः क्रियते गमिकर्मणः ॥ ८३ ॥

इष्यते ग्रामो गन्तुं इत्युदाहरणम् । अत्रेषिरुभे कर्मणी गमेर्ग्राम एवेति ग्रामस्येषिविषयायां कर्मशक्तावभिहितायां गमिविषया ऽपि तद्व्यपेक्षतेऽत्र गमनार्थमेषणम् तथा च क्रियायां क्रियार्थायामुपपदे तुमुनिति फलभूतावगम्यप्रधानत्वेषिरिति शङ्कायामुदाहरणान्तरमिदम् । आख्यानपदवाच्ये ह्यर्थे ऽनियतत्वात् प्रधानता सर्वत्रापक्त्वा भुज्यत इत्यत्र त्वार्थमपि प्राधान्यमस्ति । पाकस्य भोजनार्थत्वात् गमिसंस्पर्शादिति इषेर्द्वयोरभिसम्बन्धः क्रियान्तरमुल्लेनैव सर्वदा भवति तदिह न दर्शनादिमुखेन ग्रामे इच्छा, अपि त्वेकवाक्योपात्तगमिद्वारेणेत्यर्थः । निर्भोगश्चर्वणमाख्यानमिति यावत् । इषिणैवेति । इषिप्रत्ययेन लकारेण कर्मणि विहितेन तन्त्रेण शक्तिद्वयमप्यभिदधाति प्रत्यय इति वाक्यपदीये निर्णीतम् ॥ ८३ ॥

मतान्तरेणाप्यत्रोपपत्तिमाह ।

पक्त्वा भुज्यत इत्यत्र केषां चिन्नव्यपेक्षते ।
ओदनं पचतिः सो ऽसावनुमानात्प्रतीयते ॥ ८४ ॥

केषाञ्चिन्मते ऽत्र वाक्ये पचिक्रियौदनं नापेक्षते प्रथमान्तस्यौदनस्य पक्त्रेति सम्बन्धाभावात् । भुज्यते इत्यनेनैव तु सम्बन्धो भवत्योदनस्येत्येकैव कर्मशक्तिः सा चाभिहितेति केदमुपनिपतति प्रधानशक्त्यभिधाने गुणक्रियाशक्तिरभिहिनवत्प्रकाशत इति ॥ यदि तर्हि पचिनौदनस्यासम्बन्धः पक्त्रान्यत् किञ्चिदोदनो भुज्यत इत्यर्थः स्यात् । तथा च विवक्षितमोदनपाकस्य भुज्यङ्गत्वं न प्रतीयेत इत्याशङ्क्याह । सो ऽसावनुमानात्प्रतीयते इति । स इति परामृष्टस्यौदनबुद्ध्या साक्षात् कृतस्यासाविति प्रत्यक्षानुकारेण प्रतिनिर्देशः । साक्षात्पचिसमन्वययोग्यौदनः सामर्थ्यात्पचेरर्थापेक्षणीयत्वेन प्रतीयते । किं सामर्थ्यमिति चेत् एकवाक्यत्वमिति ब्रूमः । श्रुतसम्बन्धो ह्यश्रुतसम्बन्धपरिकल्पनाल्लघुः । एतच्च सत्येन गुणप्रधानभावेनान्वयेति पूर्वोक्त एव न्यायो ऽत्राश्रयणीय इति पूर्वोक्तमेव न्याय्यम् । अत एवान्यमतत्वेनास्योपन्यासः । किल भूमिः पाकमपक्षत इति स-

न्निहितेनैवाकाङ्क्षा पूरयितव्या । पाकस्य भुज्यपेक्षया पूर्वकालस्येति गुणप्रधानभावोपपत्तावेकवाक्यतोपपत्तिः ॥ ८४ ॥

न केवलं कर्मण्ययं कारकविषयो न्यायः यावत्कारकान्तरे ऽपीति व्याप्त्यर्थमुदाहरणान्तरमाह ॥

तथा ऽभिनिविशौ कर्म यत्तिङन्ते ऽभिधीयते ।
त्क्तान्तेऽधिकरणत्वेऽपि न तत्रेच्छन्ति सप्तमीम् ॥ ८५ ॥

भुक्त्वा नगरमभिनिविशत इत्यत्राभिनिविशश्चेति नगरस्याभिनिविशेराधारस्य कर्मसञ्ज्ञायां तिङन्ते ऽभिनिविश्यत इत्यत्र प्रधानभूते विषये ऽभिहिता कर्मशक्तिः । भुक्तेति क्तान्तविषये ऽधिकरणशक्तिरपि गुणत्वात् स्वकार्ये सप्तमीविभक्तिलक्षणं न प्रयुङ्क्ते । सप्तम्या चात्र प्रधानक्रियाविषया कर्मशक्तिर्न प्रतीयत इति प्रधानोपरोधो गुणेन कृतः स्यात् । न चैष न्यायः प्रधानानुयायित्वाद् गुणानां प्रधानविरोधिनि कार्ये उदासते एव ॥ प्राधान्यं च सर्वत्र तिङन्तार्थस्य शाब्दव्यवहारविवक्षितस्य वाक्यार्थभूतस्य । अनेनैव न्यायेन नगरे ऽभिनिविश्य भुङ्क्ते इत्यत्र भुज्याश्रयेणाधिकरणत्वेन नगरस्याभिनिविशिकर्मत्वमापद्यते । गतमेतत् । इह कथं कर्मत्वं गुडं भक्षयतीति गुडो ऽभिनिर्वृत्तः, भक्षणक्रियाकृतं न कंचन विशेषमाकाङ्क्षतीति तथेप्सितम् । अपि तु भक्षणक्रियाया आश्रयविशेषदर्शनार्थमुपादीयत इति क्रियार्थमेतत् । द्रव्यसंस्कारार्था क्रिया दन्तावच्चूर्णनादिना लक्षणक्रियाफलत्वं अपि त्वन्नादिना रूपात् । एवं भावलक्षणस्य भक्षणस्य प्रीतिस्तृप्तिलक्षणा फलमिति नास्ति क्रियाकृतो ऽत्र कश्चनोत्पत्त्यादिविशेषः । एतदुक्तं वार्त्तिके । ईप्सितस्य कर्मसंज्ञायां निर्वृत्तस्य कारकत्वे कर्मसंज्ञाप्रसङ्गात् क्रियेप्सितत्वादिति । निर्वृत्तस्य निर्वर्त्यकर्मतां प्रतिक्षिपति । उपलक्षणं चैतत् । विकार्याद्यभावात् कर्मान्तरतापि नास्ति । निराकाङ्क्षस्य चेत्यर्थः । कारकं च, इति क्रियासिद्धौ निमित्तभावमाह । लक्षणक्रियानिष्पत्त्यर्थं गुडस्योपादानात् । अत एव भक्षणाय गुड इति क्रियासन्दर्शनादिभिराप्यमानत्वादीप्सितं कर्म न तु ॥ द्रव्यभक्षणमात्रं हि गुडस्येप्सितं न तु भक्षणप्रत्याख्यानेनान्यस्तत्कृतो विशेषः । अत्र वार्त्तिकपरिहार उक्तः, न वोभयेप्सितत्वादिति ॥ ८५ ॥

अथ कथं गुडादेरीप्सितत्वमित्येतद्व्याख्यातुमाह ॥

यन्निवृत्ताश्रय कर्म प्राप्तेरप्राचितं पुनः ।
भक्ष्यादिविषयापत्त्या भिद्यमान तदीप्सितम् ॥ ८६ ॥

निवृत्ता निष्पन्नो ऽत एव निराकाङ्क्ष आश्रयो गुडादिद्रव्यं यस्य कर्मण: कर्मशक्तेरिति निर्वर्त्यकर्मताव्युदास: । विकारादीनामाकाङ्क्षणाच्च विकार्यतापि व्युदस्ता । प्राप्तेरप्राचितमिति । प्राप्तेर्भक्षणक्रियासम्बन्धाद्धो ऽपि प्रचयापचययो: विशेषेणाप्ययुक्तमप्राचितमिति प्राप्यकर्मता व्युदस्ता । पूर्वपक्षे आद्येन हि कारिकार्धेन पूर्वपक्षवार्त्तिकार्थ: संगृहीत: । द्वितीयेनार्धेनोत्तरवार्त्तिकव्याख्यानम् । भक्षिभुज्यादिक्रियाविषयीभावापत्त्या भिद्यमानं विशेष्यमाणं गुडादीप्सितं प्राप्यमेतत् कर्मेत्यर्थ: । तथा हि, न भक्षणादिक्रियैवात्रेप्सिता एवं लोष्टमपि भक्षयित्वा कृती भवेत् । नापि गुड क्रियान्तरत्वेनेप्सित:, अपि तु भक्षणाश्रयत्वेनेत्युभयभावमाश्रयाश्रयिभावेन समुदितमीप्सितम् । यस्य हि गुडभक्षणमीप्सितं तस्य गुडो ऽपीप्सित: भक्षणक्रियासम्बन्ध एव चात्र क्रियाकृतो विशेष: प्राप्यकर्मणो विशेषान्तरस्यानापेक्षणात् अन्यथा निर्वर्त्यविकार्ययोर्न्यां को विशेष स्यात् । भक्षणस्य प्रीत्यतिशयो ऽत्र फलमास्य च गुडस्य तत्सम्बन्धे सति घटत इत्ययमेव विशेष । क्रियाकृतस्त्वानुरूपफलप्रभवयोग्यता हि संस्कार: । ननु च तृप्तिलक्षणायां प्राप्तौ गुडो ऽयमिति कथं, प्रधानकारकरूपं कर्मत्वं अस्याउच्यते । तृप्तौ जातायां गुडस्यास्त्य इतिकर्त्तव्यताविशेष: यद्भक्षिक्रियाविषयीकरण तां प्रति प्राधान्यं, नान्यथा तृप्ति: सम्पादयितुं शक्या । तदस्य तृप्त्यङ्गभावे ऽयं प्राथमकल्पिको व्यापार । तद्यथा गुरु सेव्यमानो धर्मोत्पत्तावङ्गतामेति तथास्य परिचरणक्रियाविषयभावगमनमन्तरेण न घटनामेतीति गुरुं शुश्रूषत इति प्राधान्योपपत्ति: । तदेवमत्र पूर्वपक्षे द्रव्येप्साराहित्येन क्रियामात्रस्येप्सा दर्शिता । यदि तर्हि क्रियाविषयभावमात्रगमनेन कर्मतासिद्धि: । तथा सति सर्वत्र क्रियामात्रे ऽपि सकर्मकता स्यात् । ततश्चाकर्मकव्यपदेशा: शास्त्रे विरुध्येरन् । न च विरुध्यन्ते । न ह्यवश्यं क्रियामात्रे बाह्यविषयसम्भव: । का चिद्धि क्रिया कर्त्तर्येव विश्राम्यति । न तु बाह्यभावमपेक्षते । तद्यथा आस्ते शेते इत्यादि । द्रुचर्थ: पचिरिति वचनात् सर्वधातुविषये ऽपि भावनालक्षणे व्यापारे धात्वर्थे एकत्र भावनापर्य्यवसानात् स एव भाव्य । आसन करोति शयनं करोतीति । अत एवात्र बाह्यभावविषय: प्रश्नो नास्ति किमिति यत्र बाह्य-

जानिष्ठा भावना तत्र तेन बाह्येन भाव्येन कर्मणा सकर्मकत्वमुक्तम् च किमित्यनुयुज्यतेऽपचति, किमोदनमित्यादिधात्वर्थस्य हि सर्वत्राव्यभिचारात् भाव्यत्वे ऽपि न तेन सकर्मकाकर्मकविभागः शक्यक्रिय । कालादिकर्मणोव बाह्यं कर्म । अत एव बाह्यनिष्ठायां भावनायां धात्वर्थं करणमिति न्यायविद् । तेनौदनं भावयतीति वाक्यार्थः । यद्यपीह दर्शने भावना धात्वर्थ एव, तथापि फलपर्यन्ताऽसौ कर्तुव्यापाररूपा दीर्घेतरावयवक्रियामात्रात् पृथग्व्यवहारसंज्ञा । एवं सर्वत्र योज्यम् ॥ ८६ ॥

क्वचित्पुनर्वस्तुतो बाह्यकर्मसद्भावे ऽप्यकर्मकव्यपदेशो भवतीत्याह ।

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणो ऽकर्मिका क्रिया ॥ ८७ ॥

प्रसिद्धादर्थादन्यत्रार्थे यदा धातुर्वर्तते तदा ऽस्य कर्मसमन्वयरहिता क्रिया वाच्या प्रतीयते । तद्यथा वहतिर्देशान्तरप्रापणवचनः सकर्मक. प्रसिद्धो, भारं वहतीति, स यदा नदी वहतीत्यत्र स्यन्दनक्रियामभिधत्ते तदा स्यन्दनस्य जलस्रुतिरूपस्य नद्यात्मभूतत्वात् किमित्यनुयोगाभावादकर्मक इति धात्वर्थमात्रोपेक्षये ऽयं भावना, वहति स्यन्दनं करोतीति । यद्यपि धात्वर्थक्रियायां कर्मान्तर्भवति तदा ऽप्यकर्मकत्वम्।तद्यथा जीवति प्राणान् धारयतीति ह्यत्रार्थे इति प्राणलक्षस्य कर्मणो ऽत्रान्तर्भाव ।एवम्रियते, प्राणान् जहातीति।तथा ऽस्ति, आत्मान बिभर्त्तीति ।यत्राप्यव्यभिचारेण प्रतिनियतस्य कर्मण. प्रतीति , तत्राप्यकर्मका क्रियेति व्यवहार । तद्यथा वर्षतीति । अत्र हि यथा वर्षणक्रियायामव्यभिचाराद्व कर्त्ता प्रतीयते तथा कर्मापि जललक्षणमिति प्रसिद्धेः अकर्मकत्वाश्रय' कर्तरि क्त उदाहृतः, वृष्टो देव इति। यत्त्वप्रसिद्ध कर्म तेन सकर्मकत्वमेवास्या क्रियाया रुधिरं वर्षतीति लाजान्वर्षति। उपलो वृष्ट इति कर्मणि क्त'।विद्यमानो ऽपि वा यत्र कर्मसम्बन्धः क्रियामात्रप्रतिपादनतात्पर्यान्न विवक्ष्यते तत्राप्यकर्मकत्वं सम्भवति।तद्यथा नेह पच्यते, नेह भुज्यत इति।क्रियाप्रतिषेधतात्पर्याद्भावे लकारः । दीक्षितो न ददाति, न पचति, न जुहोतीति । कर्मणो विवक्षा ऽत्र किमिति नापेक्ष्यते । क्रियाप्रतिषेधे तात्पर्यात् ॥ ८७ ॥

तदेवं चतुर्भिरपि प्रकारैरकर्मकव्यपदेशाः शास्त्रे भवन्ति । एषामन्येऽपि प्रकारा सम्भवन्तीत्याह ।

भेदा य एते चत्वारः सामान्येन प्रदर्शिताः ।
ते निमित्तादिभेदेन भिद्यन्ते बहुधा पुनः ॥ ८८ ॥

य एते कर्मण्यपि धातूनामकर्मकत्वनिबन्धनभूता भेदाश्चत्वारो विहिताः ते निमित्तादिभेदेनानेकप्रकारा जायन्ते । निमित्त सहाय उपसर्गादि । आदिशब्देन कालादयः । तद्यथा चरति देशान्तरगमनवचन सकर्मक उर्ध्वगतिवृत्तिलक्षणेऽर्थान्तरे प्रयुक्तोऽकर्मको निमित्तस्य शब्दान्तरप्रयोगस्य सामर्थ्याद्भवति । वाष्प उच्चरति धूम उच्चरतीति । उच्छब्दवशाद्धातुरयमूर्ध्वप्रवृत्तावकर्मकः । आदिग्रहणात्कचिदात्मनेपदप्रयोगादकर्मकत्वमभिव्यक्ति । उत्पतन इति । भासन इत्यर्थः यावद्भुक्तमुपतिष्ठते, भोजनकाल यावदुदीक्षत इत्यर्थः । अकर्मकाच्चेत्यात्मनेपदम् । सर्पिषो जानीते मधुनो जानीत इतिवेनोपायेन प्रवर्त्तन इति ज्ञानपूर्विकाया प्रवृत्तौ अत्र धातुर्वर्तते । अपह्नवे ज्ञ इत्यनुवृत्तावकर्मकाच्चेत्यात्मनेपदम् । वाक्यसामर्थ्यात्क्वचिदकर्मकत्वमभिव्यक्तिः । तद्यथा नदी वहतीति । नदीलक्षणकर्तृविशेषसामर्थ्यात् स्यन्दनवचननायामकर्मकत्वम् । एवं वायुर्वहतीति । तथा कर्मकर्तृविषयकर्मणाः कर्तृत्वप्रतीतिवशादेकदेशवचननायान्धातोरकर्मकत्वं, पच्यते ओदनः स्वयमेवेति । एव च कृत्वाऽकर्मकव्यपदेशनिमित्त शास्त्रमत्र विषये प्रवर्त्तते मुचो ऽकर्मकस्य गुणो वेति । मोक्ष्यते वत्स स्वयमेवेति । एवमर्थान्तरे वृत्तेर्धातोरकर्मकत्वनिबन्धनं निमित्तादिभेदेन भिद्यते । धात्वर्थेनोपसंग्रहे ऽपि निमित्तादिभेदेन भेदः । तद्यथा क्रियाविशेषकया स्वरूपसामर्थ्यलक्षणानिमित्तानिरोहितभेदत्वेन कर्मणोऽन्तर्भावे ऽकर्मकव्यपदेशो जीवत्यादौ । क्वचिदन्याख्यानव्यवस्थया निर्धार्यमाणरूपभेदस्याप्यन्तर्भावः । तद्यथा पुत्रीयतौ पुत्रकर्मण । परमार्थतो ऽत्र पुत्रलक्षण कर्म क्रियाशरीरानुप्रविष्टं भेदेनासत्येन प्रक्रियायामन्याख्यानिमित्तमाश्रीयते । तथा च वक्ष्यति । पुत्रीयतौ न पुत्रोऽस्ति विशेषेच्छा तु तादृशी । विनैव पुत्रानुगमादपुत्रे व्यवतिष्ठत इति । क्वचित्पुत्रोपमा न कर्मान्तर्भूतम् । उपकार्यकर्मणा तु सकर्मत्वम । पुत्रीयतीच्छात्रमितिमुण्डयति माणवकमिति । सामान्यकर्मान्तर्भूतं, विशेषक-

र्मणा तु सकर्मकत्वम्।एवं मिश्रयति तिलानित्यादौ। वाष्पायते धूमायते रोमन्थायत इत्यादौ विशेषकर्मणा एव निर्द्धारितरूपस्यान्तर्भाव ।पचे. पार्थिव भिदेश्च सावयवं कर्म प्रसिद्धं, न त्वन्तर्भूतम्।तस्य स्वशब्देनापि वचनात्।पचति पाक्यं, भिनत्ति भेद्यमिति। अन्तर्भावे तु स्वशब्देन निर्देशो न स्यात् । न च भवति जीवति प्राणानिति, जल वर्षतीति तु भवति। अन्तर्भावाच्च कर्मणो नमस्यति देवानित्यत्र नम.शब्दयोगे चतुर्थी न भवति। तथा वार्त्तिकान्तरीत्या चोदयित्वा प्रकृत्यन्तरत्वात्सिद्धमिति परिहृतं । अनेनैवाशयेन धात्वन्तरमेव नमस्यतिशब्द:, पूजार्थो न सम्भवत्येवात्र नमः शब्दो यावत् कल्पनाद्वारेणेत्येवं व्युत्पादयत इत्यर्थ. । भाष्यकारस्त्वस्यान्वाख्यानवेलायां नमसः प्रकृतित्वेन परिग्रहात् सम्भव मन्यमानः पुनश्चोदयति ।ननु नमस्यतिशब्दे नमः शब्दो ऽस्ति तेन योगे चतुर्थी प्राप्नोतीति । परिहरति । वार्थवतो नमः शब्दस्य ग्रहणं, न च नमस्यति शब्दे नमः शब्दो ऽर्थवानिति । श्रुत्यानुवृत्तिरियं । अत्र चोपसर्जनार्थे प्रत्ययार्थे गुणभूत इति नमो देवेभ्य इत्यत्र प्रधानभूतनम'शब्दयोगे सावकाशत्वात् चतुर्थी न भवतीति भाष्यार्थ. । प्रसिद्धेरपि यत्राकर्मकत्व तत्राप्यवान्तरो भेदो देशकालवशात् जायतेतद्यथा,दक्षिणापथे पूर्वाह्णे पचयतामित्युक्ते यत्रागूकर्मक: पाको ऽवगम्यते । अपराह्णे पुनरोदनसाधनम्।मांसभूयिष्ठे देशे मांससाधनः पाक प्रसिद्ध. । क्रियास्वरूपसामर्थ्यात् क्व चित्प्रसिद्धत्रियत कर्म, वर्षति, जल प्रतीयते । कर्तृसामर्थ्यादपि कर्म प्रसिद्धं । यथा दुर्जनः करोतीत्युक्ते उपघातलक्षणं कर्म गम्यते । सज्जनः करोतीति उपकारो ऽवगम्यते।गोष्ठीभेदेन देशभेदेन चापरिमिता प्रसिद्धिरनुगन्तव्या यदुदाहियते । अविवक्षायामपि क्व चित्साहश्यमात्रप्रतिपादनपरतया वाक्यस्य कर्मणो दृश्यते । तद्यथा ऽनुवदते कठः कलापस्येत्यत्र कठकलापयोर्भाषणसाहश्यं प्रतिपाद्यमिति कर्म न विवक्षितम्।तथा कर्मविशेषप्रतिपादने देवदत्त किं करोतीति प्रश्ने पचति ब्रवीति इति कर्मसम्बन्धो न विवक्ष्यते । क्रियाप्रबन्धाव्युपरमप्रतिपादने ऽपि न विवक्ष्यते कर्म, पचत्येव ददात्येवेति यथायोगमनुसरणीय प्रयोगजातमिष्टम् ॥ ८८ ॥

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे
साधनसमुद्देश कर्माधिकार.

इह स्वादिविधिवाक्ये यया ऽऽनुपूर्व्या विभक्तिप्रत्यया सन्निविष्टा तदनुसारेण तदर्थानां कारकाणां विचार. । तत्र द्वितीयार्थे कर्मणि विचारिते तृतीयार्थं करण पूर्वं विभार्यते । कर्त्ता तु पष्ठ्या अप्यर्थ इति साधारणत्वात् । न त्वेतस्य स्वं निरूपयिष्यते।तत्र क्रियासंसिद्धौ सामग्र्या. साधनत्वात्कोऽतिशय करणस्य येन तत्साधकतमं स्यादित्याशङ्क्य लक्षणमाह ॥

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥ ८९ ॥

सन्निपत्योपकारिषु सर्वेष्वपि साधनेषु यद्व्यापारानन्तरभाविनी क्रिया लक्ष्यते तदेव सातिशयं साधकतम करणम् । तद्यथा च्छेदने दात्रमनुप्रविश्य च्छेद्यावयवविभाग साधयत् प्रकृष्टामुपकारकतामासाधयत्यधिकरणादिकारकान्तरेभ्य. । एव दर्शने चक्षुः प्रणिधीयमानं, इत्युदाहर्तव्यं । साधनव्यवहारस्य च बाह्यवस्तुसमाश्रयत्वाद्विवक्ष्यत इत्याह । विवक्षोपारूढा एव ह्यत्र व्याकरणे ऽङ्गं न बाह्यवस्तुमत्व इत्यर्थ. । तथा च बलेन आलोकेन पश्यतीत्यादावनाहत्य दात्रादिकं बलादि साधकतमत्वेन विवक्षितं करणम्।तत्र साधनान्तराणां वास्तवेऽप्याश्रयादिभावे बुद्ध्या ऽन्यथात्वं, यथा स्थाल्या पच्यत इत्यादौ । करणस्य तु रूपमेव विवक्षाधीनमिति । साधनव्यवहारश्च बुद्ध्यवस्थानिबन्धन इत्युक्ते ऽपि विवक्ष्यते इति पुनरुक्तम् ॥ ८९ ॥

एतदेवाह ॥

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ॥ ९० ॥

इदमेव नियतजातीयं उक्तं करणमित्येवं निरूपयितुं न शक्यते । यस्मान्न वस्तु व्यवस्थित करणतयाभिप्रेतममस्ति । प्रज्ञाताधिकरणभावा ऽपि हि स्थाली तनुतरकपालत्वाच्छीघ्रतरपाककार्यसाधनतया ऽनुभवस्येव वैवक्षिकं करणभावम् । तथा हि प्रयोगः करणतृतीयान्तस्थाल्या पच्यते इति लोके प्रसिद्ध । आर्द्रेन्धनापेक्ष-

था हि सुसन्निवेशा स्थाली क्रियासिद्धौ प्रत्यासीदति ॥ ९० ॥

यतश्च क्रियासिद्धौ प्रकृष्टोपकारकं करणम् । अतस्तत्र कर्तृणां संरम्भ इत्याह ॥

करणेषु तु संस्कारमारभन्ते पुनः पुनः ।
विनियोगविशेषाश्च प्रधानस्य प्रसिद्धये ॥ ९१ ॥

प्रधानस्य क्रियालक्षणस्यार्थस्य प्रसिद्धये प्रकृष्टोपकारकस्य करणस्यैव फलार्थिनः संस्कारमुत्तेजनादिकमसकृद्व्यापारेण चारभन्ते। उपायद्वारेणोपेये प्रवृत्तेऽत्र काष्ठानामुपधानं संस्कारः । पुनः पुनश्चोपस्थानं विनियोगः । दात्रस्य तीक्ष्णताधानं संस्कारः । उद्यमाननिपतने विनियोगः । चक्षुषोऽञ्जनादिः संस्कारः, प्रणिधानं विनियोग, इत्याद्यन्यत्रापि यथायोगं वक्तव्यम् ॥ ९१ ॥

इह कथमुपकारप्रकर्षो दीपिकादिकैः यातीति। बहूनां मेकः करणं विवक्ष्यत इत्याह ॥

स्वकक्ष्यासु प्रकर्षश्च करणानां न विद्यते ।
आश्रितातिशयत्वं तु परतस्तत्र लक्षणम् ॥ ९२ ॥

स्वस्यां कक्ष्यायां करणभावावस्थायां सजातीयापेक्षः प्रकर्षोऽत्र तमप्प्रत्ययवाच्यो नाश्रीयते, अपि तु साधनसामान्यस्यानुगतस्य कारकान्तरापेक्ष एव प्रकर्षस्तमप्प्रत्ययवाच्यः कारणत्वमावेदयते । साधकशब्दाद्धि कारकसामान्यवाचिनः तमबुत्पन्नस्तत एव प्रकर्षं गमयति । परत इति साधनान्तरात् । एव कारणजात्यपेक्षस्यातिशयस्यानाश्रयणादश्वादीनां सर्वेषामपि साधनान्तरापेक्षया प्रतिलब्धप्रकर्षाणां करणत्वमविरुद्धम् । तथा चाश्वो देशान्तरप्राप्तौ कर्त्राद्यपेक्षया प्रकृष्टोपकारकः पन्था अपि साधुध्वोरदृयुपद्रवरहितः । दीपिकाऽपि तमः संहतिमालोकेन निर्भत्सयन्ती प्रतिपद्यते साधनान्तरेभ्योऽतिशयेन ॥ ९२ ॥

ननु च कर्तृविनियोगोत्तरकालं साधनानां प्रवृत्तेस्तदपेक्षया कर्तुरेव साधकतमत्व न्याय्यमित्याह ॥

स्वातन्त्र्येऽपि प्रयोक्तारमारादेवोपकुर्वते ।

करणेन हि सर्वेषां व्यापारो व्यवधीयते ॥ ९३ ॥

यदुव्यापारानन्तरं क्रियानिष्पत्तिः तत्करणमित्युक्ते कर्तुः करणत्वप्रसङ्गः । न हि कर्तृव्यापारानन्तरमेव क्रियासिद्धिः । साधनविनियोगो हि कर्तृव्यापारः । विनियुक्तेषु तु साधनेषु स्वव्यापाराविष्टेषु सत्सु क्रिया निष्पद्यते । तत्र चापि करणादीनामिव कर्त्तरि व्यापारो विप्रकृष्यते क्रियासिद्धौ प्रकृष्टतरप्रयोगाभावात् । पारतन्त्र्यायोगेऽपि साधनान्तराणां प्रयोक्तारः कर्त्तारः विनियुक्तसाधनान्तरव्यापारव्यवधानेन क्रियां दूरादेव साधयन्ति । करणव्यापारसमनन्तरमेव तु क्रियासिद्धिः ॥ ९२ ॥

अथ वा कर्त्रा सहातिशयचिन्ता सम्भवतीत्याह ।

क्रियासिद्धौ प्रकर्षो वा न्यग्भावस्त्वेव कर्त्तरि ।
सिद्धौ सत्यां हि सामान्यं साधकत्वं प्रकृष्यते ॥ ९३ ॥

इह क्रियासिद्धिविषये साधनान्तरेभ्यो ऽतिशयः करणस्य विवक्षितः । यदा च निवृत्तानि गृहीतव्यापाराणि कारकाणि तदा क्रियासिद्धिर्विषयीभवति । कर्तृविनियोगे त्वपेक्षिते कर्त्तरि न्यग्भवति । साधनान्यनाविष्टव्यापाराणि स्वातन्त्र्यनिबन्धनसामान्यभूतं साधनव्यपदेशादिव नामादयन्तीति कृत तदपेक्षया कर्तुरतिशयः स्यात् । तदाह । सिद्धौ सत्या हि सामान्यं साधकत्वं प्रकृष्यत इति । यस्मिन्सिद्धौ सामान्यं साधनं तस्मिन्सिद्धौ निष्पत्तौ सत्यां प्रकर्षमासादयति । निष्पत्तिश्च तस्य कर्तृविनियोगादुत्तरकाल स्वव्यापारावेशे सति । तथा च तस्यां दशायामतिशयश्चिन्त्यमानो ऽधिकरणादेस्तुल्यकक्ष्यात् करणस्यैवावतिष्ठते । ननु कर्तुः सद्भिः स्वामिप्राक् प्रवृत्ति । स्वतन्त्रो न भृत्यैः सह स्पर्धां धत्ते सजातीयापेक्षो हि प्रकर्षः कर्ता तु विजातीय एव, कारकान्तराणां स्वातन्त्र्यपारतन्त्र्यरूपत्वात् । एवं च कृत्वा कर्त्तरि पराधीनस्यापि करणस्य साधनत्वातिशयः कारकान्तरापेक्षो युज्यते भिन्नविषयत्वादिति कथमस्वाधीन प्रकर्षवत् साधन स्यादिति न चोदनीयम् ॥ ९३ ॥

यदि तर्हि कर्तुः करणस्य च रूपविप्रकर्षः । कथमिदानीं करणस्यापि कर्तृत्व असिश्छिनत्तीत्यादावित्याशङ्क्याह ।

अस्यादीनां तु कर्तृत्वे तैक्ष्ण्यादि करणं विदुः।
तैक्ष्ण्यादीनां स्वतन्त्रत्वे द्वेधात्मा व्यवतिष्ठते ॥ ९४ ॥

यदा छिदिं प्रति सुतीक्ष्णधारत्वात् कर्तृविनियोगातिरस्कारेणासिः स्वातन्त्र्येण विवक्ष्यते तदा सौकर्य्यमेव न भवति अपि तु यदनन्तरभाविनी क्रिया तस्यैव करणत्वं तैक्ष्ण्यगौरवकाठिन्यसंस्थानादे। तस्यापि कर्तृत्वविवक्षायां विवक्षाप्रापितरूपभेदाय करणभाव। तथा हि तैक्ष्ण्यं छिनत्ति स्वसामर्थ्येनेति शब्दभेदोपहितरूपभेदादेकमपि तैक्ष्ण्यं भेदेनैव कर्तृकरणते प्रतिपद्यते। स्वाधीनत्वेनाश्रितमात्मा कर्त्ता साधकतमत्वेनाश्रितः करणमितिद्वे अवस्थाने क्रियायाः करणाविनाभावात् करणान्तव्यावृत्तिपरेयं चोदना। तैक्ष्ण्यमेव च्छिदौ साधकतमं नान्यदिति तस्यातिशयपरिपोषे तात्पर्यं, तदेवं कर्तृकरणे भिन्ने एव ॥ ९४ ॥

यद्येवमेकदा प्राप्तौ संज्ञयोः करणं परमिति विप्रतिषेधः कथमुपन्यस्त इत्याह।

आत्मभेदे ऽपि सत्येवमेको ऽर्थः प्राप्यते यदा।
तदाश्रयत्वाद्भेदे ऽपि कर्तृत्वं बाधकं ततः ॥ ९५ ॥

विवक्षाप्रापिते सत्यपि कर्तृकरणतया रूपभेदे स एको ऽर्थः शक्त्याधारस्थितो न प्रच्यवलेपादिरित्यर्थः। अत्रोपपत्तिः तदाश्रयत्वादिति। कल्पनाश्रयत्वात्। काल्पनिको हि भेदो न वास्तवमेकत्वं सहत इत्यर्थः। यद्वा तदाश्रयत्वादिति तदेकार्थाधारत्वात्। कर्तृकरणसंज्ञाया इति के चिद् व्याचक्षते। शक्तिभेदे ऽपि तदाधारद्रव्यैकत्वाविवेकः संज्ञयोर्विप्रतिषेधविषय उपपद्यते। संज्ञा हि शक्तिविष्टस्य द्रव्यस्यैव। तदेवं वस्तुविद्यमानमेकत्वं यदा विवक्षोपादत्ते तदैक्यविषयत्वे विप्रतिषेधे परत्वात् कर्तृसंज्ञा करणसंज्ञां बाधत इत्युदाहृतमसि च्छिनत्तीति। अत्र हि साधकतमत्वविवक्षायां भाविस्वातन्त्र्यविवक्षासेरित्येकविषयत्वे ऽनुभयसंज्ञाप्रसङ्गे परत्वात् कर्तृसंज्ञा। साधकतमत्वे हि सत्यसेः स्वातन्त्र्यमारोप्यते। यथा धनुषा विध्यतीत्यपायभावे सत्येव साधकतमेन धनुषा तत्क्रियां प्रति प्रकृष्टोपकारकं करणमिति स्थितम् ॥ ९५ ॥

उपकारश्च भवताऽर्थेन क्रियते, न त्वविद्यमानेनेत्येतामाशङ्कामप्यपाकरोति ॥

यथा च सन्निधानेन करणत्वं प्रतीयते ।
तथैवासन्निधानेऽपि क्रियासिद्धिः प्रतीयते ॥ ९६ ॥

दात्रादय. सन्निहिता. क्रियोपकारातिशयमापादयन्त. करणतया यथा प्रज्ञायन्ते, तथैव धनाभावेन मुक्त इत्यादावसन्निहितमपि धनं मुक्तिं साधयत् करणमेव प्रसिद्धम् ॥ ९६ ॥

अत्रैव सूत्रकारमत संवादकमाह ॥

स्तोकस्य वाभिनिर्वृत्तेरनिवृत्तश्च तस्य वा ।
प्रसिद्धिं करणत्वस्य स्तोकादीनां प्रचक्षते ॥ ९७ ॥

करणे च स्तोकाल्पेत्यत्रोदाहरण, स्तोकेन मुक्त इति । अत्र सत्ववचनानामपि स्तोकादीनां धर्ममात्राभिधानतात्पर्येण प्रयोगादसत्ववचनता । तत्र धर्ममात्रं स्तोकलक्षणं सदसद्वा मुक्तिक्रियायामतिशयेनोपकारकं करणमित्युक्तम् यस्मात्स्तोकं देयं वस्तु नो निष्पन्न, न चान्यत्सम्भवति निष्किञ्चनत्वात् अतो मुक्तप्रायत्वात् स्तोकं तद्देयं वस्तु नो विशिष्टमवसित ततो मुक्तः । यदि च बहु देयं स्यात्, न मुक्त्येतेतिस्तोकेनाभवता मुक्त । एवमेकेन न विंशतिरेकान्नविंशतिरिति एकाभावा विंशतिनिषेधस्य करणम् ॥ ९७ ॥

तदेवं विवक्षाधीनस्य साधनव्यवहारस्य, यद्यत्साधकतमत्वेन विवक्ष्यते तत्तत्करणम् । तथा च ॥

धर्माणां तद्वता भेदादभेदाच्च विशिष्यते ।
क्रियाऽवयेवच्छेदविशेषाद्विधते यथा ॥ ९८ ॥

आश्रितमात्रं धर्मशब्देनाह । तद्वता आश्रयेण । तथा हि, देवदत्तः काष्ठैः पचतीति इन्धनगतस्य तेजसस्तद्भेदविवक्षया प्रयोग । तथा च देवदत्तकर्तृकेन्धनकरणिका चय पचिक्रिया । यदा तु तेजो भेदेनेन्धनाद्विवक्ष्यते तदा पचा. पक्ष्यन्ति तेजसेति तेज. करणिकेन्धनकर्तृका च पचिक्रिया । यदा चौष्ण्य तेजसो भेदेन

क्रियासिद्धावनुपयोगाद्विवक्ष्यते तदा तेज पचत्यौष्ण्येनेति, भिद्यते साधनविशेषा क्रिया । तद्यथा ऽवधेर्ग्रामादेरवच्छेदविशेषाद्भेदविशेषा क्रिया भिद्यते विशेष्यते । ग्रामादागच्छति ग्रामस्य समीपादागच्छतीत्यादौ तद्भेदाश्रापि बोद्धव्यमित्यर्थः । सारण्यके ससीमके सखण्डिलके, ग्रामशब्दाभिधेये भेदेन ग्रामादागच्छतीति प्रयोग । वाटपरिक्षिप्ते तु ग्रामशब्दाभिधेये सीमादीनां भेदविवक्षेति ग्रामस्य समीपादागच्छतीति भिद्यते ऽवधिः । तद्भेदाच्च क्रिया विशिष्यते। एवं चैव हि करणभेदाद्यपि यथाविवक्षमेव । तदेवं प्रधानकरणं तृतीयावद्धातुप्रत्ययन स्फुटं घटादावभिधीयते । पचनमेध , पचनं तेज , पचनं स्थाली, पचन औष्ण्यमित्यादि यथाविवक्षमुद्दाहार्यं प्रयोगजातमिष्टम् ॥ ९८ ॥

इति भूपराजतनयहेलाराजकृते प्रकीर्णकप्रकाशे
साधनसमुद्देशे करणाधिकारः ।

तृतीयार्थे करणे विचारिते सम्प्रति तदर्थः कर्त्ता विचार्यते ॥ तस्य लक्षणं स्वतन्त्रः कर्त्तेति । स्व आत्मा तन्त्रं प्रधानमस्य । करणादीनां हि परः कर्त्तैव तन्त्रं प्रधानम् । क्रियासिद्धौ तेनप्रयोज्यत्वात् । कर्त्ता त्वनन्यप्रयोज्यः स्वतन्त्र इत्युच्यते । तत्र करणादीनामपि स्वव्यापारे स्वातन्त्र्यात् को ऽतिशयः कर्त्तुरित्याशङ्क्योपपादयति ॥

प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि ।
तदधीनप्रवृत्तित्वात्प्रवृत्तानां निवर्त्तनात् ॥ ९९ ॥
अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्त्तुरुच्यते ॥ १०० ॥

करणादिप्रवृत्ते प्रागेवार्थितादेरन्यस्माच्छक्तिलाभात्, न तु सहकारिण्य एव सामर्थ्यमासादयति । फलक मो हि कर्त्ता करणादीन्युपार्जयते । तथा च पूर्वमेव शक्तिमान्स्वतन्त्र । करणादीना तु कर्तृविनियोगादेव स्वव्यापारे स्वातन्त्र्य, तत्त्वन्यत । अत एव कर्त्ता न्यग्भावमात्माधीनतामापादयति ॥ तदायत्तव्यापाराश्च कर्त्रा तु फलमर्थमानेन स्वयं व्यापारावेशात् अतिशयवृत्तानि च करणादीनि निवर्त्यन्ते । कर्त्ता तु फलप्राप्तौ स्वयमेव निवर्त्तते । चोदितासम्भवे करणादीनां प्रतिनिधिरुक्त. । कर्त्तुः स नास्ति । कर्त्रन्तरं हि क्रियां निवर्त्तयता प्रतिनिहितं नोच्यते । तस्याप्यर्थिनः समर्थस्यापर्युदस्तस्याधिकारात् । प्रविवेके च कारकान्तराणामभाव, दृश्यते कर्त्तरि क्रियाः अस्ति भवति विद्यत इत्यादौ । यद्यप्यत्राधिकरणादय सम्भवन्ति तथा ऽपि नान्तरीयकास्ते शब्दव्यापारादप्रतीयमाना. । तत्तश्चाकर्तृकायां क्रियायां मानाभावात् सम्भूयकारिभ्यो विशिष्यते कर्त्ता । एतेन हेतुकलापेन कर्त्तुः करणापेक्षया क्रियासिद्धौ विप्रकृष्टोपकारकत्वे ऽपि स्वातन्त्र्य प्राधान्यनिबन्धनमुच्यत इति तस्यैव कर्तृसंज्ञा न तु करणादे स्वव्यापारे स्वतन्त्रस्यापीत्यर्थं । एतेन चेदं भाष्यं व्याख्यातं, "यत्सर्वेषु साधनेषु कर्त्ता प्रवर्त्तयिता भवतीति" । एतच्च भाष्य गर्भीकृतनान्तरीयकार्थसहं संक्षिप्योक्तमिति गर्भीकृतार्थव्यक्तीकारेणात्र व्याख्यातम् । तथा हि तदधीनप्रवृत्तित्वादित्यनेन साक्षात्प्रवर्तकत्वं व्याख्यातम् । सामर्थ्याक्षिप्तं च न्यग्भावनादि नि-

र्दिष्टम्।तथा हि प्रयोक्तृधीनत्वात्प्रवृत्तेर्न्यग्भाव. करणादीनां तत्रार्थोक्त.। प्रवर्त्तना तु फलार्थमितिवत्,प्राप्तावप्रतिप्रवृत्तौ निवर्त्तनाप्याक्षिप्ता । प्रवर्त्तयिता तावत्प्रवर्त्तन्य. प्रारभत इति तदपि व्याख्यातम्। असम्भवे च प्रवर्त्तयितुरेवाभाव इति प्रतिनिध्यभाव. सामर्थ्योक्तो ऽविकृतःसाक्षादसमर्थस्य च क्वचिदनपेक्षणात्।प्रविवेके तु दर्शनसामर्थ्यं लब्धं व्याख्यातमिति समस्यामिहितं भाष्यं च व्याख्यातम् ॥१००॥

अचेतनविषये तर्ह्येवंविधधर्मकलापात् कर्तृता न प्राप्नोतीत्याशङ्क्याह ।

धर्मैरभ्युदितैः शब्दे नियमो न तु वस्तुनि ।
कर्तुर्धर्मविवक्षायां शब्दात्कर्त्ता प्रतीयते ॥ १०१ ॥

अभ्युदितैरुत्कैरेतै. प्रागन्यतः शक्तिलाभादिभिः प्रवर्तयितृत्वादिभिः प्रवर्त्तयितृत्वादिलक्षणैर्धर्मैः स्वभावैरुपलक्षित. कर्त्ता, इत्येवंलक्षणो नियमो ऽवश्यंभाव' शब्दविषये समाश्रयणीयः। शब्देन यस्यैते धर्मा प्रत्याय्यन्ते स कर्ता बोद्धव्यः। न तु वस्तुविषयतया धर्माणामेषां सम्भवो ऽन्वेषणीयः। येनाचेतनविषये, अग्निर्दहति, पचाः पञ्चन्ति, स्थाली पचतीत्यादौ, कूल पतति नदी वहतीत्यादौ च कर्तृत्वं न स्यात् । एते धर्मा यदा कर्तृलक्षणाय विवक्ष्यन्ते शब्देन च यथाविवक्षं प्रत्याय्यन्ते तदा शब्दात् कर्त्ता सुप्रतिष्ठितलक्षणः प्रतीयत इति करणमिव कर्त्ता ऽपि वैवक्षिकः प्रतिपादित.।एवं च कृत्वा चेतनेषूपचरितमपि न भवति कर्तृत्वम् । सर्वशास्त्रवृत्तित्वात्प्रयोगस्य मुख्यतासम्भवात् । व्याकरणं हि शब्दार्थो ऽर्थ । न च स्वार्थ. ततश्च व्याकरणात् अर्थी कर्त्ता, तथायुक्तश्चेति लक्षणद्वयं चेतनाचेतनविषयतया तत्प्रणीतं तेन कौशलमित्युक्तं भवति ॥ १०१ ॥

यदा च विवक्षाधीनं स्वातन्त्र्यं तदेवमपि सिद्धम्भवतीत्याह ।

एकस्य बुद्ध्यवस्थाभिर्भेदे च परिकल्पिते ।
कर्मत्वं करणत्वं वा कर्तृत्वं वोपजायते ॥ १०२ ॥

हन्त्यात्मानमात्मनत्येकस्यैवात्मनो विवक्षाप्रापितरूपभेदाद्धेतोः कारकत्रययोगो दृश्यते। स चास्तवैकाकारव्यवहार न घटेत। न ह्येकस्य वस्तुनो युगपद्भिन्नानेकरूपता शक्या ऽवगातुम् । नचामूर्त्तस्यात्मनः

शस्त्रादिव्यापारजन्यवधसम्भवविवक्षा तु शब्दनिबन्धना न विद्यन्ते। तत्र तयोर्हिबुद्धेरवस्था प्रतिहासे नानात्वं तदनुसारेण विवक्षया भेद परिकल्प्य शस्त्रायुद्यमननिपतनव्यापार द्रव्याणि हन्तीति हि कर्त्तात्मैवात्र विषयभावापतितस्तत्रैव कर्मसंकल्पनाशयाविवक्षायां शस्त्रादिव्यापारनिरास करणत्वमात्मन । कर्मकरणे ह्यत्र भेदेन दृष्टे इति नास्तिरास्माय कर्त्तृवाद तथाऽऽख्यते भेदन। अत एव वार्त्तिके कर्मबद्धावो ऽनन न्यायेन प्रत्याख्यात । सिद्ध तु प्राकृतकर्मत्वादात्मसयोगे कर्मकर्तृ कर्मदर्शनादित्यात्मानमात्मना हन्तीति ॥ १०२ ॥

अन्यदपि शब्दकर्मकत्व सिध्यतीत्याह ।

उत्पत्तेः प्रागसद्भावो बुध्यवस्थानिबन्धन ।
अविशिष्टः मता ऽन्येन कर्त्ता भवति जन्मनः ॥ १०३ ॥

अङ्कुरो जायत इति जानकर्तृत्व सतोऽसतो वा । तत्र "यदि सज्जायते कस्मादथासज्जायत कथ"मित्यादिना पूर्व वास्तवरूपाश्रयेण सदसत्पक्षभेदेनापि जानकर्तृत्वमुक्तमित्युक्तम् । उपचारसत्ताश्रयेण तूत्पत्ति सिध्यति उपचर्य तु कर्त्तारमित्यादिना । अत्र वैवक्षिके कर्तृत्वे उपचारार्थो ऽपि न कश्चिदित्युच्यते। तथा हि विवक्षारूपाया बुद्धे. शब्दनिमित्ताया ये ऽवस्थाविशेषा. प्रतिनियतशब्दनिबन्धनाः, तदाश्रयेणात्र क्रियान्तरकर्तृकत्वतुल्यं जानकर्तृत्व सिद्धम । विवक्षाप्रापितसन्निधाने ह्यर्थे ऽङ्कुर इति शब्दः प्रयुज्यते । स च सदेव वस्तु दर्शयति । ततो जायत इति पदसमभिव्याहारावधारितजन्मना ऽस्य कुतः सत्त्वमिति बुध्या निश्चितसत्त्वस्य क्रियासिद्धावुपगृहीतसामर्थ्यस्य बाह्येन रूपेण जन्मेति वाक्यार्थो ऽवतिष्ठते । ततश्च येन रूपेण सत्त्वं न तेन कर्तृत्वं येन कर्तृत्वं न तेन सत्त्वमिति नेयं वास्तवी व्यवस्था अपि तु शाब्द्येवेत्यर्थ । शब्दार्थ एव चार्थ इत्यसकृदुक्तत्वात् प्रयोगस्य मुख्यतैव सर्वत्र, नोपचारार्थ कश्चित् ॥ १०३ ॥

वृत्तचर्यायामपि चाङ्कुरो जायत इति प्रयोग उपपन्नइत्याह ॥

कारणं कार्यभावेन यदा वा व्यवतिष्ठते ।
कार्यशब्दं तदा लब्ध्वा कार्यत्वेनाथ जायते ॥ १०४ ॥

कार्यमुखेन कर्तृता जन्म च सदसत्पक्षभेदेन नोपपद्यत इति बुद्ध्यवस्थासमाश्रयेण पूर्वमुपपादितम् । इदानीं कारणमुखेन प्रतिपाद्यते । अत एव पक्षान्तरसूचको वा शब्दः । तत्र कारणात्पृथगेव कार्यमाजायते इति पूर्वपक्ष उक्तम् । परिणामदर्शने त्वभद्रपक्ष इदं कथ्यते । कार्यकारणयोः प्रकृतिविकाररूपतया क्षीरं दधि सम्पद्यते, बीजमङ्कुरो जायत इत्यभेदेन व्यवहारादेकस्यावस्थातुरवस्थाविशेषस्वीकरणमात्र सत्तन्त्रमिति कार्योन्मुखतायां विशिष्टविकाराभिनिर्वृत्तिप्रक्रमे विशिष्टोत्तरावस्था विशेषगतवाचकाध्यासात् कारणमेव सदुपकर्तृ भवदुत्तरावस्थासाधनलक्षणं जन्म प्रतिपद्यत इति युज्यते जायते ऽङ्कुर इति प्रयोग इत्यर्थः ॥ १०४ ॥

युक्तं चैतद्यदुत्तरकारणमेव कार्यभावेनावतिष्ठत इति स्वसिद्धान्तेनैतदुपपादयितुमाह ॥

यथाऽहेः कुण्डलीभावो व्यग्राणां वा मणग्रता ।
तथैव जन्मरूपत्व सतामेके प्रचक्षते ॥ १०५ ॥

पूर्वं सदसत्पक्षभेदेन कार्यकारणभावासम्भवं प्रतिपाद्य [त्वाङ्कुरतास्विव यति]रित्यादिना विवर्तनयेन सिद्धान्तितम् । तत्र तेषामेव जन्मार्थो विचार्यमाणो ऽवतिष्ठते । यदुत तथा तथा सन्निवेशमात्रम् । तद्यथा सर्पस्य कौटिल्यमनर्थान्तरभूतम् । पृथग्भूतानां चाङ्गुल्यादीनां सङ्घातो मुष्ट्यादिरित्यवस्थाविशेषमात्रसारः कार्यकारणभाव इत्यवस्थातुरभेदादवस्थास्वनुगमात्सत्त्वे जातिकर्तृतासिद्धिः ॥ १०५ ॥

इदानी कार्यकारणयोर्भेदवादे ऽपि वास्तवेन रूपेण जातिकर्तृत्वं प्रतिपादयितुमाह ।

विभक्तयोनि यत्कापि कारणेभ्यः प्रवर्तते ।
सा जातिर्व्यक्तिरूपेण तस्यापि व्यवतिष्ठते ॥ १०६ ॥

विभक्ता व्यतिरिक्ता योनिः कारणमस्य तस्यासतो ऽपि कार्यमात्रस्य कारणेभ्य सकाशाद्व्यतिरिक्तस्योत्पत्तेः । पूर्वं व्यक्तिरूपेणासत्वे ऽपि जात्यात्मना सत्त्वात् सज्जायत । या तिरूप्य साधनाविनियोगात् जातिरेव कारणानां स्वाभिषङ्गकसम्पत्यर्थं प्रयो-

जिकेति सैव व्यक्त्यात्मना जायत इति व्यवहारात्जातिरूपेण कर्तृत्वं व्यक्तिरूपेण जन्यत्वमिति अत्यन्तव्यतिरेकाभावाज्जातिव्यक्त्योः सामानाधिकरण्यादुपपद्यत इत्यर्थः ॥ १०६ ॥

इदानीं शब्दार्थः ऽर्थ इति स्वसिद्धान्तं निगमयितुमाह ॥

भावेष्वेवं पदन्यासः प्रज्ञाया वाच एव वा ।
नास्तीत्यप्यपदे नास्ति न चामद्वियते मनः ॥ १०७ ॥

आकारावग्रहेण ज्ञानशब्दयोः प्रवृत्तेः, निरालम्बनतायोगात्प्रतीयमान एवाकारो भावशब्दवाच्य सदेव विषय, पदविन्यासस्थानं तयोः । तथा हि नास्तीत्यनालम्बनैकत्वे परपरिकल्पितं स्वयमुत्प्रेक्षित वाक्यमवलम्ब्य जायते येन सदाकारावलम्बनाभ्यां ज्ञानशब्दाभ्यामनयोर्विशेषाभावः स्वाकारग्रहसाम्यादिति व्यवहारे सर्वमेव भावाभावजातं समानम् । बहिर्वस्तुचर्चा तु नाङ्गं इत्यत एव व्यवहारप्रतिसमाप्तेरिति सदाकारावग्रहप्रवृत्तौ जायते ऽङ्कुर इति प्रयोगः सूपपाद इत्यर्थः ॥ १०७ ॥

बुद्धिशब्दविषयभावाव्यतिरेकेण व्यवहारे वस्तूनां बाह्या सत्ता न काचन विद्यत इत्याह ॥

बुद्धिशब्दौ प्रवर्तेते यथा भूतेषु वस्तुषु ॥
तेषामन्येन तत्त्वेन व्यवहारो न विद्यते ॥ १०८ ॥

अभिधानप्रत्ययावेव व्यवहार इति । तत्र यथाप्रत्ययं यथाभिधानं च पदार्थतत्त्वमेषणीयं, नान्यपदार्थस्वरूपमप्रतीयमानमनभिधीयमानं चाश्रित्य प्रत्यवस्थेयमित्यर्थः । तथा चार्थोल्लेखरहितायाबुद्धेरयोगात्तत्सिद्धेन सत्त्वेन जायमानः कर्ता निरूपितश्चाभिधीयते । यद्वा नास्तीति प्रत्यये बहिरसन्नपि पदार्थो ऽनियतदेशकालयोर्निषिध्यमानो देशकालान्तरोपलब्धेन नानाकारेणावभासमान कर्तृप्रत्ययेनाभिधीयते । तथा कार्योन्मुखतायामभिगतमपि वस्तु तज्जातीयानुभववासनया बुद्धावभिमुखीभवत्समर्थहेतुवशाज्जायत इति जन्मन कर्तृत्वेनाभिधीयत इति प्रकरणार्थः ॥ १०८ ॥

इदानीं सम्बन्धसमुद्देशोक्तं न्याय चेतसि सन्निवेश्याद्वैतनयेन जन्मनाशासम्भव प्रतिपादयति ॥

आकाशस्य यथा भेदश्छायायाश्चलनं यथा ।
जन्मनाशावभेदे ऽपि तथा कैश्चित्प्रकल्पितौ ॥ १०९ ॥

निष्प्रदेशस्याप्याकाशस्य नित्यसंयोगिपदार्थप्रविभागेन देशभेदाध्यारोपो न भेदपरिकल्पनेत्युक्तम्। तासामभावरूपाया छायायाश्च निष्क्रियत्वे ऽपि वारकद्रव्यक्रियानुगामितसक्रियत्वाध्यारोपः । एवमभावस्य पूर्वं निराकृतत्वात् जन्मनि कारणव्यापारस्य च निषेधात् विनाशे ऽपि तदनुपपत्तेरावेदितत्वात् । निर्हेतुकविनाशप्रतिषेधाद्भिन्नस्याद्वयस्य तत्त्वस्य नित्यस्य जन्मनाशयोगादविद्यावशात् प्रतिभासमात्रनिष्ठजन्मनाशवशेन परिकल्पितभावाभावरूपतया व्यवहार इति सम्बन्धसमुद्देश एव विस्तरतो निर्णीतम् । एवं च भावाभावव्यवहारवज्जायत इत्यर्थो ऽविचारितरमणीय. सिद्ध इत्यर्थ ॥ १०९ ॥

तत्र कल्पितत्वमुपपादयितुमाह ॥

यथैवाकाशनास्तित्वमसन्मूर्त्तिनिरूपितम् ।
तथैवमूर्त्तिनास्तित्वममदाकाशनिश्चयम् ॥ ११० ॥

व्यापकस्याकाशस्य सर्वत्र भवतो वस्तुतो न क्व चिदभावः । ततश्चासदप्याकाशनास्तित्वं परिमितदेशघटादिमूर्त्तिवत्सम्भवतो न कल्प्यते । यत्र हि घटादयस्तत्रासदाकाशमिति व्यवहार. । एवं मूर्त्तीनामपि पटादीनां क्वचित् नास्तित्व भावतो विद्यमानमपि । स्वस्वभावस्य स्वरूपविनाशायोगादसत्वभावत्वे कदा चिदप्यभावादिति आपादकाकाशस्यान्तराले दर्शनादध्यवसीयते । अन्तराले हि मूर्त्तीनां सत्तायास्तिराधाने गगनमेव, तद्रहितमवधारयन्तो ऽन्यदर्शना नास्तीत्यध्यवस्यन्तीति । आविर्भावसत्तायां स्वदेशे ऽवश्य ते जन्म प्रतिपद्यन्त इत्येतत् प्रकरणादवगन्तव्यम् । तथा च द्वयोरपि जन्मनाशयोः कल्पितत्वमुपपादित भवति । यथाध्यवसायं च व्यवहारजन्मनिरोधा एव पदार्थाः सिद्धाः । न ह्याकाशमभावो वस्तुतः पदार्थानामभावभावे च सदैवावस्थानाज्जन्मार्थो ऽपि न कश्चित्॥११०।

इदानीं वास्तवे ऽपि जन्मनि, प्रकारान्तरेण जायत इति प्रयोग समर्थयितुमाह ॥

यथा तदर्थैर्व्यापारैः क्रियात्मा व्यपदिश्यते।
अभेदग्रहणाद्धेव कार्यकारणयोः क्रमः॥ १११॥

कारणं कार्यभावेनेत्यादिना कार्यकारणयोर्व्यावहारिकमभेदमाश्रित्य समर्थितम्। अधुनातूपचरितभेदाश्रयेणोच्यते। यथा हि पचेर्विक्लित्तिः प्रधान्यं इति तदर्थे गुणव्यापारेऽधिश्रयणोदकासेचनादिभिः कर्त्रादिगतैस्तद्भेदमध्यारोप्य प्रधानक्रियारूपमुच्यते। अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणाः क्रियाः प्रधानस्य कर्तुः। पाकः, काष्ठानि पचन्ति, आविक्लिद्यन्ते ज्वलन्तीति करणस्य पाक इत्यादिना। तथा कार्यार्थत्वात् कारणस्यैवानुपूर्वीक्रमेऽभेदेन व्यवहारे। तथा च कारणमेवाङ्कुरशब्दाभिधेयं सत्कर्तृ कार्यात्मना जायत इति युज्यते व्यपदेष्टुमित्यर्थः॥ १११॥

ननु च कार्यकारणयोरभेदाध्यारोपेऽपि जन्मतः कर्तृत्वं कार्यस्यैव युज्यते न तु कारणस्य सिद्धत्वादित्याशङ्क्य प्रकृतिविकारविषयपर्यायतः कर्तृत्वं कार्यकारणयोः प्रयोगभेदेनावस्थापयितुमुपक्रमते॥

विकारो जन्मनः कर्त्ता प्रकृतिर्वेति संशये।
भिद्यते प्रतिपत्तृणां दर्शनं लिङ्गदर्शनैः॥ ११२॥

इह प्रकृतिविकारविषयसामानाधिकरण्यं दृश्यते क्षीरं दधि सम्पद्यत इत्यादौ। अत्र सन्देहः। तथा हि। गुणप्रधानभावस्य समन्वयान्यथानुपपत्त्यवश्यंभावात् किमत्र प्रकृतिः प्रधानं विकारोऽङ्गं, उत विपर्ययः। तत्र प्रधानस्य कर्तृत्वं जनिं प्रति। अङ्गस्य तु प्रधानद्वारको जनिसंस्पर्श इति सामानाधिकरण्यमाश्रयदारूपभेदेन निर्देशो बीजादङ्कुरो जायत इति तदा ऽसंशयमेव विकारस्य कर्तृत्वम्। अपादानतया प्रकृतेर्निर्देशात्। जनिकर्तुः प्रकृतिरिति। तत्र विकारकर्तृणामाशय। आत्मलाभस्य जन्माख्या असत्ता वात्मा लब्धव्यः। तथा च विकार इति स एवात्र कर्त्ता युक्तः। प्रकृतिकर्तृकास्तु मन्यते। असतो विकारस्यात्मलाभं प्रत्यभिमुख्यायोगात्तल्लक्षणे जन्मनि कर्तृतानुपपत्तिः। आत्मलाभोन्मुखतो हि जन्म सिद्धान्तयिष्यते। प्रकृतिरूपेण चात्मनो लब्धत्वादुत्तरावस्थालक्षणात्मला-

भौन्मुख्यमवतिष्ठत इति तत्र प्रकृतेरेव कर्तृत्वमुचितमिति ॥ ११२ ॥

तदेतद्दर्शनद्वय लिङ्गदर्शनैः प्रयोगभेदस्वभावैर्विषयविभागनाच्चस्थापयितुमाह ॥

कल्पिसम्पद्यमाने या चतुर्थी सा विकारतः ।
सुवर्णपिण्डप्रकृतौ वचनं कुण्डलाश्रयम् ॥ ११३ ॥

कल्पिसम्पद्यमाने चतुर्थी वक्तव्येति वार्तिकस्थायमर्थः । सम्पादनक्रियाकर्तरि चतुर्थी विधेयेति प्रयोगमूलत्वात् स्मृतेर्विकारवचनाच्च चतुर्थी श्रूयमाणविकारस्यैव सम्पत्तिक्रियाकर्तृत्वमावेदयते । मूत्राय सम्पद्यते यवागूर्मूत्रं जायत इत्यर्थः । प्रकृतेरत्र विकारद्वारेण क्रियासमन्वयो न साक्षात् । भेदविवक्षायां तु जनिकर्तुः प्रकृतिरित्यपादानपञ्चम्येवात्र कारकविभक्तिः । यवाग्वा मूत्रं जायत इतिअभेदविवक्षायां तु चतुर्थ्या अवकाश ।अत एव तत्र सन्देहे सत्यय निर्णयो व्यवास्थापि । तथा पुनरावृत्तः सुवर्णपिण्डः पुनरपरया ऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवत इत्यत्र भाष्यप्रयोगे सुवर्णपिण्डस्य प्रकृतित्वे ऽपि न तद्गतमेकत्वं दृश्यते, अपि तु विकारूपकुण्डलद्वित्वाश्रयं भवत इति द्विवचनं कर्तृप्रत्ययरूपं दृश्यत इत्यस्मादपि लिङ्गाद्विकारस्य कर्तृत्वावसायः ॥ ११ ॥

लिङ्गान्तरं विषयभेदेन प्रकृतिविकारयोः कर्तृत्वानुमापकमाह ॥

वाक्ये सम्पद्यतेः कर्त्ता सङ्घश्च्व्यन्तस्य कथ्यते ।
वृत्तौ सङ्घीभवन्तीति ब्राह्मणानां स्वतन्त्रता ॥ ११४ ॥

अभूततद्भावे कृभ्वस्तिविवक्षायां सम्पद्यकर्त्तरि च्विर्विधीयते तस्यार्थप्रदर्शनाय यद्वाक्यं क्रियते तत्र विकारस्य सम्पद्यकर्तृत्वं दृश्यते । तथा हि असङ्घो ब्राह्मणाः सङ्घो भवतीति सङ्घगतैकत्वप्रत्ययस्य वचनस्य च दर्शनात् सङ्घ एव कर्त्ता । वृत्तौ तूच्यते सङ्घीभवन्ति ब्राह्मणा इत्यत्र प्रकृतिभूतब्राह्मणगतबहुवचनदर्शनात् प्रकृतेः कर्तृत्वावसायः । तदेव प्रयोगभेदेन प्रकृति विकारयोः कर्तृत्वमुन्नेयम् ॥ ११४ ॥

इदानीं प्रकृतेः कर्तृत्वे भाष्यकारोक्तं लिङ्गमाह ॥

स त्वं सम्पद्यते यस्त्वं न तस्मिन्युष्मदाश्रया ।
प्रकृतिः पुरुषस्यास्ति प्रकृतेः स विधीयते ॥ ११५ ॥

अत्वं त्वं सम्पद्यते त्वद्भवतीति भाष्य उदाहृतम् । अत्र युष्मदर्थो विकारः न च तदाश्रयो मध्यम पुरुषोऽदृश्यते अपि तु भवतीत्यर्थयुष्मदर्थप्ररूढप्रकृतिगतप्रथमपुरुषदर्शनात्, प्रकृतेरेव कर्तृत्वावसाय. ११५

तदेतद्विषयभेदेन प्रयोगप्रामाण्यादवस्थितं कथ युज्यत इत्याक्षेपपत्तिमाह ॥

पूर्वापरस्थामजहत्संस्पृशन् धर्ममुत्तरम् ।
सम्मूर्च्छित इवार्थात्मा जायमानोऽभिधीयते ॥ ११६ ॥

इह न स्वयैव निष्पत्त्या जायत इत्यभिधीयते ऽपि तु पूर्वा कारणावस्थामविजहदुत्पद्यदिति प्रकृतेरेव कर्तृत्वसम्भावना नापि. सर्वात्मनोदासीनोऽपि तूत्तरावस्थाविशेष सस्पृशन्नासादयन्निति विकारस्यापि कर्तृत्वसम्भावना । एवं पूर्वापरावस्थोपाध्यवच्छिन्नमेकं पूर्वावस्थानुगुण्येनोत्तरावस्थासादनोन्मुखं प्रचीयमानरूपमिवाव्यवसीयमानं जायत इति धात्वर्थप्रत्ययोपजनगुणमासादयति । तथा च प्रकृतिविकारयोः सामानाधिकरण्यं, उभयोरपि च कर्तृत्वमुपपद्यते ॥ ११६ ॥

यथैवं सर्वत्रैवोभयोः कर्तृत्वं स्यादित्याशङ्क्याह ॥

सव्यापारतरः काश्चित्कांचिद्धर्मः प्रतीयते ।
संसृज्यन्ते च भावानां भेदवत्यो ऽपि शक्तयः ॥ ११७ ॥

द्वयोरपि प्रकृतिविकृत्योरुक्तेन न्यायेनाभेदापत्त्या जातिसमन्वयसहत्वे ऽपि कर्तृप्रत्ययोत्पत्तौ क्वचिद्विकार.सव्यापार क्वचिन् प्रकृतिरित्युक्तमप्येवमपि च विषयविभागो न. जायत इत्यत्र यथोक्तेन प्रकारेण द्वयोरपि कर्तृत्वमुपपादितम । यतो भावानामन्यत्र भिन्ना अपि शक्तयः क्वचित्संसर्गमपि प्राप्नुवन्तीत्यर्थ. । यद्वा सर्वत्रैव द्वयोरपि कर्तृत्वमेकस्य तु साक्षादिति प्रकर्ष. सव्यापारतर इत्युक्तः।प्रकृतिविकृत्योर्हि सामानाधिकरण्यान्यथानुपपत्त्या एकस्य ज-

निकर्तृत्वे नान्तरीयकं अपरस्यापि तद्वेदितव्यम् । यो हि विधेयः स प्रधानभूतः प्रकर्षेण जनिव्यापारवान् अन्यस्त्वनूद्यमानो गुणोऽप्रकृष्टव्यापारः ॥ ११७ ॥

तथा च संसर्गः कर्तृशक्त्योर्यदि तर्हि संसर्गः त्वद्भवतीत्यत्र विकारावस्थाश्रयः पुरुषः कस्मान्न भवतीत्याशङ्क्याह।

विपरीतार्थवृत्तित्वं पुरुषस्य विपर्यये ।
गम्येत साधनं ह्यत्र सव्यापारं प्रतीयते ॥ ११८ ॥

अत्वं त्वं सम्पद्यसे त्वद्भवसीत्येवं युष्मदर्थाश्रयेण मध्यमे पुरुषे विवक्षिते ऽर्थो न प्रतीयतेऽयुष्मदर्थः प्रकृतिः युष्मदर्थो विकृतिरिति । युष्मदर्थः प्रकृतिः सव्यापारा प्रत्ययोत्पत्ताविति तस्यान्या विकृतिः प्रतीयते। सम्पद्यत इति हि साधनं युष्मदर्थः, सव्यापारं प्रतीयत इति तस्य फलवत्तायां विकारान्तरमनुषज्यते। तथा च युष्मदर्थस्तद्विपरीतमस्मदर्थभावमापद्यत इति विज्ञायेत । तस्मादयुष्मदर्थस्य प्रकृतेः सम्पद्यमानत्वसंप्रत्ययार्थं प्रथम एवात्र पुरुषो न्याय्यः ॥११८॥

विपरीतार्थवृत्तित्वमेव व्याचष्टे

त्वमन्यो भवसीत्येषा तत्र स्यात्परिकल्पना ।
राज्ञो भृत्यत्वमापन्ने यथा तद्वद्विनिर्भवेत् ॥ ११९ ॥

यथा राजा सम्पद्यस इत्युक्ते राजार्थस्य प्रकृते युष्मदर्थस्याख्यातपदेन प्रत्यायनात् सव्यापारस्य स्वार्थविपरीतभृत्यभावेन सम्पत्तिक्रियाकर्तृत्वं प्रतीयते । तथा त्वद्भवसीत्युक्तेऽन्यावस्थासाधने युष्मदर्थस्य कर्तृत्वावसायात् विवक्षितोऽर्थोऽयुष्मदर्थस्य युष्मदर्थतापत्तिलक्षणो न प्रतीयेतेति तत्सम्प्रत्ययार्थं प्रथमपुरुषो न्यायान् । न ह्यन्यदभिधित्सन्नन्यदभिदधातीत्यम्, सुवर्णपिण्डः कुण्डले भवत इत्यत्र तु विकारस्यापि कर्तृत्वम् । कुण्डले सुवर्णपिण्डात्मतया परिणमेते इति विपरीतार्थवृत्तित्वं न भवति । भवतौ कर्तुरवश्यं विकारापेक्षाभावात् । त्विविषय एव हि कर्तुरवश्यं विकारान्तरावेशः कथ्यते । यस्मात्प्रकृतिविवक्षायां द्विर्विधीयते तेनात्मना च सिद्धा प्रकृतिरिति विकाररूपा साध्यमाना सव्यापारा विशिष्टविकारनिवृत्तिप्रतिपत्तये विकारशब्दाभिधेया कर्त्ता न्याय्या । ण्यन्तस्य क्रियायोगे गतिसंज्ञाविधानात् । गतेः क्रियाविशेषणत्वात् । असत्त्वक

चनेन कर्तृत्वायोगात् प्रकृतेरेव कर्तृत्वमुचितं विकाररूपगतिसंज्ञत्वान्नाख्यविशेषणविशिष्टायां क्रियायाम् । त्वद्भवति सङ्घीभवन्ति ब्राह्मणा इति वाक्ये तु तस्य प्रकृतिविकृत्योः स्वशब्देनोपादानाद्यथाविवक्षं गुणप्रधानभावात् उभयोः कर्तृत्वनियमः । तथा हि कदाचित्प्रकृतेर्निजमेव तत्त्वं सम्पदौ व्यापृतं प्राधान्येन विवक्षितं भवति। कदा चित् समारोपितविकाररूपम् । तद्यथा महद्भूतमब्रह्मा इत्यत्रामहदर्थप्रकृतिरूपस्य कर्तृत्वात् स एव महच्छब्देन विकारवाचिना विधीयत इति गौणत्वान्महदर्थस्यात्वं न भवतीत्युक्तम् । महद्भूता ब्राह्मणीत्यत्र तु विकाररूपैव महदर्थस्य भावित्वेन कर्तृतया विवक्षितत्वात् समानाधिकरणलक्षणो भवत्येव पुँवद्भाव इत्युक्तम् ॥ ११९ ॥

गतमानुषङ्गिकम् । इदमिदानीं वक्तव्यम् । प्रागन्यतः शक्तिलाभादित्यादिना स्वातन्त्र्यं व्याख्यातं तच्च प्रयोज्यकर्तुर्नोपपद्यते । स हि करणादिवत् प्रयोजकव्यापारे न्यग्भवन्न स्वतन्त्रः सत्यपि स्वव्यापारे स्वातन्त्र्ये । ततश्च स्वातन्त्र्यनिबन्धना कर्तृसंज्ञा न स्यादस्येति पाचयत्योदनं देवदत्तेन यज्ञदत्त इत्यत्र देवदत्तात्प्रयोज्यकर्तुस्तृतीया न स्यात् । तथा च वार्त्तिकम् । स्वतन्त्रस्य कर्तृसंज्ञायां हेतुमत्युपसङ्ख्यानमस्वतन्त्रत्वादिति। हेतुः प्रयोजकः तद्वति प्रयोज्य इत्यर्थः । हेतुसंज्ञायास्त्वध्येषणे स्याद्विषयो यत्र नियुज्यमानस्यापि स्वातन्त्र्यानपायात् तत्प्रयोजकत्वं न विरुध्यते इति हेतुमतीत्युपलक्षणं युक्तम् । अत्र परिहारवाक्यं, न वा स्वातन्त्र्यादिति । स्वव्यापारे ऽस्त्येव प्रयोज्यस्य स्वातन्त्र्यमिति सिद्धा कर्तृसंज्ञा । न त्वेवङ्करणादीनामपि स्यात् । नैतदस्ति । तेषां यथास्वं करणादिसंज्ञाविधानात् । प्रयोज्यस्य तु न कदा चिदन्या संज्ञोक्तेति कर्तृसंज्ञैव । एवं स्थिते प्रयोजकायत्तत्वात् प्रयोज्यप्रवृत्तेः कथं स्वातन्त्र्यमित्याशङ्क्योपपादयति ।

सम्भावना क्रियासिद्धौ कर्तृत्वेन समाश्रितः ।
क्रियायामात्मसाध्यायां साधनानां प्रयोजकः ॥ १२० ॥
प्रयोगमात्रे न्यग्भावं स्वातन्त्र्यादेव निश्चितः ।
अविशिष्टो भवत्यन्यैः स्वतन्त्रैर्मुक्तसंशयैः ॥ १२१ ॥

यस्तावदप्रवृत्तक्रियः प्रयोज्यः सो ऽनुमितक्रियासामर्थ्य एव प्रयुज्यते । अन्यथा प्रयोग एव न स्यात् । न ह्यशक्त· कस्यां चिक्रियायां केन चिद्विनियुज्यते सचेतसा । ततश्चावधूतशक्ति सम्भावितक्रियः कर्तैव स्वतन्त्रो विनियुज्यते । यो ऽप्यात्मसाध्यायां क्रियायां प्रवृत्त', सव्यापारः करणादिकारककार्यप्रयोजनमन्तरेण प्रवृत्तक्रिय. सन् प्रयुज्यते विरामाशङ्कायां मा विरंसीदिति बुध्या, सो ऽपि स्वतन्त्रः कर्तैव प्रयोज्यः, स्वव्यापारस्वातन्त्र्यादेव च प्रयोगमात्रे प्रयोजकप्रैषात् न्यग्भावमायत्ततां विनिश्चितः प्राप्त' । क्रियासिद्धये हि प्रैषः । एवं च क्रिया सिध्यति । यदि साधनान्तरविनियोगलक्षणं स्वातन्त्र्यं प्रयोज्यः प्रतिपद्यते नान्यथेति न प्रयोगेण स्वातन्त्र्यं विरुध्यते । विषयभेदाच्च प्रयोगे पारतन्त्र्यं स्वव्यापारे स्वातन्त्र्यमिति । उपाये एव च स्वव्यापारे स्वतन्त्र्यं प्रयोगे पारतन्त्र्यस्य । एवमन्यप्रयोज्यतया स्वाधीनतया विश्चितैरपरैः सम्मतः स्वतन्त्र· प्रयोज्य·सिद्धः । तदुक्तं वार्त्तिके । इतरथा ह्यकुर्वत्यपि कारयतीति स्याद्न कुर्वन्तीतिति चेत् स्वतन्त्र इति । उदसनिसाप्यस्याशक्तस्य प्रयोगानुपपत्तेः । सम्भावितस्वातन्त्र्य एव प्रयोज्य इत्यर्थः । यद्येवं स्वतन्त्रस्य प्रयोजको हेतुरित्येव स्वव्यापारे स्वतन्त्राणां करणादीनामपि प्रयोजकस्य प्रयोज्यस्य कर्तुः हेतुसंज्ञाप्रसङ्ग· । भवतु को दोष इति, हेतुविषय एव प्रैषो धात्वर्थे ऽन्तर्भवेत् फलार्थत्वात् कर्तृभावनाया धात्वर्थस्य कर्मणश्च तथा संस्पर्शात् । अकर्मकत्वात् विषयेषु कारणादिविषयो नियोगो वस्तुत· सन्नप्यनवधारित इति तत्प्रत्यायनाय णिजुत्पद्यते । शब्दाद्विशिष्टसाधनक्रियाभावनाभावो गम्यते । न तु करणादीनां प्रवणत्वम् । किं च प्रयोज्यस्यापि हेतुसंज्ञायां तत्प्रयोजक इति तच्छब्देन स्वतन्त्रस्य प्रत्यवमर्शो ऽनर्थकः । करणादिप्रयोजकव्यावृत्तये हि स· । तस्यापि तु करणादेः स्वव्यापारस्वातन्त्र्याश्रयेण प्रयोजकस्य हेतुसंज्ञायामनर्थकः प्रत्यवमर्शः । किं च हेतुसंज्ञैवानर्थिका । कर्तृमात्रस्यैव तस्य कर्तृमति णिजित्येवास्तु । तथा च भीस्म्योर्हेतुभये भियो हेतुभये षुक् बिभेतेर्हेतुभय इति अत्र कर्तृभय इति वचने ऽनिष्ट स्यात् । तस्मात्स्वतन्त्रस्य प्रयोजक इति करणादिप्रयोजकस्य हेतुसञ्ज्ञाव्युदासे प्रयतनीयम् । अत्रोच्यते । तस्य प्रयोजक इति सर्वनाम्नानुभवा-

तृ कर्तृसंज्ञस्य स्वतन्त्रस्य परामर्शादप्रतिलब्धकर्तृसंज्ञानां करणादीनां प्रयोजकस्य हेतुसंज्ञा न । तथा हि स्वव्यापारे स्वतन्त्रत्वे ऽपि करणादेः प्रधानव्यापारे पारतन्त्र्यात् कर्तृसंज्ञा न भवति । स्वतन्त्रश्रुतिसामर्थ्यात्तु विप्रकृष्टं सामर्थ्यं विवक्षितम् । करणादीनां स्वनुपकुर्वाणानां कारकत्वायोगात् तदन्यथानुपपत्त्यानुमीयमानस्वव्यापारे स्वातन्त्र्यं यदि परं कारकसंज्ञायामुपयुज्येत । न तु कर्तृसंज्ञायां, प्रधानाविनियोगेनाभिभूतत्वात् प्रकृष्टस्य स्वातन्त्र्यस्याभावात् । ततश्च न ते कर्तारः सन्तः प्रेष्यन्ते । प्रयोज्यस्तु प्रयुक्तो ऽपि साधनान्तराविनियोक्तृत्वलक्षणं प्रकृष्टसाधनत्वं नैव त्यजतीति सर्वथा ऽसौ कर्तैव प्रयुज्यते । अत एवोक्तं कर्तृत्वेन समश्नुत इति । भूतेन भाविना वा सम्भाव्यमानेन बुद्ध्याभिसंहृतेन कर्तृत्वेनेति सिद्धमिष्टम् ॥ १२० ॥ १२१ ॥

उक्तमिदं प्रयोगमात्रे न्यग्भावः स्वातन्त्र्यादेव निश्चित इति तदपि वा नास्तीत्याह ।

निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये ।
अभिप्रायानुरोधे ऽपि स्वार्थस्यैव प्रसिद्धये ॥ १२२ ॥

स्वार्थलिप्सया सर्वः प्रवर्त्तमानः पराधीनतां प्रवृत्तौ नापादयति । केवलं कस्य चित्प्रवृत्तिः कस्य चिदर्थसिद्धये ऽप्यङ्गमित्येतावता भृत्यादिः स्वाम्याद्याशया न प्रवर्त्तते इति न प्रयोज्यता कथ्यते । निर्वेशनिमित्ता हि भृत्यानां प्रवृत्तिः स्वार्थसाधना । वीतरागाणामपि परोपकारात्प्रवृत्तेः । परार्थसम्पादनमेव स्वार्थः फलरूपलक्षणत्वात्तस्य । तदेतद्भाष्ये ऽभिहितं सर्वं इमे स्वभूत्यर्थं यतन्ते नेह कश्चित्परो ऽनुगृहीतव्य इति । स्वभृत्यर्थं प्रवर्त्तमानेषु कः प्रयोज्यार्थ इति बोधे समाधानमप्युक्तं यदभिप्रायेषु सज्जत इति प्रयोजकाभिप्राया क्रिया सम्पादनान्तस्तदर्थः । फलाभिसन्धानेन प्रवर्त्तमानो ऽपि प्रयोज्यः साधयत्येव । एवं च कृत्वा हेतुमति चेत्यत्रोपसङ्ख्यानानि प्रत्याख्यातानि । न वा सामान्यकृद्धेतुनो ह्यविशिष्टमितिस्वरसप्रवृत्तित्वात् । सूर्यस्य माहिष्मत्यामुद्गमन कस्यामिप्रेतं काकतालीयात्समुत्पन्नमित्यभिप्रायानुवर्णनात् सूर्यः प्रयोज्यो भवतीत्यादिना पूर्वमेव समर्थितम् । अचेतनविषये ऽपि तर्हि भिक्षा वासयतीत्यादौ दासा-

यानुकूल्याभिप्रायाध्यारोपात् प्रयोजकत्वसमर्थनाय एवं योग्यतामात्रेण निमित्तमात्रहेतुप्रयोजक इत्युक्तम् । निमित्तेभ्य इति वार्त्तिकेऽप्युक्तं हेतुनिर्देशश्च निमित्तमात्रं भिक्षाविषदर्शनादित्येवं सति न विचारः कर्त्तव्यः ॥ १२२ ॥

इति भूतिराजतनयहेलाराजकृते प्रकीर्ण-
प्रकाशे कर्त्रधिकारः ।

कर्तैव प्रयोजकः सन् हेतुरिति कर्तृविचारानन्तरं हेतुं विचारयति।

प्रेषणाध्येषणे कुर्वंस्तत्समर्थानि वाचरन्।
कर्तैव विहितां शास्त्रे हेतुसंज्ञां प्रपद्यते ॥ १ ॥

संज्ञापूर्वः सरा व्यापारणा प्रेषणं, निकृष्टविषयो नियोग इत्यर्थः। यत्पुनरुच्यर्हिनं व्यापारयति तदध्येषणं, अभ्यर्हितविषयं प्रबोधनमित्यर्थः। तत्समर्थानि प्रयोज्यक्रियासम्पत्त्यनुकूलानि चेष्टितानि। अयमेव च मुख्यः प्रयोजकव्यापारः, यत्प्रयोज्यक्रियासम्पत्तिसमर्थाचरणं व्यापकत्वाद् भिक्षादिष्वपि भवति। अस्यैव निकृष्टोत्कृष्टविषयतया प्रेषणाध्येषणरूपेण प्रविभागः। तथा च गोबलीवर्दन्यायेन तल्लिङ्गणं तत्समर्थाचरणं भिक्षाविषयमत्राभिप्रेतम्। व्यवहारभेदाभेदेनैषामुपादानम्। यथा त्वभिप्रायानुविधानं प्रयोज्यत्वमुक्तं, तथा स्वाभिप्रायप्रकाशनं प्रयोजकत्वमिति तत्समर्थाचरणमेव। सर्वत्र प्रयोजकव्यापारः कर्तैवेति तत्प्रयोजको हेतुश्चेति संज्ञासमावेशार्थं चकारं व्याचष्टे। असति चकारे तदेकसंज्ञाधिकारात् कर्तृसंज्ञा न स्यादिति समावेशार्थोऽसौ। तदुक्तं वार्त्तिके, कर्तृसंज्ञायां प्रयोज्यस्य ग्रहणमिति। विहितां शास्त्र इति। प्रदेशे स्वस्यैव ग्रहणं कृत्रिमतया तथा स्यादित्यर्थः। फलसाधनयोग्याः पदार्था हि लौकिको हेतुर्द्रव्यादिविषयः। तस्यायं विशेषः। क्रियाविषयत्वेन कारकं हेतुः प्रयोज्यप्रयोजकः। अत एव कारकत्वनिबन्धनः प्रेषणादिः स्वव्यापारोऽस्य निर्दिष्टः। तत्र हेतुमति च, भियो हेतुभय, इत्यत्र कृत्रिमस्य हेतोर्ग्रहणम्। तृतीयाविधौ तु हेतावित्यत्र प्रयोजके कर्तृत्वादेव तृतीयासिद्धेर्लौकिकस्य हेतोर्ग्रहणम्। पञ्चमीविधावप्यकर्त्तरीति परिभाषितः पर्युदस्यतेऽलक्षणहेत्वोः। क्रियाया इत्यत्रापि प्रयोज्यस्य कारकत्वात् क्रियायोगाव्यभिचारात् विशेषणसामर्थ्यात् द्रव्यगुणक्रियाविषयत्वेन सम्भवव्यभिचाराभ्यां लौकिक एव हेतुर्गृह्यते। तथा धात्वधिकाराच्च। न हि धातु साधनरूपे हेतौ वर्त्तते। एवं हेतुहेतुमतोर्लिङित्यत्रापि हेतोर्धात्वर्थावशेषात् साधनस्य च धात्वर्थत्वाभावात् लौकिक एवहेतु। कृभ्वो हेतु नाच्छील्यानुलोम्येष्वित्यत्रापि न प्रयोजको हेतुः। तत्र णिज्विधानात्। कृभ इति च णिजरहितनिर्देशात्तेनात्र कृत्वा प्रातस्य कर्तुर्लौकिको हेतुर्विशेषणम्।

तेन च विरोधाभावान्न निवर्त्यते कर्त्ता ॥ योग्यतारूपेणैव च कृद्भिः कर्त्तुरभिधानान्निमित्तमात्रं हेतुरुपादीयमानो विशेषणं पुन श्रुतेरवधारण प्रकल्पयति, हेतुरेवेति । ननाव्यभिचारकारणं विद्यायश. प्रभृतिषु प्रतिपादित भवति। एते चात्र हेत्वादय. कर्तृविशेषप्रतीतिसामर्थ्यात् गम्यमाना. परम्परया पदार्था एव । अन्यथा वाक्यावयायां प्रतीयमानाः पदार्थाधिकस्य व्याख्याङ्गस्य निमित्तभावं नोपेयु ।इह प्रैषातिसर्गेत्यादिसूत्रकारेण समुच्चितो लोडिति प्रैषे णिल्लोटोर्विधानाद्विकल्पप्रसङ्ग इति भाष्ये चादितम् । पृच्छतु मा भवान् अनुयुङ्क्तां मा भवानित्यत्र णिच् कस्मान्न भवतीति । आत्मनिर्देशन प्रयोजकाश्रित प्रैषं दर्शयन् णिच प्राप्तिं परिपृष्णातीति। अत्र परिहारो भाष्ये ऽभिहित , अकर्तृत्वात् इति। स्वतन्त्रस्य कर्तु प्रयोजको हेतुरिति तस्य कर्तृत्वाभावात्तत्प्रयोजकस्य हेतुसंज्ञाभावात्तद्व्यापारे प्रैषे णिज् न भवतीत्यर्थ. । चोदकस्तु कालादे. प्रश्नाद्यशक्तस्य प्रयोज्यत्वात्प्रवृत्तस्य च नियोगानर्थक्यात्सम्भावितक्रियत्वेन कर्त्तु प्रेषणमिदमित्याशङ्क्याह । किं च भोवर्तमानाया एव क्रियाया कर्त्ता भवितव्य न भूतभविष्यत्कालाया इति । अत्रोत्तरमभिसम्बध्यस्तत्र क्रियत इति । सामर्थ्य सम्भावितो भूतभविष्यक्रियाविषय क्रियाकारकभाव । तत्र च लोडविषये प्रयोज्यक्रियैवैका सम्भाव्यत इति क्रियाया कर्ता भवति प्रयुज्यते । न त्वपर. प्रयोज्यव्यापारविषय प्रयोजकव्यापारोऽस्ति । अनन्तरं भाष्यम । यद्यकर्त्ता कर्थं प्रत्ययेनोच्यते इति । अस्योत्तर कथमस्ति न पृच्छति वर्तन इति । तदुक्त, अभिसम्बन्धस्तत्र क्रियते इमां क्रियां कुर्विति । अनन्तरमुक्त कर्त्रापि तर्ह्यभिसम्बन्ध क्रियते । अस्यां क्रियायां कर्त्ता भवेति। तथा च यथात्र सम्प्रत्यपृच्छत्यपि पृच्छिक्रियाभिसन्धानेन पृच्छधातुर्वर्तते,तथा तत्कर्त्राप्यभिसम्बन्धात्कर्तृप्रत्ययो लोटि क्रियत इति कर्त्रापि तर्ह्यभिसम्बन्ध क्रियत इत्युक्तम । एव वदता भाष्यकारेण सम्प्रत्यकर्तृत्वादत्र णिज् न भवति इत्युक्तं भवति। तथा हि नवमेवाख्याधीयमानकर्तृत्व न तु विद्यमानम् । क्रियायां कर्त्ता भवेति प्रेष्यते न तु कर्त्रैव सन् । तेन कर्तु. सतः प्रैष' । प्रयोजकसमवायात् णिजिषयो लोट्प्रत्ययस्तु कर्त्रादिषु विधीयते । धात्वर्थोपाधिस्तु तस्य प्रेष्य.। स च न धातुप्रत्ययवाच्य', अपि तु सामर्थ्यात्कर्तैव प्रयोजको

ऽवतिष्ठत इति तद्धर्मः प्रैषो ऽवतिष्ठमानो धातुप्रत्ययेन नियतकालतया-ऽवतिष्ठते । तथा च सम्प्रत्यपृच्छत्यपि पृच्छतीति प्रयोग. । णिचस्तु प्रैषो वाच्य इति शब्दोपादानत्वादभिधेयधर्मो भवन् नियतकालाभिधायिना प्रत्ययेन लडादिना कालनियमेनावच्छिद्यते । शब्देन हि प्रयन्तावुत्पन्नेन कर्तृवाचिना लकारेण तृजादिनोपात्तो य. कर्ता प्रयोजकस्तस्य सम्बन्धी प्रतीयतऽसावित्यभिधेयधर्म. । द्विविधो ह्यर्थः शास्त्रे व्याख्यानाङ्गमाचनोपाधीयते । कश्चित्प्रयोक्तृधर्मो यथा वाप्सादेर्हार्ष्यसूयाकुत्सनादि. । अन्य. प्रतिपाद्यधर्म. । तत्रायं लोड्विषयः प्रैष आबाधादिवत् प्रयोक्तृधर्म इत्यभिधेयधर्मत्वाद् व्यावृत्तः ॥ १ ॥

तदेतत्तात्पर्येण प्रतिपादयति ।

द्रव्यमात्रस्य तु प्रैषे पृच्छ्यादेर्लोड् विधीयते ।
सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः ॥ २ ॥

प्रवृत्तक्रियस्य द्रव्यमात्रस्याप्रतिलब्धकर्तृभावस्य कर्तृत्वार्थं एव प्रैषे द्योत्ये लोडुपदिश्यते । पृच्छ्यनुयुज्यादेर्धातो परः प्रत्ययः कर्त्रादिकारके वाच्य । प्रवृत्तक्रियस्य तु विरामाशङ्कायां मा विरंसीरित्यभिसन्धाय कर्तुरेव स्वतन्त्रस्य प्रयोजकहेतुव्यापारे णिज्वाचक उपदिश्यते । प्रत्ययार्थविशेषणपक्षो हि हेतुमति चेत्यत्र सिद्धान्तित. । तथा च वार्त्तिक हेतुमतीति कारकोपादान प्रत्ययपरिग्रहार्थमिति । तदेव णिज्लोड्वाच्यतया धर्मभेदाल्लोड्विषयस्य द्योतकत्वेन प्रयोक्तृधर्मत्वेन च भेदादत्र एव तु शब्दद्वयेन परस्परस्य शब्द पूर्वस्मादपकृष्य सक्रियस्येत्यनेन सम्बध्यते. । पृच्छतु मा भवानित्यादौ न प्रैषकर्तुर्वाचक. कश्चिद्विद्यते । केवलमुद्बोधयितैव कर्ता सामर्थ्यात्प्रतीयते इत्यभिधेयमात्रप्रैषात् प्रयोक्तृधर्मत्वेनाबाधादिवत् प्रतीयते प्रैषो न त्वस्य वाचकः कश्चिदस्ति । यदि तर्ह्येवमनयोः प्रैषयो' स्फुटो भेदः कथं भाष्ये चादिदं इहकस्मान्न णिज् भवति पृच्छतु मा भवानिति । लोकव्यवहारमार्गगम्या ऽयं विभाग' कृत इति प्रैषमात्र समान मत्वा पूर्वपक्ष. ॥ २ ॥

गतमेतत्, इह प्रयोज्यस्य प्रेषणाध्येषणादिना सर्वस्य प्रयोजकव्यापारेणाप्यमानत्वात् कर्मसंज्ञाप्रसङ्ग इत्याशङ्क्याह ।

गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्मतां गतः ।
नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयते ॥ ३ ॥

स्वतन्त्रं नाम परित्यजन्नेव प्रयोज्यः प्रयोजकव्यापारे पाराधीन्यं प्रतिपद्यते । न ह्यस्य प्रयोजकेन स्वातन्त्र्यखण्डना क्रियत इत्युक्तम् । इतरथा ह्यकुर्वन्नपि कारयतीति स्यादिति । तथा च प्रैषेऽपि स्वव्यापारे स्वातन्त्र्यात्कर्तृसंज्ञा भवत्येव । कर्मसंज्ञा तु प्रैषेणाप्यमानत्वात् गतिबुद्धीत्यादिना नियमिता । गत्यादिधातुविषय एव प्रयोज्यः कर्मसंज्ञो नान्यत्रेति पाचयत्योदनं देवदत्तो यज्ञदत्तेनेत्यादौ स्वधर्मेण कर्तृत्वेन प्रयोज्योऽभिधीयते इत्यर्थः ॥

ननु च प्रैष एव कार्यं प्रयुङ्क्ते न तु गुणशक्तिरिति प्रागेव प्रतिपादितम् । तत्र धातुवाच्यः प्रयोज्यव्यापारो व्यर्थविशेषणत्वादप्रधानं, प्रयोजकव्यापारस्तु णिज्वाच्यः प्रधानम् ।प्रकृत्यर्थावच्छिन्नत्वाद्धि प्रत्ययार्थः सर्वत्रैव प्रधानं, प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति । अतश्चात्र प्रयोजकव्यापारस्य प्राधान्यात्तदपेक्ष्यकर्मशक्तिरेव स्वकार्यं प्रापयति । न तु स्वव्यापारविषया कर्तृशक्तिस्तथौदनस्य विक्लित्तौ स्वातन्त्र्येऽपि न कर्तृसंज्ञा अपि तु विक्लेदनेन देवदत्तव्यापारेणेप्सिततमत्वात् कर्मसंज्ञैव पचत्योदनमिति । तदेवमत्रोभयप्रसङ्गाभावे विप्रतिषेधाभावात् कर्तृसंज्ञाप्राप्त्या सिद्धैव गत्यादिविषयेऽपि कर्मसंज्ञेति नियमार्थं आरम्भः । तथा च पचत्यादिविषये नियमेन प्रधानकार्ये प्रसारिते नि प्रतिपक्षं गुणक्रियायाः स्वातन्त्र्यं स्वकार्ये कर्तृसंज्ञां प्रवर्तयत्येवेति सिद्धम् ॥ ३ ॥

प्रयोजको हेतुरित्युक्तं कर्मणाश्चापि फलभूतस्य क्रियां प्रत्यस्त्येव प्रयोजकत्वमिति तस्यापि हेतुत्वप्रसङ्ग इत्याशङ्क्य हेतुकर्मणोर्भेदं दर्शयति ॥

क्रियायाः प्रेरकं कर्म हेतुः कर्तुः प्रयोजकः ॥
कर्मार्था च क्रियोत्पत्तिः संस्कारप्रतिपत्तिभिः ॥ ४ ॥

निर्वृत्तिविकारप्रतिपत्तिभिर्यथाक्रमं निर्वर्त्यादि त्रिविधं कर्म सम्पादकत्वात् क्रियाफलम् । कर्मात्मसम्पत्त्यर्थं क्रियां प्रयुङ्क्ते हेतुः पुनः क्रियार्थी साधनविनियोगे कर्तारं प्रयुङ्क्ते न तु साक्षात् क्रियां तत्परिशेषाय हि कर्तुः प्रवृत्तिः । तस्य कर्तुः प्रयोजक इति वचना-

द्विप्रविषयत्वाद्धेतुकर्मणोः प्रयोजकत्वस्य स्वरूपभेदः स्फुट इत्यर्थः । स्वशब्दो हेतौ यस्मादुत्पत्त्यादिभिरुपकारात् क्रिया कर्मार्था ततः कर्म क्रियायाः प्रयोजकम् । यद् यदर्थं तत्तस्य प्रयोजकमिति व्यपदिश्यते । तदुद्देशेन तत्प्रवृत्तेः । कारकान्तराणि तु क्रियार्थानि न तु तदर्था क्रियेति न तानि तस्याः प्रयोजकानि । न हि करणाद्यर्थत्वमवसितविचारो हेतुः ॥ ४ ॥

इति भूनिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे
साधनसमुद्देशे हेत्वधिकारः ।

विभक्तिविधानक्रमेण साधनानां विचारे तृतीयार्थे कर्त्तरि निर्णीते चतुर्थ्यर्थे सम्प्रदानं विचारयितुमाह ।

अनिराकरणात्कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणानुमतिभ्यां वा लभते सम्प्रदानताम् ॥ १ ॥

अन्वर्थत्वात्सम्प्रदानशब्दस्य त्यागाङ्गमिति लक्षणालाभः । त्यागो दानं दीयमानस्य स्वत्वनिवृत्त्या परस्वत्वापादनं । तत्र चाङ्गनिमित्तकारणमित्यर्थः । तथा च कर्मणा यमभिप्रैतीति लक्षणात् परिग्रह एव त्यागः कथं कारकविशेषरूपं लभते इत्याशङ्क्य कारकत्वनिबन्धनं व्यापारं क्रियासिद्धौ निर्दिशति । अनिराकरणादित्यादिना । उच्यते । तदभिप्रायेणैव त्यागात्तदेवं विधत्यागाङ्गं, स चोपाध्यायः तदभिसम्बन्ध्यमानं न निराकरोति, नापि तस्यकर्तुर्मां त्याक्षीरिति निराकरणं क्रियते । यदि हि निराकुर्यात् त्याग एव सम्पद्येत । परस्वत्वापत्तिपर्यंतत्वात्तस्यानुमन्यते च दीयमानं तथा दीयमानं न निराकरोति । बल्यादिदेवतादीनि तदविक्रियायां वा पूर्वकेऽवदाने प्रेरणमप्यर्थतया दाने प्रवर्तमानमपि सम्प्रदानव्यापारः तथा च त्यागोपकारित्वात् त्यागाङ्गं भवत्येव कारके सम्प्रदानम् । न तु च दानस्य तदर्थत्वात्तादर्थ्ये चतुर्थीप्रयोगात् किमर्थं सम्प्रदानसञ्ज्ञा । नैतन्याय्यम् । दानक्रियार्थं हि सम्प्रदानं न तु दानक्रिया तदर्थं, कारकाणां क्रियार्थत्वात्सम्प्रदानार्थं तु दीयमानं कर्मेति वाक्यार्थभूताया दानक्रियाया अतादर्थ्यात्तादर्थ्ये चतुर्थ्यां अप्राप्तौ तदर्थो संज्ञा न्याय्या रजकस्य वस्त्रं ददाति, घृतं पृथुं ददातीत्यादौ तु तदर्थो नास्ति । यो हिंसते न च हानात्मकेन ममताविच्छेदस्याक्षेपादेव परोपकारत्वोपयोगाभिसम्बन्धेन परस्वत्वापादनमपि स्वीकृतं अत्र च तदभाव इति गौणोऽयं ददातेः प्रयोगः । तत् देवताविषये तु दाने दातुः अस्वामिकत्वसङ्कल्पो विद्यते एव । एवमरोचकिने ऽन्नं ददातीत्यादौ । उपयोगाभावस्तु ज्ञानच् । शूद्राय मतिं ददातीत्यत्रापि मतिसंतानस्यापक्रामतोऽस्त्येव परोपयोगः । तथा चोपाध्यायादागमयतीत्यध्ययनसन्तानस्यापक्रामतो भवत्यपादानमुपाध्यायः । मतिसन्तानस्य चैकदेशस्त्यज्यमान इति स्वत्वनिवृत्त्यपरस्वत्वापादनलक्षणो मुख्य एव ददात्यर्थः । अन्ये तु मतेः दानस-

स्वस्वाम्यनवगमादाहुरौण इत्याहुः । कन्यां ददातीति जन्यजनकभावाव्यापकत्वादपि स्वस्वामिसम्बन्धस्य निवृत्तेर्मुख्य एव ददात्यर्थः । खण्डिकोपाध्यायस्तस्मै चपेटां ददातीत्यादौ वस्तुतो ऽसत्यपि चपेटादिस्वाम्ये तदुपकारितया दातुः स्वामित्वाभिसन्धिरस्त्येव । यद्यपि प्रतिकूलरूपत्वाच्चपेटायास्तदानीमुपयोगो नास्ति तथा ऽपि फलद्वारेणास्त्येव परोपयोगित्वम् । चपेटासहस्रं शास्त्राभ्यासयोगत्वात् फलाव्याप्तेः । सृजिदृस्मायविशेषेणोपदिष्ट इति तु तादर्थ्ये चतुर्थी । अविशेषेण गणपाठतो सृजिर्मार्जकशब्दार्थो ऽपि भविष्यतीत्यर्थः ॥ १ ॥

तदेव प्रथमं सम्प्रदान व्याख्यातम् । इदानीमुत्तर व्याख्यातुमाह ।

हेतुत्वे कर्मसंज्ञायां शेषत्वे वापि कारकम् ।
रुच्यर्थादिषु शास्त्रेण सम्प्रदानाख्यमुच्यते ॥ २ ॥

यथा सञ्ज्ञान्तरपूर्वकं कर्म प्रागुक्तं तथेदमपि सम्प्रदानमन्यपूर्वकं शास्त्रेण रुच्यर्थानां प्रीयमाण इत्यादिना व्याख्यातम् । तथा हि देवदत्ताय रोचते मोदक इत्यत्रान्यकर्तृकाभिलाषो रुच्यर्थ इत्यभिलाषविषयभावमापद्यमान मोदक देवदत्त प्रयुङ्क्ते लौल्यात्तदानुगुण्यमाचरतीति हेतुसञ्ज्ञायां प्रयोजकस्य देवदत्तस्य प्राप्तायां सम्प्रदानसञ्ज्ञा कथ्यते । तथा हि हेतुसंज्ञाभावे णिचोऽभावाद्धेतुसमवायिन्या द्वितीयस्याः क्रियायाश्च प्रतीतेर्मोदकः स्वक्रियायां धात्वाख्यायां कर्त्ता भवति न कर्म । रोचते मोदकः । हेतुसञ्ज्ञासमन्वितकाया कर्तृसंज्ञाया अपि देवदत्तस्य बाधनात्कर्तुः क्रियायेप्सिततमत्वाभावात् । स्वातन्त्र्योपलक्षणार्थायामपि कर्तृश्रुतौ स्वार्थाद्धीयत इति प्रतीयते, तत्र भवेत्तदाश्रयं कर्मत्व, यथा हीयत इति ज्ञाने शब्दोपात्त सो ऽर्थस्येति तदाश्रयावधिकस्य कर्मसंज्ञा । इह तु शब्दोपात्तायां मोदकक्रियायां रोचत इत्यस्माच्च देवदत्तस्य स्वातन्त्र्य प्रतीयते । स्वातन्त्र्यस्य कारकमात्रविषयत्वात् कर्तृश्रुतिरनर्थिका स्यात् । यदा तु देवदत्ताय रोचन मोदक इत्ययमर्थो देवदत्त मोदक प्रीणयति तथा च प्रीयमाण इति साङ्गविशेषण तदा कर्मसंज्ञायां प्राप्तायां सम्प्रदानसञ्ज्ञारम्भः । धातोरर्थान्तरे हि वृत्तौ सकर्मकत्वम् । एवं

देवदत्ताय श्लाघते इति गुणोत्कर्षेण देवदत्तः शंस्यमानगुणवत्तया तत्समर्थाचरणाद्व्यारोपितप्रयोजकभावो हेतुसञ्ज्ञः प्राप्तो गुणाख्याने वा ज्ञापयितुमिष्टो ज्ञानेनाप्यमानत्वात् कर्मसंज्ञ इति श्लाघह्नुङ्स्थादिना सम्प्रदानसंज्ञः कथ्यते । एवं ह्नौतिप्रभृतीनां यथायोगं वाच्यम् । ह्नौतिप्रभृतयो ह्यत्र स्वार्थोपसर्जनज्ञापनवचनत्वात्सकर्मका । तथा च ह्नीप्स्यमान इति संज्ञिविशेषणमुपात्तम् । देवदत्ताय शतं धारयतीति स्वरूपे ऽवतिष्ठमानं शतमवस्थापयत्यधमर्णो धारयति । अवोत्तमर्णो देवदत्ता दानक्रियाद्वारेण निमित्तं धारणस्य। यतो ऽसौ ददाति शतं न च तत्र ददातिक्रिया श्रूयत इत्यश्रूयमाणक्रियाविषये ऽत्र कारकशेषे षष्ठ्यां प्राप्तायां धारेरुत्तमर्ण इति सम्प्रदानसंज्ञा। यथासम्भवमिति हेतुत्वादित्रयं प्राप्तमुच्यते न तु प्रत्येकं। पुष्पेभ्यःस्पृहयतीति पुष्पाणामीप्सिततमत्वात्कर्मसंज्ञाप्रसङ्ग उक्तः । दुह्यादौ तु कर्मसंज्ञाप्रसङ्गः । द्रोहस्यापकारत्वात्तदर्थाः सकर्मकाः । एवमीर्ष्यासूयार्था अपि । देवदत्ताय राध्यतीक्षते इति तु दैवं पर्यालोचयन्तं गणकं देवदत्तः प्रयुङ्क्ते इति हेतुसंज्ञायां प्राप्तायां राधीक्ष्योरिति सम्प्रदानता । देवदत्ताय गां प्रतिशृणोतीत्यत्र तु देवदत्तो याञ्चया गां प्रतिज्ञानात् प्रयुङ्क्त इति हेतुसंज्ञायां प्राप्तायां प्रत्याङ्भ्यां श्रुव इति सम्प्रदानता । पूर्वस्य हि धात्वर्थस्य याचनलक्षस्य देवदत्तः कर्ता भवन् प्रतिश्रवे ऽङ्गीकारे प्रयोजको भवति।होत्रे ऽनुगृणाति प्रतिगृणातीत्यत्रा ऽपि होतारं शंसिता प्रोत्साहयतीति हेतुकर्मसंज्ञाप्रसङ्गे ऽनुप्रतिगृणश्चेति सम्प्रदानता । शताय परिक्रीतो ऽनुसूहीति साधकतमस्य परिक्रयणे नियतकालस्वीकारे सम्प्रदानता विकल्पेनोक्ता । तत्र रुच्यार्थेष्वित्यादिशब्दोपात्तस्य सुज्ञानत्वात् कर्मसंज्ञाप्रसङ्गो नोक्तः । विशेषाविवक्षाया अभावे चात्र सर्वत्रैव क्रियानिमित्तत्वाश्रयेण शेषत्वे प्राप्ते सम्प्रदानतोदाहार्या । दुह्यादिपारगणनादकथितकर्मतात्र नास्ति । ननु च पूर्वमपि सम्प्रदानशास्त्रेणैवोक्तं कर्मणाभिप्रैतीति, तत्कथमत्र शास्त्रेणैतीति विशेष्यमणितिरुच्यते । अन्वर्थत्वात्सम्प्रदानशब्दस्य लौकिक एव सम्प्रदानार्थः पूर्वमुक्तः । इह तु रुच्यर्थविषये तदर्थाभावाच्च शब्दसंस्कारमात्रप्रतिपादनाय शास्त्रारम्भसामर्थ्यात्सम्प्रदानमुच्यते इति शास्त्राय लौकिकभेदेन द्विविधं व्याख्यातम् ।

इह साध्याय निगृह्यते, युद्धाय संनह्यते, पत्ये शेते इत्यकर्मकधातुविषये कर्म्मणोऽभावात्तेनाभिप्रेयमाणस्य सम्प्रदानता न सिध्यतीति क्रियाग्रहणमपि कर्त्तव्यमिति वार्त्तिकेऽभिहितम् । क्रियायाभिप्रेयमाणस्य स्यात्सम्प्रदानसंज्ञा । एतद्धात्वर्थे प्रत्याख्यानं,क्रिया अपि क्रियायाप्यमानत्वात्कृत्रिमं कर्म । साध्याय निगृह्यते इत्यादौ च कया क्रियया क्रियाप्यमानेत्युक्त संदर्शनादिक्रियाधीनभेदेन धातुनाभिधानात् ॥ २ ॥

कथमभेदाश्रयः क्रियाकारकभावो युज्यते इति समर्थयितुमाह ।

भेदस्य च विवक्षायां पूर्वा पूर्वा क्रियां प्रति ।
परस्याङ्गस्य कर्मत्वान्न क्रियाग्रहणं कृतम् ॥ ३ ॥

संदर्शनप्रार्थनाध्यवसायैराप्यमानत्वात् क्रियाभेदापेक्षयोत्तरोत्तरस्याङ्गस्य प्रधानक्रियार्थस्य कर्मत्वमविरुद्धं पूर्वपूर्वक्रिययाप्यमानत्वादिति क्रियाया अपि कर्म्मतायां तयापि अभिसम्बध्यमानस्य सूत्रेणैव सम्प्रदानता सिद्धेति क्रियाग्रहणं प्रत्याख्यातमोदनं पचति कर्मणोत्वयं तु विशेषो नाङ्गीक्रियते । तदत्र धातुना प्रधानक्रियैवोच्यते । सामर्थ्यप्राप्तास्तु संदर्शनादय , ततो भिन्ना इति क्रियाकारकभावोपपत्तिः । तद्यथा । सार्थोऽङ्गीयते इति प्रतीयमानं सार्थस्य स्वातन्त्र्यं कर्मत्वनिमित्तम् । यदि वा तादर्थ्यात्प्रधानक्रियाणां प्राप्ताभेदानां धातुभिरभिधाने अपि न सर्वथैव भेदतिरस्कार इत्यभेदाख्यकार्यानुमितप्रतीत्या कर्मतोपपत्ति. ॥ ३ ॥

यद्येवमोदनं पचतीत्यादावपि क्रियाकर्मणाऽभिप्रेयमाणस्य सम्प्रदानसंज्ञा स्यात् । ओदनादेः कर्मसंज्ञा तु क्रियाकर्मसु सावकाशेत्यत आह ॥

क्रियाणां समुदाये तु यदैकत्व विवक्षितम् ।
तदा कर्म क्रियायोगात्स्वाख्ययैवोपचर्यते ॥ ४ ॥

सन्दर्शनादिक्रियासमुदायः परस्परमङ्गाङ्गिभावमनापन्न समकक्षतया समुच्छ्रीयमाणरूपो यदैकफलत्वादभेदेन धातुनाङ्गीक्रियते तदा भेदनिबन्धनस्य क्रियाकारकभावस्याप्रतीतेरप्रतिबद्धकर्मभावया

क्रियया सम्बध्यमानमोदनादिकर्म स्वाश्रयेव क्रियायेप्सिततमं निमित्त-भूतया कर्मसंज्ञयैव व्यवह्रियते न तु सम्प्रदानसंज्ञयेत्यर्थ । समुच्चये-नाभिधानादङ्गाङ्गिभावाभावात् क्रियाकर्मरूपता नास्त्यत्र पक्षे ॥ ४ ॥

भेदविवक्षायां तर्हि सम्प्रदानता स्यादित्याशङ्क्याह ।

भेदाभेदविवक्षा च स्वभावेन व्यवस्थिता ।
तस्माद् गत्यर्थकर्मत्वे व्यभिचारो न दृश्यते ॥ ५ ॥

लौकिकप्रयोगः प्रसिद्ध इति तमुद्दिश्याख्याने यथाप्रयोग-मुपायपरिकल्पनादानीयते भेदाभेदविवक्षेत्यर्थ. । एवं च गत्यर्थक-र्मणि द्वितीयाचतुर्थ्यावपि उभयविवक्षाश्रयेण सिद्धे इति नार्थस्तदारम्भेण । अन्यत्र भेदविवक्षानियमाद्व्यभिचारो ऽतिप्रसङ्गो नास्ति ॥ ५ ॥

एतदेवागमेन द्रढयति ।

विकल्पेनैव सर्वत्र संज्ञे स्यातामुभे यदि ।
आरम्भेण न योगस्य प्रत्याख्यानं समं भवेत् ॥ ६ ॥

भेदाभेदविवक्षानियमानाश्रयेण सर्वत्र कर्मसम्प्रदानसंज्ञयो र्भावाभियमार्थं गत्यर्थकर्मणीत्यादि सूत्र भाष्यकारो न प्रत्याचक्षीत । प्रत्याख्याने ह्यतिप्रसङ्ग· स्यात् । यदा तु विवक्षानियमश्चेतसि भाष्य-कारस्य स्फुरति तदारम्भप्रत्याख्यानयोरविशेषं मन्यमानो युक्तं यत्प्र-त्याचक्षीत। तदेवं गत्यर्थविषये विवक्षेयम । शास्त्रे निगदत इत्येवमादौ तु भेदविवक्षैव। पचत्योदनमित्यादावभेदविवक्षैव। चेष्टायामनध्वनी-त्येतत प्रत्युदाहरणयोरपि वा ऽभेदविवक्षैव । मनसा पाटलिपुत्रं गच्छन्यध्वान गच्छतीति। सूत्रारम्भे स्त्रिय गच्छत्यजां नयतीत्यतिप्रस-ङ्गे, सिद्ध त्वप्राप्तावचनादित्युक्तम।असङ्गमनेनासम्बन्धात् क्रमात्तत्र द्वितायाचतुर्थ्यौ वक्तव्ये। अजास्त्रियोस्तु सम्प्राप्ते कर्मणीत्यतिप्रसङ्गो न भवति। एवं च विशेषसूत्रारम्भे प्रतिषेधो न वक्तव्य । अजा हि सम्प्राप्तकर्मात्र प्रतिषेद्धुमभिप्रेत, तस्य चासम्प्राप्तवचनादेव व्युदास सिद्ध । अत एव भाष्ये ऽभिहित, आस्थितप्रतिषेधो वक्तव्य इति ॥ ६ ॥

त्यागरूपं प्रहातव्ये प्राप्ये संसर्गदर्शनम् ।
आस्थितं कर्म यत्तत्र द्वैरूप्यं भजते क्रिया ॥ ७ ॥

अध्वन्यर्थग्रहणमिति वचनादध्वपर्यायेभ्योऽपि प्रतिषेधः पन्थानं गच्छतीत्यादौ । आस्थित-आक्रान्तो गमिक्रियया अध्वाऽऽक्रान्त इत्युदाहरणप्रवृत्ता गमिक्रिया सा द्विरूपाभावमतिक्रान्तस्य पर्यायो भवति । क्रमाणां यो भागः तत्र त्यागरूपं हीनरूपः क्रियायाः प्राप्ये स्वामादनीये भागे संसर्गरूप प्राप्तरूपामिति त्यागोपादानलक्षणावयवभेदात् क्रिया द्विविधा । तथा च त्यागोपादानरूपाविच्छिन्नप्रवाहगमिक्रियाक्रान्तोध्वा क्रियाविषयभावमात्रविधीयमानकर्मसंज्ञागोचरो न तु क्रियया कर्मभूतया ऽभिसम्बध्यते क्रियाभेदाभावादिति सम्प्रदानसञ्ज्ञाभाव । ग्रामादेरेव तदुपायप्राप्यसाधनाध्वरूपस्य तद्योगः । यस्तु नास्थितो ऽध्वा तत्र विभक्तिर्भवति । कथं वा नास्थितो, ऽध्वा भवति यथोत्पथेन प्राप्नोति पन्थानं, पथे गच्छतीति । तदेव सूत्रारम्भे विशेषो वक्तव्यः प्रत्याख्याने स्वविवक्षानियमनेवेष्टं सिद्धम् ॥

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे
सम्प्रदानाधिकारः ।

इदानीं विभक्तिविधानक्रमेण तदर्थविचारे चतुर्थ्यर्थे निर्णीते प्राप्तावसरं पञ्चम्यर्थमपादानं विचारयितुमाह ।

निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा ।
अपेक्षितक्रियं चेति त्रिधा ऽपादानमुच्यते ॥ १ ॥

अपाये साध्ये यद् ध्रुवमेकरूपमनाविष्टापायलक्षणक्रियमस्मिन्नपायेनाविष्टेऽपि तत्साधनमपादानमित्यवधिविशेषापेक्षत्वात् संरब्धोदासीनं भवतु, को ऽपादानोपादनस्य विषय ।कथ्यते। स निर्दिष्ट खशब्द. तस्य तदेकमपादानं।यथा ग्रामादागच्छति पर्वतादवरोहतीत्यादि । उपात्तः क्रियान्तरस्य गणभावेन प्रधानभावेन वा यत्रापायलक्षणो विषयः तदन्यदुपात्तविषयमपादानम । तद्यथा बलाहकाद्विद्योतते, कुसूलात् पचति, ब्राह्मणात्। शंसतीति । अत्र हि निःसरणाङ्गे विद्योतने विद्योतनाङ्गे च निःसरणे विद्युतिर्वर्त्तते इति नि.सरणलक्षणो ऽपायो विद्यते तस्य गुणप्रधानभावेनोपात्तः। बलाहकात् नि.सृत्य ज्योतिर्विद्योतते, बलाहकाद्वा विद्योतमानं निःसरतीत्यर्थ.।कुसूलादादाय पचतीत्यपादानाङ्गे पाके पचिः। ब्राह्मणात् गृहीत्वा शंसतीति ग्रहणाङ्गे शसने शंसिर्वर्त्तते। पञ्चमीप्रकरणे ब्राह्मणाच्छंसिन उपसंख्यानमित्यलुक्। तत्र वार्तिककारस्य द्वितीयार्थे पञ्चम्येषाभिमता । यदाहान्यथैतानि ब्राह्मणानि ग्रन्थविशेषरूपाणि य. शंसति स कथ्यते ब्राह्मणाच्छंसीति वृत्तिविषये ऽत्र द्वितीयार्थे पञ्चमी वक्तव्या। भाष्यकारस्तु ब्राह्मणाद् गृहीत्वा आहृत्य शंसतीत्याहरणाङ्गे शंसने शंसिर्वर्तते इति उपात्तविषयमेवापादानं मन्यतेऽपेक्षितक्रियं त्वपादानं,यत्र सर्वथैव क्रियाशब्दस्यानुपलब्धेरश्रुता क्रियाऽनुमीयमाना सम्बन्धिषु द्रव्येषु संज्ञाविशेषहेतूनां शक्तिभेदानामाविर्भावनिमित्तत्वाय कल्प्यते । तद्यथा माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इति । अत्र हि प्रकर्षप्रत्ययसामर्थ्यात् विभागहेतुरनुमीयमानापकर्षक्रिया ऽपायलक्षणेत्यपेक्षिता । मेघत उपात्तत' चैत्रत. पाकनिरसनयो. शंसतीत्यादौ विद्योतनादिमात्रव चनत्वे ऽपि अन्यत्र नि सरणाद्यङ्गवृत्तेरविरोधात् पञ्चमीश्रुतिसामर्थ्यात् अपायोऽत्र प्रतीयते। स च नि.सरणाद्यङ्गत्वे धात्वर्थस्योपपद्यते

नान्यथेति तदर्थतानिश्चयः ॥ १ ॥

किं ध्रुवमपाये, किमङ्गमात्रं नेत्याह ।

संयोगिभेदाद्विन्नात्मा गमिरेव भ्रमिर्यथा ।
ध्रुवावधिरपायो ऽपि समवेतस्तथा ध्रुवम् ॥ ॥

ध्रुवे संयोगेन साहचर्याद्विभागो ऽप्यवधि-स्वीकृतः । तेन द्रिग्विशेषावच्छिन्नसंयोगविभागकार्यम् । यथा गमनमेव भ्रमणमिति व्यपदिश्यते यथा च गमनग्रहणाद् भ्रमणरेचनस्पन्दनादयो गृह्यन्ते न जात्यन्तराणीति काणादाः, एवं ध्रुवमचलमनाविष्टापायमवधियैस्याध्रुवे चले समवेतोऽसौ संरब्धोदासीनसाध्यस्त्यागस्तदुभयकारकगतिविभागलक्षणफलोपायाख्यो गतिविशेषो बोद्धव्यः । गन्तरि समवेतापीयं क्रिया ऽवध्यपेक्षणादपायाख्यां लभत इति तत् ध्रुवस्य क्रियासिद्धौ निमित्तत्वकारकत्वमुपपद्यत इत्याशयः । स चापादानसंज्ञाया विषयभावेनावस्थितो ऽपायो धातुना ऽभिधीयमानानुमीयमानो वा ध्रुवमपादानसंज्ञमपाये साध्यत इति तन्निमित्तत्वं ध्रुवस्य कारकस्य । एवमपायो व्याख्यातः । ध्रुव तु स्थिरमचलं लोके प्रसिद्धम् । ततश्च वार्त्तिके चोदितङ्गतियुक्तेष्वपादानसंज्ञा नोपपद्यते ध्रुवत्वादिति । धावतो ऽश्वात्पतितः सार्थाद्गच्छतो हीन इत्यादौ गतियुक्तेष्वपादानसंज्ञिषु ध्रुवत्वस्य स्थिरत्वस्याचलत्वस्याभावात् संज्ञा न प्राप्नोतीत्यर्थः । अत्र परिहारो हि उदितः, न चाध्रौव्यस्याविवक्षितत्वादिति ॥ २ ॥

तद्व्याख्यातुमाह ।

द्रव्यस्वभावो न ध्रौव्यमिति सूत्रे प्रतीयते ।
अपायविषयं ध्रौव्यं यत्तु तावद्विवक्षितम् ॥ ३ ॥

ध्रुवं कूटस्थं निष्क्रियमिति द्रव्यस्वभावो ध्रौव्यं सूत्रे न प्रत्येतव्यं अपि त्वसंसृष्टवचनो ऽत्र ध्रुवशब्दः । तथा ह्यपाये साध्ये यद्ध्रुवं तेनापायेनासंसृष्टमित्येषो ऽर्थः । एवं च कृत्वा धावतो ऽश्वात्पतनीत्यत्र पतने स्वकर्तृकत्वाभावादेवानाविष्टधावनस्याश्वस्य तत्रास्त्येव संरब्धोदासीनसाधनसाध्यो ह्यपायः । तत्राश्व उदासीनः अपायानु-

संबद्धः । ग्रामादागच्छति यथा पर्वतमितिरूपः। करणस्य पर्वतस्य कर्मणोऽपायेनावेशाद् ध्रुवतायां सत्यामपि परत्वात् करणादिसज्ञाभिर्वाधनादपादान संज्ञा न भवति । तथा च वार्त्तिक अपादानमुत्तराणि । धनुषा विध्यति: कंसपात्र्यां भुङ्क्ते, गां दोग्धि, धनुषा विध्यतीति । तदेवमपायाविषयस्य ध्रौव्यस्याश्रयणात् अश्वस्यापायेनावेशादस्तु तद्विषमध्रौव्य भवदेवाविवक्षितमिति वार्त्तिकार्थ ॥ ३ ॥

तथा हि ॥

सरणे देवदत्तस्य ध्रौव्ये पाते तु वाजिनः ।
आविष्टं यदपायेन तस्याध्रौव्यं प्रचक्षते ॥ ४ ॥

सरणेऽश्वसमवायिन्यां वेगितायां गतौ यथा देवदत्तस्य ध्रौव्यं तथ सरणेनावेशात् तथा देवदत्तसमवेते पाते पतनक्रियायां वाजिनो ऽश्वस्य तयावेशात् ध्रौव्यमिति दृष्टान्तदार्ष्टान्तिकाभावेनेदमुदाहरणं । हेतुत्वेन त्वपायोऽनावेशात् व्यतिरेकमुखेनोभयत्रापि ध्रौव्य उपात्तः ।यद्यपि गतिं विना त्वविधिना नापाय इति गम्यत इति वक्ष्यमाणत्वादविभागेन देवदत्तस्यानुपादानात्तद्वाप्यपादान भवत्येव समानो देवदत्त. ॥ ४ ॥

उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे ।
विभागे सविभक्ते तु क्रिये तत्र विवक्षिते ॥ ५ ॥

ततश्च ॥ ५ ॥

मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् ॥ ६ ॥

इतरेतरक्रिययेतरेतरस्यानावेशात् अन्यक्रियायामन्यस्य ध्रौव्यं स्वक्रियायां तु कर्तृत्वं द्वयोरपि । यदा तु परस्परमवधिभावो न विवक्ष्यते अपि त्वेकशब्दोपादाने द्विगते अपि क्रिये विवक्ष्येते ॥६॥

तदा ॥

अभेदेन क्रियैका तु द्विसाध्या चेद्विवक्षिता ।
मेषावपाये कर्त्तारौ यद्यन्यो विद्यते ऽवधिः ॥ ७ ॥

मेषावपसर्पत इत्याख्यातपदेन कर्तृद्वये निर्वर्त्यक्रियापेक्षेण प्रत्यायिते तद्वयोरपि मेषयो. क्रियाविशेषकर्तृत्वमपायेन त्वकस्यावधित्वमित्यपादानता न भवति । एवं च कृत्वा ऽपायकर्तृत्व मेषयोर्भवति । यद्यन्य. पर्वतादिरवधि. ध्रुवलक्षणो ऽत्र भवति । तथा च तस्यापादानसंज्ञा । पर्वतादपावर्त्तेत इति परस्परतो मेषावपसर्पत इत्येवमभिधाने मेषान्तरक्रियापेक्षमवधित्वं द्वयोरेव क्रियापेक्षं सर्वं कर्तृत्वमुक्तम् । कर्तृभेदाद्यत्र क्रियाभेदानुमानमाख्यातादेकेनापि प्रतीयते ॥ ७ ॥

यद्यन्यो विद्यते ऽवधि. तदा तेषामपायकर्त्तरि नान्यथेत्येतत् भाष्य ग्रन्थसवादेनोपपादयितुमाह ॥

गतिर्विना त्ववधिना नापाय इति गम्यते ।
वृक्षस्य पर्णं पततीत्येवं भाष्ये निदर्शनम् ॥ ८ ॥

कारकसूत्रे संज्ञिनिर्देश. कर्त्तव्यस्तथा चोदित साधकं कारकमिति वक्तव्यम् । अन्यथा अक्रियानिमित्तस्यापि कारकसंज्ञाप्रसङ्ग इत्यनिष्टप्रसङ्गोपादानं च । वृक्षस्य पर्णं पततीत्याद्युदाहृत वार्त्तिकं च भाष्यमिति । भाष्य इत्याह । एतच्च तत सावधिकाया अपायत्वे न लिङ्ग अपि त्वस्य परिहाराय। तत्रापायस्याविवक्षितत्वादिति । यदुक्तमित्यनेन भाष्यप्रबन्धो ऽत्र निर्दिष्ट प्रपञ्चार्थ । वृक्षसम्बन्धिनः पर्णस्य पातो वाक्यार्थो विवक्षित , इति वृक्षस्यावधिना विवक्षात्र नास्ति । तथा चापायो ऽत्र न भवति।अपायत्वेनावध्यपेक्षारूपणाविवक्षितत्वादित्यत्रापादानता वृक्षस्य न भवति । यदि त्वपायो ऽत्र विवक्ष्यते तदा वृक्षस्यावधित्वात् वृक्षात्पर्णं पततीति भवति । ततश्च न ज्ञायत कस्य सम्बन्धि पर्णकं वृक्षस्य वान्यस्य वेत्युक्तम् । तस्मात्पर्णविशेषणत्वेन वृक्षस्य विवक्षितत्वात् वृक्षमत्यजदपि पर्णमात्रं भूमिं स्पृशति इति प्रयोगो भवत्येवेत्यपायाविवक्षोक्ता ।तस्माच्चावसीयत सावधिकगतिरपायो न श्रद्धाजन्यया ऽवध्याविवक्षया ऽप्यत्रापायसम्भवादपादानत्वं स्यादेवेति ज्ञापक मेतत् ।एतच्चापायेनैवावधेराक्षेपात्तस्यैव विशेषणम् । शब्दवत्संज्ञिप्रतिपत्त्यर्थं ध्रुवग्रहणं सर्वव्योदासीनोभयसाध्यतामपायस्य दर्शयितुमित्यव्याख्यानम् ॥ ८ ॥

गतमद. इदमिदानीं वक्तव्य अपादानमुत्तराणीति विप्रतिषेध. कात्ययनेनोक्त. तथाचोक्तं. कारकैरपादानस्य बाधितत्वात्,

बलाहकाद्विद्योतते बलाहको विद्योतने बलाहके विद्योतत इति भाष्ये सङ्घातसमावेशो दर्शितो विरुद्ध इत्याशङ्क्य भाष्यं समर्थयितुमाह ।

भेदाभेदौ पृथक्भावः स्थितिश्चेति विरोधिनः ।
युगपन्नविवक्ष्यन्ते सर्वे धर्मा बलाहके ॥ ९ ॥

धूमज्योति.सलिलमरुतां सङ्घातो बलाहक', तत्रावयवस्य ज्योतिषो विद्योतनं । तच्च ज्योतिर्यदा तस्मात्समुदायात्मनो बलाहकात् भेदेन विवक्ष्यते तदा भेदविवक्षायां पृथग्भावेनैव वा-विवक्ष्यते तत्रावस्थानेनैव वा ॥ यदा पृथग्भावेन विवक्ष्यते तदा बलाहको ऽवधिः पृथग्भावलक्षणस्यापायस्येत्युपात्तविषयमिदमपादानं व्याख्यातम् । बलाहकाद्विद्योतते विद्युज्ज्योतीरूपेति बलाहकात्पृथग्भूय निःसृत्येति निःसरणाङ्गे विद्योतने धातुः । यदा तु निराधारस्य तेजसो ऽवस्थानाभावाद् बलाहक. स्थितिहेतुत्वादाधारभावेन विवक्ष्यते तदाधिकरणसंज्ञो ऽसौ जायते बलाहके विद्योतत इति, बलाहके स्थित्वा प्रकाशत इत्यर्थः।अविन्धनत्वाद्विद्युतस्य जातवेदसो बलाहको जलपूर्णो ऽप्याधारो युज्यते । स्वयोदकसम्भेदात् पार्थिवेन धूमेन वा विलीकारात् बलाहकाद्भेदो नास्ति । नास्ति तावत्तेजसः प्रकाशकर्तृत्वाभाव इति भेदविवक्षायां शक्तिद्वयाविर्भावो बलाहके दर्शितः । पृथग्भावे स्थितौ च भिन्नविषये एव । यदा तु स्वच्छत्वाद्बलाहकद्रव्यस्य तत्रत्यात्तत्यमुदकादितेजसः प्रकाशे प्रतिबन्धकं न भवतीत्यभेदेन बलाहकाख्य' समुदायस्तेजोवयववशाद्विद्योतनसमर्थो विवक्ष्यते तदात्र कर्तृशक्तिरेवोज्जृम्भते बलहको विद्योतत इति अवयवनिबन्धनाहि समुदायमनुगतमिति व्यपदेशाः । तद्यथा किसलयितमुपवनमिति वृक्षसमुदायस्योपवनशब्दवाच्यत्वेन तदवयवानां सञ्जातकिसलयत्वे समुदायस्तथा व्यपदेशार्हः। तदेवं विवक्षाभेदात्पर्यायेण भिन्नशक्तिबलाद्भाष्य उदाहृतः। ननुयुगपच्छक्तिविवक्षायामिति भवति प्रतिषेधे वचनेनास्य विरोधः कश्चित् ॥ ८ ॥

यत् विप्रतिषेधोदाहरणं तत्र युगपदेव शक्त्यो विवक्षेत्याह ।

धनुषा विध्यतीत्यत्र विनापायविवक्षया ।
करणत्वं यतो नास्ति तस्मात्तदुभयं सह ॥ १० ॥

धनुषा विध्यतीति परत्वात्करणसंज्ञा ऽपादानसंज्ञां बाधत इत्युदाहृतम्। तत्र युगपत्प्राप्तिरेव नैकस्य सञ्ज्ञयोरिति तद्द्वयं साधकत्वमपायश्च सहैकस्मिन् द्रव्ये वर्त्तते । यतोऽपायविवक्षामन्तरेण साधकतमत्वं व्यधने धनुषो नास्ति। न हि दण्डेनैव धनुषा विध्यते ऽपि तूत्सर्पच्छरस्यावधिभावमुपयद्धनुर्व्यधननिमित्ततां प्रतिपद्यत इति युगपदुभयविवक्षायां भिन्नविषययोरपि शक्त्योर्निमित्तनिमित्तिभावेनावस्थानादेकत्र द्रव्ये समावेशात् स्वनिमित्तसंज्ञाद्वयहेतुत्वे युगपदेकस्मात्प्रातिपदिकात् तत्कार्यविभक्तिद्वयोत्पत्तयोगात् एकसञ्ज्ञाधिकारोपनीते विरोधे परत्वात्करणसंज्ञानिमित्ता विभक्तिर्भवति। शक्त्योर्हि नास्ति अत्र विरोधः भिन्नविषयत्वात्। शरानि सरणे ह्यपादान व्यधने तु करण धनु, आविष्टशक्ति द्रव्यमेव संज्ञाविषय इति तदपेक्षयैव च प्राप्तिः। तथा हि विभक्तिविधाने अपादाने करण इत्यादिसञ्ज्ञाविशेषेण द्रव्यत्वमेव विशिष्यते । एकस्यानेकसंज्ञाप्रवृत्तावपि नास्ति विरोध इति सञ्ज्ञाकार्यविभक्तिमुखेन विरोधो ऽत्र व्याख्येयः । एतच्चोदाहरणमुपलक्षणार्थमुपात्तमन्यत्रापि विप्रतिषेधोदाहरणमुभयविवक्षा योज्येति । यथा हि कंसपात्र्यां भुङ्क्ते इत्यत्रास्वादनादिरूपाया भुजेः कसपात्री धारयन्त्यत्र मत्राधारः। स चाप्याधारभावस्तावन्नोपपद्यते यावदपादानता नास्ति कसपात्र्यामन्नमुद्धृत्य भुज्यत इत्यपादानम्। न हि पर्णपुटेन (संहानमभ्यवहारोतोऽद्यादंस्तत्र)? भुङ्क्ते इति भवत्याधारसम्प्रत्ययः। यदि च कसपात्री न भवेदन्नादस्यावधिस्तदा भुजिर्नैव निष्पद्येतेत्यपायविवक्षां विना ऽत्र करणत्वाभावः । उभयोर्युगपद्विवक्षायां संज्ञाद्वयप्रसङ्गे ऽपादानमुत्तराणीति अधिकरणसंज्ञया परया पूर्वोऽपादानसंज्ञा बाध्यते एव। गां दोग्धीति क्षारणवचने दुहौ नान्तरीयकोपायः । न हि गोस्तनपतितपयसः क्षारण संपद्यत इति अपादानतानान्तरीयका कर्मशक्तिः गोः परत्वात् कार्यं प्रयुङ्क्ते । एव धनुर्विध्यतीत्यपायविवक्षां विना व्यधने धनुष स्वातन्त्र्यं नास्तीत्युभयसंनिधौ चापादानमुत्तराणीति परा कर्तृसञ्ज्ञैव भवति। एवमत्र विषये द्वे शक्ती अभ्युपगम्ये ॥ १० ॥

नान्तरीयकत्वादेकत्र द्रव्ये समावेशे संज्ञाद्वयप्राप्तौ विभक्त्याश्रयकार्यद्वारेण विरोधे सति परत्वेन व्यवस्थोक्ता ॥ सम्प्रति शक्त्य-

भेदमाश्रित्य संज्ञयोरभिन्नविषयोपादानमाह ।

एकैव सा सती शक्तिर्द्विरूपा व्यवतिष्ठते ।
निमित्तसंज्ञयोस्तत्र परया बाध्यते ऽपरा ॥ ११ ॥

परा भिन्नक्रियाविषया ऽपि द्रव्यस्यैकैव शक्तिः । तथा हि न द्रव्यं क्रियाद्वयं सम्पादयतीति तत्र क्रियाद्वयविषये अपादानकरणादिसंज्ञाद्वयं लभत इति एकत्र शक्तौ संज्ञाद्वयप्राप्तौ परसंज्ञया न परा अपरा पूर्वा संज्ञा बाध्यते विरोधादेकसंज्ञाधिकारनिमित्तादित्यर्थः । शरनिस्मरणे ऽवधिभावो धनुष साधकत्वशक्तावन्तर्भावित । तेन विनापायो ऽपीति तावत्येकैव शक्तिर्भेदात् परस्परनिरपेक्षस्य कार्यद्वयस्य प्रविभक्तरूपशक्तिद्वयपरिकल्पकस्याभावात् । व्यधनक्रियया हि शरापगमक्रियाऽत्र गुणभूतेऽपि पृथगात्मानं शक्त्यन्तरं नाक्षिपति । कवलमेकैव शक्तिर्ग्रहणप्रयातभूताक्रियाद्वयविषयतया भिन्नरूपेण चकास्ति । द्रव्यमेव तर्ह्येकं क्रियाद्वयाद् द्वयं सम्पादयत् साधनमस्तु किं शक्तिपरिकल्पनेनेति । नैतदुपपद्यते । आभिन्नस्वभावत्वाद्द्रव्यस्य नानाक्रियाविषयतायोगात् । शक्तिस्तु सामर्थ्यमनेके कार्यमपि भवति । तद्यथोक्तं, न शक्तीनां तथा भेदो यथा शक्तिमतां स्थितिरिति । यथैव पक्त्वौदनो भुज्यतामित्यत्राप्येकैव शक्तिरस्तु नैवमुपपद्यते । अन्तर्भूतेनापायेन पृथगात्मानमलभमानेन ह्यनिमित्तशक्तिभेदस्यानाक्षेपादिति स्थितम् ॥ ११ ॥

पूर्वं तु गुणप्रधानभावानाश्रयेण क्रियाद्वयमात्रविषयं शक्तिद्वयमुक्तम् । तदेतदिदानीं ध्रुवमपायेऽपादानमित्यनेनैव लक्षितं सर्वमपादानमस्यैवामी विषया अपरस्तु ॥

निर्धारणे विभक्तेऽर्थो भीत्रार्थानां च यो विधिः ।
उपात्तापेक्षितापायः सो ऽवधिप्रतिपत्तये ॥ १२ ॥

पञ्चमी विभक्त इति विभक्तविशिष्टे निर्धारणे लक्ष्यमाणे पञ्चमीलक्षणो यो विधिरुक्त सो ऽपेक्षितापायः । अपास्यानुमीयमानस्यापेक्षणाद्ध्रुवमपादानसंज्ञैव सिद्धा । तस्य

हि माथुरा पाटलिपुत्रकेभ्य अढ्यतरा इत्येतदुदाहरणम् । अत्र निर्द्धारणस्य विभक्तविषयत्वादन्येन विभक्ततामप्रतिपद्यार्थं विभक्तग्रहणमिति पृथग्भूता एव प्रतिपाद्यमाना एतस्य विषय । ननु गर्वा कृष्णा सम्पन्नक्षीरेत्यादि गोत्वेनापृथग्भावात् तदात्मनि विभागेऽपि विवक्षिते पूर्वमाढ्यत्वेन बुध्या समभ्यमनस्थापेक्षमाणा तथा ह्याढ्यत्वेन समानेन गुणेन बुध्यैकत्वमापाद्यातिशयविशिष्टाढ्यत्ववशात् पृथक्क्रियेत्यस्ति बुद्धिसङ्कलनपूर्वको विश्लेषोऽपायाख्य इत्येव सिद्धा ऽत्र पञ्चमी। अपाक्षनक्रियं च ह्यवधेरपादानम् । तदुक्तं भाष्ये, यस्ते सत्य गतवान् स एव प्रयुङ्क्ते इति । कारकाधिकारे तमग्रहणमतिशयत्वेन विवक्षयत इति गौण इत्यत्र बौद्धेऽपाये अपादानता विरुद्धा । तेष्वध्यादिकारकव्यवहारो बुध्यवस्थानिबन्धन एव सर्वः । उक्तं प्राक् । बुध्या समीहितैकत्वान् पञ्चालान् कुरुभिर्यदा । पुनर्विभज्यते वक्ता तदापायः प्रतीयत इति । एवं सामान्येनैव सिद्धे सूत्रारम्भे बौद्धमपाय प्रतिपाद्यमान प्रति विवक्षानियमाय अपायविवक्षैवात्र कर्त्तव्येत्यर्थ । तथा भीत्रार्थानां भयहेतु, पराजेरसोढ इत्यादिश्च यो विधिरपादानसंज्ञालक्षण सोऽप्युपात्तो गुणभावेन विषयोऽपायलक्षणक्रिया येन स एवं विध इति उपात्तविषयोपादानभेदोदाहरणरूप पूर्ववादो ऽनुवोधनार्थ एव । तथा हि वृकेभ्यो मयः चौराद् विभेतीति य पन्थ मनुष्य प्रेक्षापूर्वकारी भवति स तु बुध्या चिन्तयति यदि मा वृकान् प्राप्नुयु ध्रुवमनिष्टापात इति इत्थ बुध्या वृकान् प्राप्य बुध्यन्तरेण ततो विभाग प्रतिपद्यत इति भयपूर्विकायां निवृत्तौ विभेतर्वर्तनादस्येवापाय । एवं चौरेभ्यस्त्रायत इत्यत्राप्यनर्थप्रतिघातवचने त्रायतावनर्थचोदकत्व बुध्या निश्चित्य 'तत' स्वमपनयति सह इति सम्भाव्योपाय । अध्ययनात्पराजयत इत्यध्ययनाभ्यासपरिश्रान्तो गुरुपर्युपासनायां (स नायासनीरूप प्रागित्वाध्ययनं) ? ततो निवर्त्तत इत्यस्येवापाय । पराजयनिश्चाऽत्र खेदपूर्वके निवर्त्तन वर्त्तते खिन्नःसन्निवर्त्तत इत्यर्थ । पूर्वमेवाप्रवृत्तौ तु खेदा बुध समीहित । एके (घतयसानित्य) ? दृष्टोपचरतो गुरून् । यवेभ्यो गां वारयतीति यवमुख्य एवापाय । कूपादन्धं वारयति अग्नेर्माणवक वारयतीति बुद्ध्या कूपाग्निसम्प्राप्तिमनिष्टहेतुभूतां मन्यमानो ऽनु

कम्पया ततो निवर्तयतीति बुद्धिसंश्लेषको ऽपाय' । उपाध्याया-दन्तर्हित इत्युपाध्यायसमीपप्राप्तौ प्रेषणोपालम्भादि दुःखं मनसि निश्चित्य ततो ऽपैतीत्यपायः । उपाध्यायादधीत आगमयतीति च ग्रन्थम्, इत्युपाध्यायमुखोदीरिता हि शब्दाः सन्तानेन वर्त्तमानाः शिष्यमनुप्रविशन्तीत्युपाध्यायादवधिस्थानीयात्तेषामपक्रमो ऽवसीयते । तदुक्तं भाष्ये सत्रादिन्यनुपयोगे तु नटस्य शृणोतीत्यपायो न विवक्ष्यते,। न हि नटादयमादत्ते, अपि तु नटसम्बन्धिशृणोत्येतावदत्रार्थसतत्त्वम् । शृङ्गाच्छरो जायत इति निःसरतीत्येवं लोकस्य प्रतिपत्तेरित्यस्येवापायः । शास्त्रे च पदार्थो लौकिक एविभज्यत इत्युक्तामेति निर्विकल्पिते प्रक्रियानादर. । तीर्थिको नहि केषाञ्चित्कार्यकारणयो परिमाणाश्रयेण भेद इति विभागभाव' । हिमवतो गङ्गा प्रभवतीति स्रोतोरूपा गङ्गा तत. प्रसर्पतीति मुख्य एवापायः । गौणं चापायमाश्रित्य जुगुप्साविरामप्रमादार्थानामुपसख्यानं प्रत्याख्यातम । तथा हि अधर्माज्जुगुप्सते विरमतीत्यास्तिक । परत्र तु खानुबन्धिनमधर्ममवगत्य जुगुप्सापूर्वकतया ऽपैतीत्यस्यपायः । नास्तिकः पुनरिहैककलेशफलं धर्ममवगत्य ततः प्रमादेन निवर्त्तत इति प्रमाद्यतीत्युच्यत इति सर्वत्र पूर्वेणैवापादानसंज्ञायामुत्तरो विधिः प्रपञ्चार्थ. । लक्षणप्रपञ्चाऽर्थां हि व्याकरण यथोक्त त एव विधय इत्यादीति सिद्धम् ॥ २२ ॥

इति भूनिराजननयहेलाराजकृते प्रकीर्णप्रकाशे
साधनसमुद्देशे ऽपादानाधिकार. ।

इदानीं विभक्तिविधानक्रमायातं षष्ठ्यर्थं शेषलक्षणमतिक्रम्य कारकविशेषप्रक्रमायातमधिकरणे सप्तम्यर्थं विचारयति ॥

कर्तृकर्मव्यवहितामसाक्षद्द्वारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥ १ ॥

लोके ऽधिकरणमविशेषेण द्रव्यगुणक्रियाविषयमभिधीयते । शास्त्रे त्वस्मिन् कारकप्रकरणात् क्रियामेवोपकारविशेषेणाधारेण लक्षणेनाधिकरणसंज्ञा अवतिष्ठते । तत्र क्रिया कर्तरि कर्मणि वावतिष्ठत इति तयो. क्रियाधारणादधिकरणसंज्ञा वचनात्पर्यायेण स्यात्कर्मस्थक्रियाविषया वा कर्तृसंज्ञा कर्तृस्थक्रियाविषया वा कर्मसंज्ञा स्यादिति तत्र यथायोगं कर्तृकर्मसंज्ञा नाधिकरणसंज्ञा प्रसज्यत इत्याशङ्क्योक्तं कर्तृकर्मव्यवहितामित्यादि ॥ कटे आस्ते स्थाल्यां पचतीति कर्तृकर्मधारणं तु तत्समवेतायां क्रियायामुपकारकमधिकरणं पारम्पर्येण । असतीत्याधारे कर्तृकर्मणी क्रियोपकारं न प्रतिपद्येयातामिति तद्योगो नास्तीत्याधारोपकारपरत्वात्कर्तृकर्मसंज्ञे एव । कारकाणां च क्रियानिमित्तत्वं, यथा ऽपि नावदाश्रीयत इति व्यवधानात् क्रियोपकारकत्वमविरुद्धम् । व्यवहितामित्युक्ते ऽप्यसाक्षादिति वचनं लोकानुसारेणापि पदार्थव्यवस्थायामधिकरणस्य क्रियाधारणं प्रति व्यवधानपरिशेषणार्थम् । तथा हि शब्दात्प्रतीयमानो ऽर्थो लौकिक संस्कारनिमित्तमुच्यते । पृथिव्यां शेते, स्थाल्यां पच्यत इत्यादौ साक्षात् शब्दात् क्रियाविशिष्टे कर्तृकर्मणी प्रतिपद्येते नाक्रियामात्रं ततो निकृष्टकमिति क्रियाश्रयधारणादेव लोके ऽधिकरणस्य क्रियोपकार. प्रतीयते न साक्षात् । ॥ १ ॥

इदानीमौपश्लेषिकादिभेदो ऽप्यधिकरणस्य । सामान्यमेतल्लक्षणमनुगतमित्याह ॥

उपश्लेषस्य चाभेदात्तिलाकाशकटादिषु ।
उपकारास्तु भिद्यन्ते संयोगिसमवायिनाम् ॥ २ ॥

उपश्लेष आधारस्याधेयेन सम्बन्ध । यद्यप्यसावाधार

तस्य त्रिष्वधिकरणेषु भेदः । अन्यथा तु संयोगिव्याधारे सम्बन्धः । अन्यथा तु समवायिनीति सम्बन्धभेदात्त्रित्वेन व्यपदेशः । तथा हि कटे आस्ते देवदत्त इति संयोगिन कटस्य सकलावयवव्याप्त्या देवदत्तोपश्लेषो न दृश्यते ऽपि तु कतिपयावयवव्याप्त्येत्यविशेषादौपश्लेषिक इति सामान्यसञ्ज्ञया आधारो ऽभिधीयते । तिलेषु तैलमिति तु समवायिना तैलरसेन तिलानां समस्तावयवव्याप्त्या लोकप्रसिद्ध्या सम्बन्धाद्व्यापकमधिकरणम् । खे शकुनय इत्यत्र चाकाशस्य तात्त्विकावयवाभावात्कल्पितप्रदेशतया सम्बन्धाङ्विषयिकमेतदधिकरणमनन्यभावश्चात्र विषयार्थे एवं (त्वमत्था) ? इति आधारप्रदेशापेक्षया चैतदौपश्लेषिकमधिकरणम् । गुरौ वसतीति शिष्याणा गुर्वधिपाना नावृत्तौ दैशिकमधिकरण गुरु. । उपश्लेषो ऽप्यत्र बौद्ध. । युद्धे सन्नह्यतीति युद्धाभिसम्बन्धिन. सन्नहनस्य तनुत्राद्यवयवरूपस्य प्रवृत्ते युद्ध विषयाधिकरणम् । गङ्गायां गाव इति गङ्गाशब्द. सामीप्यात् प्रदेशवृत्तिरित्यौपश्लेषिकमधिकरणम् । शत्रोरभावे सुखमित्यादावस्य बौद्ध कारकत्वमिति प्रागेव निर्णीतम् ॥ २ ॥

के पुनरुपकारा इत्याह ।

अविनाशो गुरुत्वस्य प्रतिबन्धे स्वतन्त्रता ।
दिग्विशेषाद्वच्छेद इत्याद्या भेदहेतवः ॥ ३ ॥

अविनाशस्तैलस्य तिलकृत उपकार । तिलविनाशे हि तैल विकीर्ण नश्येत् । पर्यङ्के शेत इति शयितुर्गुरुत्वप्रतिबन्धे स्वतन्त्रः कर्त्ता आधार. । अन्यथा गुरुत्वात्पन्नो भवेत् । खे शकुन्तादय इत्यादौ खेन शकुन्ताद्दे(वैनावारदिशा) ? सम्बन्धस्याप्यवर्त्तनमित्ययमेव तस्याधेयोपयोग. । आदिशब्दाच्छकटादिनाधारेण देशविशेषसमाप्ति. । गुरुणा शिष्याणा सस्कारातिशयः पर्यङ्कादिना चैकस्थित्यमित्येवमादय उपकारा प्रतिपाद्यन्ते । प्राच्यामादित्य उदेति प्रतीच्यामस्तमेति दक्षिणस्यामगस्त्य उत्तरस्यां ध्रुव इति दिग्विशेषसम्बन्धप्रतिपादनमात्रापयोगमेतदधिकरणम् ॥ ३ ॥

मूर्त्तानां सर्वेषामन्याधीनायां स्थितौ मूर्त्तस्याधारस्याप्यपरमधिकरणमिति पर्यन्तवर्ति मुख्यमधिकरण किमित्याह ॥

आकाशमिव केषां चिद्देशभेदप्रकल्पनात् ।
आधारशक्तिः प्रथमा सर्वसंयोगिनां मता ॥ ४ ॥

ग्रहनक्षत्रविमानादीनां तावदाकाशमेवाधिकरणं प्रसिद्धमेव मन्यत्रापि पृथिव्येकदेशो रथादीनामधिकरणं तेषामपि तस्य पृथिव्येकदेशस्याकाशाधारत्वात्पारंपर्येणाकाशमेवाधार इति सर्वग्रहेणाह । समवायिनां तु स्वावयवे आधार इति मुख्याधारशक्तिराकाशाश्रया । भावानां चैकदेशतया संकरः सयोगिभिरपरिमितदेशमुख्यभागकल्पने भिन्नतयाकाशदेशभावं प्रतिपद्यते यतस्तदुक्तं देशभेदप्रकल्पनादिति । संयोगिनां देशतया व्यवह्रियमाणस्याकाशभेदस्य तैरेव सयोगिभिरव्यापकैः पारेकल्पनादाकाश सर्वेषामसङ्करेणाधिकरणमित्यर्थः । केषां चित्, ये ह्याकाशमभ्युपयन्ति संभर्गवादिनां तेषां मते इत्यर्थः । नन्वेतन्न्यात् किमिदमनभ्यक्षमाण आकाशे नामशब्देन गुणेन गुणयोगो ऽनुमीयत इति चेदाकाशगुणत्वस्यैवासिद्धेः । शब्दस्थानमप्येतत् न स्पर्शवद्भिरेषगुणा शब्दः । अयावद्द्रव्यभावित्वादाश्रयादन्यत्रोपलम्भादित्यादिहेतूपन्यासो वार्थं न्यायरूपादीनामपि ॥ ४ ॥ (सत्यप्याश्रये निमित्तान्तरप्रवृत्तिदर्शनादाकाशस्य च द्रव्यत्वासिद्धौ शब्दाश्रयत्वस्य विवादास्पदत्वादयावद्द्रव्यभावित्वे शब्दे असिद्धं कर्णशष्कुल्यवच्छिन्नाकाशदेश एवोपपन्नाश्रयत्वादन्यत्रोपलभ्यमानत्वाभित्पद्गुसमानेन्द्रियग्राह्यलाक्षणिकानेकविशेषगुणयोगित्वमपि स्पर्शवत्त्वाभावस्वकृता तन्नियमित्याशङ्क्याकाशसद्भावे लोक प्रसिद्ध लिङ्गमाह ॥)?

इदमत्रेति भावानामभावान्न प्रकल्पते ।
व्यपदेशस्तमाकाशनिमित्तं संप्रचक्षते ॥ ५ ॥

इहाधारशक्तिरेवान्यथानुपपत्तेराकाशसद्भावं गमयति । तथा हि शब्दप्रमाणकानां शब्दार्थो ऽर्थ ।अस्ति चाय शब्द इद नक्षत्रमभ्रनिघ्नतीति । (अत्रेति य निर्दिष्टतस्मिंच न वस्तु भवत्पृथिव्यादरन्यत्वादाकाशमवलंबता तथावस्त्वेतत् सर्वसामर्थ्यविरहलक्षणादवस्तु न सर्वविधव्यपदेशाभावान्निरूप्य हि व्यपदेशो निरू-

पणवस्तुनि वह्न्यवहानिरूपितस्यैव वस्तुत्वादत एव शब्दोरभावे सुखमित्यादौ निरूप्यमाणस्याभावस्याप्याधारभाव इत्यस्ति लोकप्रसिद्धव्यवहारनिमित्तमाकाशमाधारापन्नमत्र) ? । परमार्थविचारे प्रपञ्चरूपमसद्व्ययस्यैव सत्त्वादित्यविचारितरमणीयलौकिकपदार्थाश्रयलक्षणप्रवृत्तिरेव विरुद्धेत्याशय. ॥ ५ ॥

आकाशस्य सर्वभावाधारत्वं यदुक्त तत्सिद्धस्वभावविषयं, साध्यस्वभावविषयं तु कालस्याधारत्वमित्याह ।

कालात्क्रिया विभज्यन्ते आकाशात्सर्वमूर्त्तयः ।
एतावांश्चैव भेदाऽयमभेदोपनिबन्धनः ॥ ६ ॥

प्रतिबन्धाभ्यनुज्ञाभ्यां ते न विभज्यन्त इति वक्ष्यमाणनयेन ज्ञानास्तिविरोधप्रविभागेन आरादप्युपकुर्वन्काल क्रियास्वाधारभावोपगमनेन प्रविभागमवस्थापयति । आकाशत्वं सर्वगतद्रव्यपरिमाण पदार्थे सयोगादि तु प्रविभागमसङ्कीर्णाधारभाव(मुपपमियतदेशे तया तपदार्थव्यक्तिर्विभज्यते)? मूर्तिक्रियाविवर्त्तरूपश्चेद् विश्व भेदावभासबहुलं (लक्षतेत्यवहारे) ? (यथायथमाद्यायां दशायामभिनमतीत्येदपश्चणकालाकाशाख्याभेदनिमित्तकालाकाशयोरभेद उपनिबन्धनं निमित्तमस्य मुक्तियाविधस्तस्येत्यर्थव्यक्ति' । दशायामभिनमतीर्थोदये क्षयाकालकाशाख्याभेदनिमित्त । तस्याधिनषक्ती यथा क्रियेते इत्युपपादितं प्रथमकाण्डे ।) ? उपान्वध्याङ्वस इत्युपादिपूर्वस्य वसतेराधारः कर्मसह. । तत्र वार्त्तिककार आह । वसतेरश्यर्थस्य प्रतिषेध इति ग्राममुपवसतीति यथा स्थितिर्गतिनिवृत्तिविशिष्टमवस्थानमाह । एवं भोजननिवृत्तिविशिष्टवाग्रमुपवसिरिति वार्त्तिककारो मन्यते । तथा च । वसेस्तु तिष्ठति वस्तु (ग्रामेजास्ति सवधि) ? इति प्राप्ता कर्मसज्ञा निवर्त्तयते विचक्षणै ।(अनेन वार्त्तिकेना अवेस्यवमग्रामो श्रिकरणां किं तर्ह्यप तु पूर्वस्य ग्रामे सौ वासंस्त्रिरात्रमुपव सतीति तत्रायमाशयो भाष्यकारस्य)? इह कालविशेषो ऽतरङ्ग प्रकृ-

तमेव कर्म । प्रभुञ्जानस्य चावस्था न निश्चयेनोपपद्यते इत्याधारोऽपेक्षितो नियतः । तत्रोपपूर्वस्य वसेर्न ग्रामस्याधिकरणत्वाभावात् कर्मसञ्ज्ञा ॥ ६ ॥

नन्वेवमपि यदाकाशदेशोऽपि नियतोऽपेक्षितः, तीर्थे उपवसन्तीत्यादौ तदास्त्येवोपवसेर्देश इति न कुतः कर्मसञ्ज्ञेत्याशङ्क्य भाष्यं समर्थयितुमाह ॥

यद्यप्युपवासिर्देशविशेषमनुरुध्यते ।
शब्दप्रवृत्तिधर्मात्तु कालमेवावलम्बते ॥ ७ ॥

तीर्थादिदेशविशेषमवलम्ब्य भोजननिवृत्तावभिसंहितायां देशविशेषेण सम्बन्धं यद्यप्युपपूर्वस्य वसेरस्ति तथापि नासौ शब्दसामर्थ्येऽपि निपतितो देशसम्बन्धः । भोजननिवृत्तिमात्रं ह्युपवासार्थः । स चानियतकालोनोपपद्यत इति कालविशेषान्तरयोगं(भीयुतः)ह्यः । शब्द एव शब्दस्य वृत्तिरभिधानव्यापार शब्दस्य धर्मस्वभावः शब्दशक्तिरिति यावत् । देशस्तु देवदत्तमत्तायां निराधारायां अनुपपत्तेरपि साहित्योऽपि तीर्थादिभि शब्दार्थे नान्तर्भवति, भोजननिवृत्त्या देशस्य सम्बन्धाभावात् । तत्र त्वङ्गभूतो यो वासः तेनैव देशस्याभिसम्बन्धः । यथा (वाग्भूतवसति)ह्यक्रियाद्वारेणोपवासेऽधिकरणतां देश प्रतिपद्यते साक्षात्कालनैव तथास्या योगः । भोजननिवृत्तेर्नियतकालत्वाकालव्यवधाने भोजनरूपत्वात्तस्यास्तदन्तेवास्मो नियतदेश इति तद्द्वारेणात्र देशोऽधिकरणम्ह्यत एव भाष्ये ग्रामे यस्त्रिरात्रमुपवसतीति उपवासाङ्गस्य वासरेण ग्रामस्य सम्बन्धो दर्शितो न रूपत्वात्तस्यैव साक्षात्सा चात्र वसतिक्रियाङ्गभूतत्वादाक्षिप्तेवेति तद्द्वारेणेष्यते क्रियाकारकसम्बन्धः । वसत्यादेर्भोजननिवृत्तिर्नियतकाला उपवसेरर्थः । अतश्च ग्राम उपवसतीति उक्ते गम्यते वसति क्रियापेक्षया देशस्याधिकरणता ॥ ७ ॥

प्रधानभूतभोजननिवृत्त्यपेक्षया च कालस्याप्रयुज्यमानस्यापि कर्मता प्रतीयत इत्याह ॥

वसतौ च प्रयुक्तेऽपि देशो ऽधिकरणं ततः ।
अप्रयुक्तं त्रिरात्रादि कर्मोपवसतौ स्मृतम् ॥ ८ ॥

भाष्य इति शेषः ।श्रूयमाणोपवासक्रिया सा चानङ्गत्वाद् ग्रामादिसा-

मर्थप्राप्तार्थां प्रयुज्यमानायामपि वसतिक्रियायामधिकरणं साधनं श्रूयमाणमन्वययोग्यां क्रियामाक्षिपति । प्रविश पिण्डीमिति भक्षिक्रियाकर्म । अत्र च विशेषप्रतिपत्तिनिबन्धनाभावादव्यभिचरितसम्बन्धसामान्यरूपेण सत्ता प्रतीयते । यस्य चेष्टा अधिकरणसत्ता ग्रामे ऽसौ वसतीति वासं प्रत्यधिकरणं ग्रामादिदेशो ऽवतिष्ठते । श्रूयमाणाया उपवसतीति क्रियायाः काल एवान्तरङ्गो ऽधिकरणमित्यप्रयुज्यमानमप्येतद्योगाद्दाक्षिप्यते प्रवेशनक्रिययेव गृहं । तत्र च सा उपवसत्याधार(कृतायो)? कर्मसंज्ञाअङ्गभूतवसतिक्रियाद्वारा यात्वा आचारग्रामादिदेशलक्षणां (नावमाह)?। प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययात् कारकाधिकारे च कारकात्साक्षात्कारकाणां(प्रवर्त्तो)? नाद्रियते । ननु क्रियासम्बन्धनिमित्तान्तरङ्गबहिरङ्गभावो न देशे ऽन्यथा स्वव्यापारे स्वातन्त्र्यात्कर्मणःकर्तृसंज्ञा स्यात् । कर्मसंज्ञा सन्दर्शनादिभिरीप्सिततमायां क्रियायां सावकाशा यदावा विशेषस्य उपादिशब्देन द्योतनादास्त एव विशिष्ट उपवसत्यर्थ, तदा कर्मसंज्ञा देशे ऽपि चरितार्था ग्राममुपवसतीति अधितिष्ठतीत्यर्थः । अतश्च भोजननिवृत्त्यर्थतायामुपवसतेःसाक्षात्काल आधारः, कर्मसंज्ञादेस्त्वभिसंहितो ऽसौ वासद्वारेणैवाधारो न साक्षादिति स्थितम् । यस्तु निवृत्तिरूपत्वादुपवसेराधारे सम्बन्ध इति व्याचष्टे तस्य कालेनाधारेण सम्बन्धोऽत्रस्यात् । अस्ति च निवृत्तिवचनस्यापि उपवसेराधारेण सम्बन्धः । सर्वव्यापारोपरमलक्षणश्च वासः । ग्रामे तिष्ठति ग्रामक्रिया सहभेदावभासकद्वय आस्त इति नियतकालभोजननिवृत्तेश्च क्रियात्वमुपवर्त्तन्त्याः क्रियात्वमविरुद्धमेव । कारकाणां हि प्रवृत्तिविशेषः फलानुमेयः । क्रियासत्ता च नियतकालभोजननिवृत्तिरूपस्फुटवचनापि सकलपविशेष एव । स चात्र व्यापारो निवृत्तिः सन्दर्शनादीनां प्रधानक्रियया सह भेदाभावाद् युद्धाय संनह्यते इत्यादावेव भेदविवक्षेत्युक्तम् । तथा चात्र सङ्कल्पपूर्वककर्तृव्यापारो नियतकालव्यवधिमाह, भोजनादिरूपोपादानादिति नान्तरीयककालाख्याधारसम्बन्ध एव कर्मसंज्ञाविधिरिति सिद्धम् ॥ ८ ॥

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे
साधनसमुद्देशे ऽधिकरणाधिकारः ॥

इदानीं षष्ठ्यर्थः कारकभेदो विधार्यते सच्च शेषलक्षणः सम्बन्धः । तस्य कथं कारकभेदत्व कथं च शेषत्वमित्यतदुपपादयितुमाह ।

सम्बन्धः कारकेभ्यो ऽन्यः क्रियाकारकपूर्वकः ।
श्रुतायामश्रुतायां वा क्रियायां सो ऽभिधीयते ॥ १ ॥

कारकेभ्यो ऽन्य कर्मादिविशेषलक्षणेभ्यः षड्भ्यो ऽन्यो ऽयं सम्बन्धः स शेष इत्युपयुक्तैर्भिन्नवचनशेषशब्दाश्रयेण कारकाणामविवक्षा शेष इति भाष्यं व्याख्यातम् । क्रियाकारकपूर्व इत्यनेन कारकत्व व्याचष्टे शेषस्य। तथा हि राज्ञः पुरुषो वृक्षस्य शाखा पशो. पाद. पितुः पुत्र इत्यादावश्रूयमाणक्रियाविषय सम्बन्धिभावावयवावयविभावजन्यजनकभावरूपौ सम्बन्ध (इदं ददाति च्छिनत्तीत्यादि क्रियाप्रविभोत)? पूर्वभावि कारकत्वं उत्तरावस्थायामप्यनुगतमिति भवत्येव शेष. । कारके राजादिपुरुषाय ददाति । अत्र राज्ञ पुरुष इति स्वस्वामिभावो ऽवतिष्ठते । तत्र क्रियाकारकसम्बन्ध. कारणभूत. । शेषसम्बन्धस्तु फलभूत. । क्रियाकारकसम्बन्धो हि वृक्ष. स्वाश्रयेण शेषसम्बन्धफलं निर्वर्तयोपरमते । तत्र पूर्वं कर्तृसम्प्रदानरूपौ राजपुरुषावभूतां, शेषसम्बन्धकाले कर्त्रादिविशेषरूपतानवगम इति तच्छेषभूतं समान्यकारकत्वमवतिष्ठत्येव । करणादिसाधनभेदोपाख्यानिमित्ताभावात् कारकेभ्यो ऽनु कारकाणां अविवक्षा शेषः । कारकपूर्व इत्यत्र च कारकत्वैकार्थसमवायिनः करणादय. साधनभेदा कारकशब्देनोच्यन्ते । न तु कारकसामान्यमपि । द्रव्याणा हि सिद्धस्वभावानामर्थ शब्दाकारूपानां परस्परसम्बन्धाभावात् क्रियाकर्तृक स. । क्रिया हि नि.अपणीव द्रव्याण्युपश्लेषयतीतथा च भाष्यम् । प्रातिपदिकार्थानां क्रियाकृत विशेषा उद्भवन्ति, कर्म, करणमित्यादि । तत्र कर्मादिरूपव्यतिरेकेणान्यविशेषस्य दृष्ट: शेषाख्य सम्बन्ध कर्मादिरूपो ऽवतिष्ठमानो ऽनुभूतकर्मादिविशेषे स्वाधारे षष्ठ्युपनिपतन्नपि विवक्षितकर्मादिभेदरूपमात्मानमुपदर्शयति । ततश्च राजपुरुषयोर्वर्त्तमानत्वसम्बन्धानत्वे एकफलावस्थायामनुद्रिक्तस्वस्वरूपसामान्यरूपे सम्बन्ध इति व्यपदेशमर्हत: । तथा चानुल्लिङ्गितविशेषरूपा सप्तमीव कारकयो

नि· परिगण्यते शब्दार्थसम्प्रत्ययभेदात् । अन्यो हि सम्प्रत्ययो राजा पुरुषाय ददातीति । न ह्यस्मान्नियमेन स्वस्वामिभावनिमित्तं दाने प्रतीयते । करणादिनापि निमित्तेन दानसंभवात् । अन्यस्तु राज्ञः पुरुष इति स्वस्वामिभावावयवमान्नूनम् । अतश्च प्रतीतिभेदान्नान्यत्वे सिद्धे कर्मादिविशेषेणैव शेषाख्येनाप्यनेनैव प्रातिपदिकार्थोऽभिधीयमानो ऽभिधीयते । तदयं श्रूयमाणक्रियाविषय सम्बन्धः स्वस्वामिभावादिनिमित्तानां दानादिक्रियाणामश्नुते । सम्बन्धलक्षणं कार्यान्यथानुपपत्त्याऽनुमीयमाना स्वादानादिक्रिया संनिहिता एवेति सर्वमुपपद्यते । ग्रामस्य समीपादागच्छति वृक्षस्य पर्ण पततीत्यादौ आगमनादिक्रियां प्रति तु ग्रामादेरप्यस्त्येव समीपभावादौ सम्बन्धे क्रियाकारकपूर्वत्वम् । समीपस्य हि ग्राम आश्रय । एवं पर्णस्य वृक्ष इत्ययमेव सर्वत्र न्याय· । आगमनादिक्रियां प्रति तु ग्रामादेरकारकत्वमुच्यते। श्रूयमाणक्रियाविषयस्तु सम्बन्ध कारकभेद एवाविक्षितकर्मादिविशेष सम्बन्धसामान्यस्वभावः क्रियाकारकसम्बन्ध एव स इति नैतत्पूर्वक । तद्यथा नटस्य शृणोतीत्यादि। करणादिसंज्ञानामत्र निमित्ताभावादप्रवृत्ते·। दुह्यादिपरिगणनादकथितकर्मत्वाभावात्। कारकेऽर्थोऽन्योऽयं शेष कारकपदं। तथा चोपयोगग्रहणमर्थवदित्युक्तं । एवं मातु स्मरति न माषाणामश्नीयात् सर्पिषो जानीत इत्यादौ कर्मादिकारकभेद एवाविवक्षितरूप शेष इत्युक्तः । अत्र च शेषषष्ठीप्रसङ्गे प्रतिषेध कार्य इत्यर्थविभक्तिरुक्ता । सम्बन्धस्य द्विष्ठत्वाच्च द्वाभ्यामपि सम्बन्धिभ्यां षष्ठीप्रसङ्गे इति चोदित, षष्ठी-शेष इति चेत् विशेष्ये प्रतिषेध इति । राज्ञः पुरुष इति पुरुषशब्दादपि षष्ठीप्रसङ्गे प्रतिषेध· कार्य इत्यर्थ । सम्बन्धस्य चोद्भूतत्वात् विशेष्ये प्रथमान प्राप्नोतीति सा विधेयेत्युक्त, तत्प्रथमाविधिरिति। अत्रोभयत्रापि परिहारायोक्त पूर्वेणेत्यभिहितम्।प्रातिपदिकार्थसूत्र पदसामानाधिकरण्य उपसंख्यानमधिकत्वादिति चोदिते, नवा वाक्यार्थत्वादिति उक्तम्।तदेवात्रातिदेशायानूदितम्।राज्ञ इत्येतत्सम्बन्धसमन्वयवशेन पुरुषस्य सम्बन्धित्व अवगम्यत इति वाक्यार्थो ऽत्र सम्बन्धोऽन्तरङ्गे पदार्थभावाश्रये संस्कारे निमित्त भवति न बहिरङ्ग इति धीरः पुरुषो नीलमुत्पलमित्यादिवत् अत्र षष्ठ्यभा-

व' प्रधानसिद्ध इत्यर्थः । यद्येवं राजशब्दादपि वीरादिशब्दादिवानेन न्यायेन षष्ठी न स्यात् । नैतदस्ति विशेष्यगतस्यैवाधिक्यस्य वाक्यार्थत्वात् । तद्धि प्रधानं प्रथममजहत्स्वरूपमेव उपकार्यतामाक्षिपति गुणे समापद्यत इति तस्यैवाधिक्यं वाक्यार्थः. कथ्यते।गुणस्य तु प्रधानोपकाराय प्रवर्त्तमानस्य स्वात्मप्रतिष्ठस्योपकारकत्वासम्भवादुपक्रम एव प्रधानोपयोगक्षमं सम्बन्धिसामान्यापेक्षया रूपान्तरं विपरिवर्त्तते । तदुक्तं अर्थरूपमेवैतज्ज्ञातीयकामिति । तथा च गुणाच्छेषे षष्ठी न्याय्या।समानाधिकरण तु विशेषणं नीलादि प्रधानेनोत्पलादिना सहैकात्म्यमिवापाद्यमानं न व्यतिरेकं भजत इति न तत्र षष्ठी भवति ॥ १ ॥

एतद्वस्तु सतत्त्वं प्रतिपादयति ।

द्विष्ठो ऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते ।
तत्राभिधीयमानश्च प्रधाने ऽप्युपयुज्यते ॥ २ ॥

द्विष्ठः एक सम्बन्धः तत्र एकैव षष्ठी न्याय्या । षष्ठीद्वये सम्बन्धिद्वयं प्रतीयते । तथाचैका षष्ठी भवन्ती गुणादेव भवति न प्रधानात् । यस्मादसौ सम्बन्धो द्वयोरपि सम्बन्धिनोः स्थितः तयोर्गुणप्रधानभावेनैकवाक्यत्वात्, प्रधानानुरोधित्वाद् गुणानामेव रूपपरिवर्त्तनस्यौचित्यात् । तत्रैव फलतीति गुणादेव सम्बन्धकार्या षष्ठी न्याय्या । तथाच गुणेषु व्यतिरिक्तमाधिक्यं दर्शयति। सम्बन्धस्वरूपं प्रधान तु स्वरूपादप्रच्यवमानमेव सम्बन्धमनुभवति । इदं हि तस्य प्राधान्यं भवति । यदि गुणानुरोधेन रूपपरिवर्त्तन नासादयति गुणाश्रयतया च सम्बन्धस्याभिधाने षष्ठ्या. प्रधानगतमपि रूपमुपभुक्त स्पष्टमेवाभिहितमेवेत्यर्थ. । एतत्तदुच्यते प्रधानगतस्याधिक्यस्य वाक्यार्थत्वं गुणसम्बन्धेन प्रतीयते । परस्परसाकाङ्क्षस्य वाक्यत्वाद्राज्ञ इति हि स्वामित्वमवगम्यमानमन्यथानुपपत्त्यैव गमितत्वात्प्रातिपदिकार्थमेवाधिक्यं सा । ननु प्रवेशात् मत्या पुरुषे ऽपि स्वत्वलक्षणमतिरेकमावेदयते । तथा च पुरुषादन्तरङ्गात् प्रथमैव भवतीति बहिरङ्गस्य सम्बन्धस्य पदान्तरसमन्वयान्यथानुपपत्त्यैव गमितत्वात् प्रातिपदिकार्थं एवाधिक्य सा न तु प्रवेशात् । यदा तु विशेषणविशेष्यभावे कामचारात्पुरुषस्य राजे-

त्युच्यते तदा गुणात्पुरुषादेव षष्ठीति न व्यभिचरति लक्षणम् ॥ २ ॥

उक्तमिद् क्रियाकारकपूर्वकः सम्बन्ध इति, तत्र क्रियाकारकसम्बन्धोऽस्य निमित्तं। स च फलभूतात्सम्बन्धादनुमीयमानो न विशेषेणानुमातुं पार्यते, अपि तु सामान्येन एवस्वभावत्वादनुमानस्येति कुतो ऽय विशेषावसाय इत्याह ॥

निमित्तनियमः शब्दात् सम्बन्धस्य न गृह्यते।
कर्मप्रवचनीयैस्तु स विशेषे ऽनुरुध्यते ॥ ३ ॥

पितुः पुत्रः, पशोः पदं, इत्यादौ सम्बन्धिस्वरूपविशेषावधारणादेव नियतस्थितिजननादिक्रियाभावान्वितत्वं सम्बन्धस्य प्रतीयते। राज्ञः पुरुष इत्यादौ तु (अन्वादिभि मपापहारप्रभृतिभिरपि)? स्वस्वामिभावस्य सम्भवाद्यदपि नियतनिमित्तत्व नावधार्यते, तथापि दानादीनामन्यतमाविनाभावात् क्रियानुमितस्वसम्बन्धिस्वरूपादिति नायं कर्मप्रवचनीयविषय। क चित्तु शब्दसामर्थ्यादियमिमित्तविशेषो नावधार्यते। निमित्तसामान्यावधारण तु सोऽयमेवंविधो विषय. कर्मप्रवचनीयानां तैरन्वादिभिर्निवृत्तनियमएव च क्रियते सम्बन्धः। तथा हि शाकल्यस्य संहितामनु प्रावर्षदित्यत्र संहिताप्रवेषणयो. हेतुहेतुमद्भावो निशामयतिक्रियाजनित इति अनुना वेद्यते। तथा क्रिययान्यत्रानुनिशम्येत्यादौ साहचर्योपलब्धेः कर्म प्रोक्तवन्त इति कर्मप्रवचनीयेष्वतिक्रान्तक्रियाप्रकाशनां (प्रीयकारान्)? सम्प्रति क्रियामयं नह्येव भवति। नापि तद्वाचकक्रियापदस्याश्रुतिस्तेऽर्थो ऽभिधायकत्वाभावात् नियमद्योतकत्वाभावात्। स्वरूपेण तु सम्बन्धो विभक्त्यैव प्रतिपाद्यत इति नापि तद्वाचकक्रियापदाक्षेपे ऽनुशब्दस्य सामर्थ्यं कारकविभक्त्यभावादिति सम्बन्धविशेषावद्योतकत्वख्यापित कर्मप्रवचनीयानान्तवुक्तमनन्तरकाण्डे। क्रियाद्योतको न सम्बन्धस्य वाचकः। नापि क्रिया पराक्षेपात् सम्बन्धस्य तु भेद इति। एवमपि ब्रह्मदत्ते पञ्चाला इति परिपालनादिक्रियाया निमित्तत्वं स्वस्वामिभावस्या ऽधिना वेद्यते। अभित. पुरजनेभ्यः प्रतीति परपराजयनादिक्रियावृत्तेरनुकार्यानुकरणभावो जनाभिघ्रः सम्बन्धइति प्रतिना प्रकाश्यते। एवमन्यत्रापि यथायोगमनुगन्तव्यम्। तदयमश्रुतक्रियाविषयसम्बन्धे कर्मप्रवचनीयानां महिमा,

क्रियाविषये तु श्रूयमाणैव क्रिया नियतनिमित्तमवधार्यत इति ॥ ३ ॥

नन्विदं विचार्यते। शेष इत्येव सिद्धायां षष्ठ्यां अधीगर्थेत्यादिना पुनर्विधान किमर्थं, कर्मणि शेषे इति च सामानाधिकरण्येन विशेषणानुपपत्ते:, कर्मत्वाविवक्षायां हि न शेष. कारकाणामविवक्षा शेष इत्युक्तफलभूत शेषविवक्षा अतिरोहितत्वात् कर्मत्वस्येत्याशङ्क्याह ।

साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः ।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ॥ ४ ॥

कर्मादीनि साधनानि शेषस्य व्यपदेशार्थान्यत्रोपादीयन्ते न तु स्वार्थशेषे षष्ठी । कस्मिन् शेषे, कर्मणि, करण इति वा भूतावस्थानागतकर्मत्वादिरूपाश्रयेण शेषस्य विशेषणात् कर्माद्यर्थसमवायिनि फलभूते शेष इत्यर्थो ऽवतिष्ठते तथा च विशेषणोपपत्तिः । षष्ठी तु, सिद्धापि प्रतिपदमधीगर्थेत्यादिना नियतविषया पुनः विधीयते, समासो यथा निवर्त्तेतेति पुनः प्रवृत्तिर्हि नियमार्था । तथा च षष्ठ्येव भवतीति वाक्यार्थ. । नियमे चान्यनिवृत्ति. प्रधानं अन्यथा प्रतियोगं व्यवच्छेद्य. । स चात्र षष्ठ्यभाव. स चासमासे भवतीति सामर्थ्यात् समासनिषेधो भवति षष्ठ्या. । तदुक्तं प्रतिपदविधाना च षष्ठी न समस्यत इति सूत्रव्यापार एवानेन वार्त्तिकेन च दर्शितो नापूर्वार्थ.।क्व पुनरयं समासप्रतिषेधो यत्र समासस्य प्राप्तिः। क्व च प्राप्तिः सुबन्तेषु मातुः स्मृतमिति ॥ ४ ॥

तथा च ।

निष्ठायां कर्मविषया षष्ठी च प्रतिषिध्यते ।
शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते ॥ ५ ॥

कृद्योगा च षष्ठी समस्यत इत्युक्तं । तथा च कर्तृकर्मणोः कृतीति या षष्ठी तत्र भवत्येव समासः । धर्मस्मरणं मनुस्मरणमित्यादौ न शेषषष्ठीनियम. । कर्तृकर्मणो कृतीति पुनः कर्तृकर्मग्रहणाच्छेषग्रहणनिवृत्तेरित्यपूर्वविधानमिदं। तेन षष्ठ्येवेति षष्ठी नियमद्वारेण समासप्रतिषेधमावेदयते । मातु स्मृतमित्यादौ तु निष्ठाप्रयोगे न लोकाव्ययेत्यादिना कर्तृकर्मणो. कृतीति षष्ठी निषिद्धेत्यधीगर्थवद-

येषां कर्मणीत्यनेन कर्मणि शेषत्वेन विवक्षिते षष्ठीति सामान्येन सिद्धायां पुनर्विधानात् समासप्रतिषेधार्थं विज्ञायते । ननु च क्तस्य च वर्तमाने, नपुंसके भाव उपसंख्यानमित्यनेनात्र षष्ठी ॥ नैतत् । शेषविज्ञानात् सिद्धमित्यस्य प्रत्याख्यानाच्छेषषष्ठ्येवेयं पुनर्विधानेन समासाभावं ज्ञापयति । एवमपि मातु स्मृतमिति प्रयोगानुपपत्तिः । स्मृतेः सकर्मकत्वात् कर्मणि निष्ठाप्रसङ्गान्मातृसामानाधिकरण्यान्माता स्मृतेति स्यात् । सम्बन्ध्यन्तरापेक्षायां तु मातु स्मृताया अपि इति प्रयोगो न्याय्यः । सत्यमेतत् । कर्मादिष्वकर्मबहुवचनमिति तूक्तम् । तथा चात्रकर्मवद्भावे प्रत्येये तेन कर्मणोऽनभिधानाच्छेषविवक्षया तत्र षष्ठी पुनर्विधानाभावात् समासप्रतिषेधाय सम्पद्यत इति स्थितमेतत् । एवं ज्ञोऽविदर्थस्य करण इत्यादौ प्रतिपदविधाने सर्पिषो ज्ञान, मधुनो ज्ञानमित्यादिः समासप्रतिषेध उदाहार्यः । ननु चात्र समासे कृते सम्बन्धमात्र प्रतीयते, न तु करणपूर्वकः सम्बन्ध इति प्रहवाक्यार्थाभिधाने सामर्थ्याभावात् समासो न भविष्यतीति किमनेन यत्नेन । स्ववाक्येऽपि नाशाब्दः सम्बन्धविशेषावसायः सादृश्यात्तथा हि कर्मषष्ठ्यामपीदृशमेव वाक्यम् । तत्र यथाप्रकरणादिना जानातेर्विदर्थस्य च सम्प्रत्यये कर्मषष्ठ्या अपि भवेत्समास सत्वज्ञानं, वर्णज्ञानमित्यादौ, तथा सर्पिषो ज्ञानमित्यत्रापि करणादेरविदर्थत्वसम्प्रत्यये करणषष्ठ्या अपि भवेत्समास इति शेषग्रहणानुवृत्त्या ऽत्रापि षष्ठ्या पुनर्विधानमाश्रित्य परिहरणीय इति स्थितम् । विभक्तिविधानस्य च स्वादिविधिनैकवाक्यत्वे ऽप्यवयववाक्यानां स्वव्यापारस्य निवृत्तेः प्रतिपदविधाने न का चिदनुपपत्तिः । द्वितीयसम्बन्धो गुणे व्यतिरिच्यत इत्युक्तम् । गुणप्रधानभावस्य चैकत्र विरोधात् भाष्ये उक्तम्, न हीदानीं भवति राज्ञः पुरुषस्येति तत्र प्रतिसमाधानमुक्तं भवति बाह्यमर्थमपेक्ष्येति ॥५॥

एतद्भाष्यं व्याचष्टे ।

अन्येन व्यपदिष्टस्य यत्रान्यत्रोपजायते ।
व्यतिरेकः स धर्मो द्वौ लभते विषयान्तरे ॥ ६ ॥

राज्ञः पुरुषस्य कम्बल इत्यादौ राज्ञो विशेषणेन व्यपदिष्टस्य विशेष्यत्वं तथापि तस्य प्रधानभूतस्य नात्र कम्बलादौ प्रतियोगिनि